# शब्दशास्त्रीयव्याख्यानतत्त्वदृष्टयाऽष्टाध्यायी-शारदाप्रभाव्याख्यायाः समीक्षणम्

नेपालसंस्कृतविश्वविद्यालयान्तर्गतेऽनुसन्धानकेन्द्रे

विद्यावारिधिः (Ph.D) इत्युपाधये प्रस्तुतो

नव्यव्याकरणविषयकः

शोध-प्रबन्धः


अनुसन्धाता

भवानीशङ्करभट्टराईः

पञ्जीकरणसङ्ख्या-१६७/२०६९


२०७५

# निर्देशकसम्मतिः

सुनसरीजनपदान्तर्गते धरानस्थे पिण्डेश्वरविद्यापीठे संस्कृतव्याकरणाध्यापनरतेन भवानीशङ्करभट्टराई इत्यभिधेयेनानुसन्धात्रा 'शब्दशास्त्रीयव्याख्यानतत्त्वदृष्ट्याऽष्टाध्यायी-शारदाप्रभाव्याख्यायाः समीक्षणम्' इति शीर्षके मदीयनिर्देशने विरचितोऽयं विद्यावारिधि-शोधप्रबन्धो नैपालकेन वैयाकरणेन हरिप्रसादशर्माचार्येण पाणिनीयाष्टाध्याय्यां रचितायां 'शारदाप्रभा'टीकायां केन्द्रितोऽस्ति । पाणिनीयसूत्राणामर्थापनतन्निर्दिष्टप्रक्रियासरलीकरणा-द्युद्देश्यैरद्यावधि काशिका-भाषावृत्ति-प्रक्रियाकौमुदी-सिद्धान्तकौमुदीप्रभृतिषु पञ्चाशदधिकेषु व्याख्यानग्रन्थेषु तेभ्योऽप्यधिकासु टीकासु विरचितास्वपि भाषिकजाटिल्येन प्रौढसरणेरङ्गीकारेण च ताः सर्वाः प्रौढतरा जटिलतराश्च सञ्जाता सन्ति । फलतो व्याकरणप्रविविक्षूणां कृते शब्दसाधुत्वबोधो दुरवगमोऽनुभूयमानो दृग्गोचरीभवति । एतादृशीं समस्यां समाधातुं विरचितायां शारदाप्रभाटीकायां मच्छात्रेण भवानीशङ्करशर्मणाऽत्रत्यव्याकरणशिक्षणपद्धतिः शैक्षणिकोपकरणप्रयोगरीतिर्देशभाषामिश्रिते संस्कृते पाणिनीयसूत्रव्याख्यानशैली सरलया भाषया सूत्रख्यापनविधयश्च शब्दशास्त्रीयव्याख्यानतत्त्वदृष्ट्या समीक्षिताः सन्ति । सारतो हरिप्रसादशर्मनिर्दिष्टा सूत्रव्याख्यानपद्धतिरत्र विस्तरशो विविक्ता नूतनसारश्च निष्पादितः । अनुसन्धातुर्विषयोत्थापन-विश्लेषण-निष्कर्षण-प्रबन्धसङ्घटनपद्धतिरपि सन्तुलिता व्यवस्थिता चास्ति, अतः स्वोपज्ञतया विरचितोऽयं शोधप्रबन्धो विद्यावारिध्युपाध्यर्थं ने.सं.वि. अनुसन्धानकेन्द्रमनुरुणद्धि-

दिनाङ्कः २०७५/०१/२९

प्रा.डा.माधवशरणोपाध्यायः
शोधनिर्देशकः

## विशेषज्ञसम्मतिः

नेपालसंस्कृतविश्वविद्यालयान्तर्गते पिण्डेश्वरविद्यापीठे नव्यव्याकरणविषयाध्यापनरतेनोपप्राध्यापकेन भवानीशङ्करभट्टराई इत्युपाह्वेनानुसन्धात्रा 'शब्दशास्त्रीयव्याख्यानतत्त्वदृष्ट्याऽष्टाध्यायीशारदाप्रभाव्याख्यायाः समीक्षणम्' इति शीर्षके विद्यावारिध्युपाधिलाभाय विरचितोऽयं शोधप्रबन्धो मया विलोकितः । नैपालकेन वैयाकरणेन श्रीमता हरिप्रसादशर्माचार्येण पाणिनीयाष्टाध्याय्यां रचितायां 'शारदाप्रभा'टीकायामाश्रितोऽयं प्रस्तुतप्रबन्धोऽत्रत्यान् विषयान् शब्दशास्त्रीयव्याख्यानतत्त्वदृष्ट्या व्याख्याय व्याख्यात्रा पाणिनीयव्याकरणशिक्षणाय निर्दिष्टां पद्धतिं 'भाषाव्याकरणे सहैव पाठनीये' इति तस्य चिन्तनं पाणिनीयव्याकरणसूत्रप्रक्रियाक्रमसङ्गमोद्देश्यं तादृशीभिः प्रक्रियाभिर्व्याकरणसरलीकरणलक्ष्यञ्च प्रकाशयति । विषयविवेचन आधुनिकपद्धतिमुपयुज्य विनिर्मितोऽयं शोधः प्राच्यान् विषयानाधुनिकेन शैलीशिल्पेन समीक्ष्य विवेचनपद्धतावप्याधुनिकरीतिसंवरणाय प्रयतमानो नवीननिष्कर्षनिष्पादने समर्थश्च दृश्यते । अतो विद्यावारिध्युपाधिलाभाय ने.सं.वि. अनुसन्धानकेन्द्रे संस्तौति-

दिनाङ्कः २०७५/०१/२९

प्रा.डा.विष्णुप्रसादशर्मा देवकोटा
शोधविशेषज्ञः

## विशेषज्ञ-सम्मतिः

भवानीशङ्करभट्टराईनामकेन मच्छात्रेण काशिकाकौमुद्यादीन् ग्रन्थान् पर्यालोच्य तैः सह तुलनां विधाय च महताऽऽयासेनानुसन्धानात्मिकया दृष्ट्या च प्रबन्धीकृतोऽयं 'शब्दशास्त्रीयव्याख्यानतत्त्वदृष्टयाऽष्टाध्यायीशारदाप्रभाव्याख्यायाः समीक्षणम्' इति नामकः प्रस्तुतशोधप्रबन्धो मया व्यलोकि । त्रिभुवनविश्वविद्यालयान्तर्गते तात्कालिके संस्कृतसङ्काये बहुकालं व्याकरणविषयकाध्यापकत्वेन स्थितेन श्रीमता हरिप्रसादशर्मणा तदानीं व्याकरणं पाठयताऽऽत्मसात्कृतया शैल्या विनिर्मिते प्रयोगात्मके 'अष्टाध्यायी शारदाप्रभाव्याख्या' नामके ग्रन्थे तत्रत्येषु विषयेषु च केन्द्रितोऽयं शोधप्रबन्धस्तथ्यपूर्णो मौलिकः संस्कृतव्याकरणशास्त्रीयव्याख्यानतत्त्वनिर्धारकस्तत्त्वसापेक्षैरत्रत्यविषयविश्लेषण- समीक्षणपर-श्चास्ति । अतः शोधोऽयं विद्यावारिध्युपाधये ने.सं.वि. अनुसन्धानकेन्द्रेऽग्रेसारयति-

दिनाङ्कः २०७५/...०१./.२८....

प्रा.नारायणदत्तशर्मा पौडेलः
शोधविशेषज्ञः

# कृतज्ञताज्ञापनम्

नैपालकेन प्रसिद्धवैयाकरणेन श्रीमता हरिप्रसादशर्माचार्येण पाणिनीयाष्टाध्याय्यां रचिता 'शारदाप्रभा'व्याख्या भाषाव्याकरणयोरेकीकरणेन शिक्षणायाभिप्रेरयति, सूत्रप्रक्रिया-क्रमसमन्वयेन शब्दसाधुत्वसम्पादनाय शिक्षयति, पाणिनीयव्याकरणशिक्षणे शैक्षणिकोपकरण-प्रयोगाय च दिशं निर्दिशति । एतादृशमाधुनिकशैलीशिल्पयुतं प्रयोगात्मकं व्याख्यानं प्रकृतानुसन्धात्रा 'शब्दशास्त्रीयव्याख्यानतत्त्वदृष्ट्याऽष्टाध्यायीशारदाप्रभाव्याख्यायाः समीक्षणम्' इति शीर्षकेण समीक्षितम् । एतस्मिन् क्रमे शब्दशास्त्रीयव्याख्यानतत्त्वानि निर्धार्य तानि प्रकृतव्याख्याने सङ्घटन्ते नवेति परीक्षितानि, व्याख्यान-समीक्षणादिभिरस्य वैशिष्ट्यानि प्रतिपाद्य काशिकाकौमुद्यादिभिः सह तोलनेन ग्रन्थमूल्यानि निर्धारितानि च, अतः प्रस्तुतानुसन्धानस्य महत्त्वं वरीवर्तते ।

प्रस्तुतशोधशीर्षकचयने, सामग्रीसङ्कलनेऽनुसन्धानप्रबन्धरचनायां प्रविधिसङ्घटने च मम निर्देशकैः श्रीमद्भिः प्रा.डा.माधवशरणोपाध्यायगुरुभिर्वात्सल्यपूर्णभावेनासीमः स्नेहः प्रदर्शितः । अतः पूज्यचरणेभ्यो मम निर्देशकगुरुभ्यः प्रथमतो हार्दीं कृतज्ञतामभिव्यनज्मि । तथैव भाषासम्पादने शोधप्रबन्धसङ्घटने वैषयिकमन्थने च मार्गदर्शकेभ्यः पूज्यगुरुभ्यः कृतविद्यावारिधिकेभ्यः प्राध्यापकेभ्यो विष्णुप्रसादशर्मभ्यो हार्दमाभारं विनिवेदयामि । एवमेव महत्त्वपूर्णं परामर्शं प्रदाय शोधप्रबन्धसङ्घटने विशेषेणोपकारकेभ्यो विशेषज्ञगुरुभ्यो नारायणदत्तशर्मभ्यो हृदयत आभारं प्रकटयामि । प्रकृताध्ययनमध्य एव दिवङ्गताः (२०७२ वैक्रमे फाल्गुनमासे) मम शोधनायकाः शारदाप्रभादीनां रचयितारः पूज्यगुरुचरणा हरिप्रसादशर्माचार्या अस्मिन् क्षणे विशेषेण स्मरणीयाः सन्ति, तादृशान् संस्कृतसेवकान् गुरूनद्य भूयोभूय संस्मृत्य तेषामखण्डसायुज्यप्राप्त्यर्थं सर्वशक्तिमन्तं भगवन्तं प्रार्थयामि । एवमेव शोधसामग्रीभिर्व्यावहारिकसहयोगैश्चोपकारकान् गुरोः परिवारसदस्यान् मनसा वाचा कर्मणा चाभारमर्पयामि ।

प्रकृतशोधरचनायां स्वीकृतिप्रदायको नेपालसंस्कृतविश्वविद्यालयस्तदन्तर्गतमनु-सन्धानकेन्द्रं नेपालसंस्कृतविश्वविद्यालयस्थाः शिक्षाध्यक्षपदभाजः पूज्यगुरुपादा रमेशढकालवर्या अनुसन्धानकेन्द्रे कार्यकारिनिर्देशकपदमलङ्कुर्वाणाः प्रा.डा. काशीनाथन्यौपानेमहाभागा अनु-सन्धानपरिषत्सदस्यास्तत्रत्याः कर्मचारिणश्चावश्यमेव धन्यवादार्हाः सन्ति, अतो वन्दनीयान् विद्वद्वरेण्यान् सर्वान् गुरुवर्गान् मनसा शब्दराशिभिश्चाभारं विनिवेदयामि । तथैव

पिण्डेश्वरविद्यापीठस्थपुस्तकालयतः, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्थपुस्तकालयतस्तथा-न्येभ्योऽपि नैकेभ्यः पुस्तकालयेभ्यो विशेषज्ञेभ्यो मित्रेभ्यः सहकर्मिभ्यः शुभचिन्तकेभ्यश्च सहयोगः प्राप्तः शैलीशिल्पविषयाश्च गृहीता अतस्तेभ्यः सर्वेभ्यो हार्दं साधुवादमर्पयामि । अन्त्ये प्रस्तुतशोधपत्रोट्टङ्कनकर्त्रे, उपप्राध्यापकाय टीकारामदाहालाय, प्राविधिकसहयोगप्रदायकाय सौगातपौडेलाय तथा कीर्तिपुरेऽवस्थिताय प्रकृतिटङ्कनकेन्द्राय च कृतज्ञतां व्यनज्मि ।

प्रस्तुतानुसन्धानस्य रचना मम पूज्यपितृचरणयोः, संस्कृताध्यापनप्रेरकयोष्टीकाराम-सूर्यवदनादेव्योः शतश आशीर्वादेन, सत्प्रेरणया वात्सल्यपूर्णेन सहयोगेन च सञ्जाता, अतोऽस्मिन् हर्षपूर्णे क्षणे प्रातःस्मरणीयौ तौ भूयो भूयः प्रणम्य मनसा वचोभिश्च साधुवादमर्पयामि । तथैव नैकासु व्यावहारिकीषु समस्यासु सतीष्वपि ताभ्य उन्मुक्तिं प्रदायाध्ययनलेखनादिषु सौविध्यप्रदायिन्यै सहधर्मिण्यै, अम्बिकादेव्यै हृदयतः स्नेहं प्रकटय्य विद्यावारिध्युपाधये वाक्परीक्षार्थं ने.सं.वि. अनुसन्धानकेन्द्रमनुरुणद्धि -

दिनाङ्कः २०७५/०१/२९

....................

भवानीशङ्करभट्टराईः

अनुसन्धाता

पञ्जीकरणसङ्ख्या- १६७/२०६९

# शोधसारांशः

## १. शोधपरिचयः

नेपालदेशेऽष्टाध्यायीव्याख्यानस्य सूत्रक्रमिकपरम्परा वैयाकरणधुरीणेन श्रीमता सुकृतिदत्तपन्तेन प्रारब्धा । सुकृतिदत्तस्य तामेव सरणिमनुसरन्नधुनातनीयो नैपालको वैयाकरणो हरिप्रसादशर्माचार्यः पाणिनीयाष्टाध्याय्या रूपसाधनप्रक्रियां सरलीकर्तुमष्टाध्यायीं व्याख्याय 'शारदाप्रभाव्याख्या- महिताष्टाध्यायी'नामकं व्याख्यानग्रन्थं २०५३ वैक्रमे विरचितवान्, महेन्द्रसंस्कृतविश्वविद्यालयः २०६० तमे वैक्रमे तं प्रकाशितवाँश्च । अत्र पाणिनीये व्याकरणे प्रवेष्टुकामानां जिज्ञासूनां कृते षड्मासाभ्यन्तरेऽध्ययनीया ५३६ सूत्रेषु सान्दर्भिकेषु वार्त्तिकपरिभाषाफक्किकादिषु च निबद्धा प्रक्रियाक्रमाधीना सरला सुबोध्या पदसाधुत्वसम्पादनपद्धतिस्तथा तस्मात् पारङ्गतानां कृते पाणिनीयाष्टकक्रमेण निर्धारिता, सकलसूत्रव्याख्याता द्वितीया सरणिर्व्यवस्थापितेति प्रकृते व्याख्यानग्रन्थ एव द्विविधा पद्धतिः प्राप्यते । अनया व्याख्यया सूत्रक्रमं प्रक्रियाक्रमञ्च सङ्गमय्य पाणिनीयव्याकरणस्याध्ययने नवीनपरम्पराद्वारं समुद्घाटितम् । तथैवाधुनिकशिक्षणोपकरणप्रयोग- निर्देशपाठाभ्यासादीँश्च सन्निविश्य शैलीशिल्पादिष्वपि नूत्नता प्रदत्ता । एतादृशं ग्रन्थरत्नं शब्दशास्त्रीय-व्याख्यानतत्त्वदृष्ट्या समीक्षणीयमित्यवधार्य प्रकृतशोधप्रबन्धः प्रकल्पितः ।

## २. शोधसमस्या उद्देश्यञ्च

नेपालदेशीयं प्रसिद्धवैयाकरणं हरिप्रसादशर्माचार्यमधिकृत्य तद्रचितां शारदाप्रभाव्याख्या-मभिलक्ष्य वा कोऽपि लेखः, कापि विवृतिः, समालोचनात्मकमध्ययनमनुसन्धानं वाऽद्यावधि केनापि न कृतम् । पाणिनीयव्याकरणस्य सरलीकरणाय समर्पितजीवनमिमं व्याख्यातारं तद्रचितां शारदाप्रभां तस्य महाकाव्यखण्डकाव्यादिकमधिकृत्य तद्योगदानमाधृत्य च साकल्येन पृथग् ग्रन्थमाश्रित्य वाऽनुसन्धानं सञ्जातं सञ्जायमानञ्च न दृग्गोचरीभवतीति सा प्रथमा समस्या । प्रकाश्यत्वेऽपि तिरोहितस्य व्याख्यातुर्हरिप्रसादशर्मणः परिचयसंस्तावस्तद्व्यक्तित्वस्य तद्योगदानस्य च चर्चाकरणं प्रस्तुतानुसन्धानस्य प्रथममुद्देश्यम् । तथैव शब्दशास्यीयव्याख्यानग्रन्थसमीक्षणायापेक्षितान्युपकरणानि कानि कानि भवितुमर्हन्तीति विषये पूर्ववर्त्तिभिः समालोचकैरनुसन्धातृभिर्वा न किमप्यभिहितम् । अतो व्याख्यानतत्त्वनिर्धारणेऽनवधारणायां जातायां शब्दशास्त्रीयप्रक्रियाग्रन्थव्याख्यानाय कीदृशानि व्याख्यानतत्त्वानि निर्धारयितुं शक्यन्त इति जिज्ञासाऽत्रत्या द्वितीया समस्या । एवमेव काशिकाकौमुदीकृद्भ्यां तयोष्टीकाकारैराधुनिकैः प्रक्रियाव्याख्यातृभिर्नेपालीसाहित्य-

समालोचकैश्च प्रयुक्तां व्याख्यानप्रक्रियामाश्रित्य शब्दशास्त्रीयव्याख्यानतत्त्वनिर्धारणं तत्सम्बद्धमुद्देश्यम् । आधुनिकीं शिक्षणपद्धतिमवलम्ब्य ग्रथितां शारदाप्रभाव्याख्यां कोऽप्यनुसन्धाता व्याख्याता समीक्षको वाद्यावधि न समीक्षितवानतोऽत्रस्थितां व्याकरणशिक्षणे महदुपकारिकां प्रक्रियां न कोऽपि ज्ञातवानिति सापि समस्यैव । तथैव व्याख्यातुराधुनिकीं सूत्रव्याख्यानपद्धतिं तस्यानुवृत्तिनिदर्शनकौशलञ्च न कोऽपि प्राप्तवानिति ग्रन्थप्रणयनेनापि समस्या यथावत् स्थिता दृश्यन्ते । अनेनैव प्रकारेण शारदाप्रभायाः सुबन्त-तिङन्त-कृदन्त-कारक-तद्धित-समासप्रकरणेषु व्याख्याता विषयाः परम्परामूला, व्याख्यान- मर्मानुरूपाः शब्दशास्त्रीयव्याख्यानप्रक्रियानुकूलाश्च सन्ति नवेति परीक्षणमप्यावश्यकम् । अत उपरि निर्दिष्टा जिज्ञासाः समस्यारूपेण तासां समाधानञ्चोद्देश्यत्वेनात्र प्रस्तुताः सन्ति ।

३. शोधविधिः

प्रकृतेऽध्ययने प्राथमिकस्रोतसा द्वितीयकस्रोतसा च सामग्र्यः सङ्कलिताः । व्याख्यातुर्हरिप्रसादशर्मण ऐतिह्यावदानयोः समुल्लेखनार्थं शोधनायकेभ्यस्तत्परिवारसदस्येभ्यः शुभचिन्तकेभ्यः सहकर्मिभ्यश्चावश्यकं वस्तुजातं गृहीतम्, एतस्मिन् क्रमे प्राथमिकस्रोतसा सामग्र्यो गृहीताः । शारदाप्रभाव्याख्याया विश्लेषण-समीक्षण-तुलनार्थन्तु द्वितीयकस्रोतसां पुस्तकालयीयानां सामग्रीणां प्रयोगो विहितः । एवंविधा गृहीताः सामग्रीर्जीवनीपरक-प्रभावपरक-वर्णन-व्याख्यान-समीक्षण-तुलनात्मिकाभिः पद्धतिभिः परीक्ष्य सत्यापयित्वा सामान्यीकरणेन च निष्कर्षो निष्पादितः । विशेषतः पाणिनीयसूत्राणां तत्प्रक्रियाणाञ्च व्याख्यानार्थं समीक्षणार्थञ्च पारम्परिकी निगमनपद्धतिः प्रयुक्ता । प्रस्तुतग्रन्थसमीक्षणे विशेषतः - अधिकारानुवृत्त्योर्निदर्शनम्, विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम्, शङ्कामुद्भाव्य समाधानम्, रूपसिद्धिप्रक्रियावबोधः, वार्त्तिकपरिभाषादिभिर्जाटिल्य स्फोरणम्, अन्याचार्यमतसङ्ग्रहः, प्रकरणसङ्घटनं शैलीशिल्पञ्चेति सप्तव्याख्यानतत्त्वान्याधारत्वेन प्रयुक्तानि ।

अत्र पादटिप्पणीप्रयोगे सन्दर्भग्रन्थसूचीनिर्माणे च लेखकपृष्ठपद्धतिः प्रयुक्ता वर्तते ।

४.अध्ययनक्षेत्रम्

प्रस्तुतानुसन्धानस्याधारः ‘शारदाप्रभा’व्याख्या वर्तते । सा संस्कृतव्याकरणप्रवक्तृणा महर्षिणा पाणिनिना विरचिताया ‘अष्टाध्याय्याः’ आधुनिकी व्याख्या । शारदाप्रभाव्याख्यानसम्बद्धस्य प्रस्तुतानुसन्धानस्य परमाधारस्तु पाणिनीयं व्याकरणम् । भगवता

पाणिनिना सूत्रक्रमेण विरचितमेतद् व्याकरणमुत्तरे काले कैश्चित् सूत्रक्रमेण कैश्चिच्च प्रक्रियाक्रमेण व्याख्यातम् । शारदाप्रभाकारेण हरिप्रसादशर्माचार्येण तु प्राथमिकानां छात्राणां कृते प्रक्रियाक्रमेण ततः पारङ्गतानां कृते तु सूत्रक्रमेणैकस्मिन्नेव ग्रन्थे क्रमद्वयं निर्धार्य विविक्तम् । अतः प्रकृते व्याख्याने स्थितयोर्द्विविधयोः सरण्योः समीक्षणतोलनमूल्याङ्कनं प्रकृतानुसन्धानस्याध्ययनक्षेत्रम् ।

५.अध्यायसारांशः

प्रस्तुतशोधप्रबन्धः सप्ताध्यायात्मको वर्तते । तेषु प्रथमोऽध्यायः शोधपरिचयात्मकोऽस्ति । तदुत्तरवर्त्ती द्वितीयोऽध्यायो व्याख्यातुर्हरिप्रसादस्य व्यक्तित्वकृतित्वयोः परिचयप्रदाने केन्द्रितो वर्तते । सिद्धान्ताध्यायत्वेन स्थितस्तृतीयोऽध्यायो व्याख्यानसिद्धान्तपर्यालोचने तस्मात् शब्दशास्त्रीय-व्याख्यानतत्त्वनिर्धारणे चाधृतो विद्यते । तस्मादुत्तरवर्त्तिनश्चतुर्थ-पञ्चम-षष्ठाध्यायाः शारदाप्रभा- व्याख्यान्तर्गतानां संज्ञासन्धिसुबन्ततिङन्तकृदन्तकारकतद्धितसमासप्रकरणस्थानां विषयाणां समुद्भावन-समीक्षणतोलनादिषु समर्पिताः सन्ति । अन्तिमः सप्तमोऽध्याय उपसंहारात्मको वर्तते ।

६.शोधनिष्कर्षः

स्वविरचितसूत्राणां लघूनोपायेनार्थापनाय, व्याख्यानाय, तेषां पौर्वापर्य्यसम्बन्धस्थापनाय च भगवता पाणिनिनाऽधिकारानुवृत्तिरूपे द्वे युक्ती प्रयुक्ते । ते च युक्ती कथं प्रयोज्य इति विषये प्राचीनैराधुनिकैरपि व्याख्यातृभिः स्वशक्तिसामर्थ्यानुसारेण दिङ्निर्देशः कृतः । तादृशनिर्देशेषु हरिप्रसादशर्मणः सङ्केतः स्पष्टतरः पूर्वाचार्यकृतसङ्केतापेक्षया सुबोध्यतरश्च प्रतिभातीति प्रकृतानुसन्धानस्य प्रथमनिष्कर्षः । तथैव कठिनसूत्रस्वरूपेण, वृत्तिरटनजाटिल्येन, रूपसाधने व्याख्यातृभिः कृतेन प्रपञ्चेन च जटिलीभूतं पाणिनीयं व्याकरणं कठिनमित्युक्त्वा पलायनपराञ्छात्रानाकर्षयितुमेतद् व्याख्यानं रचितमतोऽत्र विग्रहसमासप्रदर्शनशङ्कासमाधाना-न्याचार्यमतसमुद्धरणानि सामान्यत एव कृतानीति प्रकाशनं प्रकृतानुसन्धानस्य द्वितीयनिष्कर्षः । तेनैव प्रकारेण शारदाप्रभाव्याख्यानेन दर्शिता रूपसाधनप्रक्रिया पूर्वव्याख्यानापेक्षया सरलतरा, प्राथमिकछात्रबोध्या, वाक्यप्रयोगसमन्विता, प्रकृतिप्रत्ययविच्छेदकेन्द्रिता च वर्तते । व्याख्यातायं सर्वादिगणपठितानामन्येषामपि त्रिषु लिङ्गेषु प्रचलितानां सुबन्तप्रातिपदिकानां रूपाण्येकत्रैव साधयित्वा सारल्येन पदसाधुत्वसम्पादनाय समुत्प्रेरयति । नेपालसंस्कृतविश्वविद्यालयस्थे व्याकरणविषयके पाठ्यक्रमेऽपि एतादृश्याः शिक्षणपद्धत्याः प्रयोगे कृते सति शिथिलीभूता

पाणिनीयव्याकरणपठनपाठन- प्रणाली पुनर्जागरिष्यतीति प्रस्तुतानुसन्धानस्य तृतीयनिष्कर्षः । भाषाव्याकरणयोः पठनपाठन- सञ्चालनायाधुना परामर्शाऽऽगमन-सम्प्रेषण-मौखिकसंरचनासन्दर्भप्रभृतयोऽनेके नूतना विधयः प्रचलिता आधुनिकैस्ते प्रयुक्ता अपि दृश्यन्ते । तथापि नेपाले पाणिनीयव्याकरणशिक्षणे पारम्परिकी निगमनपद्धतिरेव सर्वथा प्रयुज्यते । आधुनिकशिक्षणविधीनाम्, पठन-लेखन-श्रवण-वाग्रूपैः प्रथितानां चतुर्विधानामेव शिक्षणशिल्पानाम्, शिक्षणसामग्रीणाञ्च प्रयोगाय, शिक्षण आवश्यकक्रियाकलापसञ्चालनाय, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनाय च शारदाप्रभा- व्याख्यानेन निर्दिष्टो विधिरादर्शो भविष्यतीति चतुर्थो निष्कर्षः । यद्यपि शारदाप्रभाव्याख्येयं प्राथमिकछात्रहिताय रचिता तथाप्यस्या ग्रन्थस्वरूपमेकत्रैव प्राथमिकद्वितीयकविन्यासयोर्मिश्रणेन जटिलीभूतम्, नेपालीहिन्दीमिश्रितसंस्कृतप्रयोगेणाशास्त्रीयं जातम्, सूत्रप्रक्रियाक्रमयोः सङ्गमेन प्रकरणविभक्तेषु स्थानेष्वस्पष्टीभूतम्, काशिकाया अधिकतरेण समुद्धरणेन काशिकाश्रयि जातञ्च प्रतीयते तथापि गुणाधिक्यादेते दोषा गुणेष्वन्तर्भवन्तीति पञ्चमनिष्कर्षः ।

नेपालदेशोद्भवैः पञ्चाधिकैर्विवृतिकारैः प्रक्रियाक्रमेण सूत्रक्रमेण चाष्टाध्यायीसूत्राणि व्याकृतानि । एतेषु विवृतिग्रन्थेषु शारदाप्रभेयं नवीना सामान्या च प्रतीयते । इतः पूर्वं भारतीयव्याख्यातृभिर्या याः संस्कृतव्याख्याः कृतास्ता वैषयिकगाम्भीर्यप्रदानोद्देश्येन विरचिताः सन्ति, तथैव ताः सर्वा महाभाष्य-शेखर-प्रौढमनोरमा-काशिकायमानाः सन्ति । परमस्या उद्देश्यन्तु प्राथमिकेभ्यश्छात्रेभ्यः प्रयोगमूलया सरलया च भाषया विषयप्रबोधनमस्ति, अतो भारतीयैर्नैपालकैश्च पूर्वव्याख्यातृभिः कृतैर्व्याख्यानैः सह व्याख्येयं तोलयितुं न शक्यते । तेषां सर्वेषां वैषयिकगाम्भीर्यप्रतिपादनरूपं वैशिष्टयमस्ति चेदस्यास्तु व्याकरणसरलीकरणरूपं भिन्नं वैशिष्ट्यमस्ति । तथापि स्वपूर्ववर्त्तिभिर्विरचितैर्व्याख्यानग्रन्थैः सह प्रस्तुतेऽस्या गुणवत्ता सामान्यतरा एव प्रतीयते, अतो भारतवर्षीयव्याख्यानग्रन्थेषु शास्त्रीयचिन्तन- दृष्टचा सामान्यमिदं व्याख्यानमिति वक्तुं समुचितं भवति ।

नैपालकविवृतिग्रन्थेष्वपि सुकृतिदत्तपन्तस्य वृद्ध्यादिसूत्राष्टकविवृतिः, सोमनाथसिग्द्यालस्य प्रतिसंस्कृता सिद्धान्तकौमुदी चेति द्वौ ग्रन्थौ प्रकृतव्याख्यानात् प्राञ्जलतरौ प्रौढतरौ च प्रतीयेते । इतः प्राग्वर्त्तिनः पश्चाद्वर्त्तिनश्चान्ये व्याख्यानग्रन्था एतस्मादतिसामान्याः स्वल्पाकाराश्च सन्तीति तयोर्मध्यवर्त्तित्वेनास्य स्थानं निर्धारयितुं शक्यत इति मूल्याङ्कनम् ।

७. प्रस्तुतप्रबन्धस्य योगदानम्

प्रकृतेनाध्ययनेन कृतेषु योगदानेषु शब्दशास्त्रीयव्याख्यानतत्त्वनिर्धारणं प्रथमं मन्तव्यम् । तथैव पाणिनीये व्याकरणे स्थितं रूपसाधनपक्षं सरलीकर्तुं प्रकृता व्याख्या रचितेति व्याख्यायामस्यां स्थितानां ग्रन्थसरलीकरणयुक्तीनां प्रकाशनं प्रस्तुतेनाध्ययनेन प्रदत्तं द्वितीयं योगदानम् । ब्लुमफिल्डचम्स्कीप्रभृतिभिर्भाषाविद्भिः 'देशभाषाणां सम्मिश्रणैः शास्त्रीयभाषाः शिक्षणीया' इति निर्दिष्टा तस्याः परीक्षणञ्च हरिप्रसादशर्माचार्येण प्रकृते व्याख्याने कृतम् । तादृशी युक्तिः प्राथमिकानां छात्राणां कृत उपयुक्ता वर्तत इति पुनः पोषणमनेन प्रबन्धेन कृतं तृतीयं योगदानम् । तथैव महर्षिणा पाणिनिना स्वसूत्रव्याख्यानक्रम आपतिता अस्पष्टता दूरीकरणाय, पूर्वापरसूत्रेषु सङ्गतिकरणाय, पूर्वतः सूत्रार्थाऽऽनयनाय परत्र नयनाय च अनेका भाषिकयुक्तयश्चिह्नानि च प्रयुक्तानि, अधुना तादृशेषु चिह्नेषु युक्तिषु च कति विलुप्तप्राया जाता दृश्यन्ते । शारदाप्रभाकारेणात्र- अनुबन्धलोपार्हो वर्णश्चन्द्रबिन्दुना सङ्केतितः, अधिकारानुवृत्त्योर्निर्देशेऽक्षरस्थूलीकृतः, स्वरितचिह्नेनानुदात्तो निदर्शितः, सूत्रान्तेऽङ्कं प्रदाय सूत्रगतिर्निर्दिष्टा च । परिवर्त्तितायामध्यापनप्रणाल्यां शारदाप्रभाकारेणैतेषां विलुप्तप्रायाणां चिह्नानां पुनरुद्धारो विहितः, तत् कार्यं पाणिनीयगुरुकुलपरम्परा-संरक्षकमिति मत्वाऽस्य ससमर्थनप्रचारः प्रकृतस्य शोधस्य चतुर्थं योगदानम् । एवमेव भाषावाङ्मयेषु प्रचलितानां पाणिनिकालिकानां ततोऽर्वाचीनानामपि पाणिनीयनियमतोऽनिष्पन्नानां मयूर-ब्राह्मण-बृसी-दूढ्य-बलाहक-पञ्जिकाप्रभृतीनां संस्कृतशब्दानां पाणिनीयत्वसिद्धय उत्तरवर्त्तिभिव्याख्यातृभिरनेके प्रयासाः कृताः । शारदाप्रभाकारेण च तेषां समर्थनेन संस्कृतज्ञैरप्रयुक्ताः संस्कृततुल्या - हिमाल-सारितम्-फालितम्-हार्दिक-कालीनप्रभृतयश्शतशश्शब्दाः प्रयुक्ताः । प्रकृतशोधप्रबन्धः शारदाप्रभाकारेण प्रयुक्तान् तादृशानाधुनिकानन्यानपि कतिचित् संस्कृततुल्यानपाणिनीयाञ्शब्दानात्मसात्कृत्य संस्कृतशब्द-भाण्डागारप्रवर्द्धनाय प्रोत्साहयतीत्येतेषां प्रचारप्रसारावस्य शोधस्य पञ्चमं योगदानमिति सारः ।

दिनाङ्कः २०७५/०१/२९

अनुसन्धाता
भवानीशङ्करभट्टराईः
धरानः
सम्पर्कः ९८५२०३४५६६

# विषयसूची

| शीर्षकाणि | पृष्ठसङ्ख्या |
|---|---|
| निर्देशकसम्मतिः | 2 |
| विशेषज्ञसम्मतिः | 3 |
| विशेषज्ञसम्मतिः | 4 |
| कृतज्ञताज्ञापनम् | 5 |
| शोधसारः | 7 |
| विषयसूची | 12 |
| सङ्क्षिप्तशब्दसूची | 19 |
| तालिकासूची | 21 |

प्रथमोऽध्यायः

शोधपरिचयः

| | |
|---|---|
| १.१ अनुसन्धेयविषयपरिचयः | १ |
| १.२ समस्याकथनम् | २ |
| १.३ उद्देश्यकथनम् | ३ |
| १.४ पूर्वकार्यसमीक्षणम् | ३ |
| १.४.१ पाणिनीयाष्टाध्याय्याः सूत्रक्रमिकवृत्तिव्याख्यानपरम्परा | ५ |
| १.४.२ अष्टाध्यायीव्याख्यातारौ वार्त्तिकमहाभाष्यकारौ | ११ |
| १.४.३ पाणिनीये व्याकरणे नैपालकं योगदानम् | १४ |
| १.४.४ शारदाप्रभामधिकृत्य सञ्जातं पूर्वकार्यम् | २३ |
| १.५ अध्ययनस्यौचित्यं महत्त्वञ्च | २६ |
| १.६ शोधविधिः | २६ |
| १.७ अध्ययनस्य क्षेत्रं सीमा च | २७ |
| १.८ शोधप्रबन्धस्य रूपरेखा | २७ |

द्वितीयोऽध्यायः

शारदाप्रभाव्याख्यातुर्व्यक्तित्वकृतित्वपरिचयः

| | |
|---|---|
| २.१ विषयपरिचयः | २८ |

२.२ शारदाप्रभाव्याख्यातुर्हरिप्रसादशर्मण ऐतिह्यम् २८
२.२.१ पारिवारिकी पृष्ठभूमिः २८
२.२.२ जन्म २८
२.२.३ सहोदर्यः २९
२.२.४ शिक्षा २९
२.२.५ व्रतबन्धः ३०
२.२.६ अध्यापनम् ३०
२.२.७ राजपरम्परायामास्था श्रद्धा च ३२
२.२.८ धार्मिकी आस्था ३४
२.२.९ विवाहः ३४
२.२.१० सन्ततयः ३५
२.२.११ निवासः ३५
२.२.१२ सम्मानप्राप्तिः ३६
२.२.१३ कार्यक्षेत्रम् ३७
२.२.१४ निधनम् ३८
२.३ व्याख्यातुर्योगदानम् ३८
२.३.१ सामाजिकमवदानम् ३८
२.३.२ धार्मिकमवदानम् ३९
२.३.३ प्राज्ञिकमवदानम् ३९
२.३.४ साहित्यिकमवदानम् ४०
२.३.५ अनुसन्धानक्षेत्रेऽवदानम् ४१
२.४ व्याख्यात्रा रचितानि काव्यानि ४२
२.४.१ 'गोरक्षशाहवंश'महाकाव्यम् ४३
२.४.२ 'श्री ५ महेन्द्रविरहवेदना'शोककाव्यम् ४४
२.४.३ 'श्री ५ वीरेन्द्रशुभराज्याभिषेकं' खण्डकाव्यम् ४४
२.५ व्याख्यातुश्शोधप्रबन्धष्टीकाग्रन्थश्च ४४
२.५.१ शोधप्रबन्धः ४५
२.५.२ अष्टाध्यायी : शारदाप्रभाव्याख्यामहिता ४५
२.५.३ कृतिविवरणम् ४६

२.६ व्याख्यात्रा प्रकाशिताः लेखाः कविताश्च ४७
२.७ शारदाप्रभाव्याख्यायाः परिचयः ४८
२.७.१ शारदाप्रभाव्याख्यारचनायाः पृष्ठभूमिः ४८
२.७.२ शोधप्रबन्धपरिष्कारः ४९
२.७.३ शारदाप्रभाव्याख्याया उपजीव्यम्, सहायग्रन्थाश्च ५१
२.७.४ शारदाप्रभाव्याख्याया विषयवस्तु ५२
२.७.५ व्याख्येयग्रन्थस्वरूपं सूत्रन्यासप्रक्रिया च ५४
२.७.६ शारदाप्रभाव्याख्यायाः शक्तिः सीमा च ५६
२.७.७ शब्दशास्त्रीयविवृतिग्रन्थेषु शारदाप्रभायाः स्थानम् ५७
२.७.८ शारदाप्रभायां पूरकसामग्रीप्रयोगदिङ्निर्देशः ५८
२.७.९ शारदाप्रभायां शिक्षाशास्त्रोक्तमान्यतानामनुप्रयोगः ६३
२.८ अध्यायनिष्कर्षः ६७

तृतीयोऽध्यायः

## व्याख्यानसिद्धान्तनिरूपणम्

३.१ विषयपरिचयः ७०
३.२ व्याख्यानार्थबोधकानां पदानां व्युत्पत्तिरर्थश्च ७०
३.२.१ व्याख्या, व्याख्यानञ्च ७०
३.२.२ विवरणम्, विवृतिः ७१
३.२.३ चर्चा ७१
३.२.४ टीका ७१
३.२.५ भावप्रकाशनम् ७२
३.२.६ निर्वचनम्, निरुक्तिः ७२
३.२.७ वृत्तिः ७३
३.२.८ स्पष्टीकरणम् ७४
३.२.९ व्याकृतिः ७४
३.२.१० पदस्फोरणम् ७४
३.२.११ भाष्यम् ७४
३.२.१२ पञ्जिका/पञ्चिका ७५
३.२.१३ मीमांसा ७५

३.३ व्याख्यानपदप्रयोग: ७७

३.४ व्याख्यानमुद्रा ७९

३.५ व्याख्यानस्यार्थेन सह सम्बन्ध: ७९

३.६ अर्थस्य लक्षणम् ८०

३.७ अर्थप्रकारा: ८१

३.८ शब्दार्थयो: सम्बन्ध: ८४

३.८.१ वाच्यवाचकभावसम्बन्ध: ८५

३.८.२ कार्यकारणभावसम्बन्ध: ८५

३.८.३ योग्यतासम्बन्ध: ८५

३.८.४ इतरेतराध्यासमूलकसम्बन्ध: ८६

३.८.५ नित्यसम्बन्ध: ८७

३.९ शैलीविज्ञानेन सह व्याख्यानस्य सम्बन्ध: ८८

३.१० शब्दार्थयो: सम्बन्धेनैव व्याख्यानसम्भव: ९०

३.११ व्याख्यानभेदा: ९०

३.११.१ वैदिकव्याख्यानम् ९०

३.११.२ निरुक्तीयव्याख्यानम् ९०

३.११.३ व्याकरणशास्त्रीयं व्याख्यानम् ९५

३.११.४ दर्शनशास्त्रीयं व्याख्यानम् ९६

३.११.५ काव्येषु प्रचलितं व्याख्यानम् ९८

३.१२ व्याख्यानपदस्य लोकव्यवहारे प्रयोग: ९८

३.१२.१ वैज्ञानिकं प्रचलितञ्च व्याख्यानम् ९८

३.१२.२ सामाजिकव्याख्यानानि ९९

३.१२.३ व्याख्या-सीमान: १००

३.१२.४ व्याख्यानदोषा: १०१

३.१३ आङ्ग्लसाहित्ये व्याख्यानम् १०२

३.१३.१ आशयप्रकाशनम् (interpretation) १०२

३.१३.२ शब्दान्तरैर्व्याख्या (praphrase ) १०३

३.१४ स्कीथ (skeath) महोदयस्य निर्वचनसिद्धान्त: १०३

३.१५ पारम्परिकसमालोचने तत्त्वार्थे पद्धत्यादीनां योग: १०४

३.१५.१ विधिपदस्यार्थ: १०४

३.१५.२ पद्धतिपदस्यार्थः १०५

३.१५.३ विधिपद्धत्योर्भेदः १०५

३.१६ व्याख्यानतत्त्वानि १०७

३.१६.१ वैदिकव्याख्यानतत्त्वानि १०७

३.१६.२ निरुक्तीयव्याख्यानतत्त्वानि ११०

३.१६.३ उणादिशब्दनिर्वचन(व्याख्यान)तत्त्वानि ११४

३.१६.४ दर्शनोक्तव्याख्यानतत्त्वानि ११७

३.१६.५ काव्यशास्त्रीयव्याख्यानतत्त्वानि ११९

३.१६.६ आधारभूतव्याख्यानतत्त्वानि १२२

३.१६.७ शब्दशास्त्रीयव्याख्यानतत्त्वानि १२९

३.१७ अध्यायनिष्कर्षः १३५


चतुर्थोऽध्यायः

शारदाप्रभायाः संज्ञा-सन्धि-सुबन्तप्रकरणसमीक्षा


४.१ विषयपरिचयः १३७

४.२ संज्ञाप्रकरणसमीक्षा १३७

४.२.१ वर्णसमाम्नायसूत्राणां व्याख्यानप्रक्रिया १३८

४.२.२ शारदाप्रभायां स्थान-प्रयत्न-संज्ञानिरूपणम् १३९

४.२.३ प्राचीनाधुनिकयोर्भाषाविदोः स्थानविभागः १४२

४.२.४ प्राचीनाधुनिकयोर्भाषाविदोः प्रयत्नविभागः १४४

४.३ सन्धिप्रकरणसमीक्षा १४६

४.३.१ अधिकारानुवृत्त्योर्निदर्शनम् १४७

४.३.२ विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम् १५०

४.३.३ शङ्कामुद्भाव्य समाधानम् १५८

४.३.४ रूपसिद्धिप्रक्रियावबोधः १६०

४.३.५ वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम् १६२

४.३.६ अन्याचार्यमतसङ्ग्रहः १६४

४.३.७ प्रकरणसङ्घटनं शैलीशिल्पञ्च १६७

४.४ सुबन्तप्रकरणसमीक्षा १६९

४.४.१ अधिकारानुवृत्त्योर्निदर्शनम् १७१

४.४.२ विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम् १७७
४.४.३ शङ्कामुत्थाप्य समाधानम् १८३
४.४.४ रूपसिद्धिप्रक्रियावबोधः १९०
४.४.५ वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम् १९३
४.४.६ अन्याचार्यमतसङ्ग्रहः २००
४.४.७ प्रकरणसङ्घटनं शैलीशिल्पञ्च २०२
४.५ अध्यायनिष्कर्षः २०३

पञ्चमोऽध्यायः

शारदाप्रभायास्तिङन्त-कृदन्त-कारकप्रकरणसमीक्षा

५.१ विषयपरिचयः २०६
५.२ तिङन्तसमीक्षणम् २०९
५.२.१ अधिकारानुवृत्त्योर्निदर्शनम् २०९
५.२.२ विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम् २१७
५.२.३ शङ्कामुद्भाव्य समाधानम् २२३
५.२.४ रूपसिद्धिप्रक्रियावबोधः २३०
५.२.५ वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम् २३२
५.२.६ अन्याचार्यमतसङ्ग्रहः २३५
५.२.७ प्रकरणसङ्घटनं शैलीशिल्पञ्च २३७
५.३ कृदन्तकारकप्रकरणसमीक्षा २४०
५.३.१ अधिकारानुवृत्त्योर्निदर्शनम् २४१
५.३.२ विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम् २४६
५.३.३ शङ्कामुद्भाव्य समाधानम् २५०
५.३.४ रूपसिद्धिप्रक्रियावबोधः २५७
५.३.५ वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम् २६०
५.३.६ अन्याचार्यमतसङ्ग्रहः २६३
५.३.७ प्रकरणसङ्घटनं शैलीशिल्पञ्च २६६
५.४ अध्यायनिष्कर्षः २७०

षष्ठोऽध्यायः

## शारदाप्रभायाः तद्धित-समासप्रकरणसमीक्षा


६.१ विषयपरिचयः २७०

६.२ तद्धितप्रकरणसमीक्षा २७२

६.२.१ अधिकारानुवृत्त्योर्निदर्शनम् २७४

६.२.२ विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम् २८१

६.२.३ शङ्कामुद्भाव्य समाधानम् २८७

६.२.४ रूपसिद्धिप्रक्रियावबोधः २९५

६.२.५ वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम् २९८

६.२.६ अन्याचार्यमतसङ्ग्रहः ३०२

६.२.७ प्रकरणसङ्घटनं शैलीशिल्पञ्च ३०४

६.३ समासप्रकरणसमीक्षा ३०८

६.३.१ अधिकारानुवृत्त्योर्निदर्शनम् ३०९

६.३.२ विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम् ३१३

६.३.३ शङ्कामुद्भाव्य समाधानम् ३१७

६.३.४ रूपसिद्धिप्रक्रियावबोधः ३२५

६.३.५ वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम् ३२८

६.३.६ अन्याचार्यमतसङ्ग्रहः ३३२

६.३.७ प्रकरणसङ्घटनं शैलीशिल्पञ्च ३३४

६.४ अध्यायनिष्कर्षः ३३६


सप्तमोऽध्यायः

## शोधप्रबन्धोपसंहारनिष्कर्षोपलब्धयः


७.१ विषयपरिचयः ३३८

७.२ उपसंहारः ३३८

७.३ शोधनिष्कर्षः ३४२

७.४ उपलब्धयः ३५०

७.५ भाव्यनुसन्धानाय सम्भावितशीर्षकाणि ३५१

सन्दर्भसामग्रीसूची ३५२

# सङ्क्षिप्तशब्दसूची

| | | |
|---|---|---|
| अप्र.विद्य.शो. | : | अप्रकाशित-विद्यावारिधिशोधः |
| अ.पा.सं. | : | अध्यायपादसङ्ख्या |
| इ. | : | इसवीयसंवत् |
| उ. सू. | : | उणादिसूत्रम् |
| उदा. | : | उदाहरणम् |
| ऋ.म. | : | ऋग्वेदमण्डलः |
| का.वा. | : | कात्यायनवार्त्तिकानि |
| का.वा.सहिता | : | कारिकावलीसहिता |
| कारि. | : | कारिका |
| क्याम्ब्रिज. | : | क्याम्ब्रिज युनिभर्सिटि प्रेस |
| च.भा. | : | चतुर्थभागः |
| चतु. सं. | : | चतुर्थसंस्करणम् |
| चौ.सं.प्र. | : | चौखम्बा-संस्कृत-प्रतिष्ठानम् |
| चौ.सं.सि. | : | चौखम्बा-संस्कृत-सिरिज |
| चौ.सु.भा.प्र. | : | चौखम्बासुरभारतीप्रकाशनम् |
| तृ.भा. | : | तृतीयो भागः |
| तृ.सं. | : | तृतीयसंस्करणम् |
| त्रि.वि. सं.अ.सं. | : | त्रिभुवनविश्वविद्यालयः, संस्कृत अध्ययनसंस्थानम् |
| त्रि.वि.के.वि. | : | त्रिभुवनविश्वविद्यालयः केन्दीयविद्यापीठम् |
| द्वि.भा. | : | द्वितीयो भागः |
| द्वि.सं. | : | द्वितीयसंस्करणम् |
| नि.सू. | : | निरुक्तीयसूत्रम् |
| ने.स.वि. | : | नेपालसंस्कृतविश्वविद्यालयः |
| ने.रा.प्र.प्र. | : | नेपाल-राजकीय-प्रज्ञा-प्रतिष्ठानम् |
| ने.स.वि.अनु.के. | : | नेपालसंस्कृतविश्वविद्यालयः, अनुसन्धानकेन्दम्र् |
| ने.स.वि. प्रा.सं. | : | नेपालसंस्कृतविश्वविद्यालयः प्राध्यापकसंघः |
| पञ्च.सं. | : | पञ्चमसंस्करणम् |
| परि. | : | परिभाषा |
| प्र.वर्षम् | : | प्रकाशनवर्षम् |
| प्रतिसं.कारि. | : | प्रतिसंस्कृतासिद्धान्तकौमुदीकारिका । |
| पृ. सं. | : | पृष्ठसङ्ख्या |
| पा.सू. | : | पाणिनीयसूत्रम् |

| | | |
|---|---|---|
| बाल. | : | बालकृष्णप्रवर्द्धनम् |
| भा. | : | भाष्यकारः |
| भा.प्रा.वि.प्र. | : | भारतीयप्राच्यविद्याप्रकाशनम् |
| भू. | : | भूमिका |
| म.सं.वि. | : | महेन्द्रसंस्कृतविश्वविद्यालयः |
| मोतीलालब. | : | मोतीलालबनारसीदासः |
| रा.ला.क.ट्र. | : | रामलालकपुरट्रस्ट |
| रानीपोखरीसं.पा. | : | रानीपोखरीसंस्कृतपाठशाला |
| वारा. | : | वाराणसी |
| वाल्मीकिः | : | वाल्मीकिविद्यापीठम् |
| विद्यार्थी. | : | विद्यार्थीपुस्तकभण्डारः |
| व्या. | : | व्याख्याता |
| वृद्ध्यादि. | : | वृद्ध्यादिसूत्राष्टकविवृतिः |
| शिशुपा. | : | शिशुपालवधमहाकाव्यम् |
| शु .य. | : | शुक्लयजुर्वेदः |
| शा.प्र.व्या. | : | शारदाप्रभाव्याख्या |
| सप्तच.सं. | : | सप्तचत्वारिंशत् संस्करणम् |
| स.पू.क. | : | समस्यापूर्तिकविता |
| सं सं. वि. | : | सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः |
| साभ्काप्र. | : | साभ्काप्रकाशनम् |
| सम्पा. | : | सम्पादकः |
| सं.अ.सं. | : | संस्कृताध्ययनसंस्थानम् |
| हरि.सं.पाठ. | : | हरिहरसंस्कृतपाठशाला |
| हरि. नि.भ. | : | हरिकृष्णनिबन्धभवनम् |

# तालिका-सूची


| तालिकासङ्ख्या | | पृष्ठसङ्ख्या |
|---|---|---|
| १ | पाणिनेरुत्तरोद्भवा वृत्तिकाराः | ९ |
| २ | नैपालका वैयाकरणास्तेषां कृतयश्च | १८ |
| ३ | पाणिनेरैतिह्यान्वेषका नैपालका गवेषकाः | १९ |
| ४ | नेपालतः सञ्जाता व्याकरणविषयका विद्यावारिधयः | २३ |
| ५ | हरिप्रसादशर्मणा प्राप्तसम्मानप्रशंसादीनां विवरणम् | ३६ |
| ६ | हरिप्रसादशर्मणः कार्यक्षेत्रम् | ३८ |
| ७ | व्याख्यातुर्हरिप्रसादशर्मणः कृतिविवरणम् | ४७ |
| ८ | हरिप्रसादशर्मणा प्रकाशिता लेखाः कविताश्च | ४७ |
| ९ | शारदाप्रभायाः प्राथमिकस्वरूपम् | ५३ |
| १० | प्राच्याधुनिकयोरुच्चारणस्थानविभाजनम् | १४४ |
| ११ | प्राच्याधुनिकयोराभ्यन्तरप्रयत्नविभागः | १४६ |
| १२ | तिङन्तकृदन्तकारकप्रकरणस्थसूत्रसङ्ख्यानां तुलना | २०७ |
| १३ | तिङन्तकृदन्तकारकप्रकरणस्थसूत्राणां योगः | २०९ |
| १४ | शारदाप्रभाया अनुवृत्तिसङ्केतदिग्दर्शनम् | २१२ |
| १५ | चकारादनुवृत्तिसङ्केतदिग्दर्शनम् | २१८ |
| १६ | तिङन्ते चकारादनुवृत्तिनिदर्शनम् | २२० |

प्रथमोऽध्यायः

# शोधपरिचयः

## १.१ अनुसन्धेयविषयपरिचयः

विश्वप्रसिद्धायां प्राचीनतमायां समृद्धायाञ्च संस्कृतभाषायां रचितं महर्षेः पाणिनेरष्टकं संस्कृतभाषासम्बद्धयोर्वैदिकलौकिकयोर्भाषिकनियमयोरनुशासकम्, भारोपेलीपरिवारान्तर्गतानां शताधिकानां भाषाणां स्रोतश्च मन्यते । अल्पाक्षरिकेष्वसन्दिग्धेषु विश्वतोमुखभूतेषु चासन्नचतुस्सहस्रसङ्ख्यकेषु सूत्रेषु निबद्धं पाणिनीयव्याकरणमधिकृत्य संस्कृतव्यतिरिक्तानां नेपाली-हिन्दी-वङ्ग-मैथिलि-भोजपुरि-कन्नड-तेलगुप्रभृतीनां नैकानां भाषाणां क्रिया-वाक्यरचना-वाच्य-पदसङ्गति-कारक-समास-कृदन्त-तद्धितान्तसम्बद्धा व्याकरणनियमाः प्रत्यक्षतो गृहीताः सन्ति चेदाङ्ग्लोर्दूसिंहालीमलयप्रभृतीनां पञ्चाशदधिकानां भाषाणां भाषिकसंरचना अप्रत्यक्षतोऽङ्गीकृता दृश्यन्ते ।

पाणिनिना सूत्रक्रमेण विरचय्य तेनैव क्रमेण प्रवचनीकृतां व्याख्यातां चेमामष्टाध्यायीं त्यक्त्वा शर्ववर्मप्रभृतिभिर्वैयाकरणैर्द्वादशशतके प्रक्रियाक्रमिकेषु व्याकरणान्तरेषु विरचितेषु क्षयोन्मुखीभूता पाणिनीयाष्टकाध्ययनप्रणाली समयगतिबोधकैस्तात्कालिकैः पाणिनीयव्याकरण-मर्मज्ञैः सुचिन्तकैः प्रक्रियाक्रमं विनिर्माय पुनरुद्धारिता, लोकापेक्षानुकूलः प्रक्रियाक्रमनामको द्वितीयक्रमो विनिर्मितश्च । अतो गच्छति काले पाणिनीयं व्याकरणं सूत्रक्रमिकं प्रक्रियाक्रमिकञ्चेति द्विधा विभक्तम् । उपर्युक्तयोर्द्वयोः क्रमयोर्मध्ये सूत्रक्रमे महाभाष्य-काशिका-भाषावृत्ति-वृद्धयादिसूत्राष्टकविवृति-शारदाप्रभाप्रभृतीनि व्याख्यानानि, तेषामपि नैकानि समालोचनानि विरचितानि । प्रक्रियाक्रमेण प्रारब्धे व्याख्यानेऽपि रूपावतार-रूपमाला-प्रक्रियारत्न-प्रक्रियासर्वस्व-सिद्धान्तकौमुदी-प्रतिसंस्कृतासिद्धान्तकौमुदी- प्रभृतयोर्व्याख्यान-ग्रन्थास्तथा तदुपरि शताधिकाष्टीकाश्च विरचिताः । प्राचीनकाले जिज्ञासवः सततमध्ययनमनन-निदिध्यासनादिनाऽहरहरचिन्तयन् द्वादशवर्षाणि व्याकरणमधीत्य तदनन्तरमेव शास्त्रान्तरे प्राविशन् । तदा व्याकरण-काव्य-कोशधर्मशास्त्रादीनामध्ययनं तदुपरि चिन्तनं सम्यगवलोकनं हि तेषामुद्देश्यमभवत् परमधुना प्रपञ्चनिमग्ना जनाः सांसारिकवैचित्र्येषु रममाणाः सन्तो दिनार्धमप्यध्ययनाय नोत्सहन्ते । अतः शास्त्रविवेचकैर्ग्रन्थकारैरपि तादृशीमवस्थां परिज्ञाय सूक्ष्मतराः सरलतराश्च ग्रन्थसारा निस्सारिताः । वैयाकरणैरपि सद्यः फलाकाङ्क्षिणां कृते प्रक्रियाक्रमः, सकलशास्त्रेष्ववगाहन-समुत्सुकानां कृते तु सूत्रक्रम इत्यध्येतू रुच्यनुकूला द्विविधा सरणिर्व्यवस्थापिता । नैपालकेषु

प्रायो विद्यालयमहाविद्यालयेष्वधुना प्रक्रियाक्रमः प्रचलति । भारतीयेषु विद्यालयमहाविद्यालयेषु तु क्रमद्वयमपि प्रचलतीति विशेषः । नैपालकेषु कतिपयगुरुकुलीनशिक्षणसंस्थासु तु गुरुवः सूत्रक्रमेणापि पाठयन्ति । एतादृशयोः क्रमयोर्मध्ये ये वैयाकरणाः प्रक्रियामवलम्बन्ते ते नव्या ये सूत्रक्रममनुसरन्ति ते तु प्राच्या इति सुधियो निर्धारयन्ति ।

सुकृतिदत्तपन्तादीनां पाणिनीयसूत्रव्याख्यानस्य सूत्रक्रमिकं मार्गमनुसरन्नधुनातनीयो नैपालको वैयाकरणो हरिप्रसादशर्माचार्यः पाणिनीयाष्टाध्याय्या रूपसाधनप्रक्रियां सरलीकर्तुमष्टाध्यायीं व्याख्याय 'शारदाप्रभाव्याख्यामहिताष्टाध्यायी' नामकं व्याख्याग्रन्थरत्नं २०६० तमे वैक्रमाब्दे प्रणीतवान् । नैपालके संस्कृतविश्वविद्यालये त्रिंशदुत्तरवर्षाणि व्याकरणमध्यापितेनानेन व्याख्यात्रा ग्रन्थेऽस्मिन् सूत्रक्रमं प्रक्रियाक्रमञ्च सङ्गमय्य व्याकरणाध्ययने नवीनपरम्परा समुद्घाटिता । तथैवाधुनिक-शैक्षिकोपकरणप्रयोगनिर्देश-पाठाभ्यासादिभिश्च शैलीशिल्पादिषु नूत्नत्वमपि प्रत्तम् । तादृशवैशिष्टचपूर्णं प्रस्तुतव्याख्यानमन्यैः कैः कैश्च तत्त्वैशिष्टचैर्विशेषिताभिः शक्तिभिश्च पूर्णम् ? व्याख्यानेऽस्मिन् शब्दशास्त्रीयव्याख्यानतत्त्वानि घटन्ते न वेति क्रमशोऽत्र विविच्यन्ते ।

## १.२ समस्याकथनम्

नेपाले भारतेऽन्यदेशे च चिन्तनरतैर्वैयाकरणैः पाणिनिकात्यायन-पतञ्जलिविरचितेषु सूत्रवार्त्तिकभाष्येषु तद्व्याख्यानग्रन्थेषु च बह्व्यष्टीकाः प्रणीताः सन्ति । किन्तु नेपालदेशीयं प्रसिद्धवैयाकरणं हरिप्रसादाचार्यमधिकृत्य तद्रचितां शारदाप्रभाव्याख्यामभिलक्ष्य वा कोऽपि लेखः, विवृतिः, समालोचनात्मकमध्ययनमनुसन्धानं वाऽद्यावधि केनापि न रचितम् । पाणिनीयव्याकरणस्य सरलीकरणाय समर्पितजीवनमिमं व्याख्यातारम्, तद्रचितां शारदाप्रभाम्, तस्य महाकाव्यखण्डकाव्यादिकमधिकृत्य, तद्योगदानमाधृत्य च साकल्येन पृथग् ग्रन्थमाश्रित्य वाऽनुसन्धानं सञ्जातं सञ्जायमानञ्च न दृग्गोचरीभवति । यद्यपि तदीयव्याख्यानग्रन्थे तात्कालिकमहेन्द्रसंस्कृतविश्वविद्यालयस्योपकुलपतिना पूर्णचन्द्रढुङ्गेलमहोदयेन शिक्षाध्यक्षपद-मलङ्कुर्वाणेन नारायणकुमाराचार्येण च सङ्क्षिप्ता भूमिका रचिता, किन्तु तादृशमध्ययनं न समग्रम्, तादृशैर्लेखनैर्व्याख्यानस्यास्य समग्रं वर्गीकरणम्, विश्लेषणम्, तात्त्विकमध्ययनम्, तोलनम्, मूल्याङ्कनं तात्कालिकभाषिकसामाजिकस्थितिपर्यालोचनं पारिवेशिकपर्यवेक्षणं ततो नवीनतथ्योद्घाटनञ्च न सम्भवति, अतोऽननुसन्धितेऽस्मिन् व्याख्यानग्रन्थे प्रथमतः तात्त्विकमध्ययनमावश्यकमित्यनुभूय प्रक्रियाव्याख्यानग्रन्थेषु तट्टीकासु च प्रयुक्तैः

शब्दशास्त्रीयव्याख्यानतत्त्वैरस्य व्याख्यानसमीक्षणमूल्याङ्कनानि विधीयन्ते । एतस्मिन् क्रमे प्रस्तुतशोधप्रबन्ध-सम्बद्धा अधोऽङ्किताः समस्या उद्भाव्यन्ते-

१. अनुसन्धेयग्रन्थ-ग्रन्थकारयोः परिचयः कः ?
२. शब्दशास्त्रे व्याख्यानतत्त्वानि कानि ?
३. शारदाप्रभायाः संज्ञासन्धिसुबन्तेषु व्याख्यानतत्त्वानुपालनावस्था कीदृशी ?
४. शारदाप्रभायास्तिङन्तकृदन्तकारकेषु व्याख्यानतत्त्वानि सङ्गतानि ?
५. शारदाप्रभायाः समासतद्धितयोर्व्याख्यानतत्त्वानुपालनं कथङ्कारं कृतम् ?

## १.३ उद्देश्यकथनम्

नेपालदेशीयस्य प्रसिद्धवैयाकरणस्य हरिप्रसादशर्माचार्यस्य परिचयः, तद्रचितव्याख्यान-ग्रन्थस्य ससमीक्षण-विश्लेषणम्, तद्योगदानस्य समग्रमूल्याङ्कनञ्चावश्यकम् । तथैवाष्टाध्यायीव्याख्यासु प्रकृतव्याख्यानं कीदृशं स्थानं बिभर्तीति मूल्याङ्कनमप्यावश्यकम् । वैज्ञानिकपद्धत्याऽध्यापने लब्धप्रतिष्ठोऽपि वैयाकरणोऽयं कथं छायायाङ्गत इति विषयोऽप्यन्वेषणीयः । समस्याकथने समुत्थापितानामतेषां प्रासङ्गिकानामन्येषाञ्च प्रश्नानामुत्तरमस्मिन् शोधप्रबन्धे प्राप्यते । विशेषतोऽधो लिखितानामुद्देश्यानां प्राप्तिरत्र भवति-

१. अनुसन्धेयग्रन्थ-ग्रन्थकारयोः सवैशिष्टय-परिचयप्रदानम् ।
२. शब्दशास्त्रीयव्याख्यानतत्त्वनिर्धारणम् ।
३. शारदाप्रभायाः संज्ञासन्धिसुबन्तेषु व्याख्यानतत्त्वानुपालनसमीक्षा ।
४. शारदाप्रभायास्तिङन्तकृदन्तकारकेषु व्याख्यानतत्त्वसङ्गतिपरीक्षा ।
५. शारदाप्रभायाः समासतद्धितयोर्व्याख्यानतत्त्वानुपालनविमर्शः ।

## १.४ पूर्वकार्यसमीक्षणम्

पाणिनीयाष्टाध्याय्यामद्यपर्यन्तं पारेशतं सूत्रक्रममूलकं व्याख्यानं सञ्जातं भवेत् । परमध्यावधि प्रकृतानुसन्धात्रोपलब्धानि व्याख्यानानि पञ्चाशदधिकानि वर्तन्ते । एवमेव पाणिनीयसूत्रेषु च न्यूनावधि ४००० वार्त्तिकानि, १३३ परिभाषाः, महाभाष्यमेकम्, विंशतिसङ्ख्यातोऽधिकाः प्रक्रियाक्रमानुसारिणो व्याख्यानग्रन्थाः, पञ्चशताधिकान्यनुसन्धानानि सञ्जातान्यवलोक्यन्ते । दैशिकवैदेशिकविश्वविद्यालयेष्वस्मिन् विषये शोधकार्याणि सञ्जायमानान्यपि वर्तन्ते । नेपालदेशीयाः पाल्पाधिपतिः पृथ्वीपालसेन-सुकृतिदत्तपन्त-

सोमनाथसिग्द्याल-सुरेशझा-वैयाकरणनेपालछविलालपोखेललोकमणिदाहालहरिप्रसादशर्माचार्य-प्रभृतयो व्याख्यातारः पाणिनीयसूत्रमधिकृत्य सूत्रक्रममूलकं प्रक्रियात्मकं व्याख्यानं तत्संशोधनं वा कृतवन्तः । अधुनापि बहवो विद्वाँसः पाणिनीयाष्टकोपरि भूयो भूयश्चिन्तयन्तः सन्ति । वैयक्तिकेन प्रयासेन शैक्षिकसंस्थामाध्यमेन च तादृशानि गवेषणानि प्रकाशितानि प्रसारितानि प्रकाश्यमानानि च दृश्यन्ते । तादृशेषु व्याख्याकारेषु हरिप्रसादशर्माचार्यः पाणिनीयाष्टाध्याय्याः सूत्रक्रममूलकव्याख्यातृत्वेन ख्यातः । नेपालदेशे समुत्पन्नयोः सूत्रक्रममनुसरतोः सुकृतिदत्तपन्तहरिप्रसादयोर्मध्ये हरिप्रसादोऽयं कृतेर्गुणेनैति- हासिकेन महत्त्वेन कृतेराकारेण सरलव्याख्यातृत्वेन च द्वितीयं स्थानं बिभर्ति । सुकृतिदत्तपन्तेन प्रारब्धा 'वृद्धयादिसूत्राष्टकविवृति'रपूर्णैव अतः पूर्णग्रन्थनिर्मातृत्वेन तु हरिप्रसाद प्रथम एवेति कथयितुमपि शक्यते तथापि वैदुष्येण तु सुकृतिदत्त एव प्रथम इत्यत्र नास्ति कस्यापि विमतिः । अतस्तत्समीपेऽसौ द्वितीयः । अस्य व्याख्याकारस्य शारदाप्रभा व्याख्यामण्डिताऽष्टाध्यायी विद्यालयमहाविद्यालयेष्वध्ययनरताँञ्छात्रान् तस्मादप्यधिकं तु तत्राध्यापनरतान् शिक्षकान् जिज्ञासूननुसन्धातॄँश्च नितरामुपकरोति । २०६० तमे वैक्रमाब्दे महेन्द्रसंस्कृतविश्वविद्यालयेन प्रकाशितमिदं व्याख्यानं पाणिनीयाष्टकपरम्परायाः पञ्चाशदुत्तरं सूत्रक्रमानुरोधि व्याख्यानमस्ति चेन्नेपालेऽद्यावधि प्राप्तेषूभयविधेषु (सूत्रक्रमिकेषु प्रक्रियाक्रमिकेषु च) व्याख्यानग्रन्थेषु पञ्चमम् ।

तात्कालिके त्रिभुवनविश्वविद्यालयान्तर्गते जनताविद्यापीठे (दाङ जनपदस्थे) बहुकालं व्याकरणमध्यापितवता प्राप्तविद्यावारिधिकेन हरिप्रसादशर्माचार्येण प्रणीतासौ शारदाप्रभा, व्याकरणशास्त्रसमीक्षकाणां पुरतोऽद्यपर्यन्तं नैव समागता दृश्यते । अतस्तद्विषये केन विदुषा किं समीक्षितमिति नाद्यावधि श्रुतम् । अतो ग्रन्थप्रकाशकत्वेन महेन्द्रसंस्कृतविश्व-विद्यालयस्योपकुलपतिपदमलङ्कुर्वाणेन पूर्णचन्द्रढुङ्गेलवर्येण रचिता सङ्क्षिप्ता भूमिका प्रकाशकत्वेन तात्कालिकेन शिक्षाध्यक्षमहोदयेनास्मिन् व्याख्याने लिखितं विषयबोधकं प्रकाशकीयमन्तव्यञ्चात्र पूर्वाध्ययनत्वेनाङ्गीकृतम् । तथैव हरिप्रसादशर्मणो जन्मस्थानादि-विवरणसङ्गृहीते 'कतिपय-नैपालसंस्कृतग्रन्थकारपरिचयः' नामके शिवराजाचार्य-कौण्डिन्यायनकृते पुस्तके प्रस्तुतमितिवृत्तमेवात्र पूर्वकार्यसमीक्षायां गृहीतमभ्युपेयम् । एतादृशो ग्रन्थपरिचयस्तथा ग्रन्थकृत्परिचय एव प्रकृते ग्रन्थे सञ्जातं पूर्वकालिकमध्ययनमस्ति । अतोऽस्यां समीक्षायां प्रथमं पाणिनिमुनितो हरिप्रसादाचार्यं यावत् कैः कैश्च सूत्रक्रमानुसारिभिर्व्याख्यातृभिरष्टाध्यायी व्याख्यातेति विवरणमुल्लिख्य ततोऽस्मिन् विषये सञ्जातस्य पूर्वकार्यस्य समीक्षणं विधीयते ।

## १.४.१ पणिनीयाष्टाध्याय्याः सूत्रक्रमिकव्याख्यानपरम्परा

पाणिनीयाष्टाध्याय्याः सूत्रक्रममूलकव्याख्यानपरम्परायामद्यावधि पञ्चाशदुत्तरेषु वृत्तिकृत्सु समुपलब्धेष्वपि तेषां बहूनां कृति-देशकालादिकञ्चाज्ञातप्रायमेव । तद्विषये युधिष्ठिरमीमांसकादिभिर्गवेषकैर्यदनुसन्धितं तदेव प्रकृतानुसन्धातुरपि स्रोतः । अतस्तदुपरि पिष्टपेषणमकृत्वा पाणिनीयव्याकरणपरम्परायां मूर्धाभिषिक्तं स्थानं वहतां केषाञ्चिद्वृत्तिकाराणां सङ्क्षिप्तः परिचयः, तेषां वृत्तिग्रन्था एवात्र प्रस्तूयन्ते-

### १.४.१.१ वृत्तिकृत्त्वेन पाणिनिः

महामुनिना पाणिनिना स्वोपज्ञमकालकं व्याकरणमनेकधा प्रवचनेन छात्रेषु प्रस्तुतमिति युधिष्ठिरमीमांसको ज्ञापयति । असौ व्याकरणशास्त्रेतिहाससम्बद्धेऽनुसन्धानग्रन्थेऽस्य वृत्तिग्रन्थोऽवश्यमेवासीदित्युल्लिलेख । मतमिदं स्थिरीकर्तुं मीमांसकेन महाभाष्यस्य, काशिकायाः, वाक्यपदीयस्य, गुणरत्नमहोदधेश्च प्रमाणानि चोपन्यस्तानि । पाणिनिनैकस्यैव सूत्रस्यानेकधा प्रवचनं कृतमिति तेन प्रस्तुतैः प्राच्योदीच्यादिपाठभेदैः वृद्धलघुसंज्ञकादिपाठान्तरैश्च ज्ञायते । महर्षिणा पाणिनिनाऽनेकधा विभिन्नैः क्रमैश्च कृतस्य प्रवचनस्य संसूचनं महर्षिपतञ्जलिः आकडारादेका संज्ञा (पा.सू.१-४-१) इति सूत्रव्याख्याने करोति, तथाहि- "कथं त्वेतत् सूत्रं पठितव्यम् । किमाकडारादेका संज्ञा, आहोस्वित् प्राक्कडारात् परं कार्यमिति । कुतः पुनरयं सन्देहः ? उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः, केचिदाकडारादेका संज्ञेति केचित् प्राक्कडारात् परं कार्यमिति ।" पतञ्जलेरेतेन सङ्केतेन पाणिनिना भिन्नक्रमेणानेकधा नैकेषु शिष्यसमुदायेषु सूत्रप्रवचनं व्याख्यानं वा कृतमित्यवसीयते । काशिकाकारोऽप्येकत्र लिखति- "शुङ्गाशब्दं स्त्रीलिङ्गमन्ये पठन्ति, ततो ढकं प्रत्युदाहरन्ति शौङ्गेय इति । द्वयमपि चैतत् प्रमाणमुभयथा सूत्रप्रणयनात् ।" अनेन काशिकावचनेनापि पाणिनिनाऽवश्यमेव वृत्ती रचिता आसीदिति ज्ञायते । तस्मिन् विषये मीमांसकः पुनर्लिखति- महाभाष्यस्याध्ययनेन ज्ञायते यद् महाभाष्यात् पूर्वं न्यूनातिन्यूनमपि चतस्रः पञ्च वा वृत्तय रचिता इति । महाभाष्ये पतञ्जलिना कतिपयेभ्यः स्वपूर्ववर्त्तिभ्य आचार्येभ्य आधारो गृहीतो दृश्यते । अतः केषुचन सूत्रेर्ष्वाचीनाभिर्वृत्तिभिः सह प्राचीनवृत्तेर्भिन्नता अपि दृश्यते, तद्यथा- कष्टाय क्रमणे (पा.सू.३-१-१४) इत्यस्य सूत्रवृत्तिः काशिकायां- कष्टशब्दाच्चतुर्थीसमर्थात् क्रमणेऽर्थेऽनार्जवे च क्यङ्प्रत्ययो भवतीति वर्तते चेद् महाभाष्ये तु- कष्टशब्दाच्चतुर्थीसमर्थात् क्रमणेऽनार्जवे क्यङ् निपात्यत इत्यस्ति ।

काशिकामधीयानश्छात्रः सूत्रेऽस्मिन् निपातनप्रसङ्गं न पठति परं महाभाष्यच्छात्रस्तु क्यङ्निपातनं पठति । अतो महाभाष्ये स्वपूर्ववर्तिभ्यो वृत्तिकृद्भ्य आधारोऽवश्यमेव गृहीतः स्यादिति मीमांसकः स्वकीये व्याकरणशास्त्रेतिहासनामके निबन्धे समुल्लिखति ।

पाणिनिमुनिना स्वोपज्ञा वृत्तिर्विरचितेत्यस्मिन् विषयेऽन्यलेखकाननुसन्धातॄँश्चोद्धरन् लोकमणिदाहालो व्याकरणशास्त्रेतिहासे लिखति-भर्तृहरिश्च 'इग्यणः सम्प्रसारणम्' (पा.सू.१-१-४५) इति सूत्रमधिकृत्य महाभाष्यदीपिकायां कथयति- 'उभयथा ह्याचार्येण शिष्याः प्रतिपादिताः केचिद् वाक्यस्य केचिद् वर्णस्ये'ति, एतेन प्रमाणेनापि पाणिनिना स्वकीयसूत्रेषु स्वयमेव स्वोपज्ञा वृत्तिरपि कृतेति सिद्ध्यति सूत्रमात्रस्य प्रवचनासम्भवात् । पाणिनिना निश्चयमेव कापि वृत्तिर्लिखितेत्यस्मिन् विषये स्वपूर्वजानुद्धरन्ननुसन्धाताऽशोकचन्द्रगौडशास्त्री स्वकीये 'संस्कृतव्याकरणशास्त्रेतिहास'नामके ग्रन्थे लिखति- 'पाणिनीयाष्टाध्याय्यास्तद्धर-तिवहत्यावहतिभाराद्वंशादिभ्यः' (पा.सू.५-१-४९) इति सूत्रं द्विविधं व्याचक्षाणेन जयादित्येनोक्तं "सूत्रार्थद्वयमपि चैतदाचार्येण शिष्याः प्रतिपादिताः । तदुभयमपि प्रमाणमिति" अर्थादाचार्येण पाणिनिना पूर्वसूत्रस्योभावप्यर्थौ कृतौ अतोऽर्थद्वयमपि साधु । एतेन पाणिनीयाष्टकस्य स्वोपज्ञा वृत्तिरवश्यमेवासीदिति निश्चीयते ।

अनुसन्धाता गोविन्दप्रसादशर्ममहोदयोऽपि पाणिनिं वृत्तिकारं मनुते । असौ 'पाणिनीयव्याकरणस्यैतिहासिकं परिशीलनम्' नामके स्वकीयानुसन्धाननिष्कर्षे 'वृत्तिकाररूपेण पाणिनिः' इति शीर्षके लिखति- "पूर्वपाणिनीया अपरपाणिनीया इति काशिकावचनेनेदं व्यज्यते यत् सूत्रकारः स्वकीयाष्टकस्यानेकधा प्रवचनं कृतवानिति । प्रवचनकाले सूत्राणां तासां वृत्तीनामुदाहरणानां प्रत्युदाहरणानाञ्च नूनमावश्यकता भवति स्म । वृत्त्यादीनि विहाय केवलं प्रवचनं न सम्भवति स्म, अत स्पष्टं भवति यन्नूनं पाणिनिः स्वकीयाष्टकस्य प्रवचनार्थं वृत्तीनामपि प्रवचनं कृतवानिति । एतैर्विश्लेषणैः पाणिनिमुनिना कापि वृत्तिर्विरचितेति निश्चीयते, परं सा कीदृशी आसीदिति अज्ञातमेव ।

### १.४.१.२ काशिकावृत्तिकारौ वामनजयादित्यौ

पाणिनीयाष्टकोपर्युपनिबद्धेषूपलब्धेषु प्राचीनवृत्तिग्रन्थेषु महाभाष्यवाक्यपदीयाभ्या-मतिरिक्ता काशिका एव । वामनजयादित्याभ्यां काश्यां विरचितत्वादस्या नाम काशिकेति वैयाकरणसदसि प्रसिद्धिः । अपरे तु काशयति प्रकाशयति सूत्रार्थमिति विग्रहेण काशिकायाः सूत्रार्थप्रकाशकत्वं मन्वते । काशिकाव्याख्येयं द्वाभ्यां वृत्तिकृद्भ्यां विरचितेति सर्वेषामभिमतम् ।

तत्र युधिष्ठिरमीमांसकेन नैकानि प्रमाणान्युपस्थाप्य पञ्चमाध्यायान्ता जयादित्यविरचिता षष्ठतोऽष्टमाध्यायान्ता तु वामनविरचितेति निर्धारिता । अष्टष्वध्यायेषु विभक्तोऽयं वृत्तिग्रन्थः प्राचीनवैयाकरणानां मतानि मतान्तराणि च मन्थति । अद्यावधि विलुप्तानां कतिपयग्रन्थानां ग्रन्थकाराणाञ्च मतान्यत्र गृहीतानि समीक्षितानि च वर्तन्ते । कतिपये स्थाने काशिकाकारौ महाभाष्यविपरीतं मतमप्युपस्थापयतः । तच्च सम्प्रत्यनुपलब्धानां प्राचीनग्रन्थानामभिमतमिति केषाञ्चिद् विदुषाँस्तर्कः । परं कतिपय आधुनिकवैयाकरणास्तु तत्रस्थं महाभाष्यविरुद्धं पदं हेयं मत्वा तिरस्कुर्वन्ति । पाणिनेरष्टाध्यायी सङ्क्षिप्ततमा, सूत्रात्मिका चास्ति चेत् पातञ्जलमहाभाष्यन्त्वतिविस्तृतं बहुपरिश्रमसाध्यञ्च वर्तते । मध्यमार्गेण व्याकरणान्तर्गतानां विषयाणां सरलतोऽवबोधाय, पाणिनीयाष्टाध्यायीसरणेरनुसरणाय च काशिका सर्वोत्तमा वृत्तिः प्रतीयते । काशिकाकृद्भ्यां पाणिनीयशास्त्रोपरि परम्पराप्राप्तस्य विषयवस्तुनः प्रयत्नेन संरक्षणं कृतमस्तीति वृत्तिकारोऽयं मङ्गलपद्ये सगर्वं सूचयति, तथाहि-

वृत्तौ भाष्ये तथा धातुनामपारायणादिषु ।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसंग्रहः ॥ (काशिकाया मङ्गलपद्ये)

धातुपाठ-गणपाठ-प्रातिपदिकादिषु विप्रकीर्णं (विभक्तम्) पाणिनीयं व्याकरणं परिष्कृत्यैकीकृत्य चात्र सारसङ्ग्रहो विहितोऽस्तीति प्रस्तुतकारिकाया आशयः । पाणिनिपरम्पराऽवगाहित्वात् काशिकायां विपुलमैतिहासिकं विषयवस्तु सुरक्षितं विद्यते । काशिकापूर्ववर्त्तिनीषु वृत्तिषु गणपाठो न प्राप्यते परमत्र गणपाठः सन्निविष्टो वर्तते । काशिकाया उदाहरणप्रत्युदाहरणानि प्राचीनवृत्त्यनुसारीणि सन्ति । अतस्तादृशाभ्यामुदाहरण-प्रत्युदाहरणाभ्यां प्राचीनकालिकमैतिहासिकं तथ्यं भूगोलादिकञ्च बोद्धुं सहयोगो मिलति । वृत्तिपाठधातुपाठप्रातिपदिकादिष्वनेकेषु भागेषु विभक्तस्य पाणिनीयशास्त्रस्य सङ्ग्राहिका काशिकेत्युक्त्वा तस्या वैशिष्टचमत्र प्रदर्शितम् । काशिकायां कानि वैशिष्टचानि सन्तीति समुल्लिखन् ग्रन्थारम्भे न्यासकारः प्राह-

इष्टचुपसङ्ख्यानवती शुद्धगुणा विवृतगूढसूत्रार्था ।
व्युत्पन्नरूपसिद्धिवृत्तिरियं काशिका नाम ॥ (काशिकारम्भे जिनेन्द्रबुद्धिः)

काशिकाया गूढार्थस्य प्रकाशनक्षमौ जिनेन्द्रबुद्धिहरदत्तनामकौ वृत्तिकारौ विषयेऽस्मिन् पाण्डित्यपूर्णं व्याख्यानं कृतवन्तौ । तत्र जिनेन्द्रबुद्धिनाम्ना वैयाकरणेन काशिकाविवरणपञ्जिका नाम्नी टीका कृता । तस्याः प्रसिद्धिस्तु न्यासनाम्ना वर्तते । तथैव हरदत्तनामकेन विदुषा

तदुपरि पदमञ्जरीव्याख्या रचितेति जानन्त्येव सुधियः । काशिकामधिकृत्य अन्या अपि बह्वच व्याख्या विरचिताः । तासु इन्दुमित्रकृतोऽनुन्यासः, अज्ञातलेखकेन कृतो महान्यासः, विद्यासागरमुनीन्द्रकृता प्रक्रियामञ्जरी, रामदेवमिश्रकृतो वृत्तिप्रदीपः, अज्ञातलेखककृतश्चिकित्सासारः, सनातननामकेन व्याख्यात्रा कृता अज्ञातव्याख्या, भर्तृहर्युपनामकेन विमलमतिना कृता भागवृत्तिः, तथान्या विंशतिसङ्ख्यातोऽप्यधिकाः संस्कृतव्याख्याः, भावबोधिनीतुल्या हिन्दीव्याख्याश्च सन्तीति काशिकाया हिन्दीव्याख्यातारौ जयशङ्करलालत्रिपाठी–सुधाकरमालवीयौ काशिकाभूमिकायां सूचयतः ।

### १.४.१.३ वृत्तिकारः श्रीमान् भट्टोजिदीक्षितः

१५७० विक्रमवत्सरतः १६५० विक्रमवत्सरं यावत् स्थितिमान् श्रीमद्भट्टोजिदीक्षितः पाणिनीयाष्टकोपरि 'शब्दकौस्तुभ'नाम्नीं महतीं वृत्तिं प्रणीतवान् । किन्तु साधुना सम्पूर्णा नैवोपलभ्यते । शब्दकौस्तुभाख्यं व्याख्यानं दीक्षितेन महाभाष्य-प्रदीप-काशिका-पदमञ्जरीणां मतानि निर्मथ्य महाभाष्यसरण्या प्रणीतमिति याथार्थ्यम् । शब्दकौस्तुभस्यापि नागेशेन-विषमपदी, वैद्यनाथपायगुण्डेमहोदयेन प्रभा, विद्यानाथशुक्लमहाशयेनोद्योतादयोऽनेकाष्टीका रचिताः । शब्दकौस्तुभः सकलव्याकरणशास्त्राण्यालोड्य विरचितः । अतो वैयाकरणनिकायेऽस्य महन्महत्त्वं वर्तते । शब्दकौस्तुभो भट्टोजिदीक्षितकृतः सकलभाष्यबीजसङ्ग्राहकश्च प्रतीयते ।

### १.४.१.४ अष्टाध्यायीव्याख्यातॄणां विवरणम्

महर्षेः पाणिनेरुत्तरे काले पञ्चाशदधिकाः सूत्रक्रमिका वृत्तिकाराः समभूवन् । परं तेषु कतिपयानां ग्रन्थासमुपलब्धाद्, वैयक्तिकविवरणाप्रापणाच्च बहवोऽज्ञातप्राया एव । अतोऽत्र युधिष्ठिरमीमांसकस्य, अशोकचन्द्रगौडशास्त्रिणः, लोकमणिदाहालस्य, गोविन्द-प्रसादशर्मणस्तथान्येषामपि समुपलब्धानां व्याकरणशास्त्रेतिहासेष्वनुसन्धातॄणां वैयाकरणानां गवेषणानुसारं ग्रन्थप्राप्तानां ग्रन्थान्तरे नामादिकमेव समवाप्तानां वृत्तिकाराणां नामानि, तद्रचनाविवरणञ्चाधः स्थितायां तालिकायां प्रस्तूयते-

तालिकासङ्ख्या : १ पाणिनेरुत्तरोद्भवा वृत्तिकाराः

| क्रमः | वृत्तिकारः | वृत्तिग्रन्थः |
|---|---|---|
| १ | श्वोभूतिः (वि.पू.२९००) | वृत्तिग्रन्थोऽप्राप्तः |
| २ | व्याडिः (वि.पू.२८००) | वृत्तिग्रन्थोऽप्राप्तः |
| ३ | कुणिः (वि.पू.२०००) | अष्टाध्यायीवृत्तिः |
| ४ | माथुरः/माधुरः (वि.पू.२०००) | माथुरी/माधुरी |
| ५ | पुरुषोत्तमदेवः (वि.पू.१२००) | लघुवृत्तिः |
| ६ | केशवः (वि.पू.११६५) | अज्ञातनामा वृत्तिः |
| ७ | इन्दुमित्रः (वि.पू.११५०) | इन्दुमती वृत्तिः, अनुन्यासः |
| ८ | श्रुतपालः (वि.पू.८७०) | अज्ञातनामा वृत्तिः |
| ९ | भट्टजयन्तः (वि.पू.८२५) | अज्ञातनामा वृत्तिः |
| १० | भर्त्रीश्वरः (वि.पू.७८०) | अष्टाध्यायीटीका |
| ११ | चुल्लिभट्टिः (वि.पू.७००) | चुल्लिभट्टिवृत्तिः |
| १२ | निर्लूरः (वि.पू.७००) | निर्लूरी वृत्तिः |
| १३ | देवनन्दी (वि.पू.५००) | जैनेन्द्रशब्दानुशासनम् |
| १४ | चूर्णिः (स्थितिकालोऽज्ञातः) | अज्ञातनामा वृत्तिः |
| १५ | वररुचिः (विक्रमसमकालिकः) | अज्ञातनामा वृत्तिः |
| १६ | दुर्विनीतः (वि.सं.५३९-५६९) | शब्दावतारः |
| १७ | भागवृत्तिकारः (वि.सं.७०२-७०६) | भागवृत्तिः |
| १८ | मैत्रेयरक्षितः (वि.सं.११६५) | दुर्घटवृत्तिः |
| १९ | शरणदेवः (वि.सं.१२३०) | दुर्घटवृत्तिः |
| २० | विश्वेश्वरसूरिः (वि.सं.१२३०) | व्याकरणसिद्धान्तसुधानिधिः |
| २१ | नारायणसुधीः (वि.सं.१२३०) | अष्टाध्यायीप्रदीपः (शब्दभूषणव्याख्या) |
| २२ | अप्पननैनार्यः (वि.सं.१२५० निकटवर्ती) | प्रक्रियादीपिका |
| २३ | अन्नम्भट्टः (वि.सं.१५५०-१६००) | मिताक्षरा |
| २४ | अप्पय्यदीक्षितः (वि.सं.१५७५-१६५०) | सूत्रार्थप्रकाशः |
| २५ | नीलकण्ठवाजपेयी (वि.सं.१६००-१६५०) | पाणिनीयदीपिका |
| २६ | गोपालकृष्णशास्त्री (वि.सं.१६५०-१७००) | शाब्दिकचिन्तामणिः |

| | | |
|---|---|---|
| २७ | दयानन्दसरस्वती (वि.सं.१८८१-१९४०) | अष्टाध्यायीभाष्यम् |
| २८ | गोपालशास्त्री (वि.सं. १८९२-१९६७) | बृहद्‌जुपाणिनीयम्, अष्टाध्यायीसम्पादनम् |
| २९ | ब्रह्मदत्तजिज्ञासुः (वि.सं.१८९२-१९६४) | अष्टाध्यायीवृत्तिः |
| ३० | गोकुलचन्दः (वि.सं.१८९७) | पाणिनीयाष्टाध्याय्याः सङ्क्षिप्ता वृत्तिः |
| ३१ | रामचन्द्रभट्टः (स्थितिकालोऽज्ञातः) | पाणिनीयसूत्रवृत्तिः |
| ३२ | ओरम्भट्टः (वि.सं.१९००) | व्याकरणदीपिका |
| ३३ | रुद्रधरः (स्थितिकालोऽज्ञातः) | अष्टाध्यायीव्याख्यानम् |
| ३४ | उदयनः (स्थितिकालोऽज्ञातः) | मितवृत्यर्थसङ्ग्रहः |
| ३५ | उदयङ्करभट्टः (स्थितिकालोऽज्ञातः) | परिभाषाप्रदीपार्चिः |
| ३६ | सदानन्दनाथः (स्थितिकालोऽज्ञातः) | अष्टाध्यायी तफ्वदीपिका |
| ३७ | गोपालदत्तपाण्डेयः (वि.सं. १९ शतकम्) | अष्टाध्यायीसम्पादनम् |
| ३८ | गुरूप्रसादशास्त्री (१९००-१९७२) | अष्टाध्याय्याः सरला वृत्तिः |
| ३९ | जयदत्तशास्त्री (उप्रेती) (वि.सं.२० शतकम्) | लघुकाशिका |
| ४० | सुदर्शनाचार्यत्रिपाठी (वि.सं.२० शतकम्) | लघुकाशिकावृत्तिः |
| ४१ | भीमसेनशर्मा (वि.सं.१९११-१९७४) | पदच्छेदसहिता पाणिनीयसूत्रवृत्तिः |
| ४२ | गंगादत्तः (वि.सं.१९२३-१९९०) | तफ्वप्रकाशिका वृत्तिः |
| ४३ | देवदत्तशास्त्री (वि.सं.२० शतकम्) | पाणिनीयसूत्राणां सङ्क्षिप्ता वृत्तिः |
| ४४ | जीवरामः (वि.सं.१९ शतकम्) | पाणिनीयसूत्रवृत्तिः |
| ४५ | हरिप्रसादशर्माचार्यः (वि.सं.१९८९-२०७२) | अष्टाध्यायीशारदाप्रभाव्याख्या |
| ४६ | जानकीलालमाथुरः (वि.सं.१९८५ समीवर्ती) | पाणिनीयसूत्रवृत्तिः |
| ४७ | शिवराजाचार्यकौण्डिन्न्यायनः(वि.सं.१९९७) | अष्टाध्यायी लघुव्याख्या |
| ४८ | हरिशङ्करशर्मा (स्थितिकालोऽज्ञातः) | पाणिनीयाष्टाध्यायीलक्ष्यसूची |
| ४९ | लोकमणिदाहालः (वि.सं विंशति शतकम्) | लघुवृत्तिः |
| ५० | प्रल्हादगिरिः (वि.सं विंशति शतकम्) | पाणिनीयाष्टके सूत्रविवरणटिप्पणी |
| ५१ | पं. ईश्वचन्द्रः (वि.सं विंशतिशतकम्) | अष्टाध्याय्याश्चन्द्रलेखा टीका |

स्रोतः युधिष्ठिरमीमांसकस्य *संस्कृतव्याकरणशास्त्रका इतिहास,* लोकमणिदाहालस्य *संस्कृतव्याकरणशास्त्रेतिहासः,* कौण्डिन्न्यायनस्य *कतिपयनैपालसंस्कृतग्रन्थकारपरिचयः ।*

### १.४.२ अष्टाध्यायीव्याख्यातारौ वार्त्तिकमहाभाष्यकारौ

पाणिनीयाष्टके वार्त्तिकानि विरचय्य सूत्रेणासङ्गृहीतमतिव्याप्तमन्यथोक्तञ्च शब्दसाधुत्वकार्यं महामुनिना कात्यायनेन स्थिरीकृतम् । पुनश्च महाभाष्यकारेण पतञ्जलिना सूत्राणि वार्त्तिकानि च पक्षविपक्षाभ्यां व्याख्याय पाणिनीयव्याकरणस्य सर्वश्रेष्ठत्वं वैज्ञानिकत्वेन, लोकानुकूलत्वेन च साधितम् । अत्र पूर्वोक्तयोर्द्वयोराचार्ययोः सङ्क्षिप्तः परिचयः प्रस्तूयते ।

#### १.४.२.१ वार्त्तिककारः कात्यायनः

कात्यायनः पाणिनीयाष्टाध्यायीमधीत्य विविच्य चासन्न-चतुस्सहस्रसङ्ख्यकानि वार्त्तिकानि प्रोक्तवान् । एतेषां वार्त्तिकानां स्वतन्त्रग्रन्थोऽद्यावधि अनुपलब्ध एव । तथाप्येतानि महाभाष्ये सङ्कलय्य प्रथमतो व्याख्यातानि, तान्येव पुनः सिद्धान्तकौमुदीकाशिकादिष्वपि विवृतानि वर्तन्ते, तेभ्यः सिद्धान्तकौमुद्यां ८७६ वार्त्तिकानि गृहीतानि सन्ति । ग्रन्थयोरेतयोः स्थितानि वार्त्तिकानि कुत्रचिद् योगस्य लक्ष्ये प्रवृत्तिं प्रबोधयन्ति, क्वचिदनुक्तस्थले सहाय्यं विदधति, कस्मिँश्चिद् दुरुक्तेर्लक्ष्यावबोधनं कारयन्ति । पराशरोपपुराणस्थं तादृशं वार्त्तिकलक्षणं समुद्धरन् युधिष्ठिरमीमांसकः स्वकीये व्याकरणशास्त्रेतिहासनामके ग्रन्थे प्राह -

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ।
तं ग्रन्थं वार्त्तिकं प्राहुर्वार्त्तिकज्ञा मनीषिणः ॥

एतादृशानां वार्त्तिकानामुदाहरणान्यधो दीयन्ते, तथाहि- मन्यकर्मण्यनादरे विभाषा प्राणिषु (पा.सू.२-३-१७) इति सूत्रं प्राणिवर्जे मन्यतेः कर्मणि विकल्पेन चतुर्थीं करोति । परं कात्यायनस्तु **'नौकाकान्नशुकश्रृगालवर्जेष्विति वाच्यम्'** (का.वा., मन्यकर्म.२-३-१७ इति सूत्रे) इति वार्त्तिकद्वारा सूत्रस्थमप्राणिष्विति पदमपनीय तत्र नौ-काकान्न-शुक-श्रृगालान् वर्जयित्वा चतुर्थीं विदधाति । अस्य वार्त्तिकस्याभावे- न त्वां नावमन्नं मन्य इत्यत्रापि चतुर्थी विकल्पेन स्यादित्यतिव्याप्तिः, न त्वां शुने मन्य इत्यत्र तु प्राणित्वात् चतुर्थी न स्यादित्यव्याप्तिः । कर्मणः प्राणित्वात्, अतस्तयोर्व्यवस्थापनाय 'नौकाकान्नशुकशृगालवर्जेष्विति वाच्य'मिति वार्त्तिकमावश्यकम् । अतोऽव्याप्त्यतिव्याप्तिदोषनिवारणाय वार्त्तिकैः सूत्राणि व्याख्येयानि भवन्ति, तथैव 'मस्जिनशोर्झलि' (पा.सू.७-१-६०) इति विहितो नुम्व्यवस्थापनार्थं मस्जेरन्त्यात् पूर्वो नुम्वाच्यः (का.वा., मस्जिनशो...७-१-६० इति सूत्रे), इति वार्त्तिकम्, भृज्ज्यादिति रूपे प्राप्तरमागमबाधनार्थं 'क्ङिति रमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन' (का.वा., भ्रस्जो

रोपधयो...६-४-४७ इति सूत्रे) इति वार्त्तिकम्, कर्तुः क्यङ् सलोपश्च (पा.सू.३-१-११) इति विहितस्य क्यङो नियमार्थं 'ओजसोप्सरसोर्नित्यमितरेषां विभाषया' (का.वा.,कर्तुः क्यङ्... ३-१-११ इति सूत्रे) इति वार्त्तिकमावश्यकं वर्तते, अतः शास्त्रस्य लक्ष्ये प्रवृत्तिबोधकं दुरुक्तेश्चिन्तकं वा वार्त्तिकमिति सिद्ध्यति ।

सूत्रैरुक्तस्थले व्यवस्थापनमनुक्तस्थले प्रवचनम्, दुरुक्तेर्लक्ष्यावबोधनञ्च वार्त्तिकमिति तदपि सूत्रस्य व्याख्यानमेव । कात्यायनप्रोक्तानि वार्त्तिकानि पाणिनीयसूत्राणि पूरयन्ति, समीक्षन्ते, विवेचयन्ति, व्याख्यान्ति च अतः पाणिनीयसूत्रव्याख्यान एतानि सहायकानीति निश्चप्रचम् ।

### १.४.२.२ महाभाष्यकारः पतञ्जलिः

महामुनिः पतञ्जलिरष्टाध्याय्याः १७१३ सूत्राणि पक्षविपक्षाभ्यामुदाहरणा-दिभिर्व्याकृतवान् इत्यनुसन्धाता शालिग्रामसुवेदी सूचयति । सामान्यतोऽवलोकिते भाष्यमपि व्याख्यानमेव, तथापि प्रक्रियाव्याख्यानमहाभाष्ययोर्महत् पार्थक्यं यत् प्रक्रियाव्याख्यानं पदच्छेदसमासादिभिर्विधीयते चेन्महाभाष्यन्तु वार्त्तिकपरिभाषोदाहरणप्रत्युदाहरणादिभिः सूत्रार्थप्रकाशनेन क्रियते । किं नाम भाष्यमित्यत्र पारम्परिकं भाष्यलक्षणमुद्धरन् मीमांसकः प्राह-

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥

समालोचकैः शङ्कराचार्य-शबरस्वामि-रामानुजाचार्यादिभिः प्रणीतेष्वाकरग्रन्थेषु भाष्यत्वव्यवहारः कृतः, परं पतञ्जलिमुनिविरचित आकरग्रन्थस्तु महाभाष्यमिति व्यवहृतः, महच्च तद् भाष्यमिति विग्रहात् तस्य सिद्धिः । अत्र महाभाष्ये महर्षिणा पतञ्जलिना पृथक्शैल्या पूर्वोत्तरपक्षञ्च संस्थाप्य तत्र स्वपूर्ववर्तिनां मतञ्चोल्लिख्य बहुभिरूपायैस्समाधाय स्वमतञ्च स्थापितं वर्तते । पाणिनिना मुनिना सङ्क्षेपीकृत्य विरचितानि सूत्राणि महाभाष्ये प्रवाहपूर्णया सरलया परं गभीरया शैल्या व्याख्यातानि सन्ति । महाभाष्ये तादृशं गाम्भीर्यमनुभूयैव भर्तृहरिर्वाक्यपदीये (२/४८६ पद्ये) प्राह, यथा -

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ॥

नागेशकैयटहरदत्तादयो व्याख्यातारो व्याकरणं क्लिष्टशैल्या व्याकृतवन्तः, परं महाभाष्यकारस्तु सरलतमया संवादयुक्तया शैल्या विवृतवान् । तादृशमुदाहरणं तुल्यास्यप्रयत्नं सवर्णम् (पा.सू.१-१-९) इति सूत्रे प्राप्यते, तथाहि- किमिदं तुल्यास्यप्रयत्नमिति ? तुलया सम्मितं तुल्यम् । आस्यं च प्रयत्नश्च आस्यप्रयत्नौ तुल्यावास्यप्रयत्नौ यस्य वर्णजालस्येति तुल्यास्यप्रयत्नं सवर्णसंज्ञं भवति । पुनर्महाभाष्यकार आशङ्कते- किं पुनरास्यमिति ? तत्र समाधानरूपेणोत्तरयति- लौकिकमास्यम् । ओष्ठात् प्रभृतिः प्राक्काकलकात् । कथं पुनरास्यम् ? अस्यन्त्यनेन वर्णानित्यास्यम् । अन्नमेतदास्यन्दत इति वाऽस्यम् । कः पुनः प्रयत्नः ? प्रयतनं प्रयत्नः । प्रपूर्वाद्यततेर्भावसाधनो नङ्प्रत्ययः ... इत्यादिः ।

यद्यपि महाभाष्यमिदं शेखर-मनोरमा-शब्दकौस्तुभादिप्रौढग्रन्थापेक्षया भाषिकदृष्टचा सरलं तथापि काव्यकाराणामालोके तु जटिलं गभीरञ्चेति श्रीहर्षमाघप्रभृतीनां कवीनां कविताभिरवबुध्यते । महाकविः श्रीहर्षो नैषधकाव्यस्य द्वितीयसर्गे कुण्डिननगर्याः सुरक्षाव्यवस्थां महाभाष्यस्य दुर्गस्वरूपेण सह तोलयन् फणिभाषितभाष्यस्य जाटिल्यं पुष्णाति,तदेवं-

परिखावलयच्छलेन या न परेषां ग्रहणस्य गोचरः ।
फणिभाषितभाष्यफक्किका विषमा कुण्डलनामवापिता ॥ (नैषधः -२-९५)

तेनैव प्रकारेण महाकविर्माघः शिशुपालवधमहाकाव्यस्य द्वितीये सर्गे श्रीकृष्णस्य वाचो महाभाष्यसदृशानि गभीराणि सन्तीत्युक्त्वा महाभाष्येण सह तानि तोलयति । स पुनश्च शिशुपालवधमहाकाव्यस्य द्वितीये सर्ग एव- यथा महाभाष्यस्य पश्पशाह्निकं सूत्रवार्त्तिकादिभिर्व्याकरणाङ्गसङ्केतैः पूरितं तथैव राजनीतिरपि पश्पश(गुप्तचर) प्रभृतिभिरङ्गैर्भाव्यं तदभावे सा न विभातीत्येवं सङ्केतयति-

अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना ।
शब्दविद्येव नो भाति राजनीतिरपस्पशा ॥ (शिशुपाल.२-११२)

व्याकरणमहाभाष्यस्य महत्त्वं गायन् श्रीगिरिधरशर्मा चर्तुवेदी प्राह - “मूलतो महाभाष्यं चेदं वार्त्तिकानामेव व्याख्यानमिति शक्यते वदितुम्, वार्त्तिकमेवावलम्ब्य भाष्यस्य सर्वत्र प्रवृत्तिदर्शनात् । स्वातन्त्र्येण सूत्राणि तु क्वचिदेव व्याख्यातानि । एषु सूत्रेषु वार्त्तिकानि न दृश्यन्ते तत्र भाष्यमपि प्रायेण न दृश्यत एव । इदमपि वैलक्ष्यण्यं व्याकरणेऽनुसन्धेयं यदन्यत्र मीमांसावेदान्तन्याययोगदर्शनप्रभृतिषु ग्रन्थेषु भाष्यस्य व्याख्यानभूतं वार्त्तिकमिह तु

वार्त्तिकव्याख्यानभूतं भाष्यमिति । अस्यापि इदमेव तात्पर्यं यत् सूत्रेषु उक्तानुक्तदुरुक्तचिन्ता कात्यायनस्याभीष्टाऽभूदिति । उपर्युक्तेन वचनेन यद्यपि महाभाष्यं वार्त्तिकव्याख्यानमेव तथापि महाभाष्यकारः सूत्रव्याख्यानेऽपि न न्यूनतां कृतवानिति वृद्धिरादैच् (पा.सू.१-१-१), न धातुलोप आर्धधातुके (पा.सू.१-१-४), तुल्यास्यप्रयत्नं सवर्णम् (पा.सू.१-१-९), स्थानिवदादेशोऽनल्विधौ (पा.सू.१-१-५६), न पदान्तद्विर्वचन....(पा.सू.१-१-५८), अचः परस्मिन् पूर्वविधौ (पा.सू.१-१-५७) इत्यादिसूत्राणां महाभाष्यकारेण कृतेन व्याख्यानेन प्रमाणितं भवति ।

## १.४.३ पाणिनीयव्याकरणे नैपालं योगदानम्

नेपालस्थाः कतिपये वैयाकरणाः सूत्रक्रममाश्रित्यापि ग्रन्थान् रचितवन्तः । कतिपयैस्तु पाणिनीयव्याकरणसम्बद्ध इतिहासे, प्रसिद्धवैयाकरणविषये च ग्रन्था विरचिता वर्तन्ते । नेपालसंस्कृतविश्वविद्यालये प्राध्यापनरताः कतिपये प्राध्यापका विद्यावारिधेर्माध्यमेनापि पाणिनीये व्याकरणे महद्योगदानं कृतवन्तः सन्ति । एतेषां सर्वेषां चर्चाऽत्र क्रमशो विधीयते ।

### १.४.३.१ नैपालका वैयाकरणास्तेषां कृतयश्च

नेपालदेशोद्भवाः प्राचीना अर्वाचीनाश्च दशाधिका वैयाकरणा अनुसन्धातारश्च पाणिनीयं व्याकरणं तट्टीकां वा संलक्ष्य व्याकरणग्रन्थान् विरचितवन्तः सन्ति । प्राचीनवैयाकरणस्य उमानाथार्यालस्य- सारकौमुदी तथा वामनकौमुदी, पृथ्वीपालसेनस्य प्रासादकौमुदी, नीलदेवस्य अष्टाध्याय्या लक्ष्यनिर्देशिका टीकाः प्रभृतयः कतिपये ग्रन्था अद्यपर्यन्तं सङ्ग्रहालय एव गुम्फिताः सन्ति । महेन्द्रसंस्कृतविश्वविद्यालयस्थापनपूर्वं नेपालतः प्रकाशिताः पाणिनीयव्याकरणसम्बद्धा ग्रन्थाः प्रतिसंस्कृतासिद्धान्तकौमुदी-कौमुदीसार-श्लोकसिद्धान्तकौमुद्येव दृश्यन्ते । अनुसन्धात्रा लोकमणिदाहालेन स्वकीये व्याकरणशास्त्रेतिहासनामके स्वशास्त्रीयनिबन्धे स्वकृतीनां विवरणे 'अष्टाध्याय्या लघुवृत्तिः' इत्युल्लिखिता अस्ति परं तच्चर्चाऽन्यत्र न समुपलभ्यते । तथैव शिवराजाचार्यकौण्डिन्न्यायनः स्वकृतीनां विवरणे 'अष्टाध्याय्या अत्यावश्यकगणपाठादिः' इति पुस्तकं समुल्लिखति परं तस्या अपि चर्चा अन्यत्र नोपलभ्यते ।

अत्र एतेभ्यो व्याकरणशास्त्रसम्बद्धव्याख्यानग्रन्थकर्त्रोः सुकृतिदत्तपन्त-सोमनाथसिग्द्यालयोः परिचयः तयोः कृतिगतवैशिष्टचञ्च सङ्क्षेपेण प्रस्तूयते ।

क) वृत्तिकारः सुकृतिदत्तपन्तः

नेपालदेशस्थे बाग्लुङमण्डले १८८०-१९३० विक्रमाब्दमभितः स्थितिमान् श्रीमान् सुकृतिदत्तपन्तः पाणिनीयाष्टकसम्बद्धं 'वृद्धयादिसूत्राष्टकविवृत्ति'नामकमष्टाध्यायीव्याख्यानं विरचितवान् । तद्व्याख्यायां नेपालसंस्कृतविश्वविद्यालये प्राध्यापनरतेन श्रीमाधवशरणोपाध्यायवर्येण विद्यावारिधिरूपाधिर्लब्धः । परं व्याख्यातुस्तद्ग्रन्थोऽधुना सुलभो न दृश्यते । कतिपयनैपालसंस्कृतग्रन्थकारपरिचयनामके विवरणसङ्कलनात्मके पुस्तके सङ्कलकः शिवराजाचार्यकौण्डिन्न्यायनः सुकृतिदत्तपन्तं परिचाय्यापि वृद्धयादिसूत्राष्टकविवृतिविषये न किमप्युल्लिखितवान् । सुकृतिदत्तपन्तविरचितं कार्तवीर्योदयनामकं महाकाव्यमनुसन्धित्सुर्जनता विद्यापीठे दाङे प्राध्यापनरतः योगराजशर्मा सुकृतिदत्तपन्तस्य परिचयप्रदानसन्दर्भेऽस्य - वृद्धयादिसूत्राष्टकविवृति-लघुशब्देन्दुशेखर-परिभाषेन्दुशेखरटीकाञ्चेति व्याकरणसम्बद्धं ग्रन्थत्रयं समुल्लिखति, परमनुसन्धाता माधवशरणोपाध्यायवर्यस्तु- परिभाषेन्दुशेखरटीकेयं सुकृतिदत्तेन न रचिता, छात्राणामध्ययनसौविध्याय कस्याप्यज्ञातस्य वृत्तिकारस्य वृत्तिः स्वहस्तलिप्यामनेन सारितैव । परं पूर्ववर्त्तिनोऽनुसन्धातारः पाण्डुलिपेरवलोकनं विनैव टीकेयं सुकृतिदत्तस्येति कथितवन्तः, समये व्यतीते सैव भणितिः प्रचलिताऽभूदित्याह । सुकृतिदत्तपन्तस्य काव्यानि, न्याय-साहित्य-तन्त्र-दर्शन-ज्यौतिषादिविषयसम्बद्धा ग्रन्थाश्च समुपलभ्यन्ते ।

सुकृतिदत्तपन्तः संस्कृतव्याकरणे महान् विद्वानासीदिति तद्रचितवृद्धयादिसूत्राष्टक-विवृतेरवलोकनेन ज्ञायते । तेन वृद्धिरादैजिति सूत्रव्याख्यानेन प्रारब्धा वृत्तिः ७८ पृष्ठान्तं व्याख्यायापि पूर्णा न जाता । यद्यप्यनेन एकं सूत्रमपि न पूरितं तथापि यद् व्याख्यातं तद् महाभाष्य-मञ्जूषा-शेखर-मनोरमादीनां मतमन्थनेन तत्र नागेशमतखण्डनेन च पाण्डित्यपूर्णया पद्धत्या कृतं प्रतीयते । अत्रानेन वृद्धिरादैजिति सूत्रस्य संज्ञात्वमुपपाद्य प्रसङ्गतः शब्दस्वरूपमपि स्वकीयशैल्याऽभिधाय नागेशोक्तः पदपदार्थयोस्तादात्म्यसम्बन्धः पूर्णतः खण्डितः । तथैव कोशस्थाः शब्दाः शब्दपरका भवन्ति वाऽर्थपरका इत्यपि प्रासङ्गिकरूपेण विचारितः । तेनैव प्रकारेण नागेशेन परिभाषेन्दुशेखरे यदागमपरिभाषायाः कृता व्याख्याऽत्र खण्डिता वर्तते । वृत्तिकारोऽयं प्रकृतग्रन्थ एवमङ्गलमाचरति-

भाष्यादूर्ध्वं कुणिप्रभृतिभिर्वामनाद्यैस्ततोऽर्वाक्
सूत्रे दाक्षीसुतमुनिकृते कल्पितैवास्ति वृत्तिः ॥
न्यूनाधिक्यं किमपि मनसा तत्र सञ्चिन्त्य नूत्नां
वृत्तिं कुर्वे पृथुहितकरीमिष्टिवाक्यादियुक्ताम् ॥ (वृद्धयादि.३)

भाष्यं भाष्यत एव सम्प्रति जनैर्नैवार्थतो गम्यते ।
विच्छिन्ना पदमञ्जरीविरहिता नो काशते काशिका ॥
कौमुद्यो निखिलाश्च शेखरपथाद् वक्राः सनक्रापगाः ।
तुल्यास्तच्छिशवः श्रयन्तु सुभगां वृत्तिमदीयामिमाम् ॥ (वृद्ध्यादि.४)

वृद्ध्यादिसूत्राष्टकविवृतौ स्थितैरेतैर्मङ्गलपद्यैः- पाणिनीयसूत्रोपरि कुणिप्रभृतिभिः कृते व्याख्याने न्यूनाधिक्यमस्ति, महाभाष्यं सर्वे बोद्धुं न पारयन्ति, विच्छिन्नाभिः पदमञ्जर्यादिभिर्युक्ता सती काशिकापि न चकास्ति, शेखरपथानुयायिनी कौमुद्यपि भ्रष्टा सती नक्रमुखं प्राप्ता विद्यते अतो व्याकरणबुबोधयिषूणां हितकारिणीं विशालां वृत्तिमिमामहं कुर्व इति कारिकार्थः । विश्वेश्वरसूरिकृतस्य व्याकरणसिद्धान्तसुधानिधिनामकस्य व्याख्यानग्रन्थस्य शैल्या रचिते प्रकृतग्रन्थे न सूत्रव्याख्यानपरा विषया एव विवृता अपि तु अर्थसम्बद्धानि नैकान्यपि विषयवस्तूनि समुपस्थाप्य व्याख्यातानि सन्ति । सकृतिदत्तपन्तवर्यो- मम व्याख्यानेन कोऽपि तुष्यतु वा कुप्यतु तत्र नास्ति चिन्तालेशोऽपीत्येवं प्राह-

मुनित्रयोक्तिर्मम वन्दनीया व्याख्यानुकुल्यादभिनन्दनीया ॥
व्याख्यातृवाणी मिलतां विरुन्धां प्रमोदशोकौ न हि मे सकीर्तेः ॥ (वृद्ध्यादि.८)

प्राध्यापकस्य माधवशरणोपाध्यायस्य सौजन्येन सम्पादितेयं वृत्तिरद्यावधि पुस्तकाकारे प्रकाशिता न दृश्यते ।

ख) सिद्धान्तकौमुद्याः प्रतिसंस्कर्ता सोमनाथसिग्द्यालः

सोमनाथसिग्द्यालस्य जन्म जगन्नाथोपाध्याय-लक्ष्मीलीलादेव्योर्ज्येष्ठपुत्ररत्नत्वेन विक्रमीये १९४१ तमे वर्षे काष्ठमण्डपेऽभूत् । स गेह एव पितुरक्षरारम्भं कृत्वा नेपालराजकीयसंस्कृत-प्रधानपाठशालातः प्राथमिकमध्ययनं प्रपूर्योच्चाध्ययनार्थं वाराणस्यामवस्थितं क्विन्सकलेजं गतवान् । तस्माद् न्यायवैशेषिकं विषयमवलम्ब्याचार्यकक्षां समुत्तीर्णवाँश्च । आचार्याध्ययनं प्रपूय नेपालं प्रत्यागत्य काष्ठमण्डपे स्थितायां राजकीयसंस्कृतपाठशालायाम्, त्रिचन्द्रविद्यापीठे चानेन पाठितम् । पाठनकाल एव नेपालीभाषायां संस्कृते चानेन विंशत्यधिकानि पुस्तकानि रचितानि तेभ्योऽद्यपर्यन्तं द्वादशाधिकानि तु प्रकाशितानि सन्तीति तज्जीवनवृत्तलेखको नरेन्द्रप्रसाइवर्यः सूचयति । सिग्द्यालमहोदयेन नेपालसर्वकारतः पण्डितराजपदव्यपि प्राप्ता । दैववशादसौ २०२९ विक्रमवत्सरस्याश्विनमासस्य २८ गते पञ्चत्वमवाप्तवान् ।

वैयाकरणधुरीणस्य सिग्द्यालस्य प्रतिसस्कृता सिद्धान्तकौमुदी प्रक्रियाक्रमेण विरचितायाः सिद्धान्तकौमुद्याः प्रतिसंस्कारोऽस्ति । ग्रन्थमिमं कारिकाभागेन, मूलभागेन, प्रक्रियाभागेन, विवृतिभागेन, प्रयोगभागेन, प्रश्नभागेन च षड्धा विभक्तुं शक्यते । अत्र दीक्षितकल्पितप्रकरणेभ्यो भिन्नानि पदप्रकरणम्, सर्वनामप्रकरणम्, विशेषणप्रकरणम्, लिङ्गप्रकरणम्, वचनप्रकरणम्, विभक्तिप्रकरणमित्यादीनि सन्ति । व्यावहारिकीं प्रायोगिकीञ्च वस्तुस्थितिमात्मसात्कृत्य उचितया प्रक्रियया, शब्दरूपसाधनादिप्रदर्शनेन, उपशेषपरियोजनया प्रयोगार्थं प्रश्नादिनिदर्शनविधिना विरचितेयं प्रतिसंस्कृता कौमुदी दीक्षितस्य सिद्धान्तकौमुदीं सामान्यतः परिष्कुरुत इति सिद्धान्तकौमुदीप्रतिसंस्कृता सिद्धान्तकौमुद्योस्तुलनात्मकमध्ययन-मिति शीर्षके कृतविद्यावारिधिकः शालिग्रामसुवेदीवर्यः सूचयति ।

विक्रमस्य २०१५ वर्षे रचयित्वा २०१७ तमे वत्सरे प्रकाशितेयं कौमुदी समयोपयोगिनी, बहुपरिश्रमसाध्या,उपकारिणी च प्रतीयते । तात्कालिकस्य गुरोर्हेमराजस्य सत्प्रेरणया निर्देशनेन च रचितेयं प्रतिसंस्कृता पूर्ववर्तिभिर्व्याख्यातृभिः प्रकल्पितप्रकरणक्रमतो भिन्ना अभ्यासादिभिर्युक्ता चास्तीत्यस्य महद् वैशिष्टचमस्याः । प्रतिसंस्कारः किमर्थमावश्यक इत्यत्र सिग्द्यालो ग्रन्थारम्भे प्राह-

सिद्धान्तकौमुदीर्भट्टैर्निबद्धा प्रक्रियाध्वना ।

प्रतिसंस्क्रियते लोकदृष्टचा व्युत्पत्तिहेतवः ॥ (प्रतिसं. कारि.३)

अर्थाद् लोकहिताय, शास्त्रव्युत्पत्तिप्रदर्शनाय च प्रकृतो ग्रन्थः प्रतिसंस्कारपूर्वकं निबद्धचत इति व्याख्यातुराशयः ।

पाणिनीयव्याकरणस्य सरलीकरणोद्देश्येन विरचितोऽयं प्रक्रियाक्रमिको प्रतिसंस्कृता सिद्धान्तकौमुदीग्रन्थो व्याकरणे स्थितान् विषयान् सरलीकरणार्थं प्रयतमानः प्रतीयते तथापि शास्त्रीयविषयान् शास्त्रीयशैल्या समुपदेशनेन प्रौढपाण्डित्यशैल्याः संरक्षणपरः, पूर्णतः संस्कृतनिष्ठश्चास्तीति शारदाप्रभाव्याख्यानतो भिन्न इति निश्चितः, यतो हि शारदाप्रभाव्याख्या कतिपये स्थाने शास्त्रीया तथापि बहुत्र लोकानुकूलभाषानिबद्धा, सूत्रप्रक्रियाक्रमयोः सङ्गमयित्री, व्याकरणग्रन्थान्तरापेक्षया सरलतमा, षड्मासावधिः ५३६ पाणिनीयसूत्राणि तदन्तर्गतां प्रक्रियाञ्च पाठयित्वा तदनन्तरमेव समग्राष्टाध्यायीपाठननिर्देशनपरेति द्वयोर्महदान्तर्यम्, तथापि सिद्धान्तकौमुद्याः प्रकरणादिषु परिष्कारः, भाषाव्याकरणयोरेकीकरणेन पाठनम्, स्थाने स्थानेऽभ्यासनिदर्शनम्, ग्रन्थस्योपरि

मूलभागन्यासेन तदधस्ताद् विवृतिन्यासः, प्राथमिकाध्ययनाय प्रक्रियाक्रमप्रयोगादिषु कतिषु विषयेषु द्वयोः साम्यं प्रतीयत इत्येतानि वैशिष्ट्यानि शारदाप्रभाकारेण प्रतिसंस्कृतासिद्धान्तकौमुदीतो गृहीतानीत्यभ्युपेयम् ।

अत्र नेपालदेशोद्भवानां वैयाकरणानां तेषां पाणिनीयव्याकरणसम्बद्धानां कृतीनाञ्च विवरणमधो दीयते-

तालिका-सङ्ख्या : २ नैपालका वैयाकरणास्तेषां व्याकरणविषयकाः कृतयश्च

| क्रमः | वैयाकरणाः | कृतयः |
|---|---|---|
| १ | उमानाथशर्मा अर्याल | सारकौमुदी, वामनकौमुदी, लघुशब्देन्दुशेखरविवृतिः |
| २ | पृथ्वीपालसेनः | प्रासादकौमुदी (पाणिनीयव्याकरणे प्रक्रिया ग्रन्थः) |
| ३ | नीलदेवः | अष्टाध्याय्या लक्ष्यनिर्देशिका टीका |
| ४ | सुकृतिदत्तपन्तः | वृद्धयादिसूत्राष्टकविवृतिः, लघुशब्देन्दु-परिभाषेन्दुटीका |
| ५ | सोमनाथसिग्द्यालः | प्रतिसंस्कृता-सिद्धान्तकौमुदी |
| ६ | छविलालपोखेलः | कौमुदीसारः |
| ७ | सुरेशझा | श्लोकसिद्धान्तकौमुदी (द्वादशसाहस्री) |
| ८ | हरिप्रसादशर्माचार्यः | अष्टाध्यायी (शारदाप्रभा व्याख्यामहिता) |
| ९ | लोकमणिदाहालः | अष्टाध्याय्या लघुवृत्तिः, प्रतिसंस्कृता मध्यसिद्धान्तकौमुदी, बालकौमुदी |
| १० | शिवराजाचार्यकौण्डिन्न्यायनः | अष्टाध्याय्या अत्यावश्यकगणपाठादिः |

स्रोतः लोकमणिदाहालस्य *संस्कृतव्याकरणशास्त्रेतिहासः*

## १.४.३.२ पाणिनेरैतिह्यान्वेषका नैपालका गवेषकाः

महामुनेः पाणिनेरैतिह्यान्वेषणेऽपि नैपालकाः कतिपये गवेषका योगदानं प्रददुः । तेषु योगिनरहरिनाथ-शालग्रामशर्मा-(शिवराजपोखेल)टीकारामपन्थी-रामचन्द्रपौडेलप्रभृतयः प्रमुखाः सन्ति । योगिनरहरिनाथः पाणिनिमाश्रित्य कमपि ग्रन्थं तु न ग्रथितवान् तथापि ‘अस्माकं देशदर्शनम्’ (हाम्रो देशदर्शन) नामके पुस्तके पाणिनेः सम्भावितं तपस्थलं रुरुक्षेत्रमासीदिति समुल्लिखितवान्, पृ. ३४) अर्घाखाँचीमण्डलाभिजनः शालग्रामशर्मवर्यस्तु ‘पाणिनितपोभूमिः (पणेना) (२०१५) नामके पुस्तके ‘पाणिनीयाः’ इति पदमपभ्रंशी भूयः कालान्तरे पणिना-पणेना

इत्यभूदिति सङ्केतितवान् । तदेव मतं प्राध्यापकष्टीकाराम-पन्थीवर्योऽपि स्वकीये 'कतिपये जनश्रुतयः' (केही जनश्रुतिहरु-२०४२) नामक ऐतिह्यनिबन्ध ऊररीकुरुते, परं शारदाप्रभाटीकाकारो हरिप्रसादशर्माचार्यस्तु मतमिदं न स्वीकुरुते । शारदाप्रभाटीकाया भूमिकाखण्डे स पाणिनिशब्दस्यापभ्रंशत्वेन 'पणेना' न जातोऽपि तु आकाशात् पतितस्य जलस्य सञ्चयित्र्याः काष्ठद्रोण्याः स्थानीयं नाम तदिति प्राह । याथार्थ्यं यत् किमपि स्यात् पाणिनेर्जीवनवृत्तान्वेषणेऽनेनोपकृतं प्रतीयते । म्याग्दीजनपदाधिजनो गोविन्दप्रसादशर्मा नामकोऽपरो गवेषकः पाणिनेरैतिह्ये पाणिनीयव्याकरणस्यैतिहासिकं परिशीलनं नामकं लघुनिबन्धं रचितवान् परमयं पाणिनेर्नेपालदेशोद्भवत्वे न कुत्रापि चर्चां कृतवान् । एवंविधा पाणिनेरैतिह्ये गवेषणपराणां केषाञ्चिद् विदुषां नामानि तेषामैतिह्यग्रन्थाश्चात्र समुल्लिख्यन्ते-

तालिका-सङ्ख्या : ३ पाणिनेरैतिह्यान्वेषका नैपालका गवेषकाः

| | | |
|---|---|---|
| १. | शालग्रामशर्मा | पाणिनितपोभूमिः (पणेना) |
| २. | टीकारामपन्थी | कतिपये जनश्रुतयः (केही जनश्रुतिहरु) |
| ३. | गोविन्दप्रसादसापकोटा | पाणिनीयव्याकरणस्यैतिहासिकं परिशीलनम् |
| ४. | रामचन्द्रपौडेलः | संस्कृतव्याकरणं तथा वैयाकरणपरिचयः |

स्रोत : हरिप्रसादशर्माचार्यस्य *अष्टाध्यायीशारदाप्रभाव्याख्याया* भूमिका

एतेभ्योऽन्येऽपि वैयाकरणाः पाणिनीयव्याकरणं तद् विवृतिग्रन्थमधिकृत्य वैयाकरणसिद्धान्त-कौमुदीं लक्ष्य, प्रसिद्धवैयाकरणमाधृत्य, नेपालसंस्कृतविश्वविद्यालयस्थे पाठ्यक्रमे स्थितान् पाणिनीयाष्टाध्यायीसम्बद्धान् तद्व्याख्यानग्रन्थाञ्चाधृत्य टीकारामपन्थी-माधवशरणोपाध्याय-स्थानेश्वरगौतम-मतिप्रसादढकाल-मोहनपोखेल-रमेशप्रसादढकाल-शालिग्रामसुवेदि- नीलमणि-ढुङ्गाना-भवानीशङ्करभट्टराई- पुरुषोत्तमखतिवडा-सुमनखतिवडाप्रभृतयो विंशत्यधिका वैयाकरणाः पाठ्यपुस्तकसहयोगिनो व्याकरणसम्बद्धान् लघुग्रन्थान् टीकाग्रन्थाँश्च विरचितवन्तः सन्ति । पाठ्यपुस्तकलेखनप्रकाशनैः सहानुसन्धाने संलग्नानां विदुषां योगदानमप्युल्लेखनीयं वर्तते । वैयाकरणनेपालनामकेन विदुषा पाणिनीयव्याकरणाध्येतृभ्यः प्रतिवर्षं पुरस्कारप्रदानायाक्षयकोषस्थापनेन कृतं योगदानमपि महनीयं वर्तते ।

उपरि नामनिर्दिष्टाः पाणिनीयव्याकरणसम्बद्धाष्टीकाग्रन्थाः, पाणिनीयसूत्रव्याख्यात-ग्रन्थाः, पाणिनेर्जीवनवृत्तसम्बद्धाश्च ग्रन्थाः शारदाप्रभाव्याख्यानेनाङ्गीकृतां शैलीशिल्पम्, व्याकरणशिक्षणस्याधुनिकीं पद्धतिम्, सूत्रप्रक्रियाक्रमसङ्गमनशैलीञ्च न सङ्केतयन्ति ।

### १.४.३.३ नेपालतः सञ्जाता व्याकरणविषयका विद्यावारिधयः

नेपालदेशस्थ-महेन्द्रसंस्कृत- (नाम परिवर्तनेनाधुना नेपालसंस्कृतविश्वविद्यालयो जातः) विश्वविद्यालये कार्यरता अष्टौ प्राध्यापका अद्यावधि पाणिनीयव्याकरणसम्बद्धेषु विभिन्नेषु शीर्षकेषु विद्यावारिध्युपाधिमधिगतवन्तो दृश्यन्ते । ते पाणिनीयव्याकरणसम्बद्धेषु केषु केषु विषयेषु विद्यावारिध्युपाधिं लब्धवन्तस्तैः शारदाप्रभाव्याख्यानेनाङ्गीकृता पाणिनीयसूत्रपाठनस्या-धुनिकी प्रायोगिकी च पद्धतिरङ्गीकृता न वा ? शारदाप्रभाव्याख्यायाः प्रकाशनकालतः पश्चाद् (वि.सं.२०६० तः पश्चात्) रचितेषु शोधनिबन्धेषु अस्याश्चर्चा विद्यत नवेति परीक्षणार्थमत्र प्राग्वर्त्तिनां शोधप्रबन्धानां सारः प्रस्तूयते-

क. विष्णुप्रसादशर्मदेवकोटावर्यः *प्रक्रियाकौमुदीसिद्धान्तकौमुद्योः समीक्षात्मकमध्ययनम्* (२०५२) इति नामके विद्यावारिधिशोधप्रबन्धे- रूपावतार-प्रक्रियाकौमुद्यादयः प्रक्रियाग्रन्थास्तथा काशिकादयसूत्रक्रमिकग्रन्था अपि पाठ्यक्रमे निर्धारणीया भवन्तीति प्राह । पुनश्च तेषां प्रचारप्रसारावाश्यका इति शोधनिष्कर्षेऽसौ प्राह । शारदाप्रभातः पूर्वं विरचितेन प्रकृतशोधप्रबन्धेन सूत्रप्रक्रियाक्रमसम्बद्धानां अध्ययनपद्धतावनागतानां ग्रन्थानामपि पठनपाठने निर्धारणमावश्यकमित्युक्त्वा तेषां महत्त्वं प्रकाशितं तथाप्यनेन पाणिनीयव्याकरणस्य सरलीकरणाय, शब्दशास्त्रीयव्याख्यान- तत्त्वनिर्धारणाय, तादृशतत्त्वसापेक्षैर्ग्रन्थसमीक्षणाय, पाणिनीयव्याकरणप्रायोगिकीकरणाय च कोऽपि प्रयासः कृतो न दृश्यते ।

ख. माधवशरणोपाध्यायवर्यः *सुकृतिदत्तपन्तस्य वृद्धयादिसूत्राष्टकविवृतिः* (२०५६) इति नामके विद्यावारिधिशोधप्रबन्धे- नैपालकेनाष्टाध्यायीवृत्तिकृता सुकृतिदत्तपन्तमहोदयेन वृद्धिरादैच्प्रभृतीनां पाणिनीयसूत्राणामष्टाध्यायीक्रमेण व्याख्या कृता, सा च व्याख्या नैपालकव्याख्यानपरम्परायाः प्रौढतरा, पाण्डित्ययुक्ता, सर्वोत्तमा प्राप्तिरस्तीति शोधनिष्कर्षे प्राह । विद्वद्धुरीणः सुकृतिदत्तपन्तो महाभाष्यप्रमाणान्युपन्यसन् लघुशब्देन्दुशेखरे स्थितानि कानिचन मतानि स्वग्रन्थे खण्डितवान् । वृद्धयादिसूत्राष्टकविवृतेर्लक्ष्यं पाणिनीयव्याकरणपरम्परायां नवीनमतसंस्थापकस्य नागेशभट्टाचार्यस्य मतखण्डनमस्ति चेत् प्रकृतायाः शारदाप्रभाव्याख्यायास्तु व्याकरणसरलीकरणमिति द्वयोर्लक्ष्यं भिन्नम् । शारदाप्रभाया रचनापूर्वं विरचितायां वृद्धयादिसूत्राष्टकविवृतौ सूत्रप्रक्रियाक्रमसङ्गमस्य,

शब्दशास्त्रीयव्याख्यानतत्त्वनिर्धारणस्य, प्रक्रियासरलीकरणस्य वा कोऽपि प्रयासो न दृश्यते, अतः शारदाप्रभाकारेणास्मात् शोधप्रबन्धात् शैलीशिल्पादीन्यपि नानुकृतानीति निश्चितम् ।

ग. लीलानाथपौडेलवर्यः *व्याकरणदृष्ट्या हरिकेलिमहाकाव्यस्य समीक्षणम्* (२०६४) इति नामके स्वकीये शोधप्रबन्धे हरिकेलिमहाकाव्ये समागतानि सकलपदानि पाणिनीयव्याकरणदृष्ट्या निर्वक्ति, अतोऽत्र पाणिनीयव्याकरणसरलीकरणसम्बद्धान्युद्देश्यानि नाधिगतानि ।

घ. आनन्दप्रसादघिमिरेवर्येण *प्रातिशाख्यपाणिनीयव्याकरणयोस्तुलनात्मकमध्ययनम्* (२०६७) इति नामके विद्यावारिधिशोधप्रबन्धे वाजसनेयिप्रातिशाख्यपाणिनीयसूत्रयोस्तुलनां कृत्वा तयोः साम्यवैषम्ये प्रदर्शिते । पुनश्च महामुनिना पाणिनिना प्रातिशाख्यव्याकरणतः कति सूत्राणि यथावत् कति च शब्दभावादिपरिवर्तनेन समुद्धृतानीत्यसौ शोधनिष्कर्षे सूचितम् । अत्र शब्दशास्त्रीयव्याख्यानतत्त्वचर्चा, तत्सापेक्षग्रन्थसमीक्षणं पाणिनीयव्याकरण-सरलीकरणञ्च न प्राप्यते, अतः प्रकृतशोधप्रबन्धरचने घिमिरेवर्यस्य शोधः न सहाय्यः ।

ङ. शालिग्रामसुवेदिवर्यः *सिद्धान्तकौमुदीप्रतिसंस्कृतासिद्धान्तकौमुद्योस्तुलनात्मकमध्ययनम्* (२०६७) इति नामके विद्यावारिधिशोधप्रबन्धे श्रीमतो भट्टोजिदीक्षितस्य सिद्धान्तकौमुद्यास्तथा नैपालकस्य वैयाकरणस्य श्रीसोमनाथसिग्द्यालवर्यस्य प्रतिसंस्कृता-सिद्धान्तकौमुद्या विषयान् परस्परं तोलयति, ततो द्वयोर्ग्रन्थयोः स्थितान् साधर्म्यवैधर्म्यान्, प्रतिसंस्कृतायां स्थितं नैयून्यं तेन कृतान् परिष्काराञ्च शोधनिष्कर्षे प्रकाशयति । सोमनाथेन कृताः परिष्काराः सुवेदिवर्यः प्रकृते शोधप्रबन्ध उदाहरति । सिद्धान्तकौमुद्यामविद्यमाना नैके विषया अत्र सन्तीति सङ्केतयति च तथाप्यस्य शोधस्य प्रमुखं लक्ष्यं न पाणिनीयव्याकरणस्य सरलीकरणम्, अत एव शब्दशास्त्रीयव्याख्यानतत्त्व-निर्धारणम्, तत्त्वसापेक्षैरनुसन्धेयग्रन्थविवेचनञ्च शारदाप्रभा व्याख्यासमीक्षणपरस्य प्रकृतशोधप्रबन्धस्य विषयोऽस्माद् भिन्नः ।

च. मतिप्रसादढकालवर्यः *लोपागमवर्णविकारदृष्ट्या वैयाकरणसिद्धान्तकौमुद्यन्तर्गतानां विधिसूत्राणां तत्रोपात्तानामुदाहरणानाञ्च समीक्षणम्* (२०६७) इति नामके विद्यावारिधिशोधप्रबन्धे वर्णलोपवर्णागमविधायकानि पाणिनेर्विधिसूत्राणि तत्रोपात्तो-दाहरणानि च विविक्तवान् । तस्मिन् क्रमे प्रातिशाख्यकृद्भिर्निर्धारितान् वर्णागमवर्णलोपनियमान् महामुनिः पाणिनिः प्रत्याहारानुबन्धरीतिप्रयोगेण परिचस्कार ।

कतिषु स्थानेषु नियमनैयून्यमपि पूरितवानिति प्राह । पाणिनीयसूत्रव्याख्याने प्रक्रियाक्रमेणोत्कर्षताप्राप्तेऽस्मिन् युगे सूत्रक्रमस्यापेक्षया पाणिनीयव्याकरणस्य कतिपयेषु सूत्रनियमेषु बहुषु सूत्रेतरनियमेषु च वैभिन्येषु तयोः स्वरूपसंरचनात्मकमैक्यं न प्राप्यते, सूत्रनियमापेक्षितानि सकलोदाहरणानि च प्रक्रियाग्रन्थेषु न प्राप्यन्त इति तस्य शोधनिष्कर्षः । मतिप्रसादढकालस्यानुसन्धानेऽपि पाणिनीयव्याकरणसरलीकरणरीतिः, शब्दशास्त्रीयव्याख्यानतत्त्वनिर्धारणम्, तदनु ग्रन्थसमीक्षणञ्च न प्राप्तमिति प्रकृतानुसन्धानस्यावश्यकतां सुतरां प्रतिभाति ।

छ. सरस्वतीपोखेलवर्या *पाणिनीयव्याकरणजैनेन्द्रव्याकरणयोः समीक्षात्मकमध्ययनम्* (२०६७) इति नामके विद्यावारिधिशोधप्रबन्धे पाणिनीयजैनेन्द्रव्याकरणयोस्तुलनां कृत्वा जैनेन्द्रव्याकरणकारेण श्रीमता देवनन्दिना पाणिनीयव्याकरणतः कियानंश समुद्धृत इति प्रस्तुता । जैनव्याकरणे कति नूत्ना विषयाः समुपन्यस्ता सन्तीति शोधनिष्कर्षे सा प्राह । पोखेलवर्याया अनुसन्धानेन जैनेन्द्रव्याकरणतः प्राप्ता उपलब्धयः, तयोः साम्यवैषम्यानि, तयोर्वैशिष्टचानि च निष्कर्षत्वेन प्रस्तुतानीति शारदाप्रभाया अध्ययनं प्रकृताध्ययनाद् भिन्नो विषयः ।

ज. खेमराजखनालवर्यः- *पालपाधिपतिना पृथ्वीपालसेनेन विरचितायाः प्रासादकौमुद्याः सविवेचनं सम्पादनम्* (२०७०) नामके विद्यावारिधिशोधप्रबन्धे प्रथमतोऽप्रकाशितां प्रासादटीकां सम्पाद्य ग्रन्थकारस्य पृथ्वीपालसेनस्य सम्पूर्णम्, ग्रन्थसम्पादकस्य मनीषेर्वीरभद्रस्य च सामान्यं परिचयमुल्लिखितवान् । ततः पश्चात् पाणिनीयाष्टाध्याय्याः सरलीकरणोद्देश्येन सङ्क्षेपीकरणलक्ष्येन च रचितायाः प्रासादटीकायाः कौमुदीसदृशत्वं प्रक्रियाक्रमिकत्वम्, मध्यसिद्धान्तकौमुदीतुल्यत्वं स्वरूपत्वञ्चास्तीति शोधनिष्कर्षे निरूपितवान् । खनालमहोदयेन कृतेनैतेन सङ्केतेन व्याकरणबुबोधयिषुभ्यो रचितेयं टीका सरला सुबोध्या चास्तीति ज्ञायते, तथाप्येतेन शब्दशास्त्रसम्बद्धानि व्याख्यानतत्त्वानि न प्रकाशितानि । सामान्यत एव सूत्रव्याख्यानाद् व्याकरणसरलीकरणाधुनिकपद्धतिप्रयोगोऽपि न कृत इति प्रतीयतेऽतः शब्दशास्त्रीयव्याख्यानतत्त्वसापेक्षैर्विधीयमानं प्रकृतमध्ययनमावश्यकमित्यनुभूयते ।

नेपालदेशस्थे नेपालसंस्कृतविश्वविद्यालये कार्यरता भोजराजपन्त-गुरूप्रसादसुवेदी-भोलानारायणरेग्मी-कपिलदेवमण्डलप्रभृतयो दशाधिका अनुसन्धातारः संस्कृतव्याकरण-

सम्बद्धेष्वनेकेषु विषयेषु भारतीयसंस्कृतविश्वविद्यालयतो विद्यावारिध्युपाधिमधिगतवन्तो दृश्यन्ते । तेषां सर्वेषां विवरणोल्लेखः पृथगनुसन्धानविषयः । अतोऽत्र पाणिनीयाष्टाध्यायीं तद्व्याख्यानग्रन्थाँश्चाधृत्य नेपालसंस्कृतविश्वविद्यालयतो विद्यावारिध्युपाधिप्राप्तानां पूर्वोक्तानां विदुषां नाम, तेषामनुसन्धानशीर्षकञ्चाधः स्थितायां तालिकायां प्रस्तूयते-

तालिका-सङ्ख्या : ४ नेपालतः सञ्जाता व्याकरणविषयका विद्यावारिधयः

| क्रमः | अनुसन्धाता | विद्यावारिधेः शीर्षकम् |
|---|---|---|
| १. | विष्णुप्रसाददेवकोटा | प्रक्रियाकौमुदीसिद्धान्तकौमुद्योः समीक्षात्मकमध्ययनम् (२०५२) |
| २ | माधवशरण उपाध्याय | सुकृतिदत्तपन्तस्य वृद्ध्यादिसूत्राष्टकविवृतिः (२०५७) |
| ३ | लीलानाथपौडेलः | व्याकरणदृष्ट्या हलिकेलिमहाकाव्यस्य समीक्षणम् (२०६४) |
| ४. | आनन्दप्र. घिमिरे | प्रातिशाख्यपाणिनीयव्याकरणयोस्तुलनात्मकमध्ययनम् (२०६७) |
| ५. | शालिग्रामसुवेदी | सिद्धान्तकौमुदीप्रतिसंस्कृतासिद्धान्तकौमुद्योस्तुलनात्मकमध्ययनम् (२०६७) |
| ६. | मतिप्र. ढकाल | लोपागमवर्णविकारदृष्ट्या वैयाकरणसिद्धान्तकौमुद्यन्तर्गतानां विधिसूत्राणां तत्रोपात्तानामुदाहरणानाञ्च समीक्षणम् (२०६७) |
| ७. | सरस्वतीपोखेल | पाणिनीयव्याकरणजैनेन्द्रव्याकरणयोः समीक्षात्मकमध्ययनम् (२०६७) |
| ८ | खेमराजखनालः | पालपाधिपतिना पृथ्वीपालसेनेन विरचितायाः प्रासादकौमुद्याः सविवेचनं सम्पादनम् (२०७०) |

स्रोतः - अनुसन्धानप्रकाशः (वर्ष-६, पूर्णाङ्क-३, २०७० आषाढः)

## १.४.४ शारदाप्रभामधिकृत्य सञ्जातं पूर्वकार्यम्

प्राप्तविद्यावारिधिकेन प्राध्यापकेन हरिप्रसादशर्माचार्येण रचितेयमष्टाध्यायी शारदाप्रभा व्याख्या महेन्द्रसंस्कृतविश्वविद्यालयेन २०६० तमे वैक्रमाब्दे प्रकाशिता । व्याख्यायामस्यां केनापि वैयाकरणेन समालोचकेन च कोऽपि समीक्षणमूलको ग्रन्थः स्वतन्त्रलेखो वाऽद्यावधि न प्रकाशित इति स्वयं व्याख्याकारो ज्ञापयति । प्रकृतव्याख्यानग्रन्थस्याग्रभागे महेन्द्रसंस्कृतविश्व-विद्यालयीयेन तात्कालिकोपकुलपतिपदमलङ्कुर्वाणेन पूर्णचन्द्रढुङ्गेलमहोदयेन

लिखिता सङ्क्षिप्ता भूमिका, शिक्षाध्यक्षवर्येण नारायणकुमाराचार्येण लिखितं प्रकाशकीयमेव प्रस्तुतव्याख्याने सञ्जातं पूर्वकार्यमस्ति । अत्र क्रमशस्तेषामुल्लेखो विश्लेषणञ्च विधीयते ।

### १.४.४.१ पूर्णचन्द्रोपाध्यायढुङ्गेलः

शारदाप्रभाव्याख्यानमण्डिताया अष्टाध्याय्या भूमिकायां ढुङ्गेलवर्यो लिखति- व्याकरणशास्त्रे लब्धख्यातिना कृतविद्यावारिधिकेन प्राध्यापकेन हरिप्रसादशर्माचार्यमहोदयेन सर्वेषां व्याकरणशास्त्राध्येतॄणां कृते निर्मिते‘ऽष्टाध्यायीशारदाप्रभाव्याख्यामहिता’ इति नामकेऽस्मिन् ग्रन्थे सूत्रक्रमस्य प्रक्रियाक्रमस्य च सङ्गमो वर्तते । अतः स्वपूर्ववर्तिव्याकरण-व्याख्यानग्रन्थैरगतार्थोऽयमपूर्वो ग्रन्थः स्वल्पेनैव कालेन व्याकरणपरिज्ञानायाऽतीवोपयोगी भवन् वैयाकरणसमाजे सुप्रतिष्ठितो भवेदिति मन्ये । न केवलं स्वदेशीय एव किन्तु वैदेशिकोऽपि सश्रद्धमधिजिगांसुरेतद्ग्रन्थमाध्यमेन शीघ्रं व्याकरणप्रक्रियां ज्ञातुं प्रभवति । अहमिच्छाम्येता-दृशस्य ग्रन्थस्य प्रचारप्रसारौ स्याताम् । व्याकरणशास्त्रमध्येतुकामः प्रत्येकं जनो लाभान्वितश्च भवेदिति ।

ढुङ्गेलवर्योऽत्र सूत्रप्रक्रियाक्रमयोः सङ्गममवलोकयति । व्याख्यानमिदं यद्यपि प्राथमिके स्वरूपे प्रक्रियाक्रमिकं तथापि द्वितीये त्वष्टाध्यायीक्रमिकमेव, अर्थात् षण्मासेष्वध्येतव्येऽत्रत्ये प्रारम्भिके व्याख्याने कौमुदीसदृशः प्रक्रियाक्रमो वर्तते चेत्तदनन्तरं सूत्रक्रमेण पठनीये द्वितीये खण्डे तु सूत्रक्रमेण पठनीयान्युदाहरणानि प्रत्युदाहरणानि प्रासङ्गिकानि वार्त्तिकादीनि च निर्धारितानि सन्ति ।

महाभाष्यकार इव हरिप्रसादशर्माऽप्यत्र परामर्शमूलां शैलीं गृह्णाति । तस्मिन् क्रमे प्रथमं प्रश्नं कृत्वा स्वयमेवोत्तरयति । पुनश्च विशेषज्ञानाय सम्बद्धसूत्रभाष्यमवलोकनीयमित्यपि सूचयति ।

ढुङ्गेलवर्यस्य कथनं वस्तुतो नास्य समीक्षणं विश्लेषणञ्च । किन्तु ग्रन्थप्रकाशनकाल उपकुलपतिमहोदयेन प्रदत्ता शुभा सम्मतिरेव । प्रायः शुभसम्मतौ ग्रन्थस्य सकारात्मकपक्ष एव प्रस्तूयते यैः कैरपि । अत्रापि शुभाऽऽशंसनप्रसङ्गे व्याकरणमहत्त्वं प्रतिपादयता लेखकेन एकस्मिननुच्छेदे प्रस्तुता प्रकृतग्रन्थसम्बद्धा धारणैव । अत्र समग्रेण ग्रन्थो न समीक्षितो न व्याख्यातश्च, अतोऽस्य समीक्षणविश्लेषणतोलनमावश्यकमनुभूयते ।

### १.४.४.२ नारायणकुमाराचार्यशर्मा

प्राध्यापको नारायणकुमारशर्माऽयं शारदाप्रभाव्याख्याया भूमिकाखण्डे प्रकाशकीयमिति शीर्षके प्रस्तुतग्रन्थः किमर्थं प्रकाश्यत इति जिज्ञास्य स्वयमेवोत्तरयति एवं नवशिक्षायोजनायां प्रवर्तितायां प्रथमसंस्कृतसङ्कायनप्रमुखः (डीन) अम्बिकाप्रसादोऽधिकारी प्राध्यापकस्य हरिप्रसादशर्मण आचार्यस्य तादृशीं व्याकरणाध्यापनरीतिं विज्ञाय नितरां प्रभावितः प्रमुदितश्च आचार्यमहोदयाय लिपिबद्धं करोतु वयं मुद्रयित्वा शैलीमिमामन्यत्रापि प्रसारयेम इत्युक्तवानभूत् । स्वयं प्रक्रियाक्रमानुसारिणीं वैयाकरणसिद्धान्तकौमुदीं तद्व्याख्यानभूतप्रौढ-मनोरमा-शब्देन्दुशेखरादिग्रन्थानधीत्य नव्यव्याकरणाचार्यपरीक्षामुत्तीर्णोऽप्यत्रभवानष्टाध्यायी-क्रमेणाध्ययनाध्यापनयोः प्रवृत्तः सूक्ष्मेक्षिकया पाणिनीयाष्टकं पर्यालोचयदिति ।

हरिप्रसादशर्माचार्येणाध्यापनक्रमेऽङ्गीकृतया सूत्रप्रक्रियाक्रमसङ्गमशैल्या तात्कालिका विद्वाँसः प्रभाविता दृश्यन्ते । विदुषां व्याख्यानग्रन्थप्रणयनप्रेरणया हरिप्रसादशर्मणा कृतिरसौ पूर्णतां नीतेति प्रकाशकस्य मन्तव्याज्ज्ञायते । हरिप्रसादः प्रायशः प्रक्रियाग्रन्थानधीतवानासीत् । तथापि तेन सूत्रक्रमो हि चितः । तत्र सूत्रक्रमस्य वैशिष्ट्यमेव कारणमिति निश्चयेन वक्तुं शक्यम् । प्रक्रियाक्रममनुसृत्याधीतवान् छात्रोऽप्यष्टाध्यायीक्रमेणाध्यापने प्रवृत्तेस्तमेव क्रमं सरलं मनुते । अतो नारायणकुमारेण कृता टिप्पणी सोद्देश्या सान्दर्भिकी च प्रतीयते ।

नारायणकुमारो तद्भूमिकायामेव पुनर्लिखति- वैयाकरणाः शिक्षका ग्रन्थमेनं शङ्कानिवारणसमर्थं मन्यन्त इति । ग्रन्थस्यास्य लेखको बहुत्र शङ्कासमाधानमपि करोति । छन्दसि पुनर्वस्वोरेकवचनम् (पा.सू.१-२-६१) इत्यत्रान्यत्र च सूत्रप्रयोजनप्रतिपादनावसरे शङ्काः समुत्थाप्य परामर्शशैल्या समाधानमपि प्रस्तौति, अतस्तस्य कथनं समुचितं प्रतिभाति ।

नारायणकुमारशर्माऽसौ ग्रन्थमिमं व्याकरणशास्त्रीयगूढतमग्रन्थिभेदनसमर्थं मनुते, अतः सारल्यमस्य व्याख्यानस्य प्रथमं वैशिष्ट्यमिति तस्य निष्कर्षः । निश्चयमेव हरिप्रसादेन कृता व्याख्या सरला वर्तते । सामान्यायां बोधगम्यायाञ्च भाषायां निबद्धैषा विवृतिः सूत्रार्थप्रतिपादयित्री, शास्त्राणामुदाहरणनिदर्शिनी, संशयच्छेत्री च वर्तत इत्यत्र नास्ति कस्यापि विमतिः ।

एतैः कथनैर्हरिप्रसादस्य व्याख्या सरला, सुबोधा चास्तीति वक्तुं शक्यते । तथाप्येतत् प्रकाशकीयमन्तव्यमेव न तु शारदाप्रभायाः समीक्षणम् । विश्वविद्यालयेन प्रकाशिते बृहदाकारके प्रस्तुतव्याख्यानग्रन्थेऽस्या आवश्यकतानिर्धारणायोपस्थापितो विचार एव ।

तथाप्यत्र मन्तव्यकारेण प्रसङ्गवशाद् यावन्तो विचाराः प्रस्तुता यत् टिप्पणञ्च कृतं तत् सर्वं परिपक्वं विद्वत्तापूर्णं लघुविश्लेषणमस्तीति निश्चप्रचम् । सारतो दीर्घकालावधि एकस्मिनेव विद्यापीठे सहाध्यापयितृत्वेन स्थितेन विदुषा कृतं मूल्याङ्कनमस्तीत्यवधेयम् ।

एतेषूद्धरणेषु स्थिता विषया हरिप्रसादशर्माचार्यप्रणीतायाः शारदाप्रभाव्याख्यायाः पोषका अवश्यमेव सन्ति किन्त्वपर्याप्ताः । अतः शारदाप्रभायां कानि कानि वैशिष्टचानि सन्तीति निर्धारणं तत्र शिक्षाशास्त्रसम्बद्धाधुनिकपद्धतिपर्यालोचनं समग्रतः शब्दशास्त्रीयव्याख्यानतत्त्व-दृष्टचाऽस्या व्याख्यायाः समीक्षणञ्चावश्यकमित्यनुभूय शोधप्रबन्धोऽयं प्रकल्पितः ।

## १.५ अध्ययनस्यौचित्यं महत्त्वञ्च

हरिप्रसादशर्मणा रचितं प्रस्तुतमष्टाध्यायीव्याख्यानं पाणिनीयसूत्राणामाधुनिकं प्रायोगिकञ्च विश्लेषणं मन्यते । आसन्नपञ्चसहस्रवत्सरात् पूर्वं रचितानां प्राचीनतमानां पाणिनीयसूत्राणां नवीनतमया सरलया च शैल्या कृतमेतद् व्याख्यानमाधुनिकसमाजेऽभ्यस्तानां कृतेऽवश्यमेव सहयोगं करिष्यति । जटिलं व्याकरणं सरलीकर्तुं प्रकृतग्रन्थव्याख्यात्रा का युक्तिः प्रयुक्ता ? पाणिनीयव्याकरणाध्यापने व्याख्यात्रा प्रस्ताविता द्विविधा सरणिः समुचिता न वा ? व्याख्यात्रा हरिप्रसादेनाधिकारानुवृत्तिनिदर्शनपराणां पाणिनीयसूत्राणां पूर्वापरसम्बन्धस्थापने प्रयुक्तो विधिः समुचितो नवेत्यपि परीक्षणीयः । एतैर्वैशिष्टचैर्युक्तः प्रस्तुतप्रबन्ध उत्तरवर्त्तिनां कृतेऽपि निदर्शनं भवितुं शक्नोति । इतः पूर्ववर्त्तिनः संस्कृतव्याकरणसम्बद्धा एकाऽपि टीका शब्दशास्त्रीयव्याख्यानतत्त्वदृष्टचा समीक्षिता न प्राप्यते, अतोऽननुसन्धितेषु विषयेषु प्रस्तुतमध्ययनमावश्यकमित्यनुभूयते ।

## १.६ शोधविधिः

हरिप्रसादशर्माचार्यप्रणीतस्याष्टाध्यायीव्याख्यानस्याध्ययनविश्लेषणार्थं प्रथमतः पाणिनी-याष्टाध्याय्या व्याख्यानानुसन्धानसम्बद्धानां सामग्रीणां सङ्कलनं विहितम् । एतस्मिन् क्रमे पुस्तकालयीयो विधिरवलम्बितः । ततः सङ्कलितसामग्रीणां व्यवस्थापन-विभजन-विश्लेषण-सूचीनिर्माण-शुद्धतापरीक्षण-सामान्यीकरणञ्च कृतम् । सङ्कलितसामग्रीणां विश्लेषण-समीक्षणार्थं सामान्यतो वर्णनात्मकविश्लेषणात्मकयोः शोधविध्योरवलम्बनं विहितम् । जीवनीव्यक्तित्वयोरध्ययनार्थं जीवनवृत्तपरकप्रभावपरकविध्योरवलम्बनं तथा कृतिपक्षस्याध्ययनार्थं समीक्षणात्मकविश्लेषणात्मकतुलनात्मकपद्धतीनामुपयोगः कृतः । अत्र

पाणिनीयसूत्रव्याख्याने तदुपरि रचितायाः शारदाप्रभायाश्च समीक्षणे विशेषतो निगमनविधेरवलम्बनं विहितम् । तथैव प्रकृतानुसन्धात्रा प्रस्तुतग्रन्थसमीक्षणे प्रस्तावितानां-अधिकारानुवृत्त्योर्निदर्शनम्, विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम्, शङ्कामुद्भाव्य समाधानम्, रूपसिद्धिप्रक्रियावबोधः, वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम्, अन्याचार्यमत-सङ्ग्रहः, प्रकरणसङ्घटनं शैलीशिल्पञ्चेति सप्तानां व्याख्यानतत्त्वानामुपयोगः कृतः ।

अत्र पादटिप्पणीप्रयोगे सन्दर्भग्रन्थसूचीनिर्माणे च लेखकपृष्ठपद्धतिरवलम्बिता वर्तते ।

## १.७ अध्ययनस्य क्षेत्रं सीमा च

प्रस्तुतं समीक्षणमूलकमध्ययनं शारदाप्रभाव्याख्यायामाश्रितमस्ति, अतोऽन्येषां शब्दशास्त्रीयव्याख्यानग्रन्थानामध्ययनाभावोऽस्याः सीमा मन्तव्या । तथैव हरिप्रसादशर्मा चार्यस्यान्येषां साहित्यिककृतीनां साहित्यिकभाषिकलेखानाञ्च विश्लेषणसमीक्षणाभावः, शारदाप्रभाया अपि सारल्यविमर्शसूत्रप्रक्रियाक्रमसङ्गमपरीक्षणप्रभृतिषु वैशिष्टयपूर्णेषु क्षेत्रेष्वप्रवेश अस्याः सीमा ज्ञेया । शारदाप्रभाव्याख्यानमधिकृत्य सञ्जातं प्रस्तुतमध्ययनं प्रकृतग्रन्थस्य प्राथमिकसमीक्षण-विश्लेषणमस्ति, अतोऽत्र शोधविधिरिति शीर्षके निर्धारितैः शब्दशास्त्रीयैः सप्तभिर्व्याख्यानतत्त्वैर्ग्रन्थोऽयं समीक्ष्यते । रूपसाधनप्रक्रियाया निरूपणे प्राच्यनव्यव्याख्यातृषु दृष्टानां मतभेदानां समुद्भावनम्, शारदाप्रभाकारस्याधुनिकशैलीशिल्प-प्रयोगपरीक्षणञ्च प्रसङ्गतो विधीयत इति तदेवास्याध्ययनक्षेत्रम् ।

## १.८ शोधप्रबन्धस्य रूपरेखा

शोधप्रबन्धोऽयमधोऽङ्कितेष्वध्यायेषु शीर्षकादिषु च विभक्तोऽस्ति-

| *अध्यायः* | *शोधशीर्षकम्* |
|---|---|
| प्रथमः | शोध-परिचयः । |
| द्वितीयः | शारदाप्रभाव्याख्यातुर्व्यक्तित्वकृतित्वपरिचयः । |
| तृतीयः | व्याख्यानसिद्धान्तनिरूपणम् । |
| चतुर्थः | शारदाप्रभायाः संज्ञा-सन्धि-सुबन्तप्रकरणसमीक्षा । |
| पञ्चमः | शारदाप्रभायास्तिङन्त-कृदन्त-कारकप्रकरणसमीक्षा । |
| षष्ठः | शारदाप्रभायास्तद्धित-समासप्रकरणसमीक्षा । |
| सप्तमः | शोधप्रबन्धोपसंहारनिष्कर्षोपलब्धयः । |

## द्वितीयोऽध्यायः

# शारदाप्रभाव्याख्यातुर्व्यक्तित्वकृतित्वपरिचयः

### २.१. विषयपरिचयः

प्रकृतेऽध्याये शारदाप्रभाव्याख्यातुर्हरिप्रसादशर्मण ऐतिह्यं प्रस्तूयते । ततः तद् योगदानं किं ? तेन रचिता भाषिकसांस्कृतिकलेखाः के ? तद्रचितानि काव्यानि कानि ? तस्य शोधप्रबन्धः कस्मिन् विषय आसीत् ? शारदाप्रभाटीकाया रचनं प्रकाशनञ्च कथमभूत् ? शारदाप्रभायाष्टीकायाः किं वैशिष्टचमित्यादिषु विषयेषु चर्च्यते ।

### २.२ शारदाप्रभाव्याख्यातुर्हरिप्रसादशर्मण ऐतिह्यम्

प्रस्तुतशीर्षके शारदाप्रभाकारस्य हरिप्रसादशर्माचार्यस्य जन्म, पारिवारिकीपृष्ठभूमिः, अध्ययनम्, विवाहः, सन्ततयः, सेवा, धार्मिक्यास्थादयो विषयाः समुद्भाव्यन्ते ।

### २.२.१ पारिवारिकी पृष्ठभूमिः

नेपालस्य संस्कृतविद्वत्परम्परायां सोमनाथसिग्द्याल-सुकृतिदत्तपन्त-कुलचन्द्रगौतम-पद्मप्रसादभट्टराई-हेमराजपाण्डेप्रभृतयः सुचिन्तकाः मनीषयः समभूवन्, तेषामेव परम्परायां पद्मप्रसादस्य शिष्यत्वेनन,आधुनिकवैयाकरणत्वेन, संस्कृतमहाकवित्वेन च हरिप्रसादशर्माचार्यस्य नाम सादरं स्मर्यते ।

### २.२.२ जन्म

आचार्यवंशीयो हरिप्रसाद आचार्यः १९८९ तमे वैक्रमाब्दे पौषमासस्य प्रथमदिवसे बृहस्पतिवासरे सप्तम्यां तिथौ दुर्गाप्रसादशर्मणो धर्मपत्न्या हीराकुमारीदेव्या गर्भतो द्वितीयपुत्ररत्नत्वेनाजनि ।[१] तस्य जन्म प्युठान-(हरिप्रसादस्तु प्रतिष्ठानमित्युल्लिखति) मण्डलान्तर्गते खैरानामके ग्रामेऽभूत् । अस्य ज्येष्ठभ्राता गुरूप्रसादोऽन्ये मान्याश्च संस्कृतमर्मज्ञा आसन्नतस्ते शर्मान्तं ब्राह्मणं विद्यादिति स्मृतिवचनमनुपालयन्तः स्वनामान्ते शर्मेत्युपनाम योजयन्ति स्म, तादृशि संस्कारे समुत्पन्नो हरिप्रसादोऽपि परम्परां निर्वहन् हरिप्रसादशर्माचार्योऽभूत् । एतेषां कौण्डिन्यगोत्रीयाणामाचार्याणां पूर्वजा जुम्लामण्डलान्तर्गते दुल्लुग्रामे निवसन्ति स्म । तेषु सच्चिदानन्द-सदानन्दादयः पूर्वजाः प्युठानमण्डलस्थे खैरानामके ग्रामे समागतवन्तः । तेषां सन्ततित्वेनासौ जनिं लेभे ।[२]


---

१. हरिप्रसादशर्माचार्येण (२०७० तमे वैक्रमे) प्रदत्तसूचनानुसारेण ।

२. पूर्ववत् ।

### २.२.३ सहोदर्यः

दुर्गाप्रसादशर्मणः पञ्च सन्ततय आसन् । तासु त्रयः पुत्रा द्वे पुत्र्यावभूवन् । हरिप्रसादस्याग्रजो गुरूप्रसादोऽनुजः कृष्णप्रसादश्चाभवन् । तथैव हेरमादेवी-मुगादेवी नाम्न्यौ द्वे भगिन्यावपि अभवताम् । दुर्गाप्रसादस्यैताः सर्वाः सन्ततयोऽधुना दिवङ्गताः ।[३] दुर्गाप्रसादहीरा- कुमारीदेव्योः सन्ततीनां विवरणमधः प्रस्तूयते-




### २.२.४ शिक्षा

हरिप्रसादशर्मणा सप्तवर्षीये वयसि स्वगृह एव स्वाग्रजाद् गुरूप्रसादादक्षरारम्भः कृतः । ततः प्रतिवेशिना आत्मरामशर्मणा गुरुणा सह वर्णमालाज्ञानं कृत्वा सप्तशतीचण्डी-गीताप्रभृतयो धार्मिका आध्यात्मिकाश्च ग्रन्थाः समधीताः । उपनयनानन्तरमपि २००३ विक्रमीयवत्सरान्तं तेनैव सह समग्रां शुक्लयजुर्वेदसंहितामधीत्य स्वाग्रजेन गुरूप्रसादेन सह लघुकौमुदीं प्रारभ्यः नेत्रविनोद-मुक्तिनाथशर्मभ्यां सार्धं मध्यसिद्धान्तकौमुद्याः प्रारम्भिकप्रकरणान्यधीतानि । एतेन खैराग्राम एव आत्मराम-गुरूप्रसादाभ्यां सह प्रारम्भिकमध्ययनं कृतमिति 'श्री ५ वीरेन्द्रशुभराज्याभिषेकम्' इति नामके काव्ये कविः स्वयं सूचयति । एवम्-"या खलु पूर्वं प्रतिवेशिना श्रीमताऽऽत्मरामशर्मणा सुतनिर्विशेषं सस्नेहमङ्कमारोप्य वर्णमालाप्रभृतिर्यजुर्वेदावधि पाठितम्, ततश्च पूज्येनाग्रजेन श्रीगुरूप्रसादशर्माचार्येण समवबोधितां व्याकरणप्रवेशसरणिं सभर्तृकं मानकोटात् खिदिमग्रामं गत्वा भोज्यवस्त्रच्छात्रावासादिसुव्यवस्थायुतायां श्री हरिहरसंस्कृतपाठशालायां प्रविश्य मदीयाध्ययनपृष्ठभूमिं कारितवान् ।"[४] श्री ५ वीरेन्द्रशुभराज्याभिषेकम् नामके काव्ये स्थितेनैतेन भूमिकावाक्येनासौ मानकोटेऽवस्थितात् प्राथमिकगुरुकुलादुत्तरोत्तराध्ययनार्थं हरिहरपाठशालां गत इति बुध्यते । तत्र घनश्यामशर्मणा सह चत्वारि वर्षाणि मध्यसिद्धान्तकौमुदी-रघुवंशमहाकाव्यादीनि पठितवान्, एतदनन्तरं २००६ तमे विक्रमेऽसौ वाराणसीं गत्वा तत्र श्रीकृष्णमणित्रिपाठी-पद्मप्रसादभट्टराईप्रभृतिभिर्गुरुभिः सह वैयाकरणसिद्धान्तकौमुदी-न्यायसिद्धान्तमुक्तावलीप्रभृतीन् ग्रन्थान् समधीत्य २०१० तमे

---

३. हरिप्रसादशर्माचार्यस्य ज्येष्ठपुत्रेण शालिग्रामेण (२०७३ तमे विक्रमे) प्रदत्तसूचनानुसारेण ।

४. हरिप्रसादशर्माचार्यः, *श्री ५ वीरेन्द्र शुभराज्याभिषेकम्*, दाङ : लेखक, (२०३१) पृ. भूमिकायाम् ।

विक्रमवत्सरे नव्यव्याकरणविषयं गृहीत्वा काशिस्थराजकीयसंस्कृतमहाविद्यालयतः सम्पूर्णमध्यमापरीक्षां समुत्तीर्णवान् ।[५] प्रथमश्रेण्यां मध्यमापरीक्षां समुत्तीर्य सोत्साहितोऽसौ नव्यव्याकरणविषयमेव गृहीत्वा तत्रैव शास्त्रिकक्षायां प्रवेशं गृहीतवान् । तत्र भूपनारायणझा-मुरलीधरमिश्रप्रभृतिभिर्वैयाकरणैः सह निरन्तरमधीत्य २०१३ तमे वैक्रमाब्दे तस्माद् महाविद्यालयादेव द्वितीयश्रेण्यां शास्त्रिकक्षां समुत्तीर्णवान् । ततोऽसौ वाराणसेयसंस्कृत-विश्वविद्यालये नव्यव्याकरणविषय आचार्याध्ययनाय पञ्जीकरणं कृत्वा दाङमण्डलं प्रत्यावर्त्य जनतामहाविद्यालये शिक्षणार्थं प्रार्थितवान् । तदानीं शास्त्रिसमुत्तीर्णा जना अपि दुर्लभा आसन्, अतो व्याकरणपाठनकुशला महाविद्यालयेऽध्यापनावसरं प्राप्नुवन्ति स्म । वाराणस्यां शास्त्रिकक्षान्तं निरन्तरमधीतो हरिप्रसादः संस्कृतव्याकरणपाठने भाषायाञ्च कुशल आसीत् अतस्तत्रत्येन प्राचार्येणाध्यापनाय स नियोजितः, अतोऽत्रत्येऽध्यापनावकाशे वाराणसीं गत्वा तत्रत्यै रघुनाथशर्मप्रभृतिभिर्गुरुभिः सह शेखरमनोरमादीन् ग्रन्थान् पठन्नसौ २०१५ तमे वैक्रमाब्दे द्वितीयश्रेण्यामाचार्यमुत्तीर्णवान् ।[६] जनताविद्यापीठेऽध्यापयता आङ्ग्लभाषाऽ-ध्ययनमप्यावश्यकमित्यनुभूय वाराणसेयसंस्कृतविश्वविद्यालतः २०१७ तमे वैक्रमे विशिष्टपत्रत्वेन पूर्वमध्यमाया आङ्ग्लपत्रमप्युत्तीर्णम् ।[७] अनन्तरञ्च २०३८ तमे वर्षे 'पाणिनीयव्याकरणे शिक्षणपद्धतिविमर्शः' इति शीर्षके विद्यावारिधेरध्ययनाय सम्पूर्णानन्दसंस्कृत विश्वविद्यालयसमक्षमावेदितवान्, विक्रमस्य २०४२ तमे वर्षे तदुपाधिं लब्धवाँश्च ।[८]

### २.२.५ व्रतबन्धः

गर्भाष्टमेऽष्टमे वापि ब्राह्मणस्योपनयनमिति महर्षेर्मनोर्वचनस्यानुपालकेन पित्रा दुर्गाप्रसादशर्मणा जन्मतोऽष्टमे वर्षे विक्रमस्य १९९७ तमे वत्सरे खैराग्राम एव हरिप्रसादस्योपनयनं कारितम् । तस्य पितृष्वसृपुत्रेण रामप्रसादशर्मणाऽस्मै गायत्रीमन्त्रः श्रावितः ।[९]

### २.२.६ अध्यापनम्

काशीस्थराजकीयसंस्कृतमहाविद्यालयतः २०१३ तमे विक्रमाब्दे शास्त्रिकक्षां समुत्तीर्य नेपालं प्रत्यावर्तितो हरिप्रसादः २०१४ आश्विनतो दाङमण्डलस्थिते जनतामहाविद्यालयेऽ-

---

५. हरिप्रसादशर्माचार्येण (२०७० तमे वैक्रमे) प्रदत्तसूचनानुसारेण ।
६. हरिप्रसादशर्माचार्यस्य आचार्यकक्षायाः प्रमाणपत्रानुसारेण । ।
७. हरिप्रसादशर्माचार्यस्य विशिष्टपूर्वमध्यमायाः प्रमाणपत्रानुसारेण ।
८. हरिप्रसादशर्माचार्यस्य विद्यावारिधेः प्रमाणपत्रानुसारेण ।
९. हरिप्रसादशर्माचार्येण (२०७० तमे वैक्रम) प्रदत्तसूचनानुसारेण ।

ध्यापनार्थं नियुक्तः, ततस्तेन २०१७ वैक्रमाब्दस्याश्विनमासान्तं निरन्तरं पाठितमिति तात्कालिकः प्राचार्यः श्रीरामेश्वरशर्मामजगैया प्रमाणीकरोति ।[१०] तदनन्तरं जनतामहाविद्यालयात् प्राप्तावकाशोऽसौ प्युठानमण्डलान्तर्गतं खैराग्रामं प्राप्य तत्रत्ये मुक्तिमाध्यमिकविद्यालये कतिचिद् वर्षाणि नेपालीभाषां पाठितवान्, परं संस्कृतव्याकरण आचार्यसमुत्तीर्णोऽसौ माध्यमिकविद्यालये नेपालीपाठनाय नैच्छत् । अतः संस्कृतविद्यालये नव्यव्याकरणविषयपाठनार्थं प्रार्थयमानः २०२१ तमे वैक्रमाब्दे काष्ठमण्डपं प्राप्य पण्डितश्रीसोमनाथसिग्द्यालवर्यमभ्यर्थितवान् । सिग्द्यालमहोदयेन राजधान्यां स्थिते रानीपोखरीनामके संस्कृतविद्यालयेऽस्मै नियुक्तिप्रदानाय भाद्रकृष्णद्वितीयायां हस्ताक्षरितं पत्रमेकं लिखितम् ।[११] ततोऽसौ भाद्रमासस्य १९ दिनाङ्काद् रानीपोखरीसंस्कृतप्रधानपाठशालायां संस्कृतव्याकरणपाठनार्थं नियोजितः, परन्त्वेषस्तत्रापि बहुकालं न व्यतीतवानिति रानीपोखरीविद्यालयेन २०२१ वैक्रमाब्दे पौषमासे लिखितात् प्रशंसामूलकधन्यवादपत्राद् ज्ञायते ।[१२] तस्याः पाठशालाया अवकाशप्राप्तोऽसौ महाविद्यालये पाठनार्थमभ्यर्थमानः पुनः पद्मप्रसादभट्टराईगुरोः समीपं प्राप्तः । भट्टराईगुरुणाऽस्य वैदुष्यम्, पाठनशैलीम्, सौजन्यादिकञ्च प्रशंस्य 'भजे भव्यं दिव्यं किमपि परमं नीलिममहः' शीर्षकीभूतं सुन्दरं पत्रमेकं लिखितम् ।[१३] एतावद्भिर्विद्वद्भिः प्रशंसितेषु नियुक्तिप्रदानायानुरुद्धेष्वप्यसौ २०२४ विक्रमाब्दं यावत् कुत्रापि नियोजितो न दृश्यते । ततोऽसौ २०२४ तमे वैक्रमाब्दे, आषाढमासे, ३ दिनाङ्के त्रिभुवनविश्वविद्यालयस्य कीर्तिपुरस्थे केन्द्रीयविद्यापीठे तस्य च संस्कृतविभागे संस्कृताध्यापनाय नियुक्तः ।[१४] तत्र वर्षद्वयं संस्कृतं पाठयित्वा दाङमण्डलस्थं जनतामहाविद्यालयं प्रत्यावर्त्य पाठनायैच्छत् । तदानीं नेपालसंस्कृतविश्वविद्यालय-स्थापनसन्दर्भः प्रचलन् आसीत् । विश्वविद्यालयप्रस्तावका अपि सहयोगिनमन्वेषमाणा आसन्, तत्क्रमे हरिप्रसादः स्थानान्तरितुमैच्छत् । अतस्तदीयवाञ्छया तत्रत्यावश्यकतया च कीर्तिपुरस्थेन प्राचार्येण तत्र सम्पर्कः कृतः । तदानीं जनताविद्यापीठे दिगम्बरझा प्राचार्य आसीत् । हरिप्रसादस्य व्याकरणवैदुष्येन प्रतिभया च परिचितो झामहोदयः, अन्ये गुरवः पूर्णचन्द्रढुङ्गेल-रामेश्वरमजगैयाप्रभृतयोऽपि कीर्तिपुरस्थस्य प्राचार्यस्य प्रस्तावं

---

१०. तात्कालिकप्राचार्येण रामेश्वरमजगैयावर्येण (२०१९ तमे विक्रमे) प्रमाणीकृतपत्रानुसारेण ।

११. सोमनाथसिग्द्यालेन (२०२१ तमे विक्रमे) लिखितपत्रानुसारेण ।

१२. रानीपोखरीसंस्कृतविद्यालयेन (२०२१ तमे विक्रमे) लिखितपत्रानुसारेण ।

१३. पद्मप्रसादभट्टराईमहोदयेन (२०२१ तमे विक्रमे) लिखितपत्रानुसारेण ।

१४. प्राचार्यसिद्धिनाथगौतममहोदयेन (२०३५ तमे विक्रमे) प्रमाणीकृतपत्रानुसारेण ।

सहर्षमङ्गीकृतवन्तः । ततस्त्रिभुवनविश्वविद्यालयस्य केन्द्रीयविद्यापीठतः प्रत्यावर्तितोऽसौ २०४५ विक्रमवत्सरस्य श्रावणमासस्य ८ दिनाङ्कं यावत् तत्राध्याप्य ९ दिनाङ्के महेन्द्रसंस्कृतविश्वविद्यालयान्तर्गतं दाङमण्डलस्थं केन्द्रीयविद्यापीठं स्थानान्तरितो भूत्वा २०४६ विक्रमवत्सरस्य पौषमासस्य ११ दिनाङ्कं यावत् तत्र प्राचार्यपदमङ्कृतवान् । एतन्मध्ये प्राचार्यत्वेन महेन्द्रसंस्कृतविश्वविद्यालयस्य कार्यकारिपरिषत्सदस्योऽभूदिति विश्वविद्यालयीयः कर्मकरो भगवान् पोखेलः सूचयति ।[१५] अनन्तरं २०४७ वैक्रमाब्दस्य श्रावणमासस्य २५ दिनाङ्के प्राचार्यपदात् त्यागपत्रं दत्वा तत्रैव चत्वारि वर्षाण्यध्याप्य २०५१ तमे वर्षे ततोऽपि स्थानान्तरणं गृहीत्वा वाल्मीकिविद्यापीठं गतवान् । ततोऽपि २०५६ वैक्रमवर्षस्य वैशाखमासे २७ गतेऽनिवार्यावकाशं लब्धवान् ।[१६] वाल्मीकिविद्यापीठादवकाशं लब्ध्वा पुनरपि संस्कृतव्याकरणपाठनार्थं देवघट्टं गत्वा हरिहरसंस्कृतपाठशालासमीपं निवासव्यवस्थां कृत्वा तत्रत्यान् छात्रान् वर्षमेकं संस्कृतव्याकरणं निःशुल्कमध्याप्य तदानीमेव गायत्रीपुरश्चरणमपि कृत्वा पाठनकार्यादवकाशं गृहीतवान् ।[१७]

## २.२.७ राजपरम्परायामास्था श्रद्धा च

हरिप्रसादो यदा जनिं लेभे तदा नेपाले शाहवंशीयराज्ञस्त्रिभुवनवीरविक्रमशाहदेवस्य शासनकाल आसीत् । तदा समुत्पन्नः प्रवर्द्धितश्चायं वेदपुराणोपनिषत्सु स्थितै राजप्रशस्तिमूलकैः प्रसङ्गै राजानः शूरा, दानशीलाः कर्मवीराश्च भवन्तीति काव्यादिषु स्थितैर्वचनैस्तेषां भगवद्रूपवर्णिताभिः कथाभिश्च प्रभावितः, घुणाक्षरन्यायेन राजसंस्थां प्रत्यनुरक्तश्च । अष्टाध्याय्या- राजाहसखिभ्यष्टच् (पा.सू. ५-४-९१), राजदन्तादिषु परम् (पा.सू.२-२-३१), राजनि युधि कृञः (पा.सू. ३-२-९५), राजश्वसुराद्यत् (पा.सू.४-१-१३७) प्रभृतीनि राजपदयुतानि सूत्राणि पठता, तद्गुरुणा राज्ञां शौर्यमौदार्यं गुणगौरवञ्च श्रावयता निसर्गतो नितरां प्रमुदितः प्रभावितश्चाभूत् । न केवलं नैपालकैरपि तु भारतीयैरपि विद्वद्भिर्नेपालदेशोद्भवानां पृथ्वीनारायण-बहादुरशाहादीनां शाहवंशीयराजानां तद्वंशजानां वीराणाञ्च प्रशस्तिगायनात् तादृग्वचोभिः सम्प्रेरितः सन् राजानं प्रत्यसौ श्रद्धान्वितः सञ्जातः । राजसु श्रद्धाजागरणे तेन बाल्ये श्रुतमधस्तनपद्यमप्येकं कारणं मन्यते-

---

१५. भगवान् पोखेलमहोदयेन (२०७३ वैक्रमे) प्रदत्तसुचनानुसारेण ।

१६. पूर्ववत् ।

१७. हरिप्रसादशर्माचार्येण (२०७० तमे वैक्रमे) प्रदत्तसूचनानुसारेण ।

बाल्ये केलिपरायणेषु गगनं को नाम दोर्भ्यां स्पृशेत्  ?
उच्चैर्वेगबलान्नगेन्द्रशिखरात् को वोत्प्लवेतावनौ ?
झम्पां वा विदधीत कश्च लसताऽऽवर्ते ह्रदे निर्भयः ?
सानन्दं कथयन्ति ते प्रमुदिता राजेदृशः शक्तिमान् ॥[१८]

निश्चयमेव तात्कालिकाः पृथ्वीनारायण-बहादुर-रणबहादुरशाहसदृशा राजवंशोद्भवा उद्भटवीराः सत्पुत्रा राजेन्द्रलक्ष्मी-राजराजेश्वरीतुल्या महिष्यश्च नेपालस्यैकीकरणे, विस्तारे, विकाशे च समग्रं जीवनमेव समर्पितवन्तः । तादृशैः कार्यकलापैरवश्यमेव हरिप्रसादः प्रेरितोऽभूदिति स्वाभाविकमेव । तात्कालिकाः प्रायः शासका अपि राजपरम्परां प्रति श्रद्धाशून्यान् सर्वसाधारणान् कर्मकराँश्च तत्कालमेवादण्डयन्, अतस्तद्भयाद् लौकिकीं श्रद्धां प्रकटयन्तोऽन्तर्गतं भावमाच्छाद्यापि कतिपये  श्रद्धान्विता अभवन् । परं हरिप्रसादस्तु सश्रद्ध एव । स तु मनसा वाचा कर्मणैव राजसंस्थां प्रति भक्तिमदर्शयत् । अतस्तेन विरचिते 'श्री ५ महेन्द्रविरहवेदना' नामके काव्ये पुस्तकमूल्यमपि राजभक्तिर्लिखितमस्तीत्युक्त्वा हरिदेवमिश्र एनं प्रशंसति ।[१९] न हरिदेवमिश्र एवापि तु तात्कालिकसंस्कृतसङ्कायप्रमुखोऽम्बिकाप्रसादोऽधिकारिवर्योऽपि हरिप्रसादविरचितायां 'श्री ५ वीरेन्द्रशुभराज्याभिषेकम्' इति काव्यभूमिकायां 'राष्ट्रस्यैतत् कृत्यतमं राज्ञ एवाभिषेचनम्' इति शीर्षकद्वारा काव्यममुं कविं च स्मारं स्मारं प्रशंसति ।[२०] हरिप्रसादरचितानि- गोरक्षशाहवंश (महाकाव्यम्), श्री ५ महेन्द्रविरहवेदना (खण्डकाव्यम्), श्री ५ वीरेन्द्रशुभराज्याभिषेकम् (खण्डकाव्यम्) इति शीर्षकैः, तत्रत्यैर्विषयैः, पत्रिकादिषु प्रकाशितैर्लेखैः, तदीयग्रन्थभूमिकायां स्थितैः- 'राजा परमेश्वर' इत्यादिभिर्वाक्यैश्च स राजभक्त इति  प्रमाणितो भवति । राजपरम्परां प्रशंसन् स एकत्र लिखति- "राजा परमेश्वर इति न केवलं श्रुतिस्मृतयः, अपि तु प्रत्यक्षैकप्रमाणाश्चार्वाका अपि मन्यन्ते । तथा च तदीयं सूत्रं 'लोकसिद्धो राजा परमेश्वरः' इति । अतो राजचरितकीर्तनपरमेश्वर-चरितकीर्तनमेवेति पञ्चश्रीकस्य महाराजाधिराजवीरेन्द्रवीरविक्रम-शाहदेवशुभराज्याभिषेक-मुद्दिश्य पद्यमालामिमाम-लिखम् ।"[२१] एतादृक् श्रद्धापरायणोऽप्यसौ परवर्त्तिसु राजवंशेषु श्रद्धां नाभिव्यक्तवान् । महेन्द्रवीरविक्रमशाहदेवात् पश्चवर्त्तिषु सन्ततिषु राजा वीरेन्द्रः सरलतमो लोकतान्त्रिकविधौ निष्ठान्वितश्चासीत् तथापि विकाशकार्येषु जनाकाङ्क्षानुरूपं योगदानं

---

१८. हरिप्रसादशर्माचार्येण (२०७० तमे वैक्रमे) प्रदत्तसूचनानुसारेण ।
१९. हरदेवमिश्रमहोदयेन (२०२९) तमे विक्रमे लिखितपत्रानुसारेण ।
२०. अम्बिकाप्रसादोऽधिकारी (मन्तव्यलेखकः), *श्री ५ वीरेन्द्रशुभराज्याभिषेकम्,* दाङ : लेखक, (२०३१) पृ. भू.।
२१. हरिप्रसादशर्माचार्यः, *श्री ५ वीरेन्द्रशुभराज्याभिषेकम्,* दाङ : लेखक, (२०३१) पृ भू. ।

नाकरोदिति सोऽगादीत् । वीरेन्द्रस्योत्तराधिकारित्वेन समागतस्तात्कालिको वीरेन्द्रानुजो राजा ज्ञानेन्द्रस्तु स्वकीयमहत्त्वाकाङ्क्षाधिक्यात् पूर्वजै रक्षितां राजसंस्थामेवानाशयदिति तस्य मूल्याङ्कनं वर्तते ।[२२]

## २.२.८ धार्मिक्यास्था

हरिप्रसादशर्मा विष्णुपञ्चायतनदेवतानां पूजक आसीत् । एषः प्रतिदिनं शालिग्रामस्वरूपिणं विष्णुं समभ्यर्चयत् । यद्यपि तस्य महादेवे भगवत्यां जगदम्बिकायामन्येषु सानातनिकपरम्परायां पूजितेषु देवेषु देवीषु च विपुला श्रद्धाभक्तिश्चास्ताम् । कविर्हरिप्रसादः स्वरचितेषु काव्येषु पराम्बां भगवतीं दुर्गां बहुत्राराधयति, तथापि प्रतिष्ठानमण्डलस्थे स्वकीयग्रामे पित्रोर्नाम्नोरनेन 'दुर्गाहीरेश्वरशिवपञ्चायतनमन्दिरम्' निर्माय नित्यपूजाऽऽराधनयो र्व्यवस्था च कारिता । अतस्तयोः शिवपार्वत्योरपि समाना श्रद्धा आस्तामिति वक्तुं शक्यम् ।[२३]

## २.२.९ विवाहः

हरिप्रसादशर्मणो विवाहः प्रतिष्ठान- (प्युठान) मण्डलस्थस्य विजुवारग्रामनिवासिनो गोविन्दप्रसादशर्मणो ज्येष्ठपुत्र्या शारदाप्रभादेव्या सह २०११ तमे वैक्रमाब्देऽभूत् । भारद्वाजकुलोत्पन्ना सुवेदिपरिवारे जाता शारदाप्रभादेवी तदानीं केवलं दशवर्षदेशीया आसीच्चेद् हरिप्रसादस्तु द्वाविंशतिवर्षदेशीयः । रजोदर्शनात् पूर्वमेव पुत्र्याः पाणिग्रहणपरम्परामनुसरता पित्रा गोविन्दप्रसादेन दशमे वर्ष एव शारदाया विवाहः कारितः । पुत्रीणामनध्यापनपरम्परापरिणामतः शारदाप्रभादेव्यपि विवाहकाले निरक्षरा आसीत् । विवाहपश्चाद् हरिप्रसादेन साक्षरीकृता नेपालीसंस्कृतयोः सरलश्लोकयो वाचने निपुणीकृता च । हरिप्रसादगृहे संस्कृतभाषायामेव वाग्व्यवहारोऽप्रचलत् । अतः साऽपि विवाहानन्तरं संस्कृतसम्भाषणे प्रवीणा सञ्जातेति शोधनायकः स्वयं सूचितवान् ।[२४]

शारदाप्रभादेवी यदा मातुर्गर्भ आसीत् तदा तस्याः पितरौ तीर्थाटनार्थं द्वारकादीनि पुण्यस्थलानि गतवन्तौ । शारदाप्रभादेवी द्वारकायामेवाजनि, अतः पिता गोविन्दप्रसादो नवजाताया बालिकाया नामापि द्वारिकां कारितवान् आसीत् । विवाहे कन्यायाः पुनर्नामकरणविधानस्य प्रचलनतो द्वारिकादेव्यपि विवाहानन्तरं शारदाप्रभादेवी सञ्जाता । तदा

---


२२. हरिप्रसादशर्माचार्येण (२०७० तमे वैक्रमे) प्रदत्तसूचनानुसारेण ।
२३. हरिप्रसादशर्मणो ज्येष्ठपुत्रात् शालिग्रामात् (२०७० तमे विक्रमे) प्राप्तसूचनानुसारेण ।
२४. हरिप्रसादशर्माचार्येण (२०७० तमे वैक्रमे) प्रदत्तसूचनानुसारेण ।

दुर्गाप्रसादस्य गृहं प्युठानमण्डलस्थे खैराग्राम एव आसीत् । अतः शारदाप्रभादेव्यपि तत्रत्ये गृह एव पुत्रवधूत्वेन प्रविष्टवती ।[२५]

## २.२.१० सन्ततयः

हरिप्रसादशारदाप्रभादेव्योश्चतस्रः सन्ततयोऽभूवन् । तासु सरस्वत्यञ्जनेति द्वे पुत्र्यौ, शालिग्रामगणेशौ द्वौ पुत्रौ । एतासु सर्वासु सरस्वती प्रथमा, शालिग्रामो द्वितीयः, एते द्वे सन्तती प्रस्थानपुर एव जनिते । अञ्जनागणेशौ तु दाङमण्डलस्थे विजौरीग्रामस्थे स्वगृह एव जातौ ।

हरिप्रसादशारदाप्रभादेव्यो वंशवृक्षः[२६]




## २.२.११ निवासः

हरिप्रसादस्य जन्म, प्रारम्भिकाणि दिनानि, प्राथमिकमध्ययनम्, व्रतबन्धः, विवाहश्च प्युठानमण्डलस्थे खैराग्राम एव सञ्जातानि । विवाहानन्तरमपि २०२७ विक्रमाब्दं यावत्ते सर्वे तस्मिन्नेव गृहेऽवसन् । त्रिभुवनविश्वविद्यालयस्य केन्द्रीयविद्यापीठात् २०२६ तमे वैक्रमे स दाङस्थे जनताविद्यापीठे प्राध्यापनार्थं स्थानान्तरितवान् । तद्दिनाद् 'मम स्थायिनिवासोऽप्यत्रैव भवे'दिति स विचारितवान् । अतः २०२८ तमे वैक्रमाब्दे दाङमण्डलस्थे मानपुरग्रामे निर्मितं गृहं तद्युक्तां षट्विघापरिमितां भूमिं च क्रीत्वा तेन निवासप्रबन्धः कारितः । तत् गृहसंरचनमद्यापि पुत्रयोः शालिग्रामगणेशयोः स्वामित्वे वर्तते । अधुना काष्ठमण्डपस्थे

२५. पूर्ववत् ।
२६. हरिप्रसादशर्माचार्यस्य कनिष्ठपुत्रेण गणेशशर्मणा (२०७० विक्रमे) प्रदत्तसूचनानुसारेण ।

रातोपुलनामके स्थाने ज्येष्ठपुत्रेण शालिग्रामेण, तथैव काष्ठमण्डपस्यैव हात्तीवननामके स्थाने (कनिष्ठपुत्रेण) गणेशेन च स्वार्जनेनैकैकं गृहं निर्मितं वर्तते । हरिप्रसादस्य द्वयोः पुत्ररत्नयोर्ज्येष्ठो नेपालविद्युत्प्राधिकरणे कनिष्ठस्तु संयुक्तराष्टसंघस्य नेपालस्थे (U.N.D.P) कार्यालये वैतनिकीं सेवां कुरुतः ।[२७] २०४९ तमे वैक्रमेऽकस्माद् धर्मपत्न्या निधनेन कानिचन वर्षाणि परिखिन्नो हरिप्रसादस्तन्नाम्ना एवाष्टाध्यायीशारदाप्रभानाम्नीं व्याख्यां विरचितवान् ।

## २.२.१२ सम्मानप्राप्तिः

हरिप्रसादशर्मा कुशलप्राध्यापकत्वेन, महाकवित्वेन, वैयाकरणत्वेन, सामाजसेवकत्वेन, कुशलशिक्षकत्वेन, सुचिन्तकत्वेन, कुशलराजभक्तत्वेन-संस्कृतसंभाषकत्वेन, लेखकत्वेन च विश्वविद्यालयतः, सर्वकारतः, विद्यालयतः, अन्याभिः संस्थाभिः, सम्मान्यविद्वद्भिश्च पुरस्कृतः सम्मानितोऽभिनन्दितश्च दृश्यते । तेन प्राप्तानां पुरस्काराणां, सम्मानाभिनन्दनादीनां विवरणमधः प्रस्तूयते ।[२८]

तालिका सङ्ख्या : ५ हरिप्रसादशर्मणा प्राप्तसम्मानप्रशंसादीनां विवरणम्

| क्रमः | सम्मान/प्रशंसा-प्रदाता /स्थानम् | वि.सं. | सम्मानस्य प्रकारः |
|---|---|---|---|
| १ | साङ्गवेदविद्यालयः - वाराणसी | २००९ | शास्त्रार्थपरीक्षाप्रथमत्वेन |
| २ | साङ्गवेदविद्यालयः- वाराणसी | २०११ | शस्त्रार्थपरीक्षायां प्रथमत्वेन |
| ३ | जनताविद्यापीठम् - दाङ | २०१९ | कुशलशिक्षकत्वेन प्रशंसा |
| ४ | रानीपोखरी सं.पा.-काष्ठमण्डपम् | २०२१ | कुशलशिक्षकत्वेन प्रशंसा |
| ५ | पद्मप्रसादभट्टराई- काष्ठमण्डपम् | २०२१ | पत्रद्वारा प्रशंसा |
| ६ | सोमनाथसिग्द्यालः - काष्ठमण्डपम् | २०२१ | पत्रद्वारा प्रशंसा |
| ७ | भारतधर्ममहामण्डल - वाराणसी | २०२२ | महाकवेरूपाधिः |
| ८ | शृङ्गेरीजगद्गुरुमहासंस्थानं-वारा. | २०२३ | धर्मप्रचारकत्वेन/ग्रन्थकर्तृत्वेन प्रशंसा |
| ९ | हरिदेवमिश्रः - काष्ठमण्डपम् | २०२९ | त्रि.वि.कीर्तिपुर-प्राचार्यद्वारा प्रशंसा |
| १० | शिवहरि मरहट्ठा- काष्ठमण्डपम् | २०३८ | वाल्मीकिविद्यापीठस्य प्राचार्यद्वारा प्रशंसा |

२७. हरिप्रसादशर्माचार्यस्य ज्येष्ठपुत्रेण शालिग्रामेण (२०७३ तमे वैक्रमे) प्रदत्तसूचनानुसारेण ।
२८. हरिप्रसादशर्माचार्यस्य प्रमाणपत्रानुसारेण ।

| | | | |
|---|---|---|---|
| ११ | राधाकृष्ण अधिकारी- दाङ | २०३९ | संस्कृतअ.सं.प्रमुखद्वारा प्रशंसा |
| १२ | त्रि.वि. - काष्ठमण्डपम् | २०४२ | शिक्षापुरस्कारः |
| १३ | दशमे विश्वसंस्कृतसम्मेलने-वेङलोरे | २०५३ | विद्यासागरोपाधिः |
| १४ | नेपालसर्वकारः- काष्ठमण्डपम् | २०५३ | महेन्द्रविद्याभूषणपदकम् |
| १५ | दधिराममरासिनी स्मृतिप्रतिष्ठानम् | २०५८ | प्रतिभासम्मानम् |
| १६ | सनातनधर्मसेवासमितिकाष्ठमण्डपम् | २०६० | अभिनन्दनम् |
| १७ | योगिनरहरिनाथट्रस्ट- काष्ठमण्डपम् | २०६० | अभिनन्दनम् |

स्रोतः हरिप्रसादशर्मणो गृहपुस्तकालयः

## २.२.१३ कार्यक्षेत्रम्

हरिप्रसादशर्मा संस्कृतक्षेत्रे समर्पितः प्रज्ञाजीवी विद्वानासीदिति समकालिका मन्यन्ते ।[२९] संस्कृताध्ययनाध्यापनं तस्य प्रमुखं कार्यं दृश्यते । तदतिरिक्तं संस्कृतव्याकरणसम्बद्धेषु विषयेषु चिन्तनम्, शब्दनिर्वचनविषयेऽहरह ऊहापोहनम्, काव्यरचना, पुराणवाचनम्, धार्मिकाध्यात्मिकसमस्यासु निर्णयप्रदानञ्चावान्तरकार्यजातम् । तेन २०४६ विक्रमवत्सराद् वर्षद्वयं विश्वविद्यालयविद्यापीठं प्राचार्यपदमलङ्कृत्य प्रशासनमपि सञ्चालितम् ।। तेन कियान् कालावधि कुत्र कुत्र पाठित इति विवरणमधः प्रस्तूयते [३०]

तालिका सङ्ख्या : ६ हरिप्रसादशर्मणः कार्यक्षेत्रम्

| क्रमः | अध्यापितसंस्था/ स्थानम् | अवधिः | पदम् |
|---|---|---|---|
| १ | जनताविद्यापीठम् - दाङः | २०१४-६ : २०१७-६ | प्रशिक्षकः |
| २ | रानीपोखरीसं. पा.- काष्ठमण्डपम् | २०२१-५-१९ : २०२१-९-३ | शिक्षकः |
| ३ | मुक्ति मा.वि. - प्युठान | २०२१- २०२२ | शिक्षकः |
| ४ | त्रि.वि. केन्द्रीयविद्यापीठं कीर्तिपुरम् | २०२४-३-६ : २०२६-११-३ | उपप्राध्यापकः |
| ५ | जनताविद्यापीठं विजौरी - दाङः | २०२६-११-४ : २०४५-४-८ | उप-सह-प्राध्यापकश्च |
| ६ | विश्वविद्यालयविद्यापीठं विल्वकुञ्जः दाङ | २०४५-४-९: २०५१-१०-३० | प्राचार्यः, प्राध्यापकः |

२९. विष्णुप्रसादशर्मदेवकोटातः (२०७३ तमे वैक्रमे प्राप्तसूचनानुसारेण ।
३०. हरिप्रसादशर्माचार्यसम्बद्धविश्वविद्यालयीयपत्रानुसारेण ।

| | | | |
|---|---|---|---|
| ७ | वाल्मीकिविद्यापीठं - काष्ठमण्डपम् | २०५१-११-१ : २०५६-१-२७ | प्राध्यापकः |
| ८ | हरिहरसंस्कृतपाठशाला- देवघट्टः | २०५६-२०५७ | स्वयंसेवक-शिक्षकः |

स्रोतः हरिप्रसादशर्मणो गृहपुस्तकालयः

### २.२.१४ निधनम्

प्राध्यापन-समाजसेवादिभिर्निवृत्त्य काष्ठमण्डपस्थे रातोपुलनामके स्थाने पुत्रपौत्रादिभिः सह निवसन्नसौ २०७२ वैक्रवाब्दे फाल्गुनमासे १ दिनाङ्के वसन्तपञ्चम्यां तिथौ पञ्चत्वमवाप्तवान् ।

## २.३ व्याख्यातुर्योगदानम्

हरिप्रसादशर्माचार्यः कुशलः प्राध्यापक आसीत् । अतस्तेन विशेषतः पाठनेन प्रवचनेन टीकाग्रन्थरचनेन प्रकाशनेन च योगदानं कृतं परिलक्ष्यते । तथैवास्य सामाजिक-धार्मिक-साहित्यिकक्षेत्रेऽनुसन्धाने च महद्योगदानं दृश्यते । अत्र शोधनायकस्य तथाविधानि योगदानानि सङ्क्षेपत उल्लिख्यन्ते ।

### २.३.१ सामाजिकमवदानम्

हरिप्रसादशर्मा प्राध्यापनकाले सामाजिकीं सेवां प्रत्यपि जागरूक आसीत् । अनेन पूज्यपितृचरणयोः स्मृतौ प्युठानमण्डलस्थे खैराग्रामे दुर्गाहीरेश्वरशिवपञ्चायतनमन्दिरं निर्माय नित्यपूजाया व्यवस्था च कारिता । तथैवायं संस्कृतभाषायाः समुत्थानं प्रति सदैव दत्तचित्तः समर्पितश्चासीत् । संस्कृतभाषां सर्वे वदन्तु इति विचार्य तेन भाषाव्याकरणयोः सरलीकरणार्थं नैके प्रयासा विहिताः । भाषायां निपुणता सम्भाषणेनायाति न केवलमध्ययनेनेति तस्य धारणा आसीत् । अतस्तेन स्वगृहे संस्कृतसम्भाषणपरम्परा प्रारब्धा । ततः साक्षरा निरक्षराः सर्वेऽपि संस्कृते आकर्षिताः, तथाकृते बालाः कर्मकरा निरक्षरा महिलाश्च संस्कृतवदने प्रावीण्यमलभन्त । दाङमण्डले तदानीं हरिप्रसादगृहे पालिता महिष्यपि संस्कृतमवबोधतीति लोकोक्तिः प्रचलिताऽभूत् । तात्कालिकाः पत्रिकाः 'नेपालस्थः संस्कृतपरिवारः' इति शीर्षके तद्विषये लेखान् प्रकाशितवन्त आसन्निति वार्ताप्रसङ्गे तेन सूचितम् ।[३१] अतः संस्कृतभाषायाः सरलीकरणे जनसाधारणीकरणे सम्भाषणप्रेरणे चानेन कृतः प्रयासः स्तुत्यो मन्यते ।[३२]

---

३१. हरिप्रसादशर्माचार्येण (२०७० तमे वैक्रमे) प्रदत्तसूचनानुसारेण । ।
३२. स्थानेश्वरगौतमेन (२०७१ तमे वैक्रमे) प्रदत्तसूचनानुसारेण ।

## २.३.२ धार्मिकमवदानम्

हरिप्रसादशर्मा संस्कृतभाषाया विद्वान् आसीत् । अतः स पुराणवाचन-धार्मिकप्रवचन-भगवत्पूजनानुष्ठानेषु, देवपितृकार्येषु च सदैव संलग्नोऽभवत् । नीतिसदाचारयोर्मार्गसमुपदेशेऽप्यस्य महदवदानं दृश्यते । तदा ग्रामीणक्षेत्रेषु पण्डितानामभाव आसीत् । तादृशाभावपूरणायानेनापि प्रयत्नः कृत एव । विविधधार्मिककृत्येषु संशयेषूत्पन्नेषु निर्णयप्रदाने, लोकाचारसमुपदेशने चास्य महदवदानं आसीदित्यधुनाऽनुभूयते ।[३३]

## २.३.३ प्राज्ञिकमवदानम्

हरिप्रसादशर्मा प्रज्ञाजीवी आसीदिति सुविदितमेव । छात्रेभ्यः सरलरीत्याऽध्यापनं तस्य प्रमुखमुद्देश्यमासीत् । स नीरसमपि व्याकरणं केनोपायेन सरसीकर्तुं शक्यत इति मुहुर्मुहुरचिन्तयत् । तत्क्रमे जनताविद्यापीठस्थस्य कक्षाप्रकोष्ठस्य भित्तिकायां द्वयोरष्टाध्यायीपुस्तकयोः पत्राणि पृथक्कृत्य गुन्द्रेण तानि संश्लिष्य सूत्रक्रमखोजनेनाऽध्ययनार्थं छात्रानभिप्रेरितवानिति नारायणकुमारशर्मा ज्ञापयति, तदित्थं- “अष्टाध्याय्या द्वयोः पुस्तकयोः पत्राणि पृथक्कृत्य तानि गुन्द्रेण पटे संश्लिष्य तं च पटं भित्तिकायावलम्ब्य तत्र यथास्थानं सूत्राणि दर्शयन् सूत्रक्रमं प्रक्रियाक्रमं च सङ्गमय्य श्यामपाटीप्रयोगविधिना विद्यार्थिनो बोधयन्नध्यापयति स्म ।”[३४] पूर्ववर्त्तिभिर्व्याख्यातृभिः सूत्रप्रक्रियाक्रमयोः पृथक्करणेन ध्रुवीकृता व्याकरणाध्यापनपद्धतिस्तेन सम्मेल्य महदवदानं कृतमनुभूयते । तेन २०२४ विक्रमतः २०५६ पर्यन्तं पाठिताः सहस्रशश्छात्रा देशविदेशेषु संस्कृतमाध्यमेन राष्ट्रसेवां कुर्वन्तः सन्ति । एतेन विद्यावारिधेरध्ययने निर्दिष्टा विष्णुप्रसादशर्मदेवकोटा-माधवशरणोपाध्यायप्रभृतयश्छात्राः[३५] अधुनाऽपि सुप्रतिष्ठिताः सन्ति । तथैव रश्मिराजपाण्डेय-योगराजशर्मा-गोविन्दपौडेल-सूदनपौडेल-खेमराजखनाल-धनपतिनेपाल-मोहनपोखेलप्रभृतयश्छात्रा अधुनापि प्राध्यापयन्तः सन्ति । प्राज्ञिकयोगदानस्य माध्यमेनैव तेन बहूनि सम्मानाभिनन्दनानि च लब्धानि । विभिन्नेभ्यः स्थानेभ्यः प्रकाशितासु मर्यादा-हिमज्योति-गोरखापत्रादिषु पत्रिकासु लेखप्रकाशनम्, अष्टाध्याय्याः शारदाप्रभाव्याख्यां विरचय्य व्याकरणसरलीकरणम्, ‘पाणिनीयव्याकरण-शिक्षणपद्धतिविमर्शः’ इति शीर्षके विद्यावारिधेरूपाधिलाभश्च तस्य प्राज्ञिकयोगदानस्यैव

---

३३. गंगामणिपोखेलेन (ने.सं.वि.कर्मकरेण) (२०७१ तमे वैक्रमे) प्रदत्तसूचनानुसारेण ।
३४. नारायणकुमाराचार्यः (मन्तव्यलेखकः), *अष्टाध्यायी,* दाङ : म.सं.वि., (२०६०) पृ. भू. ।
३५. विष्णुप्रसादशर्मदेवकोटामहोदयेन (२०७३ तमे वैक्रमे) प्रदत्तसूचनानुसारेण ।

प्रमाणमिति कथयितुं शक्यते ।[३६] हरिप्रसादेन यत्र यत्र पाठिताः, ताभ्यः सर्वाभ्यः संस्थाभ्यः प्रशंसा लब्धेति तात्कालिकप्राचार्यै रामेश्वरशर्ममजगैया-सिद्धिनाथगौतम-शिवहरिमरहट्ठा-हरदेवमिश्र-पूर्णभद्रसुवेदिप्रभृतिभिः प्रदत्तैः प्रशंसापत्रैर्ज्ञायते । न केवलं प्राचार्या एवापि तु तात्कालिकौ संस्कृताध्ययनसंस्थानप्रमुखौ श्रीमदम्बिकाप्रसादोऽधिकारि-राधाकृष्णाधिकारि-महोदयौ, शारदाप्रभाव्याख्याया मन्तव्यलेखकः तात्कालिकोपकुलपतिपूर्णचन्द्रढुङ्गेलः, शिक्षाध्यक्ष-नारायणकुमाराचार्यप्रभृतयोऽप्यस्य शिक्षण-कौशलं भूयो भूयः प्रशंसन्ति । अतोऽसौ छात्रसमर्पितः, प्रायोगिकदृष्ट्याऽध्यापनकुशलः प्रतिभासम्पन्नश्च प्राध्यापक आसीदिति वक्तुं शक्यते ।

## २.३.४ साहित्यिकमवदानम्

हरिप्रसादशर्माऽयं मूलतः संस्कृतवैयाकरणः कुशलः प्राध्यापकश्चासीत् । तथापि स संस्कृतसाहित्यस्य स्तरोन्नत्यै काव्यरचनया वैशिष्ट्यपूर्णं योगदानं कृतवान् । कविशिरोमणि-लेखनाथपौड्याल-पण्डितनयराजपन्ताभ्यां नेपालीभाषायां विरचय्य प्रकाशितो 'बुद्धिविनोदः प्रश्नोत्तरी' एतेन संस्कृते समच्छन्दसि अनूदितो वर्तते । परं सोऽनुवादोऽद्यावधि अप्रकाशित एवेति तदीया ज्येष्ठा पुत्री सरस्वती ज्ञापयति । तेनैव प्रकारेण गोरखापत्रादिपत्रिकासु प्रकाशितान् चिन्तनमूलकान् लेखान् पठित्वाऽसौ तदुपरि नेपालीपद्यबद्धाः प्रतिक्रिया विलिख्य राष्ट्रियपत्रिकाष्वप्रकाशयत् । तेन सूत्ररूपेण प्रस्तुतासु तादृशीसु प्रतिक्रियासु 'शान्तिसुरक्षाराष्ट्रस्य प्रत्यङ्गं च विकाशनम्, पाञ्चायत्तं महोद्देश्यमात्मवर्गसमन्वयात्' इति महत्त्वपूर्णमस्तीति पोखेलवर्या हरिप्रसादशर्मसम्बद्धानभिलेखानुद्धरन्ती सूचयति ।[३७] स तदानीं तात्कालिकराज्ञामन्यविशिष्टव्यक्तीनां च समुपस्थितौ समायोजितासु सभासु काव्यमहोत्सवादिषु च प्रायशः कवितामश्रावयदिति सहकर्मिणो वदन्ति[३८] तेषु 'बाल्ये केलिपरायणेषु... 'इति पद्यं (पद्यमिदं हरिप्रसादस्यैतिह्यमिति शीर्षकान्तर्गते राजपरम्परायामास्था श्रद्धा च इति शीर्षकेऽस्ति) २०१६ तमे वैक्रमे दाङमण्डलान्तर्गते तुलसीपुरे महेन्द्रवीरविक्रशाहदेवस्य समुपस्थितौ समायोजितायां सभायां श्रावितमासीदिति सरस्वतीपोखेलः पितरमुद्धरन्ती सूचयति । तथैव वीरेन्द्रवीरविक्रमस्य

---

३६. रश्मिराजपाण्डेयमहोदयेन (२०७१ तमे वैक्रमे) प्रदत्तसूचनानुसारेण ।
३७. सरस्वतीपोखेलतः (२०७१ तमे वैक्रमे) प्राप्तसूचनानुसारेण ।
३८. विष्णुप्रसादशर्मदेवकोटामहोदयेन (२०७३तमे वैक्रमे) प्रदत्तसूचनानुसारेण ।

स्वर्णजन्मोत्सवस्यावसरेऽपि अनेन कवितापाठः कृत इति सरस्वतीपोखेलः ज्ञापयति ।[३९] गोरक्षशाहवंशमहाकाव्यम्, श्री ५ महेन्द्रविरहवेदना, श्री ५ वीरेन्द्रशुभराज्याभिषेकमिति काव्यत्रयरचनेनैवानेन दैशिकवैदेशिक-संस्थाभ्यो महाकवित्वेन सम्मानाभिनन्दनं प्राप्तमिति साहित्यिकयोगदानस्यैव परिणामः । अतो नेपालदेशीयसंस्कृतमहाकाव्यपरम्परायां हरिप्रसादस्य नाम सादरं स्मर्यते । संस्कृतमहाकाव्यरचनायाः समाप्तप्रायेऽस्मिन् कालेऽनेन काव्यरचनेन तादृशाभाव-परिपूरणप्रयासो विहितः । अतोऽस्य साहित्यिकक्षेत्रेऽपि विशिष्टं योगदानं दृश्यते ।

### २.३.५ अनुसन्धानक्षेत्रेऽवदानम्

हरिप्रसादशर्मा प्राध्यापनकाव्यरचनाभ्यां सहानुसन्धानेऽपि प्रवृत्तोऽध्यवसायी आसीत् । जनताविद्यापीठं तस्यानुसन्धानस्योर्वरा भूमिर्दृश्यते । तदानीं गुरुणा प्रायोगिकविधिना पाठितानि पाणिनीयसूत्राणि, तेन दर्शिताः पाणिनीयसूत्राणामनुवर्तनरीतिः, सूत्राणामनुवर्तनानि चाद्यावधि स्मरणीयानि सन्तीति तच्छात्रो योगराजशर्मा ज्ञापयति ।[४०] अतस्तेन प्रयुक्ते संस्कृते 'हिमाल-कलम-खोजनम्-पानीयम्-बोल्लितुम्-कृषीवल-जलचारणं-कुल्यं-गगरी-फालयित्वा-सारितम्'[४१] सदृशा लोकभाषातुल्याः सरलसंस्कृतशब्दा दृश्यन्ते । एतेषु कतिपये संस्कृतेऽप्रचिता अपि प्राप्यन्ते । गृहव्यवहारे, भाषाशिक्षणे चापेक्षितानां लोकप्रचलितानामेतादृशानां संस्कृतशब्दानां प्रकृतिप्रत्ययादिकं विच्छिद्यानेन संस्कृतं कारितम् । एतद्विधा नैके शब्दाः, क्रियाः, पदसमूहानि च शारदाप्रभायां यत्र तत्र प्राप्यन्ते । प्रतिदिनं न्यूनीभवन्तं संस्कृतशब्दभाण्डागारं तादृशाः शब्दाः प्रवर्द्धयन्तीति निश्चितमेव, एतादृशैर्दैशिकपदप्रयोगैरपि शारदाप्रभायाः शास्त्रीयं महत्त्वं प्रवर्द्धमानमेव प्रतीयते । 'अन्याय्योऽनेकपर्यायप्रयोगः' इति नियमस्यानुपालकोऽयं यथासम्भवं लोकप्रचलितं सरलशब्दमेवान्विष्य वाग्व्यवहारे प्रयोगाय प्रोत्साहितवान् । एतेन साक्षरनिरक्षराः सर्वेऽपि जिज्ञासवः संस्कृतसम्भाषणे समर्था जाताः । एतत्सर्वमनुसन्धानं विना ज्ञातुं न शक्यत इति व्यावहारिके जीवनेऽप्यसौ भाषिकमनुसन्धानमकरोदिति ज्ञायते । तथैवानेन : Dean–teacher–boy–brave–ocean–drink–light–night–no प्रभृतीनां शताधिकानां आङ्ग्लशब्दानां मूलं संस्कृतमित्यनुसन्धानद्वारा प्रमाणीकृतम् । तत्र निकटस्वरूपयुतयोः संस्कृताङ्ग्लशब्दयोरनेन निरुक्तीयसिद्धान्तद्वारा निर्वचनं कृतम् । निरुक्ते प्रत्यक्ष-परोक्षातिपरोक्षादिभिर्युक्तिभिः शब्दा निरुच्यन्ते । तामेव पद्धतिमुपयुज्य हरिप्रसादोऽपि

---

३९. सरस्वतीपोखेलतः (२०७१ तमे वैक्रमे) प्राप्तसूचनानुसारेण ।
४०. योगराजशर्मणा (२०७१ तमे वैक्रमे) प्रदत्तसूचनानुसारेण ।
४१. अष्टाध्यायीशारदाप्रभाव्याख्यायां प्रयुक्तशब्दानुसारेण ।

निकटसंरचनयुतानामाङ्ग्लशब्दानां मूलं संस्कृतमिति प्रमाणयति, यथा- clean > क्लिन्द्, son > सुनु, hunt > हन्तुः, run > रन्व्, right > अरायितः, high > अहायिः, noun > नामन्, pronoun > प्रोनामन्, sit > आसितः, inter > अन्तर्, eyebro > अक्षिभ्रूः । निरुक्तकारेण यथा सूत्राणि निर्माय शब्दानां साधुत्वं सम्पादितं तथैवानेनापि- आद्यन्तस्वरलोपः (आसितः > sit सिद्धये), आगमः कम् (आगमः > com सिद्धये) प्रभृतीनि सूत्राणि परिकल्प्याङ्ग्लानां संस्कृतमूलत्वं साधितमस्ति। एतेषां विवरणं भागवतशर्म-भोजराजपन्तप्रकाशितायां हिमज्योतिपत्रिकायां 'निर्वचनज्योति'रिति शीर्षकतः (३-१७ अङ्केषु) प्रकाशितं वर्तते ।[४२] तादृशप्रमाणीकरणं सामान्येनाध्ययनेन गवेषणेन च न सम्भवतीति निरन्तरानुसन्धानस्यैव परिणामः । अनेनास्मादपि वैशिष्टचपूर्णमनुसन्धानन्तु 'पाणिनीयव्याकरणशिक्षणपद्धतिविमर्शः' इति नामकेन विद्यावारिधि-शोधप्रबन्धेन कृतम् । पूर्ववर्तिनोऽनुसन्धातारः पाणिनीयं व्याकरणं पारम्परिकपद्धतिभिरेव व्याख्यातवन्तः परं हरिप्रसादस्तु शिक्षाशास्त्रनिर्दिष्टप्रायोगिकपद्धत्या व्याख्याय नवीनद्वारमुद्घाटितवान् । तेनैव प्रकारेणाऽसौ सूत्रप्रक्रियाक्रमयोर्ध्रुवीकृतं पाणिनीयं व्याकरणं सङ्गमय्यैकीकृतवान् । तथैव स्थानेश्वरगौतमेन सहानेन रचितं 'अनुसन्धानप्रकाशः' नामकं पुस्तकं २०४२ तोऽद्यावधि निरन्तरमाचार्यकक्षायां पाठ्यपुस्तकत्वेन निर्धारणं तस्य द्वितीयसंस्करणप्रकाशनञ्चानुसन्धान-पूर्णस्य कार्यस्यैव परिणामः । एतानि सकलप्रमाणानि हरिप्रसादशर्मणोऽनुसन्धातृत्वं द्योतयन्ति । अतोऽस्यानुसन्धानक्षेत्रेऽपि महद् योगदानमस्तीति निश्चित्य वक्तुं शक्यते ।

## २.४ व्याख्यात्रा रचितानि काव्यानि

जनताविद्यापीठे पाठयन् हरिप्रसादो दिनत्रयेण कवितामेकां रचितवान् । सैव मम प्रथमकवितेति स सूचितवान् । पुनः स कतिचिद्दिनानन्तरं षट्श्लोकान् विरचितवान् । सामान्यकवितालेखनाभ्यासे सञ्जाते एकदा जनताविद्यापीठप्राचार्येण दिगम्बरझामहोदयेन श्लोकबद्धाऽभिनन्दनपत्रलेखनायाऽसौ निर्दिष्टः । तल्लेखनतोऽसौ क्रमशः काव्यरचनायां प्रेरितोऽभूत् । काव्यरचनायां सामान्येऽभ्यासे सञ्जातेऽकस्मात् समागतं योगिनरहरिनाथं सम्बोध्य कतिचित् प्रशंसापद्यानि विरचय्य श्रावितवान् । तच्छ्रुत्वा नरहरिनाथोऽपि महाकाव्यप्रणयनार्थ- मभिप्रेरितवान् । तस्यैवाभिप्रेरणयाऽनेन गोरक्षशाहवंशाख्यं महाकाव्यं विरचितमिति काव्यभूमिकाया मुल्लिखति । योगिनरहरिनाथो गोखक्षशाहवंशमहाकाव्य-भूमिकायां कविममुं महाकवित्वेन सम्बोधयति, एवं-

४२. हिमज्योतिपत्रिकायां हरिप्रसादशर्माचार्येण प्रकाशितलेखानुसारेण ।

गोरक्षशाहवंशाख्यं महाकाव्यं महाकविः ।
हरिप्रसादः कृतवान् शाकेऽश्वाष्टभूमितेः ॥ (योगिनरहरिनाथः, भूमिकायाम्)

योगिनः प्रेरणया हरिप्रसादशर्मणा महाकाव्यरचनाभ्यासं विधाय महाकाव्यमेकं द्वे लघुकलेवरे खण्डकाव्ये च विरचितानि । परं प्रारम्भिकदिनेषु विरचितास्ताः कविता न कुत्रापि प्रकाशिता नापि स्मरणीयाः सन्तीति साक्षात्कारक्रमे हरिप्रसादः स्वयमसूचयत् ।[४३]

हरिप्रसादस्य काव्यरचनायां पौरस्त्यपरम्परासंवाहकानामादर्शपुरुषाणां विचाराः प्रभावभरा दृग्गोचरीभवन्ति । तथैव नैपालका राजानो राजमहिष्यस्तासां शौर्यादीनि च प्रभावकारणानि वर्तन्ते । बाल्ये श्रुतं राज्ञः शौर्यम्, युवावस्थायां पठितं शाहवंशीयराजानामवदानं गुणगौरवञ्च, परिपक्वावस्थायां जागरिता श्रद्धा च लेखकाय साहित्यिककृतिरचनायां प्रभावहेतवोऽभूवन् ।

## २.४.१ 'गोरक्षशाहवंश'महाकाव्यम्

हरिप्रसादेन योगिनरहरिनाथप्रेरणया प्रथमतः 'गोरक्षशाहवंशमहाकाव्यम्' रचितम् । महाकाव्यमिदं २०१९ वैक्रमाब्दे प्रारभ्य २०२२ विक्रमीये पूरितमिति महाकविः स्वयं साक्षात्कारक्रमे सूचितवान् ।[४४] तस्य प्रकाशनं २०२२ विक्रमवत्सरे महाकविना स्वयमेव कृतम् । अत्र प्रायश उपजातिस्तथा अल्पशस्तु वसन्ततिलका-इन्द्रवज्रा-शिखरिणीवृत्तयुक्ताः श्लोकाः सन्ति । विंशतिसर्गेषु निबद्धमिदं महाकाव्यं नेपालदेशीयशाहवंशीयराजानां यशोगाने समर्पितमस्ति । प्रकृतं काव्यं कीदृशमस्तीति ज्ञानायात्रत्यं पद्यमेकं प्रस्तूयते-

स्थितौ रीतौ नीतौ जनपदमतं कर्मणि शुभे ।
भवेच्शिक्षादीक्षादिकमखिलमात्मीयममलम् ॥
स्वके स्नेहो राष्ट्रे विकसतु जनानामनुदिनम् ।
सुहृद्भावः शश्वद् विलसतु समाजस्य च मिथः ॥ (गोखक्षशाहवंशमहा.२०-७)

प्रथमसंस्करणे एकसहस्रसङ्ख्यायां प्रकाशितमिदं महाकाव्यं पुनर्न प्रकाशितमतोऽधुना दुर्लभम् ।

---

४३. हरिप्रसादशर्माचार्येण (२०७१ तमे विक्रमे) प्रदत्तसूचनानुसारेण ।
४४. हरिप्रसादशमाचार्येण (२०७१ तमे विक्रमे) प्रदत्तसूचनानुसारेण ।

### २.४.२ 'श्री ५ महेन्द्रविरहवेदना' शोककाव्यम्

तात्कालिकस्य श्रीपञ्चसर्वकारस्य महेन्द्रवीरविक्रमशाहदेवस्य २०२८ तमे वैक्रमे सञ्जातं निधनं प्रति नैपालकैर्जनैः कथं विरहः प्रकटित इति विषयमवलम्ब्य विरचितमिदं शोककाव्यं पञ्चसप्ततिश्लोकेषु निबद्धमस्ति । अस्य प्रकाशनं २०२८ तमे वैक्रमे कविः स्वयमकरोत् । तस्मिन् काव्ये नैपालकानां प्रजानां महेन्द्रं प्रति स्थिता प्रीतिः, भक्तिः, श्रद्धा च वर्णिताः सन्ति । तेनैव प्रकारेण राज्ञो निधने तात्कालिकैः नेतृवर्गैर्वैदेशिकैर्मान्यैः प्रजाभिश्च प्रकटितः श्रद्धाञ्जलिः काव्यरूपेण प्रस्तुतो वर्तते । तत्काव्यस्यापि पुनः प्रकाशनाभावादधुना दौर्लभ्यमनुभूयते ।

### २.४.३ 'श्री ५ वीरेन्द्रशुभराज्याभिषेकम्' खण्डकाव्यम्

हरिप्रसादशर्मण एतत् तृतीयं काव्यम् । तात्कालिकस्य श्री पञ्चसर्वकारस्य वीरेन्द्रवीरविक्रमशाहदेवस्य शुभराज्याभिषेके २०३१ तमे वैक्रमाब्दे श्रीमता राज्ञा घोषितायाः शिक्षानीतेः प्रचाराय विरचितं प्रस्तुतं खण्डकाव्यं लघुकलेवरकमस्ति, अतस्तात्कालिकायाः शिक्षानीतेः प्रचारोऽस्य प्रमुखमुद्देश्यमतः खण्डकाव्यशीर्षक एव 'श्री ५ वीरेन्द्र शुभराज्याभिषेकम्' (सशिक्षानिदानम्) इत्युल्लिखितं वर्तते । पञ्चश्रीकस्य वीरेन्द्रवीरविक्रमशाहदेवस्य राज्यसञ्चालनं सफलं भूयात्, राज्ञो मनोबलं प्रतिदिनं प्रवर्द्धयेदिति कामायमानः काव्येऽस्मिन् कविः प्राह-

> वपुर्बलं पथ्यनिषेवणेन मनोबलं वृद्धसमादरेण ।
> मेधाबलं शास्त्रविमर्शणेन यथोत्तरं वृद्धिमुपैतु राज्ञः ॥ (वीरेन्द्रशुभ... ५३)

काव्येऽस्मिन् राजभक्तिविषयेऽपि वर्णनं लभ्यते । अस्य काव्यस्य प्रकाशनं २०३१ तमे माघमासे लेखकेन स्वयं कृतं दृश्यते । काव्येऽस्मिन् स्रग्धरा-उपजाति-शार्दूलविक्रीडितच्छन्दसां सप्तनवतिश्लोका वर्तन्ते ।[४५]

## २.५ व्याख्यातुश्शोधप्रबन्धष्टीकाग्रन्थश्च

व्याख्यात्रा हरिप्रसादेन प्रथमतो विद्यावारिधिशोधप्रबन्धो रचितः । तदनन्तरं तं शोधं पूर्णतः परिष्कृत्य शारदाप्रभाटीकाः कृता । अत्र शोधप्रबन्धव्याख्यानग्रन्थयोः परिचयः प्रस्तूयते ।

---

४५. हरिप्रसादशर्माचार्यः *श्री ५ वीरेन्द्रशुभराज्याभिषेकम्*, पूर्ववत्, (२०३१) पृ. भू. १-१२ ।

## २.५.१ शोधप्रबन्धः

अनुसन्धानकार्ये सर्वदैव प्रवर्तमानो हरिप्रसादः पाणिनीयव्याकरणाध्यापनायाहरहः सरलां रीतिमन्विष्टवानासीत् । तस्मिन् क्रम एव सः 'पाणिनीयव्याकरणशिक्षणपद्धतिविमर्शः' इति शीर्षके २०३८ वैशाखतो विद्यावारिधेरध्ययनार्थं सम्पूर्णानन्दसंस्कृतविश्वविद्यालये निवेदितवान् । विश्वविद्यालयेनापि तच्छीर्षकं स्वीकृतम् । ततो गुरो रामप्रसादत्रिपाठिनो निर्देशने स्वकीयमनुसन्धानं पूरयित्वा सम्पूर्णानन्दविश्वविद्यालयसमक्षं प्रस्तुत्य च २०४२ तमे विक्रमवत्सरेऽनेन विद्यावारिधेरूपाधिर्लब्धः ।[४६] परं दुर्भाग्यवशादधुना सम्पूर्णान्दसंस्कृतविश्वविद्यालयीये नेपालसंस्कृतविश्वविद्यालयस्थे च कस्मिन्नपि पुस्तकालये शोधप्रबन्धोऽयं न दृग्गोचरीभवति ।[४७]

## २.५.२ अष्टाध्यायी : शारदाप्रभाव्याख्यामहिता

हरिप्रसादशर्मणा २०४२ तमे विक्रमे पूरिते विद्यावारिधिशोधप्रबन्धे प्राथमिकच्छात्रेभ्यो निर्धारितानि ५३६ पाणिनीयसूत्राणि, तेषामध्ययनक्रमः, सूत्राध्ययनपद्धतिः, प्रायोगिकाभ्यासाय निर्धारितसामग्र्यश्च सन्निविष्टा आसन् । एतादृशीः सामग्रीः प्रयुज्य कृतं शिक्षणं प्रायोगिकं समयानुकूलञ्च भविष्यतीति विचार्य शोधपरिमार्जनेन ग्रन्थप्रकाशनाय तेन महेन्द्रसंस्कृतविश्वविद्यालयं प्रत्यनुरुद्धः । विश्वविद्यालयेनापि स्वीकृतिप्रदाने २०६० तमे वैक्रमाब्दे ग्रन्थोऽयं प्रकाशितः । एकसहस्रसङ्ख्यायां प्रकाशितेऽस्मिन् ग्रन्थे ७३६ मूलपृष्ठानि,२४८ परिशिष्टपृष्ठानि तथा ६२ अग्रपृष्ठानि चेति सम्मेल्य १०४६ पृष्ठानि सन्ति । ग्रन्थस्याग्रभागे तात्कालिकस्य राज्ञो ज्ञानेन्द्रस्यैकलम्, राज्ञो वीरेन्द्रस्य पारिवारिकम्, स्वमातुर्हीराकुमारीदेव्यास्तथा स्वर्गगताया धर्मपत्न्याः शारदादेव्या एकलं तथा वेङ्ग्लोरसंस्कृतसम्मेलने व्याख्यात्रा विद्यासागरोपाधिप्राप्तकालिकञ्च चित्रं सन्निविष्टं वर्तते । तदनन्तरं प्रकाशकीयमन्तव्यम्, व्याख्यातृवंशपरिचयश्च निबद्धः । तेन व्याख्यातृवंशपरिचयशीर्षके वसन्ततिलकादिषु वृत्तेष्वेकषष्ठिसङ्ख्यकेषु श्लोकेषु स्ववंशपरिचयः प्रस्तुतः । वंशपरिचयानन्तरं प्राक्कथनम्, ग्रन्थोद्देश्यम्, उपक्रमो व्याकरणमाहात्म्यमित्यादिषु दशाधिकेषु शीर्षकेषु व्याकरणविद्याया महत्त्वम्, तदितिहासः, पाणिन्यादीनां वैयाकरणानां परिचयः, पाणिनेर्देशकालादिपरिचयः, सूत्रप्रक्रियाक्रमयोर्वैशिष्टचम्, ग्रन्थव्याख्यानरीतयश्च

---

४६. हरिप्रसादशर्माचार्यस्य प्रमाणपत्रानुसारेण ।

४७ प्रकृतानुसन्धात्रा (२०७० वैक्रमे) द्वयोर्विश्वविद्यालयस्थयोः पुस्तकालययोरवलोकनेन प्राप्तसूचनानुसारेण ।

क्रमेणोपन्यस्ता वर्तन्ते । ततः ग्रन्थारम्भे वृद्धिरादैच् (पा.सू.१-१-१) इति सूत्रव्याख्यानपूर्वं माहेश्वरसूत्राणि, स्थानाभ्यान्तरप्रयत्नौ, कादयो मावसानाः स्पर्शेत्याद्याः संज्ञाश्च समाख्याता दृश्यन्ते । एतदनन्तरं अष्टाध्याय्याः सकलसूत्राणि व्याख्याय तदन्ते धातुपाठगण-पाठादीनामुपन्यासो विहितः । अनेन प्रकारेण गभीराध्ययनं विधाय पञ्चदशाधिकवर्षकृतेन परिश्रमेण २०५३ तमे वैक्रमे ग्रन्थोऽयं ग्रथितः, २०६० तमे वैक्रमाब्दे प्रकाशितश्च ।

शारदाप्रभायां प्रायोगिकपद्धतेः प्रयोगः, अभ्यासप्राधान्यम्, सूत्रप्रक्रियाक्रमसङ्गम-प्रभृतीनि नैकानि वैशिष्टयानि सन्ति, तथापि ग्रन्थप्रचाराभावात्, विदुषामुपेक्षया वाऽन्यकारणेनास्याः समालोचना समीक्षा च न जाता । दुःखस्य विषयोऽयं यत्-सहस्राधिकपृष्ठेषु विस्तृतेऽस्मिन् प्रयोगप्रधाने ग्रन्थेऽद्यावधि एकेनापि समालोचकेन न किमपि लिखितं न कापि टिप्पणी च कृता । आशासे भविष्येऽनेकैर्विद्वद्भिः समालोचन-मूल्याङ्कनानि च विधास्यन्ते ।

## २.५.३ कृतिविवरणम्

पुस्तकाकारेण प्रकाशितानामप्रकाशितानाञ्च हरिप्रसादस्य कृतीनां विवरण[४८]मधः प्रस्तूयते-

तालिका सङ्ख्या : ७ हरिप्रसादशर्मणः कृतयः

| क्रमः | कृतिः | प्रकाशन वर्षम् | प्रकाशकः |
|---|---|---|---|
| १ | गोरक्षशाहवंशमहाकाव्यम् | २०२२ | स्वयम् |
| २ | श्री ५ महेन्द्रविरहवेदना (शोककाव्यम्) | २०२८ | स्वयम् |
| ३ | श्री ५वीरेन्द्रशुभराज्याभिषेकखण्डकाव्यम् | २०३१ | स्वयम् |
| ४ | अष्टाध्यायी (शारदाप्रभाव्याख्यामहिता) | २०६० | म.सं.वि. दाङ |
| ५ | बुद्धिविनोदप्रश्नोत्तरी (तत्समच्छन्दसि संस्कृतेऽनुवादः) | २०२५ | अप्रकाशितः |
| ६ | पाणिनीयव्याकरणशिक्षणपद्धतिविमर्शः (विद्या.शोधः) | २०४२ | अप्रकाशितः |
| ७ | अनुसन्धानप्रकाशः (स्थानेश्वरगौतमेन सह संयुक्तलेखनम्) | २०४२ | त्रि.वि.,सं.अ.सं. |
| ८. | अनुसन्धानप्रकाशः (द्वितीयसंस्करणम्) | २०६० | म.सं.वि. |

स्रोतः हरिप्रसादशर्मणो गृहपुस्तकालयः

[४८] हरिप्रसादशर्माचार्यस्य नैजपुस्तकालयतः प्राप्तपुस्तकविवरणानुसारेण ।

## २.६ व्याख्यात्रा प्रकाशिता लेखाः कविताश्च

हरिप्रसादशर्मणा प्रकाशिताः प्रायो लेखाः, समस्यापूर्तिकविताश्च भोजराजपन्त+ भागवतशर्मभ्यां सम्पादितायां संस्कृताध्ययनसंस्थानस्य दाङस्य कर्गजमुद्रणसौजन्येन प्रकाशितायां 'हिमज्योतिः' पत्रिकायां सङ्कलिताः सन्ति ।[४९] तथैवानेन 'व्याख्यातृवंशपरिचयः' इति शीर्षकतःशारदाप्रभायां प्रकाशितमेकषष्ठीश्लोकनिबद्धं पद्यकाव्यमपि सुललितं विविधच्छन्दो- बद्धं मनोहारि वर्तते । एतेषां प्रकाशितलेखकवितानां विवरण[५०]मधः प्रस्तूयते-

तालिका सङ्ख्या : ८ हरिप्रसादशर्मणा प्रकाशिता लेखाः कविताश्च

| क्रमः | लेखः/कविता | पत्रिका | प्र.वर्षम्/अङ्कः | प्रकाशकः |
|---|---|---|---|---|
| १ | मूलशब्दखोजनम् | सुरभिः | २०२६ | त्रि.वि. कीर्तिपुरम् |
| २ | पौरस्त्यशिक्षा-१ | हिमज्योतिः | २०४० पौषः | भोजराजपन्तादयः |
| ३ | पौरस्त्यशिक्षा-२ | हिमज्योतिः | २०४० माघः | भोजराजपन्तादयः |
| ४ | स.पू.क.- संस्कृतं विश्वभाषा | हिमज्योतिः | २०४० फाल्गुनम् | भोजराजपन्तादयः |
| ५ | स.पू.क.- संस्कृतिः रक्षणीया | हिमज्योतिः | २०४० चैत्रः | भागवतशर्मादयः |
| ६ | स.पू.क. - नववर्षहर्षः | हिमज्योतिः | २०४१ वैशाखः | भोजराजपन्तादयः |
| ७ | स.पू.क.-क्व भो वयं प्रस्थिताः | हिमज्योतिः | २०४१ आषाढः | भोजराजपन्तादयः |
| ८ | निर्वचनज्योतिः -१ | हिमज्योतिः | २०४१ श्रावणः | भोजराजपन्तादयः |
| ९ | निर्वचनज्योतिः -२ | हिमज्योतिः | २०४१ भाद्रः | भोजराजपन्तादयः |
| १० | निर्वचनज्योतिः -३ | हिमज्योतिः | २०४१ आश्विनः | भोजराजपन्तादयः |
| ११ | निर्वचनज्योतिः -४ | हिमज्योतिः | २०४१ कार्तिकः | भोजराजपन्तादयः |
| १२ | हिन्दुसंस्कृतौ राजसत्ता | हिमज्योति | २०४१ मार्गशीर्षः | भोजराजपन्तादयः |
| १३ | निर्वचनज्योतिः -८ | हिमज्योतिः | २०४२ वैशाखः | भागवतशर्मादयः |
| १४ | निर्वचनज्योतिः -९ | हिमज्योतिः | २०४२ जेष्ठः | भोजराजपन्तादयः |
| १५ | निर्वचनज्योतिः -१० | हिमज्योतिः | २०४२ आषाढः | भोजराजपन्तादयः |
| १६ | निर्वचनज्योतिः -१३ | हिमज्योतिः | २०४२ भाद्रः | भोजराजपन्तादयः |

४९. भोजराजपन्तमहोदयेन (२०७३) तमे वैक्रमाब्दे प्रदत्तसूचनानुसारेण ।
५०. हरिप्रसादशर्माचार्यस्य नैजपुस्तकालयतः प्राप्तपुस्तकविवरणानुसारेण ।

| | | | | |
|---|---|---|---|---|
| १७ | निर्वचनज्योतिः -१४ | हिमज्योतिः | २०४२ आश्विनः | भोजराजपन्तादयः |
| १८ | निर्वचनज्योतिः -१५ | हिमज्योतिः | २०४२ कार्तिकः | भागवतशर्मादयः |
| १९ | निर्वचनज्योतिः -१६ | हिमज्योतिः | २०४२ मार्गशीर्षः | भागवतशर्मादयः |
| २० | व्याख्यातृवंशकाव्यम् | शारदाप्रभा | २०६० | म.सं.वि. दाङः |

स्रोतः - हरिप्रसादशर्मणो गृहपुस्तकालयः

## २.७ शारदाप्रभाव्याख्यायाः परिचयः

प्रस्तुतशीर्षके शारदाप्रभाव्याख्यानस्य पृष्ठभूमिः,ग्रन्थनिर्माणे प्रेरणप्रभावः,प्रकृतव्याख्याया उपजीव्यग्रन्थः, ग्रन्थस्वरूपम्, विषयवस्तु, प्रकरणसङ्घटनम्, भाषाशैलीप्रभृतिभिः शीर्षकैर्ग्रन्थ-परिचयः प्रस्तूयते ।

### २.७.१. शारदाप्रभाव्याख्या-रचनायाः पृष्ठभूमिः

शारदाप्रभादेवी व्याख्यातुर्हरिप्रसादस्य धर्मपत्न्या नाम । सा २०४९ तमे वैक्रमाब्दे दिवङ्गता । स्वधर्मपत्न्या वियोगजन्यपीडया प्रपीडितोऽयं धर्मपत्न्याः संस्मरणे कवितामिमां रचितवान्-

सतीवियोगोद्भववेदनाविदः सुधांशुमौलेः सुलभं न मादृशा ।
भवेऽत्र सीताविरहानुभाविनः स्नुतात्मनो दाशरथेश्च दर्शनम् ॥[५१]

स्वधर्मपत्न्या वियोगजपीडां भगवता शङ्करेण सह, सीताविरहिणा रामेण सह च तोलयता व्याख्यात्रानेन नैकाः कविता विरचितास्तथापि पीडा न शान्ता अतस्तन्नाम्ना व्याख्यानमिदं रचितमिति व्याख्याता स्वयं वार्ताप्रसङ्गे ज्ञापितवान् ।[५२]

संस्कृतव्याकरणं साहित्यादिविषयापेक्षया शुष्कं मन्यते । तदध्यापनरतो यः कोऽपि प्राध्यापको “विषयमिमं षड्भिर्मासैः कथं सरसतयाऽध्यापयितुं शक्यते” इति विचारयत्येव । ग्रन्थकर्त्रा हरिप्रसादशर्मणापि षड्भिर्मासैर्व्याकरणमध्यापयितुमध्यापनप्रारम्भादेव विचारितम् । अध्यापनकालेऽप्यसौ द्वयोरष्टाध्यायीपुस्तकयोः पत्राणि पृथक्कृत्य एकस्मिन् पटे गुन्द्रेण क्रमशः

---

५१. हरिप्रसादशर्माचार्यः (व्या.),*अष्टाध्यायी,* म.सं.वि. : दाङः, (२०६०) पृ. भू. ।
५२. हरिप्रसादशर्माचार्येण (२०६० तमे विक्रमे) प्रदत्तसूचनानुसारेण ।

संश्लेश्य पूर्णामष्टाध्यायीमध्यापनकक्षाया भित्तिकायामवलम्बितवान् । तत्क्रमे सूत्रस्थानुवर्त्यानि पदान्यङ्गुलिनिर्देशनेन पाठितवाँश्च ।

व्याख्याताऽयं कतिपयान् अन्यान् कठिनविषयान् सूत्राणि च श्यामपट्टे लिखित्वाऽशिक्षयत् । तथाऽनेन शिक्षिताश्छात्राः सूत्राणि, सूत्रार्थम्,अनुवर्त्यान् विषयाँश्च सलीलं सत्वरमेव ज्ञातवन्तः, एवं क्रमेण पाठयता तादृशशैल्याऽभिप्रेरितः संस्कृतसङ्कायप्रमुखः श्रीमदम्बिकाप्रसादोऽधिकारी- भवान् यथा पाठयति तथा लिपिबद्धं करोतु, यतः सर्वासु संस्थासु शैलीयं प्रसरेदिति निर्दिष्टवान् । नवीनरीत्या ग्रन्थकर्त्राऽध्यापयता जनताविद्यापीठावलोकनार्थ-मागतस्त्रिभुवनविश्वविद्यालयीयस्तात्कालिकोपकुलपतिः सूर्यबहादुरशाक्यमहोदयोऽपि पुस्तक-प्रकाशनार्थमभिप्रेरितवान् । तस्यैव प्रेरणया प्रकृतव्याख्यात्रा पाणिनीयव्याकरणशिक्षण-पद्धतिविमर्शरिति शीर्षके विद्यावारिधिशोधः कृतः । तं शोधं परिष्कृत्य समग्रामष्टाध्यायीं प्रायोगिकदृष्टचा व्याख्यायासौ ग्रन्थमिमं २०५३ तमे वैक्रमे पूरितवान् ।

## २.७.२ शोधप्रबन्धपरिष्कारः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः २०४२ तमे वैक्रमे पूर्णतां नीतस्य 'पाणिनीयव्याकरणशिक्षणपद्धतिविमर्शः' इति नामकस्य विद्यावारिधिशोधप्रबन्धस्य परिष्कार एव प्रस्तुतग्रन्थ इति व्याख्यातासौ साक्षात्कारक्रमे प्रकृतमनुसन्धातारं सूचितवान् । अनेनानुसन्धात्रापि कति विषयाः परिष्कृताः कति च यथावत् संस्थापिता सन्तीति ज्ञानार्थं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयं पुस्तकालयं गत्वा प्रस्तुतशोधप्रबन्धोऽन्विष्टः परं दुर्भाग्यवशात् स न प्राप्तः, तथैव नैपालकेषु पुस्तकालयेषु तथानुसन्धातुर्गृहस्थपुस्तकालये च प्रस्तुतशोधप्रबन्धो नोपलब्धः । अनुसन्धातृगृहे टङ्कन(टाइप) यन्त्रेणोट्टङ्कितस्या-परिष्कृतशोधप्रबन्धस्य प्राग्रूपमेवाधिगतम् । ततो द्वयोरध्ययनेन तोलनेन च ज्ञातस्य शोधप्रबन्धस्य परिष्करणमेवैतद् व्याख्यानमिति व्याख्यातुः कथनं सत्यमस्तीत्यनुभूतम् ।

प्रस्तुतव्याख्यानग्रन्थस्य प्राक्कथने, उपक्रमे, तदन्तर्गतेषु शीर्षकेषु च स्थितानि बहूनि शीर्षकाणि विषयाश्च शोधप्रबन्धस्य भिन्नभिन्नेषु चाऽध्यायेषु वर्तन्ते । तथैवात्रत्यं शब्दमाहात्म्यम्, व्याकरणमाहात्म्यम्, व्याकरणपरम्परा, वैयाकरणाः प्रभृतीनि शीर्षकाणि तदनु समुल्लिखिता विषयाश्च प्रायः समानाकृतिका एव सन्ति । ते शोधप्रबन्धस्य प्रथमाऽध्याये व्याख्यानग्रन्थे तु भूमिकायां ग्रथिताः सन्ति । व्याख्यानेऽपि शोधप्रबन्धे स्थितं विषयवस्तु प्रवर्द्धच प्रस्तुतीकृतं दृश्यते ।

शोधप्रबन्धे व्याकरणशिक्षणपद्धतिः प्रमुखोऽस्ति चेद् व्याख्यानग्रन्थे तु प्रकरणक्रमेण सूत्राणि तदनूदाहरणानि,वार्त्तिकफक्किकापरिभाषादीनि समुल्लिखितानि सन्ति । तथैव प्रसङ्गतः संस्कृतव्याकरणरचनाभ्यासः,शब्दानां धातूनाञ्च रूपाणि, रूपसाधनाभ्यासादीनि विषयवस्तूनि च सन्ति । तैः सह सूत्रोदाहरणादीनां शिक्षणरीतिरपि सङ्क्षेपतः प्रस्तुता वर्तते । विद्यावारिधिशोधोऽयं चतुःशतसङ्ख्यकेषु पृष्ठेषु निबन्धीकृतः । तदपेक्षया व्याख्यानग्रन्थस्तु सहस्राधिकेषु पृष्ठेषु रचित इति द्वयोर्महत् पार्थक्यम् ।

हरिप्रसादेन विद्यावारिधिशोधप्रबन्धे न्यस्तोऽनुच्छेदः परिष्कृते ग्रन्थे सर्वत्र प्रवर्द्धित उत तादृशरूपेणैव प्रस्तुत इति जिज्ञासाशमनाय शोधप्रबन्धस्य तृतीयाध्याये तथा व्याख्यानग्रन्थस्य च भूमिकायां प्रस्तुतः समानविषयक एकोऽनुच्छेदो निदर्शनायात्र प्रस्तूयते-

शोधप्रबन्धे-

"एधँ॒ वृद्धौ । वृतुँ॒ वर्तने । स्वरितचिह्नम् - उपर्युर्ध्वरेखा । यथा- डुप॑चँष् पाके । वहँ॑ प्रापणे इत्यादिः । उदात्तस्य चिह्नं न भवति वेदेऽपि तथैव । एतेन एध इत्यस्य ए तथा वृतु इत्यस्य ऋ इति चोदात्तः । डुपचँष् इत्यत्र प इत्यस्याकारोऽनुदात्तः, तेन पच्धातुरनिट् इत्यपि स्फुटं भवति । तेषामुच्चारणे वस्तुतस्तु गुरूपदेश एव शरणम्, यथोपदिशति श्रद्धेयो गोपालचन्द्रमिश्र- उच्चारणे वस्तुतस्तु सद्गुरुशरणं मतमिति ।"[५३]

व्याख्यानग्रन्थभूमिकायां -

"एधँ॒ वृद्धौ । वृतुँ॒ वर्तने । स्वरितचिह्नम् - उपर्युर्ध्वरेखा । यथा- डुप॑चँष् पाके । वहँ॑ प्रापण इत्यादि । यथा उदात्तस्य चिह्नं न भवति वेदेऽपि तथैव । एतेषामुच्चारणे वस्तुतस्तु गुरूपदेश एव शरणम् । यथोपदिशति गोपालचन्द्रमिश्रः- उच्चारणे वस्तुतस्तु सद्गुरुशरणं मतमिति सम्प्रदायबोधिनी शिक्षा ।"[५४]

एतयोः साम्येन प्रकृतप्रसङ्ग उभावपि साम्याविति निश्चीयते ।

---

५३. हरिप्रसादशर्माचार्यः, *पाणिनीयव्याकरणशिक्षणपद्धतिविमर्शः* (विद्या.शोधप्राग्रूपः) वाराणसी : स.सं.वि., (२०४२) पृ. ४२ ।

५४. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. भू. ष ।

### २.७.३ शारदाप्रभाव्याख्याया उपजीव्यम्, सन्दर्भग्रन्थाश्च

संस्कृतव्याकरणे काव्येषु लक्षणग्रन्थेषु च संरक्षकत्वेन, मुख्यस्रोतोरूपेण, प्रामाणिकाधारग्रन्थत्वेन, निमित्तत्वेन वा उपजीव्यशब्दो बहुप्रचलितो दृश्यते । यथा लघुशब्देन्दुशेखरे- यत्तूपजीव्यविरोधात् सन्धिर्न इत्याहुरित्यादि... । तथैव महाभारते- सर्वेषां कविमुख्यानामुपजीव्यो भविष्यतीति । एवमेव साहित्यदर्पणे- इत्यलमुपजीव्यानां मान्यानां व्याख्यानेषु कटाक्षनिक्षेपेण... । नैकेषु ग्रन्थेषु इत्थं प्रयुक्तोऽयमुपजीव्यशब्दो निमित्तमाधारमुख्यं वार्थं शास्तीति निर्णीयते ।

पाणिनीयाष्टाध्यायी,पातञ्जलमहाभाष्यम्, तदुपरि व्याख्यानग्रन्थत्वेनोपनिबद्धानि काशिका सिद्धान्तकौमुद्यादीनि व्याख्यानानि, तदनु रचिता न्यासपदमञ्जरीबाल-मनोरमातत्त्वबोधिन्याद्यष्टीकाः शारदाप्रभाया उपजीव्या इव प्रतीयन्ते परं ते सर्वे नोपजीव्या अपि तु सहायकग्रन्था एव, एतेषूपजीव्यग्रन्थौ तु काशिकाकौमुद्यावेव । व्याख्यायामस्यां काशिकायाः प्रायः सूत्रक्रमः, विवदमानेषु स्थलेषु तत्पक्षग्रहणम्, काशिकाविवृत्त्योर्न्यास-पदमञ्जर्योर्लक्षणप्रधाना शैली, तत्रत्योद्धरणानि च बहुत्र गृहीतानि सन्ति, उदाहरणं यथा- न य्वाभ्यां पदान्ताभ्यां... इति सूत्रमत्र गृह्यते । सूत्रमिदं वैयसनम्, वैयाकरणः,सौवश्व इत्यादिषु आद्यच्वृद्धिं निषिध्यैजागमम्, दाध्यश्विः माध्यश्विरित्यत्र तन्निषेधञ्च कुरुते । नियममिमं शारदाप्रभाकारः काशिकापदमञ्जरीभ्यां स्पष्टीकरोति । असौ काशिकामुद्धरन्नाह- "प्रतिषेधवचनमैचोर्विषयप्रक्लृप्त्यर्थम्, इह मा भूत् दाध्यश्विः,माध्वश्विः । न ह्यत्र य्वाभ्यामुत्तरत्र वृद्धिप्रसङ्गोऽस्ति वृद्धेरभावात् प्रतिषेधोऽपि नास्तीत्यप्रसङ्ग इति ।"[५५] अर्थादत्र आद्यचो वृद्धिनिषेध ऐजागमश्च यकारवकाराभ्यां परत्र प्रसक्ताया वृद्धेर्निषेधविषय एव प्रवर्तते न तु तद्व्यतिरिक्तेः । अतो दाध्यश्विरित्यादौ वृद्धेर्न निषेधः तस्मादत्र सूत्रमिदं न प्रवर्तत इति ज्ञापनार्थं व्याख्याकारोऽयं दाध्यश्विरित्यादीनि प्रत्युदाहरति । प्रस्तुविषयख्यापकं पदमञ्जरीवाक्यं शारदाप्रभाकारोऽत्र गृह्णाति, तेनैव प्रकारेणान्यत्रापि काशिकां तद्व्याख्यानानि च शारदाप्रभाकार उद्धरतीति काशिकाया उपजीव्यत्वं निश्चीयते । प्राथमिकाध्ययनार्थं कौमुदीक्रमेण निर्धारितेषु शारदाप्रभायाः पाठ्यविषयेषु सिद्धान्त-कौमुदीसदृशस्य प्रकरणक्रमस्य शब्दधात्वादीनां रूपनिर्माणक्रमस्य कौमुदीसदृश-प्रकरणविन्यासस्य च ग्रहणेन कौमुद्यपि शारदाप्रभाया उपजीव्या प्रतीयते । काशिकाकौमुदीभ्यां व्यतिरिक्तेभ्यो गोपालशास्त्रिणोऽष्टाध्याय्याः, प्रक्रियाकौमुद्याः, प्रतिसंस्कृतासिद्धान्तकौमुद्यास्तथाऽन्येभ्योऽपि

---

५५. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. ६१९ ।

नैकेभ्यो ग्रन्थेभ्योऽत्र विषयवस्तु,शैलीशिल्प-भाषिकसंरचनादीनि गृहीतानि सन्ति तथापि तानि प्रासङ्गिकान्येव सन्तीति सहायकान्येव ।

## २.७.४ शारदाप्रभाया विषयवस्तु

शारदाप्रभाटीकेयमष्टाध्यायीसूत्राणां तेषामर्थोदाहरणादीनाञ्च सारल्येनोद्बोधो भवत्विति धिया विरचिता । अतोऽष्टाध्याय्याः सकलसूत्राणाम्, प्रसङ्गतः समागतानां वार्त्तिकानाम्, परिभाषाणाम्, फक्किकानाञ्च विवृतिः प्राप्यतेऽत्र । प्रायः संस्कृतभाषायां निबद्धेऽस्मिन् व्याख्यानग्रन्थे विषयवस्तुनः स्फुटाभिव्यक्तये कतिपयेषु स्थानेषु नेपालीभाषायाः कतिपयेषु स्थानेषु तु हिन्दीभाषाया अप्यवलम्बनमभ्युपेयते । प्राग्वर्तिभ्यः काशिका-सिद्धान्तकौमुदी-प्रतिसंस्कृतासिद्धान्तकौमुदीप्रभृतिभ्यो व्याख्यानग्रन्थेभ्यस्तद्विवृतिभ्यश्च कतिपयविषयान् गृहीत्वा सरलातिसरलतया विषयविज्ञापनमस्य महद्वैशिष्ट्यम् । अत आधुनिकशैलीप्रधानेऽस्मिन् व्याख्याने बहुत्र सूत्रप्रक्रियाक्रमसङ्गमः प्राप्यते । प्रथमतो हल्सन्ध्यन्तर्गतानां विषयाणां ख्यापनम्, ततोऽजादिसन्धिनिरूपणं ततः षड्लिङ्गेषु तत्राप्यज्हल्स्वकारादिक्रमेण शब्दसाधुत्वसम्पादनं ततोऽव्ययं व्याख्याय लघुकौमुद्यामिव तिङन्तोत्तरतिङन्तकृदन्तकारकतद्धितक्रमेण द्वन्द्वसमासान्तं प्रक्रियाक्रमिकं व्याख्यानं विधायानन्तरं सूत्रक्रममनुसृत्य शब्दसाधुत्वसम्पादनं विदधातीति प्रकृतग्रन्थस्यापरं वैशिष्टचम् । द्वन्द्वसमासानन्तरं (नवीनक्रमाभावात्) सूत्रक्रममनुसृत्यैव व्याख्येयमिति व्याख्यातायमनुसन्धातुर्जिज्ञासामशमत् ।[५६] व्याख्यायामस्यामधोऽङ्कितानि ५३६ सूत्राणि व्याख्यातानि सन्ति । अत्र शारदाप्रभायाः प्राथमिकस्वरूपज्ञानाय प्रकृतव्याख्यात्रा निर्धारितः प्रकरणक्रमोऽत्र प्रस्तूयते-

तालिकासङ्ख्या : ९ शारदाप्रभायाः प्राथमिकस्वरूपम्

| प्रकरणनाम | सूत्राणि | वार्त्तिकानि |
|---|---|---|
| हल्सन्धिशिक्षणरीतिः | २५ | ३ |
| अच्सन्धिशिक्षणरीतिः | २० | × |
| सुँबन्तशिक्षणरीतौ | (क-च प्रकरणस्थानि) १५० | |
| (क) अजन्तपुँलिङ्गप्रक्रिया | ६१ | १ |

५६. हरिप्रसादशर्माचार्येण (२०७१ तमे वैक्रमे) प्रदत्तसूचनानुसारेण ।

| | | |
|---|---|---|
| (ख) अजन्तस्त्रीलिङ्गप्रक्रिया | ३ | × |
| (ग) अजन्तनपुंसकलिङ्गप्रक्रिया | ८ | × |
| (घ) हलन्तशब्दाः | १८ | × |
| (ङ) त्यदादि + शेषसर्वादिगणः | ५८ | × |
| (च) अव्ययप्रकरणशिक्षणम् | २ | × |
| तिङन्तशिक्षणरीतिः/पूर्वतिङन्तोपदेशः | १७१ | १ |
| उत्तरतिङन्तशिक्षणरीतौ | (क-ङ प्रकरणस्थानि) १८ | |
| क)णिजन्तप्रकरणम् | ३ | × |
| ख)सन्प्रत्ययः | ५ | × |
| ग)यङ्प्रत्ययः | ४ | × |
| घ)यङ्लुक् | २ | × |
| ङ)नामधातुः | ४ | १ |
| कृदन्तशिक्षणरीतौ | (क-ग प्रकरणस्थानि) ५१ | |
| क)पूर्वकृदन्तः | ३५ | × |
| ख)कृत्यप्रकरणम् | ५ | × |
| ग)उत्तरकृदन्तः | ११ | × |
| कारकशिक्षणरीतिः | ९ | × |
| तद्धितशिक्षणरीतिः | ५४ | × |
| समासे | (क-घ प्रकरणस्थानि) ३८ | |
| क) अव्ययीभावसमासः | १५ | × |
| ख) तत्पुरुषः/कर्मधारयः | १२ | × |
| ग) बहुव्रीहिः | ९ | × |
| घ) द्वन्द्वः | २ | × |
| प्राथमिकाध्ययनाय निर्धारितसूत्रयोगः | ५३६ | वार्त्तिकयोगः ६ |

स्रोतः अष्टाध्यायी (शारदाप्रभाव्याख्यायुता)

अत्र व्याख्याकारोऽयं प्रथमद्वितीययोरध्ययनयोर्भिन्नामेव सरणिमुपदिशति । व्याकरणप्रविविक्षवः प्राथमिकाश्छात्राः सरलतया विषयप्रवेशं तदध्ययनञ्च काङ्क्षन्त अतस्तेषां

कृते व्याख्याताऽयं सरलशब्दक्रमेण, लघुकौमुदीकारेणेव प्रकरणानि विभजति, शङ्कासमाधानं विनैव रूपसिद्धिं च शिक्षयति । तत्र नैपुण्यं प्राप्ताश्छात्रा द्वितीयाध्ययने शङ्कासमाधान-परमतखण्डन-सूत्रस्थपदकृत्यप्रदर्शनादिपूर्वकमष्टाध्यायीक्रमेण पठितुं प्रभवन्तीति तस्याध्ययनस्य निष्कर्षः ।

अत्र प्राथमिकाध्ययनार्थं निर्धारितेषु कतिषु प्रकरणेषु सूत्रेषु च कौमुदीक्रमोऽपि व्यतिक्रान्तो दृश्यते । एतादृशो व्यतिक्रमो हल्सन्धितोऽच्सन्धिविन्यासेन, अकारान्तशब्दादीकारान्तानां रूपसाधनेन, सर्वादीनां त्यदादीनाञ्चैकत्रैव त्रिषु लिङ्गेष्वेव रूपसाधननिर्देशेन, कारक-तद्धित-समासक्रमेण प्रकरणविन्यासेन च कृतः प्राप्यते । एतादृक् प्रकरणविच्छेदः प्रायोगिकीमाधुनिकीञ्च शिक्षणपद्धतिं प्रयुज्य सरलतया रीत्या व्याकरणपाठनाय, शुष्कं व्याकरणमित्याक्षिप्य पलायमानान् छात्रान् सरसया शैल्या व्याकरणशिक्षणाय च कृत इति व्याख्याताऽसौ स्थले स्थले स्पष्टयति । उदाहरणप्रस्तुतिक्रमे काशिकाकारो वेदोपनिषद्महाभारतादीनवलम्बते चेद्धरिप्रसादस्तु नैपालकानि राजपरम्परासम्बद्धानि समाजधर्मनीतिलोकपरम्पराद्युद्बोधकानि वाक्यानि, पदानि च समुद्धृत्य कुरुते । व्याख्यातासौ प्रथमतः सरलमर्थं प्रस्तुत्य तत्रोदाहरणानि सङ्गमय्य शङ्कायां सत्यां तासामुद्भावनादिकमपि कृत्वा ततोऽनुवृत्तिनिदर्शनञ्च कृत्वा तृतीये चरण एव सूत्रस्य शास्त्रीयार्थमुदाहरणशङ्का- समाधानादिकमुपस्करोति । व्याख्यानेऽस्मिन् विशेषतः काशिकायाः, तद्व्याख्यानयोर्न्यास- पदमञ्जर्योः, सिद्धान्तकौमुद्यास्तद्विवृतीनां बालमनोरमातत्त्व-बोधिन्यादीनां प्रभावः स्थले स्थले द्रष्टुं शक्यते । व्याख्यात्रा प्रायः स्थूलस्थलनिर्देशो ग्रन्थनामोल्लेखनेन विहितस्तथापि प्रकरणपृष्ठाङ्कादीनां विधिवदुपस्थापनन्तु नैव विहितमित्यवगन्तव्यम् । व्याख्यातुरेषा शैली प्राक्तनी ।

## २.७.५ व्याख्येयग्रन्थस्वरूपं सूत्रन्यासप्रक्रिया च

शारदाप्रभाव्याख्यामहितायामष्टाध्याय्यां सिद्धान्तकौमुद्यामिव ग्रन्थस्योपरि मूलमात्रं प्रस्तुतमस्ति । तत्राष्टाध्यायीक्रमेण सूत्राणि, तदनु उदाहरणानि,प्रत्युदाहरणानि, फक्किका, वार्त्तिकानि, परिभाषा, कुत्रचित् काशिकाकौमुद्यादीनां वाक्यानि च सन्ति । मूलभागे विन्यस्तेषु सूत्रेषु कानिचन स्थूलाक्षरितानि सन्ति चेत् कति तु सामान्यानि वर्तन्ते, तत्र स्थूलाक्षरितैः पदैः तेषामग्रेगमननिर्देशो बोद्धव्यः, तादृशपदादीनि कियदध्यायपादसूत्रान्तं च गमिष्यन्तीति सङ्केतस्तु सूत्रान्ते विन्यस्तेनाङ्कसङ्केतेन निर्धारितः । व्याख्याकारोऽयमुदाहरणादीनां प्रस्तुतौ

यथासम्भवं नेपालीयपरम्परामङ्गीकुरुते, यथा- विभाषा सेनासुराच्छायाशालानिशानाम् (पा.सू. २-४-२५) इति सूत्रे- नेपालसेनम्-नेपालसेना,गोशालम्-गोशाला इत्यादिः ।

ग्रन्थस्य मूलभागे सूत्रादीनि विन्यस्य व्याख्यानभागे कस्मात् सूत्रादनन्तरं किं पाठनीयम्, प्रकृतसूत्रे कुतः किं पदमनुवर्तत इति निर्दिष्टो वर्तते, यथा "तुमुन् ण्वुलौ क्रियायां क्रियार्थायाम् (पा.सू. ३-३-१०) इति सूत्रानन्तरं कृन्मेजन्त इति सूत्रं पाठयम्"[५७] इति सङ्केतयति । तदनन्तरं प्रकृते कस्मात् सूत्रात् किमनुवर्तत इति ज्ञापनायानुवर्त्यानु वर्तमानपदयुतयोर्द्वयोः सूत्रयोरुल्लेखः कृतोऽभ्युपेयते । तत्र कखादिवर्णद्वारा पदसङ्केतो विहितः । अनेन प्रकारेणानुवृत्तेरसङ्केतरूपं कौमुदीस्थं दौर्बल्यम्, प्रकरणविन्यासगतमष्टाध्याया निर्बलत्वञ्च दूरीकृत्य शारदाप्रभाकारेण सूत्रप्रक्रियाक्रमयोः सङ्गमो व्यधायि । एतादृशं सूत्रप्रक्रियाक्रमसंयोजनं दृष्ट्वा भूमिकालेखकः पूर्णचन्द्रढुङ्गेलमहोदयः "ग्रन्थेऽस्मिन् सूत्रक्रमस्य प्रक्रियाक्रमस्य च सङ्गमो वर्तत इत्याह ।" [५८] एतादृशेन क्रमेण चार्थे द्वन्द्वः (पा.सू.२-२-२९) इति सूत्रान्तं पाठ्यमिति निर्दिश्य सामान्यतो विषयबोधे जाते ततोऽष्टाध्यायीक्रमेण शिक्षणीयमिति व्याख्यातुनिर्देशो दृश्यते ।

शारदाप्रभायां कथं सूत्राणि न्यस्तानीति ज्ञापनायाधस्तात् पञ्चदशसूत्राण्युल्लिख्यन्ते ।

ग्रन्थारम्भे मङ्गलमाचरेदिति शिष्टवचनमनुपालयन्नसौ ग्रन्थव्याख्यानपूर्वं प्रारम्भिकाणि त्रीणि सूत्राणि मङ्गलार्थं प्रयुङ्क्ते, एवं-

१. वृद्धिरादैच् १-१-१

२. अदेङ् गुणः १-१-२

३. तुल्यास्यप्रयत्नं सवर्णम् १-१-९

शारदाप्रभायाः सन्धिप्रकरणस्थः सूत्रक्रमः-

१. स्तोः श्चुना श्चुः ८-४-३९

२. ष्टुना ष्टुः ८- ४-४०

३. मोऽनुस्वारः ८-३-२३

४. ढो ढे लोपः ८-३-१३

---

५७. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. ७।

५८. पूर्णचन्द्रढुङ्गेलः (मन्तव्यलेखकः), *अष्टाध्यायी,* पूर्ववत्,(२०६०) पृ. ७ ।

५. ढ्रलोपे पूर्वस्य दीर्घोऽणः ८-३-१११

६. रो रि ८-३-१४

७. खरवसानयोर्विसर्जनीयः ८-३-१५

८. विसर्जनीयस्य सः ८-३-३४

९. वा शरि ८-३-३६

शर्परे खरि वा विसर्गलोपो वक्तव्यः (वार्त्तिकम्)

१०. कु x प्वो x क x प्वौ च ८-३-३७

११. झलां जशोऽन्ते ८-२-३९

१२. झलां जश् झशि ८-४-५२

१३. खरि च ८-४-५४

१४. वाऽवसाने ८-४-५५

१५. शश्छोऽटि ८-४-६२

छत्वममिति वाच्यम् ( वार्त्तिकम् )

(इत्यादिक्रमेण चार्थे द्वन्द्व इत्यन्तं क्रमो निर्धारितः )

## २.७.६ शारदाप्रभाव्याख्यायाः शक्तिः सीमा च

शक्तिर्नाम बलं योग्यता सामर्थ्यं पराक्रम ऊर्जेत्याप्टेकोशकारः ।[५९] सीमा च तस्य दौर्बल्यम् । शारदाप्रभाव्याख्यायां शक्तिशब्दतोऽस्या वैशिष्ट्यं ज्ञेयम् । शारदाप्रभेयं व्याकरणप्रविविक्षून् कोमलमतींश्छात्रान् नेपालीहिन्दीसम्मिश्रितया सरलया संस्कृतगिरा विषयं प्रबोधयतीति सरलतया विषयप्रबोधनमस्य प्रथमं वैशिष्ट्यं शक्तिर्वा । तथैवाधुनिकत्वेन प्रथितायां प्रायोगिकपद्धतौ ग्रन्थरचनमस्य द्वितीयं वैशिष्टचम् । इतः पूर्वं विरचितानि सूत्रक्रमिकाणि प्रक्रियाक्रमानुसारीणि वा प्रायो व्याख्यानानि विषयगतगाम्भीर्यप्रकाशने समर्थानि दृश्यन्ते । काशिका-पदमञ्जरी-न्यास-बालमनोरमा-तत्त्वबोधिनीतुल्यानि पूर्वव्याख्यानानि पदानि विवृण्वन्ति, शङ्कां समादधते, रूपाणि साधयन्ति, मतान्तराणि प्रस्तुत्य प्रौढसरणिमङ्गीकुर्वन्ति, कतिपये स्थले प्रौढपाण्डित्यमपि प्रदर्शयन्ति, परं तानि प्राथमिक-

---

५९. वामनशिवराम आप्टे, *संस्कृतहिन्दीकोश:,* वाराणसी : मोतीलालब., (इ.१९९३) पृ. ९९७।

छात्रयोग्यताऽननुकूलितानि च सन्ति । प्राथमिकाश्छात्रा एतान् विषयान् अधिगमिष्यन्ति न वेति ते न कदापि विचारयन्ति । पठनपाठनशैलीमपि न निर्दिशन्ति प्रकृतव्याख्यानन्तु सरलतया स्तरानुकूलेन प्रयोगाभ्यासमूलकेन निगमनागमनविध्योः संयोजनेन, मध्ये मध्ये छात्रान् परीक्ष्य च विषयं प्रबोधयति, अतोऽभ्यासबाहुल्यमस्य तृतीयं वैशिष्टचम् । अत्र कीदृशान्यन्यानि वैशिष्टचानि सन्तीत्यत्र भवानीशङ्करभट्टराई ऋतम्भरापत्रिकायां लिखति "सारल्यमस्य महद् वैशिष्ट्यं प्रतीयते यतो हि जिज्ञासुबालकेभ्यः षण्मासावधि भाषां शिक्षयित्वा तदनन्तरमेव व्याकरणपाठने प्रेरकोऽसौ व्याख्यानस्यास्य कस्मिंश्चित् स्थलेऽपि प्रौढपाण्डित्यप्रदर्शनाय शास्त्रान्तरीयगूढविषयप्रतिपादनाय वा न प्रयतते । सर्वथा केनोपायेन छात्राः सूत्रार्थानधिगमिष्यन्तीति स्मारं स्मारं चिन्तयन् दृश्यते ।"[६०] व्याख्यानक्रमेऽसौ प्रथमतो विषयपरिचयं प्रदाय, ततो रूपसाधनादिकं समुल्लिख्य तृतीयचरण एव शास्त्रीयविषये प्रविशति, अतः प्रयोगमूलकं व्याख्यानमिदमिति निश्चयेन वक्तुं शक्यते ।

एतादृशं वैशिष्ट्यसंयुतमपि प्रस्तुतव्याख्यानं व्याकरणशास्त्रीयमतभेदे प्रायः स्वमतं नोपस्थापयतीत्यस्य प्रथमो दुर्बलपक्षः । तथैव व्याख्यायामस्यां नवीनशास्त्रीयचिन्तनं वैषयिकप्रौढत्वं च कुत्रापि न विलसति, इतोऽधिकं ज्ञानं तु पूर्ववर्त्तिभिः काशिका-कौमुद्यादिभिस्तद्व्याख्यानैरेव वितरितम् । अतोऽस्मात् पूर्वव्याख्यानान्येव समुपयुक्तानीत्युक्त्वा एक आलोचन्ते तत् स्वाभाविकमपि, अतो वैषयिकचिन्तने सङ्कोचस्तत्र चञ्चुप्रवेशश्चास्य द्वितीयं दौर्बल्यम् । तेनैव प्रकारेणापेक्षाधिकं शिक्षकेभ्यश्छात्रेभ्यश्च निर्देशनमभ्यासे एकरूपताभावश्चास्य तृतीयं निर्बलत्वम् । अनेनैव प्रकारेण सूत्रप्रक्रियाक्रमयोः सङ्गमने कतिपयेषु स्थानेष्वाधारं विनापि क्रमविन्यासः कृतः स चास्य चतुर्थं दौर्बल्यं प्रतीयते । तस्मादप्यधिकं दौर्बल्यन्तु एकस्मिन्नेव पुस्तक एकत्रैव सूत्रप्रक्रियाक्रमयोर्विन्यासः, एतेन कियानंशः प्राथमिकैः कियाँश्च द्वितीयकैः पठनीय इति निश्चेतुं न शक्यते । एतादृशान्यन्यान्यपि नैकानि दौर्बल्यानि व्याख्यायामस्यां लभ्यन्ते, तथापि गुणाधिक्याद् गुणेष्वेतान्यन्तर्भवन्तीति दोषं परित्यज्य गुणा ग्राह्या इति निष्कर्षः ।

## २.७.७ शब्दशास्त्रीयविवृतिग्रन्थेषु शारदाप्रभायाः स्थानम्

अष्टाध्यायीसूत्रोपरि तद्व्याख्यानग्रन्थोपरि च शताधिका व्याख्यानग्रन्था विरचिताः स्युः । नेपालदेशेऽपि दशाधिकैर्विवृतिकृद्भिः प्रक्रियाक्रमेण सूत्रक्रमेण चाष्टाध्यायीसूत्राणि

६०. भवानीशङ्करभट्टराई, 'अष्टाध्यायीव्याख्याने...' *ऋतम्भरा* (१३-१६),काठमाडौं : ने.सं.वि.अनु. के., (२०७०) पृ.९२ ।

व्याकृतानि । एतेषु सकलविवृतिग्रन्थेषु शारदाप्रभेयं नवीना, सामान्या च प्रतीयते । इतः पूर्वं भारतीयैर्व्याख्यातृभिर्या याश्च संस्कृतव्याख्याः कृताः प्रायस्ताः स्वकीयपाण्डित्यप्रदर्शनोद्देश्येन विरचिताः सन्ति, तथैव ताः सर्वाः शेखर-प्रौढमनोरमा-काशिकायमानाः सन्ति । शारदाप्रभा तु न तादृशी । अस्या उद्देश्यन्तु प्राथमिकेभ्यश्छात्रेभ्यः प्रयोगमूलकसरण्या सरलया च भाषया विषयप्रबोधनमस्ति, अतो भारतीयैर्नैपालकैश्च पूर्वव्याख्यातृभिः कृतैर्व्याख्यानैः सहैतत् तोलयितुं न शक्यते । तेषां सर्वेषां पृथङ् महत्त्वमस्ति, अस्यापि भिन्नं वैशिष्ट्यं दृश्यते, तथापि स्वपूर्ववर्तिभिर्व्याख्यानैः सहैकत्र संप्रस्तुतेऽपेक्षाकृतं न्यूनतरं शक्तिसामर्थ्यमत्र प्राप्तुं शक्यते । अतो भारतवर्षीयशब्दशास्त्रीयव्याख्यानपरम्परायां सामान्यमिदमिति वक्तुमुपयुक्तं भवति ।

नैपालकविवृतिग्रन्थेष्वपि सुकृतिदत्तपन्तस्य वृद्धयादिसूत्राष्टकविवृतिः, सोमनाथ सिग्द्यालस्य प्रतिसंस्कृतासिद्धान्तकौमुदी चेति ग्रन्थद्वयमेतस्मात् प्राञ्जलतरं प्रौढतरञ्च मन्तव्यम् । तथापि पन्तस्य वृद्धयादिसूत्राष्टकविवृतिरपूर्णाऽप्रकाशिता च वर्तते । सोमनाथसिग्द्यालवर्यस्य प्रतिसंस्कृता सिद्धान्तकौमुदी प्रकाशिता प्रौढतराऽपि वर्तते तथापि सा प्रक्रियाक्रमावलम्बिनी दृश्यते । तयोस्तुलनायां सूत्रप्रक्रियाक्रमयोः समन्वयोर्भाषिकसारल्यञ्चास्य महद् वैशिष्टचयम् । इतः प्राग्वर्त्तिनः पश्चवर्त्तिनो वाऽन्ये व्याख्यानग्रन्था एतस्मादतिसामान्याः स्वल्पाकाराश्च सन्तीति वृद्धयादिसूत्राष्टकविवृति-प्रतिसंस्कृतासिद्धान्तकौमुद्यपेक्षयाऽसौ सामान्य अन्यव्याख्यानग्रन्थापेक्षया उत्कृष्टश्चेति तयोर्मध्यवर्त्तित्वेन ग्रन्थमिममाकलयितुं शक्यत इति निष्कर्षः ।

### २.६.८ पूरकसामग्रीप्रयोगः

पाणिनीयसूत्रख्यापनाय सहयोगिन्य अनेकाः पूरकसामग्र्यः शारदाप्रभाकारेणात्र प्रस्तुताः सन्ति । तादृशसामग्रीषु व्याकरणविषयसम्बद्धासु सतीस्वपि इतः पूर्ववर्तिभिस्तास्वप्रयुक्तास्वपि भाषाशिक्षणे तासामुपयोगं दृष्ट्वा विषयप्रबोधयितृत्वेन प्रकृतव्याख्यात्रा कृतः । प्रकृतग्रन्थे समुपलब्धा तादृशसामग्र्यः कीदृश्यः सन्तीत्यत्र निरूप्यते । प्रस्तुतव्याख्यान एधै एधावहै एधामहै इत्यत्र महिङ्प्रत्ययस्य रूपसाधनानन्तरं कर्तृकर्मवाच्ययोरुदाहरणानि वाक्यप्रयोगेण प्रदर्शितानि सन्ति ।[६१] कर्तृकर्मभाववाच्येषु 'सम्यग्बोधः' इति शीर्षकद्वारा तादृशबोधः, तस्य भावस्त्वतलौ (पा.सू.५-१-११८) इति सूत्रव्याख्यानक्रमे भावपदार्थबोधनाय घटस्य चित्रद्वारा व्याख्यानम्[६२] आभ्यन्तरो बाह्यश्चेति कृत्वा वृत्तद्वयात्मकं चित्रं निर्माय वृद्धिरेचि (पा.सू.६-१-

---

६१. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. २४१ ।
६२. पूर्ववत्, पृ.२६२ ।

८५) इति सूत्र उत्सर्गापवादयोर्व्याख्यानम्[६३] अष्टाध्यायीं समाप्यापि चार्थे द्वन्द्वः (पा.सू.२-२-२९) इति सूत्रानन्तरं पाठ्यविषयमुल्लिख्य ततः पश्चाद्वर्तिनां प्रकरणानां सङ्केतः, सुँबन्तप्रकरणानन्तरं पाठ्यो धातुपाठ इत्युल्लिख्य भू सत्तायामित्यतो दशगणीयधातूनां रूपसमुल्लेखनम्, सूत्रसूची, धातुसूची, सिद्धान्तकौमुद्या उणादिप्रकरणसन्निवेशः, तदन्ते फिट्सूत्रव्याख्या, भैरवमिश्रकृतलिङ्गानुशासनव्याख्यासमावेशः, भाष्यसहितायाः पाणिनीयशिक्षायाः समुल्लेखः, गणपाठसन्निवेशश्चास्मिन् ग्रन्थे वर्तन्ते । एतानि विषयवस्तूनि प्रकृतव्याख्यानस्य परिशिष्टभागे स्थिता विषयसहयोगिन्यः पूरकसामग्र्यो विद्यन्ते ।

प्रकृतव्याख्याने समाहारस्वरबोधकं स्वरितचिह्नमनुनासिकचिह्नमनुबन्धोपदेशसदृश्यः सामग्र्योऽपि प्राप्यन्ते । अत्रैतेषां प्रयोगः प्रयोजनञ्च क्रमशः प्रस्तूयते ।

### २.७.८.१ स्वरितचिह्नप्रयोगः

वर्णस्योपरि शिरसि वा स्थितोर्ध्वरेखा हि स्वरितचिह्नम् । तत् चिह्नं सामान्यत उदात्तत्वानुदात्तत्ववर्णधर्मयुक्तैकाज्त्वमभिव्यनक्ति । महर्षिपाणिनिः चिह्नमिदमेवं परिभाषते- "समाहारः स्वरितः (पा.सू.१-२-३१) इति [६४] तं व्याख्यायन् भट्टोजिदीक्षितः प्राह- उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञ इति" तादृशः स्वरितो वेदे शारदाप्रभायाञ्च शब्दोपरिकृतयोर्ध्वरेखया सङ्केत्यते । वेदे तस्य प्रयोगः समाहारस्वरबोधनाय भवति स्म परं महामुनिः पाणिनिस्तु सूत्रस्थमग्रेऽनुवर्त्यं पदं पदसमूहादिकं वा सूचनार्थं प्रयुक्तवान् । पाणिनीये व्याकरणेऽधिकारार्थमयं प्रयुज्यत इति नागेशः स्वरितेनाधिकारः (पा.सू.१-३-११) इति सूत्रे व्याख्याति, एवं- "स्वरितत्वज्ञाप्योऽधिकारो विनियोग इत्यर्थः...विनियोगश्च प्रायेणोत्तरत्रोपस्थितिः, क्वचित् पूर्वमपि, कियद् दूरमधिकार इत्यत्रासति गमके व्याख्यानमेव शरणमिति ।" [६५] स्वीयसूत्रोत्तरसूत्रैकवाक्यतया विवक्षितार्थनिष्पादनप्रयोजनेन स्वरितोऽयमधिक्रियते । अधिकारो नाम व्यापृतिः, यथा लोकेऽधिकृतो ग्रामेऽसाविति कथिते व्यापृतिर्गम्यते । स च स्वरविशेषेणाधिकार उत्तरत्रानुवृत्तिरूपव्यापारः प्रत्येतव्यः । तादृशाधिकारश्च प्रायेणोत्तरसूत्रेष्वेव गच्छति, तथापि कियद् दूरान्तं गच्छतीत्यत्र नियमाभावाद् व्याख्यानमेव शरणमिति नागेशस्याशयः ।

---

६३ पूर्ववत्, पृ. ४५१ ।
६४. वासुदेवदीक्षितः (व्या), *वैयाकरणसिद्धान्तकौमुदी,* वाराणसी : चौ. सु.भा.प्र., (इ.१९६९) पृ.२१ ।
६५. नागेशः, *लघुशब्देन्दुशेखरः* (प्रथमो भागः), वाराणसी : चौ.सु.भा.प्र. (इ.२००६) पृ ११२ ।

उपर्युक्तनागेशवचनात् पाणिनीयसूत्रोपरि स्वरितचिह्नमासीत् तच्च कालान्तरे विलुप्तमिति ज्ञायते । शारदाप्रभाकारस्तदेव स्वरितचिह्नं पाणिनीयसूत्राणां तत्रत्यपदानां वाऽग्रे गमनीयपदसूचनाय प्रयुङ्क्ते, यथा- इको *यणचि'* (पा.सू.६-१-७४) इत्यत्राचीति पदे स्थितोर्ध्वरेखा । अतः सूत्रस्थमचीति पदमग्रिमे 'एचोऽयवायावः' (पा.सू.६-१-७५) इति सूत्रेऽधिगच्छतीति ज्ञायते । एकस्यैव सूत्रस्य बहूनि पदानि पृथक् पृथक् सूत्रान्तमग्रे गच्छन्तीति तेषां बोधः कथं स्यादिति विचारणायां बहुषु गमनीयेषु पदेषु सत्सु नैकानि स्वरितचिह्नानि न्यस्तानि, यथा- *सुँपः आत्मनः क्यच्*- (पा.सू.३-१-८) ११,९,१० अत्रत्येषु त्रिषु पदेष्वेव त्रीणि चिह्नानि प्रयुक्तानि । तथैव चिह्नितं पदमिदं कियद् दूरान्तं गच्छतीत्यत्रापि नास्ति कोऽपि नियमः, तत्र व्याख्यानमेव शरणम् । व्याकरणप्रविविक्षवस्तत् कथं जानीयुरिति शङ्कायां जागरितायां तत्सूत्रान्तेऽङ्कसङ्केतेन सीमा निर्धारिता, यथा पूर्वोक्ते- सुँपः आत्मनः क्यच् इति सूत्र एकादशेति अङ्कस्तृतीयाध्यायस्य प्रथमपादस्य एकादशसूत्रान्तमत्रत्यः सुप इति पदं गच्छतीति सूचयति तथैवान्यत्रापि । अष्टाध्याय्या आधारमानितायां गोपालदत्तशास्त्रिणोऽष्टाध्याय्यान्तु स्थूलाक्षरेण तादृशस्वरितचिह्नं सङ्केतितम् । शारदाप्रभाकारोऽपि स्वरितचिह्नेनैवानुवृत्तिसङ्केतः स्पष्टीभवतीत्यत्र न विश्वसिति, अतः स स्वरितसङ्केतेन सहैव सूत्रस्थं तादृशं पदं स्थूलाक्षरीकृत्यापि सूचयति, यथा-सुँप आत्मनः क्यच् इत्यत्र कृतः स्थूलाक्षरसङ्केतः । वेदे सामान्यत उदात्तानुदात्तस्वरितश्चेति त्रिविधाः स्वरा दृश्यन्ते । तेषु स्वरिते वर्णस्य शिरस्युपरि ऊर्ध्वरेखा भवतीति उक्तमेव, तथैवानुदात्ते वर्णस्याधस्तात् तिर्यग् रेखा दीयते यथा- अर्वाङिति । अत्र आद्योऽकारोऽनुदात्तः ।

स्वरितचिह्नमिदं किमर्थमत्र प्रयुज्यत इत्यत्र हरिप्रसादशर्मा ग्रन्थभूमिकायामाह- लाघवेन सूत्रार्थोपदेशाय भगवान् सूत्रकारोऽनुवृत्तिरीतिमङ्गीकृतवान् । तत्र कस्मात् सूत्रात् किमग्रिमसूत्रेष्वनुवर्तत ? इति प्रतिपत्तये स्वरित(नामकं किञ्चित् चिह्नम्) चिह्नमनुवर्त्ये पदे शब्दे वा खलूपयुयुजे । कालक्रमेण शिक्षणरीतौ विकृतायां स्वरितपदार्थोऽपि नाद्यत्वे दृढं निश्चीयते अतोऽनुवर्त्यपदसङ्केताय शिरस्यूर्ध्वरेखा उपयोगिनीति विचार्य तथा कृतम् ।[६६] शारदाप्रभाकारेण कृतेनैतादृशेन स्वरितचिन्हप्रयोगेण न केवलं प्रविविक्षवोऽपि तु आचार्योत्तीर्णाः प्रक्रियाक्रमिका वैयाकरणा अपि लाभान्विता भविष्यन्तीति तस्यावश्यकमतिशयेन वर्तते ।

६६. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. भू. ल ।

## २.७.८.२ अनुनासिकचिह्नप्रयोगः

हरिप्रसादसम्पादितायामष्टाध्याय्यां बहुत्रानुनासिकचिह्नप्रयोगो दृश्यते । तादृशचिह्नमनुबन्धलोपकर्तव्येषु वर्णेषु प्राप्यते, यथा- प्रजोरिनिँः (पा.सू.३-२-१५६) इति सूत्रे नकारोत्तरवर्त्तिन इकारोऽनुबन्धेन लोप्यो विद्यते, अतो ग्रन्थसम्पादकेनानुनासिकेन चिह्नितः । तादृशान्युदाहरणानि- ईश्वरे तोसुँन् कसुनौ (पा.सू.३-४-१३), लिँङर्थे लेँट् (पा.सू. ३-४-७) चूर्णादिनिँ (पा.सू. ४-४-२३), प्रतिपथमेति ठँश्च (पा.सू. ४-४-४२) दृग्दृशवतुँषु (पा.सु. ६-३-८९), लिँङ् सिँचोरात्मने- पदेषु (पा.सू. ७-२-४२) इत्यादिष्वनुबन्धलोपार्हेषु सूत्रस्थपदेषु प्राप्यन्ते । अत्र प्रतिपदमेति ठश्चेति सूत्रेऽनुनासिकेन चिन्हितस्याचो लोपः करणीय इति आचार्यमतम् । परं लोपे सति प्रातिपथिक इति प्रयोगे ककारोत्तरस्याकारस्यास्तित्वं कथं स्यादिति चिन्तनीयम् ।

को नामानुसिकः ? अस्य स्वरूपं कीदृशम् ? एतादृशीं जिज्ञासां शमयन् भगवान् सूत्रकार आह- मुखनासिकावचनोऽनुनासिकः (पा.सू.१-१-८) तत्रैव वृत्तिकारः प्राह- "मुखसहितनासिकयोरुच्चार्यमाणो वर्णोऽनुनासिक इति" [६७] तादृशोऽनुनासिको विन्दुयुक्ताऽर्धचन्द्रको भवतीति निर्धार्य महाभाष्य-काशिका-प्रौढमनोरमादिषु उपदेशेऽजनुनासिक इत् (पा.सू.१-३-२) इति सूत्रेण तस्या लोपव्यवस्था कृता । प्रौढमनोरमाकारः- नासिकामनुगतोऽनुनासिक इति यौगिकार्थाश्रयणेनैवानुनासिकस्य प्रतिपत्तावनुनासिकसंज्ञासूत्रं मन्दप्रयोजनं [६८] इति प्रसङ्गेऽस्य यौगिकार्थमुररीकुरुते । चन्द्रबिन्दुत्वेन स्थितस्यानुनासिकस्य कृते भगवता पाणिनिना कोऽपि सङ्केतो न कृतः । अन्यव्याख्यातृभिः सम्पादितायामष्टाध्याय्यां तद्व्याख्यानेषु च लोपार्हेषु वर्णेष्वनुनासिकप्रयोगो न लभ्यते । तर्हि स कथं ज्ञेय इत्यत्र भट्टोजिदीक्षितः प्राह- प्रतिज्ञानुनासिक्याः पाणिनीया इति [६९] परमधुनातनीयाः सामान्याश्छात्राः प्रतिज्ञागम्यमनुनासिकं न परिचिन्वन्तीति विचार्य प्रकृतव्याख्याता स्वसम्पादितायामष्टाध्याय्या- मावश्यकस्थलेऽनुनासिकप्रयोगं कृतवान् । तद्विषये स आह- "प्रतिज्ञानुनासिक्याः पाणिनीया इति वाक्यस्य कोऽभिप्रायो भवेत्- सम्भवतो गणपाठादिवदनुनासिकपाठोऽपि पाणिनिना पठितः कालक्रमेण स नष्टः, अतोऽद्यत्वेऽनुनासिकोऽनुमेयः, यथा स्वौजसमौट् (४-१-२) इति सूत्रे प्रथमैकवचन उकारो दृश्यते । प्रत्ययः (३-१-१) इत्यादिषु सूत्रेषु च विसर्गो दृश्यते । अतः प्रथमाविभक्तेरेकवचनस्य

---

६७. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी,* वाराणसी : चौ.सु.भा.प्र., (इ.१९९६) पृ. २५ ।
६८. भट्टोजिदीक्षितः, *प्रौढमनोरमा,* वाराणसी : चौ.सु.भा.प्र., (इ.१९९८) पृ. ४० ।
६९. भट्टोजिदीक्षितः, पूर्ववत् (इ.१९९६) पृ.१४ ।

'सु' इत्यस्योकारोऽनुनासिकः । यद्ययं सोरुकारोऽनुनासिको न स्यात्तदा सकारस्योकारेण व्यवधानाद् रुत्वाऽनापत्तौ विसर्गनिर्देशो न सङ्गच्छेत् ।"[७०]

अतः सर्वत्रानुनासिकेषु तदुच्चारणं कार्यम्, लिप्यां च चिह्नमिदं देयम्, यथा - वर्तमाने लँट् (पा.सू.३-२-१२३) लुँङ् (पा.सू. ३-२-११०), अनद्यतने लँङ् (पा. सू. ३-२-१११), क्तक्तवतूँ निष्ठा (पा.सू. १-१-२५), ससजुषो रुँः (पा.सू.८-२-६६) । विभक्तौ च- सुँ, ङसिँ । धातुषु- अतँ सातत्यगमने, एधँ वृद्धौ, अवँ रक्षणादिषु, चितीँ संज्ञाने इत्यादिः ।[७१] अनेन प्रकारेण सूत्रेषु, विभक्तिषु, धातुष्वागमेषु च यथावश्यकमनुबन्धत्वयोग्या वर्णा अनुनासिकचिह्नेन सङ्केत्येति शारदाप्रभाकारस्य निर्देशः । व्याख्याकारोऽयं सुबन्तशिक्षणरीतिप्रारम्भे एङ्ह्रस्वात् सम्बुद्धेः (पा. सू.६-१-६७) इति सूत्रे'ऽनुबन्धविषये विशेषोपदेशः' इति शीर्षकद्वारा सुबन्तीयेषु स्वौजसादिषु प्रत्ययेष्वनुबन्धफालनप्रक्रियां क्षेत्राद् गृहे धान्यानयने तुषस्नायुवृन्तादीनां फालनमिव भवतीति दृष्टान्तद्वारा बोधयति । पुनश्च तत्रत्यासु विभक्तिषु के के स्वराः कानि कानि व्यञ्जनानि च फाल्यन्त इति बोधयति ।[७२] शारदाप्रभाकारेण महताऽऽयासेन कृतेनैतेषां प्रयोगेण व्याकरणविवोधयिषुभ्यो महान् लाभो मिलिष्यतीत्यनुनासिकप्रयोग उपकारक इति निष्कर्षः ।

### २.७.८.३ अनुबन्धफलोपदेशः

महर्षिपाणिनिना सूत्राणि प्रणयताऽनुबन्धानां विभिन्नानि प्रयोजनानि प्रतिपादितानि सन्ति । तानि च शारदाप्रभाकारेण सन्यतः (पा.सू.७-४-७९) इति सूत्र एकत्र सङ्गृह्य समुल्लिखितानि । सूत्रादिषु समागतानां स्वराणां व्यञ्जनानाञ्चानुबन्धानां किं फलमित्यत्र समुल्लिख्यते-

१. अन्त्ये उदात्ताकारोपदेशफलम्= मुखसुखार्थम्,यथा- पठँ=पठ्=पठति ।
२. ङिदनुदात्तस्वरेत्फलम्= आत्मनेपदम्, यथा=पूङ्=पवते, मुदँ=मुद्=मोदते ।
३. ञित्-स्वरितेत्संज्ञाफलम्=उभयपदे, यथा- श्रिञ्-श्रि- श्रयति/श्रयते, डुपचँष-पच्-पचति/पचते ।
४. इँदित्फलम्= इदितो नुम्धातोः(पा.सू.७-१-५८)इति नुमागमः,यथा- मथिँ-मन्थ्-मन्थति ।

---
७०. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्,(२०६०) पृ.भू. श ।
७१. पूर्ववत् ।
७२. पूर्ववत्, पृ. ४४६ ।

५. दीर्घोकारानुबन्धफलम्= स्वरति...(पा.सू.७-२-४४) इति सूत्रेण वलादेरार्धधातुकस्य विकल्पेनेट्,यथा-गुपू-गुप् गोपायिता/गोपिता । इत्यादिः ।

अनेन प्रकारेण पाणिनीयव्याकरणे प्रयुक्तानां स्वरितचिन्हानाम्, अनुनासिकचिन्हानाम्, अनुबन्धवर्णानाञ्च प्रयोगफालनयोः फलान्युद्दिश्य सेडनिड्व्यवस्थादीनां प्रक्रियासम्बद्ध-नियमानाञ्चैकत्र सङ्ग्रहं कृत्वा शारदाप्रभाकारेण महानुपकार कृत इत्यवधेयम् ।

## २.७.९ शारदाप्रभायां शिक्षाशास्त्रोक्तमान्यतानामनुप्रयोगः

शारदाप्रभायां शिक्षाशास्त्रे समुल्लिखितानामाधुनिकमान्यतानां प्रयोगो यत्र तत्र दरीदृश्यते । अत्र विशेषतः शिक्षाशास्त्रोक्तानां- 'उत्प्रेरणानां प्रयोगः, शैक्षिकोपकरणप्रयोगः, दृष्टान्तप्रयोगः, स्तरानुकूलं विषयचयनम्, मूल्याङ्कनम्,' इत्यादय अनेका आधुनिकमान्यता उपयुङ्क्ता दृश्यन्ते । अत्र क्रमश एतासां मान्यतानां प्रयोगस्थलपरीक्षणं विधीयते ।

### २.७.९.१ उत्प्रेरणायाः प्रयोगः

शिक्षाशास्त्रिणो भाषाव्याकरणयोः शिक्षण उत्प्रेरणाया मनोवैज्ञानिकं प्रभावमामनन्ति । पठनीयेषु विषयेषु छात्रेषूत्प्रेरणायां जागरितायां प्रतिशतं पञ्चाशत् समस्या न्यूनीभवन्तीति तेषामभिमतम्, अतस्ते प्रेरणामदृश्यशक्तिमुररीकुर्वन्ति । व्याकरणसदृशानां कठिन विषयाणामध्यापने तत्सम्बद्धाः कथाः, रोचकप्रसङ्गाः, सम्बद्धव्यक्तेर्जीवनी, दृष्टान्तकथाः, प्रासङ्गिकमुदाहरणम्, मनोरञ्जनप्रदायकाः क्रीडाश्चावश्यका भवन्ति । कक्षायामुत्प्रेरणस्य महत्त्वं वर्णयन् प्रसिद्धवैज्ञानिक आइन्स्टाइनवर्यो लिखति- "अहं कक्षायां विद्यार्थिनो न पाठयामि केवलं पठनपाठनवातावरणमेव निर्मामि ।"[७३] एतेन कथनेन कक्षायां पाठनपूर्वमुपयुक्तं वातावरणं निर्मेयं भवतीति ज्ञायते । शारदाप्रभाव्याख्यायां यत्र तत्रैवोत्प्रेरणप्रयोगः प्राप्यते । व्याख्याकारोऽयं विषयप्रबोधनपूर्वं दृष्टान्तादिभिः, उत्प्रेरकवाक्यैः, निर्देशनैश्च वैषयिकीं जिज्ञासां प्रवर्द्धयति । तादृशमुदाहरणं 'उरण् रपरः' (पा.सू. १-१-५०) इति सूत्रे प्राप्यते । तत्र स प्राह- "एतत्सूत्रार्थोपदेशे शिक्षकेण स्मेरमुखेन सता छात्राणां हृदयमावर्जनीयम् । स्वयमपि त्वरा न कार्या..."[७४] व्याख्याकारोऽयमत्र पाठने विषयप्रवेशपूर्वं छात्राणां ध्यानमाकर्षयित्वा वातावरणं निर्माति, यत्र जिज्ञासवः सहसा पठितुं शक्नुवन्ति । महाभाष्यकारः पतञ्जलिर्विषयव्याख्यानपूर्वं

---

७३. चिरञ्जीविशर्मा, *शिक्षामनोविज्ञानम्*, काठमाडौं : एम.के.पब्लिसर्स, (२०५२) पृ. १३१ ।
७४. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ. १० ।

प्रश्नोत्तरात्मकैर्वाक्यैस्तद्विषये जिज्ञासामुत्थाप्य शिक्षार्थिनस्तत्राकर्षति, शारदाप्रभाकारो हरिप्रसादोऽप्यत्र तामेव पद्धतिमनुकुर्वन् व्याख्यातव्ये विषये पक्षविपक्षाभ्यां प्रश्नं कृत्वा जिज्ञासूनाकर्षयति । तादृशमुदाहरणं सरूपाणामेकशेष एकविभक्तौ (पा.सू.१-२-६४) इत्यत्र द्रष्टुं शक्यते, तदेवं- "किमिदं सरूपाणामिति ? समानं रूपं येषान्ते सरूपास्तेषाम् । अथ किं पुना रूपम् ? आकृतिः ? श्रोत्रग्राह्या शब्दाऽऽनुपूर्वी । कथं रूपं नाम आकृतिः श्रोत्रग्राह्यानुपूर्वी स्यात् न पुनश्चक्षुर्ग्राह्यम् ? शब्दानुशासनात् ..." [७५] एतादृशी प्रश्नोत्तरात्मिका शैली विषयं प्रति जिज्ञासाप्रवर्द्धनायावश्यमेवाकर्षयतीति एतदप्युत्प्रेरणम् । एतद्विधानि समुत्प्रेरकवाक्यानि प्रकृतव्याख्याने बहुत्र दृश्यन्त इति व्याख्यानेऽस्मिनुत्प्रेरणायाः प्रयोगोऽस्तीति निश्चीयते ।

### २.७.९.२ शैक्षिकोपकरणप्रयोगः

यस्य कस्यापि कठिनविषस्य बोधः शब्दवाक्याद्यपेक्षया चित्रसङ्केतादिभिः शैक्षिकोपकरणप्रयोगेण च कृते सति विषयावबोधः सुकरो भवति । विषयव्याख्याने चित्रमहत्त्वमुपस्थापयन् दार्शनिकः कन्फ्युसियस एकत्राह-"सहस्रपदात्मकैः शाब्दिकैरभिव्यक्तिभिर्बोध्यो यो कोऽपि विषय एकेनैव चित्रेण स्फुटीभवतीति ।" [७६] एतेन कथनेनापि विषयावबोधे चित्रसङ्केतादीनामावश्यकत्वं वरीवर्तीति निश्चयेन वक्तुं शक्यते । तथैव श्यामपट्टप्रयोगोऽपि विषयप्रबोधनाय सहयोगी मन्यते । प्रकृतायाः शारदाप्रभाव्याख्यायाः कठिने स्थाने बहुत्र चित्रसङ्केताभ्यां विषयावबोधनप्रयासः कृतो दृश्यते । व्याख्याकारोऽयं तस्य भावस्त्वतलौ (पा.सू.५-१-११८) इति सूत्रे मनसा बोध्यं भावं घटचित्रद्वाराऽवबोधयति । तथैव वृद्धिरेचि (पा.सू.६-१-८५) इति सूत्रस्थिते एच्प्रंत्याहारे आद् गुणः (पा.सू.६-१-८४) इत्यत्र पठितोऽच्प्रत्याहारोऽप्यन्तर्भवतीति द्वितीये प्रथमोऽपि प्रसज्यते, स च कथं निवार्यत इत्याशङ्कायाः समाधाने कखमण्डलयोर्चित्रद्वारा प्रथमस्योत्सर्गस्य द्वितीयेनापवादेन बाध्यत इति बोधयति । तेनैव प्रकारेणान्यत्रापि कतिचित् स्थानेषु चित्रेण विषयप्रबोधनमस्य वैशिष्टचं मन्यते। यद्यपि व्याख्यानेऽस्मिन् तादृशप्रयोगो न्यूनतम एव स्थाने परिलक्ष्यते तथापि शारदाप्रभाकारेण चित्रद्वारा विषयावबोधनप्रयासः कृत इत्यवधेयम् । तथैव श्यामपट्टप्रयोगनिदर्शनमपि प्रकृतव्याख्याया वैशिष्टचं मन्तव्यम् । शारदाप्रभाकारोऽयं प्रायः

---

७५. पूर्ववत्, पृ. ३८ ।

७६. चिरञ्जीवीशर्मा, *शिक्षामनोविज्ञानम्*, काठमाडौं : एम.के.पब्लिसर्स, (२०५२) पृ. १३१ ।

सूत्रोल्लेखने, रूपसाधने, रूपावलीनिदर्शने च श्यामपट्टप्रयोगार्थं शिक्षकान् निर्दिशति । अनेन प्रकारेण मण्डलनिर्माणम्, चित्रप्रदर्शनम्, श्यामपट्टप्रयोगः,अष्टाध्यायीपुस्तकयोः पत्राणि पृथक्कृत्य भित्तिकायामवलम्बनं सर्वे शैक्षिकोपकरणप्रयोगा एव, अतः शारदाप्रभायां शैक्षिकोपकरणानां प्रयोगोऽस्तीति वक्तुं शक्यते ।

## २.७.९.३ दृष्टान्तप्रयोगः

श्रीमद्भागवते दृष्टान्तकुशलो व्याख्याता प्रशस्यो भवतीति समुल्लिखितमस्ति ।[७७] पाश्चात्त्याः शिक्षाविदोऽपि शिक्षणे विषयव्याख्याने प्रवचने च दृष्टान्तं मुहुर्मुहुः प्रशंसन्ति । तेषामभिमतमुद्धरन् चिरञ्जीविशर्मा शिक्षणविधेरुल्लेखनक्रमे प्रवचनविधिं व्याख्यायन् दृष्टान्तप्रयोगेण कृतमध्यापनं फलदायकं भवतीति समुद्गिरति ।[७८] अतो न केवलप्राच्यानामपि तु पाश्चात्त्यानां मतेऽपि दृष्टान्तप्रयोगो महनीयो मन्यते । तत्प्रयोगेण कृतं व्याख्यानमपि प्रायोगिकं सुबोध्यञ्च भवतीति निश्चित्य शारदाप्रभाकारोऽपि बहुत्र विषयावबोधनार्थं दृष्टान्तं प्रयुङ्क्ते । अत्रत्येषु 'उपदेशेऽत्वतः' (पा.सू.७-२-६२), 'कृसृभृवृ...'( पा.सू.७-२-१३), 'नादिचि' (पा.सू.६-१-१००), 'एङ्ह्रस्वात् सम्बुद्धे' (पा.सू.६-१-६७) प्रभृतिषु पञ्चाशदधिकसूत्रेषु दृष्टान्तप्रयोगः प्राप्यते । एतेन विषयसरलीकरणार्थं विशेषकार्यं कृतमनुभूयते ।

## २.७.९.४ स्तरानुकूलं विषयचयनम्

पाठ्यक्रमे निर्धारणाय चितं विषयवस्तु छात्रयोग्यतानुकूलं भवितव्यमिति शिक्षाशास्त्रिण उद्घोषयन्ति । प्राथमिकेभ्यः प्रौढेभ्यश्च छात्रेभ्यस्तदेव विषयवस्तुचयनं नियमविरुद्धम-व्यावहारिकञ्च भवतीति तेषामभिमतम् । पाश्चात्त्याः शिक्षाशास्त्रिणः पाठ्चक्रमस्य स्वरूपमुल्लिखन्त इमं समतलीयम् (Horizontal) लम्बीयम् (Vertical) चेति द्विधा विभजन्ते । तेषां विचारे मानवशास्त्र-भूगोल-समाज-राजनीतिशास्त्र-संस्कृतिप्रभृतीन् विषयानेकीकृत्य 'अस्माकम् समाजः' इति विषयनिर्धारणं समतलीयं सङ्गठनमस्ति चेत् प्राथमिकमाध्यमिकोच्चमाध्यमिकासु कक्षासु तदेव व्याकरणं सरलतः कठिनक्रमेण निर्धारणं लम्बीयं सङ्घटनमस्ति ।[७९] शारदाप्रभाव्याख्यायां उपर्युक्तस्य द्वितीयसङ्घटनस्य स्पष्टः प्रभावः

---

७७. वेदव्यासः, *श्रीमद्भागवतमहापुराणम्,* (सप्तच.सं.) गोरखपुर : गीताप्रेस, (२०५९) पृ.३६ ।
७८. चिरञ्जीवीशर्मा, *कक्षाकोठामा मनोविज्ञान,* काठमाडौं : एम.के. पब्लिसर्स, (२०६३) पृ.५११ ।
७९. डिकेन्द्रप्रसादभट्टः, *पाठ्यक्रम योजना..,* काठमाडौं : हेरिटेज पब्लिसर्स, (२०६७) पृ.१७८ ।

परिलक्ष्यते । व्याख्याकारोऽयं प्रकृतव्याकरणं प्राथमिकान् द्वितीयकाँश्च छात्रान् विभज्य पाठयितुं कामयते, अतोऽसौ एतावद् विषयवस्तु प्राथमिकान् एतावच्च द्वितीयकान् पाठ्यमिति निर्दिशति । प्रथमत उदाहरणैः प्रत्युदाहरणैश्च सरलगिरा विषयमुपस्थाप्य तदनन्तरञ्च काशिकामहाभाष्यादिषु स्थितैर्विशेषवाक्यैः प्राथमिकेभ्यो द्वितीयकेभ्यस्तृतीयकेभ्यश्च छात्रेभ्यो विषयप्रबोधनमस्य स्तरानुकूलं विषयचयनमित्यवेधयम् । तथैवाष्टाध्याय्या आसन्नचतुःसहस्रसूत्रेभ्यः तत्प्रक्रियाभ्यश्च प्राथमिकान् छात्रान् ५३६ सूत्राणि तत्साधितप्रक्रियां च सरलक्रमेणाध्याप्यैव तदनन्तरमवशिष्टानां विषयाणां चयनं स्तरानुकूलं विषयचयनम् । तेनैव प्रकारेण सरलं सुबोध्यञ्च प्रक्रियाक्रमं प्रथमतः पाठयित्वा तदनन्तरमेव गम्भीरे सूत्रक्रमे प्रवेशोऽपि लम्बीयक्रमावलम्बनमेव, अतोऽत्र विषयवस्तुचयने लम्बीयक्रमावलम्बनं प्राप्यते ।

### २.७.९.५ मूल्याङ्कनम्

निर्धारितपाठ्यवस्तुनः शिक्षणेनापेक्षितान्युद्देश्यान्यधिगतानि न वेति ज्ञानाय कृतमुपलब्धिमापनमेव मूल्याङ्कनम् । तादृशं मूल्याङ्कनं निर्माणात्मकं निर्णयात्मकं निदानात्मकञ्चेति त्रिविधं भवतीति शिक्षाशास्त्रिणो वदन्ति । एतेषु कक्षाकार्य-गृहकार्याऽऽवधिकपरीक्षा निर्माणात्मके मूल्याङ्कनेऽन्तर्भवन्तीति तेषामभिमतम् ।[८०] शारदाप्रभायां तादृशनिर्माणात्मक-मूल्याङ्कनस्य प्रयोगः प्राप्यते । व्याख्याकारोऽयं 'तुल्यास्यप्रयत्नं सवर्णम्' (पा.सू.१-१-९) इत्यत्र स्थानप्रयत्नौ शिक्षयित्वाद्यावधि पठिताः प्रत्याहारस्थानप्रयत्नाः, स्थानाभ्यन्तरप्रयत्नयोः सवर्णसंज्ञा च छात्रैरधिगता न वेति परीक्षणीया इत्युक्त्वा मूल्याङ्कनार्थं शिक्षकान् निर्दिशति, तदेवं- "अत्र सिंहावलोकनन्यायेन प्रत्याहारस्थानाभ्यन्तरप्रयत्न-सवर्णविषयषु छात्राः परीक्षणीयाः । तथा प्रतिदिनमधीतविषयाः पुनरावर्तनीया इतिच्छात्राः प्रतिदिनमुपदेश्या इति ।"[८१] अत्र निर्दिष्टेन कक्षाकार्येण गृहकार्येण च छात्राः परीक्षिताः सन्तीति निर्माणात्मकं मूल्याङ्कनमेतत् । तथैव 'कर्तरि शप्' (पा.सू.३-१-६८) इति सूत्रेण शप्विकरणं कृत्वा पठतिप्रभृतीनि लटो रूपाणि साधयित्वा द्वित्रिदिनैस्तेषां सम्यगभ्यासः कार्य

---

८०. मनप्रसादवाग्ले, *पाठ्यक्रम र मूल्याङ्कन,* काठमाडौं : विद्यार्थी.., (२०६४) पृ. १८३ ।
८१. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. ३ ।

इति एवमुल्लिखति-"अथ पठ्+अ+ति इति श्यामपाट्यां लिखित्वा छात्रैर्वर्णसम्मेलनं कारयेत्- पठति, एवं तसादावपि । एतान् प्रयोगान् द्वित्रिदिनैः सम्यगभ्यासयेदिति ।"[८२] अत्रापि प्रकृतव्याख्यात्राऽभ्यासनिर्देशः कृतः । अत्रत्येन निर्देशेन पठ्धातोर्वर्तमानकालिकरूपसाधनाय, रूपावलीज्ञानाय चावश्यकसहयोगो मिलतीति विषयप्रबोधनाय मूल्याङ्कनमावश्यकम् । यद्यप्यत्रत्यं मूल्याङ्कनमसार्वत्रिकमव्यवस्थितञ्च तथापि पूर्वव्याख्यानग्रन्थेषु मूल्याङ्कनविधिष्व-प्रयुक्तेषु प्रकृतव्याख्यात्रा यदुल्लिखितं तदपि छात्रहितकारकम्, ग्रन्थस्थविषयावबोधकञ्चेति विभावनीयम् ।

## २.८ अध्यायनिष्कर्षः

नेपाले मल्लकालिकैः शाहकालिकैश्च प्रशासकैस्तथा सुकृतिदत्तपन्त-कुलचन्द्रगौतम-पद्मप्रसादभट्टराई- हेमराजपाण्डेयप्रभृतिभिस्थापितायां सञ्चालितायाञ्च संस्कृताध्यापनान्वेषण संरक्षणपराम्परायां वैयाकरणस्य महाकवेश्च हरिप्रसादस्य नाम सादरं स्मर्यते । १९८९ तमे वैक्रमाब्दे प्युठान (हरिप्रसादस्तु प्रस्थान इत्युल्लिखति) मण्डलान्तर्गते खैरानामके ग्रामे दुर्गाप्रसादहीराकुमारीदेवीभ्यां जातोऽसौ वाराणसेयसंस्कृतविश्वविद्यालयतो नव्यव्याकरणविषय-मवलम्ब्य २०१५ तमे वैक्रम आचार्यपरीक्षां तथा २०४२ तमे च 'पाणिनीयव्याकरणशिक्षण-पद्धतिविमर्शः' इति शीर्षके विध्यावारिध्युपाधिमधिगतवान् । आचार्यकक्षां समुत्तीर्य तेन विभिन्नेषु माध्यमिकविद्यालयेषु तथा त्रिभुवनविश्वविद्यालयान्तर्गते संस्कृतसङ्काये व्याकरणमध्यापितम् । अध्यापनकाले साधारणैर्जनैर्नीरसं शुष्कञ्चेत्यनेकधा समारोपितं पाणिनीयं व्याकरणं कथं सरलया रीत्या जनसाधारणीकरणेन पाठयितुं शक्यत इति विचारितम् । तस्यैव विचारस्य प्राथमिकस्वरूपत्वेन 'पाणिनीयव्याकरणशिक्षणपद्धतिविमर्शः' इत्याख्यो विद्यावारिधिशोधप्रबन्धो जनितश्चेत् परिष्कृतस्वरूपन्तु 'अष्टाध्याय्याः

---

८२. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. १५६ ।

शारदाप्रभाव्याख्या' जातम् । अत्र प्रकृतव्याख्यात्रा सूत्रप्रक्रियाक्रमयोरेकीकरणप्रयासो विहितः । शारदाप्रभाकर्तुर्विचारे षड्मासावधि सूत्रोदाहरणादिसंयुतं प्रक्रियाक्रमिकं ५३६ सूत्रात्मकं व्याकरणमधीत्य तदनन्तरं पाणिनिमुनिना प्रणीतेन सूत्रक्रमेण भाषाशिक्षणेन सहैव व्याकरणमपि पाठयितुं शक्यते ।

वैयाकरणेन हरिप्रसादेन योगिनरहरिनाथप्रेरणया संस्कृते नैकाः स्फुटकविता, खण्डकाव्यद्वयं तथा महाकाव्यैकं विरचितम् । कविशिरोमणिलेखनाथपौडेलनयराजपन्तयो-र्बुद्धिविनोदखण्डकाव्यमनेन तत्समच्छन्दस्येवानूदितो वर्तते । तथैव- श्री ५ महेन्द्रविरहवेदना (२०२८), तथा श्री ५ वीरेन्द्रशुभराज्याभिषेककाव्यम् (२०३१) इति नामके द्वे खण्डकाव्ये रचिते । तेनैव प्रकारेण गोरक्षशाहवंशमहाकाव्यम् (२०२२) इत्याख्यं महाकाव्यमपि विरचितम् । संस्कृतकाव्यरचनेन सह जनताविद्यापीठतः २०४१/०४२ वैक्रमाब्दे प्रकाशितायां हिमज्योतिपत्रिकायां निर्वचनज्योतिरिति शीर्षकतो विंशत्यधिका भाषिकलेखाः कविताश्चानेन विरचय्य प्रकाशिताः सन्ति । एतैः सुलेखैः, काव्यरचनाभिः, शोधानुसन्धानैः, प्राध्यापनैः सामाजिकधार्मिकयोगदानैश्चानेन नैपालकैः भारतीयैश्चानेकैर्विद्यालयैः परिषद्भिश्च महाकवि-विद्यासागरप्रभृतीनि नैकानि सम्मानाभिनन्दनानि प्राप्तानि सन्ति, अतोऽसौ संस्कृतस्य मूर्धन्यविद्वान् आसीदिति वक्तुं शक्यते । दैववशादसौ २०७२ तमे वैक्रमे फाल्गुनमासस्य प्रथमे दिनाङ्के दिवङ्गतः ।

शारदाप्रभायां शब्दशास्त्रीयेषु पूर्वव्याख्यानेष्वप्रयुक्ताः शिक्षाशास्त्रोक्ता आधुनिकमान्यता अनुपालिता दृश्यन्ते । तादृशशैक्षिकमान्यतास्वत्र उत्प्रेरणायाः प्रयोग-शैक्षिकोपकरणप्रयोग-दृष्टान्तप्रयोग-स्तरानुकूलविषयचयन-मूल्याङ्कनानि प्रमुखाणि सन्ति । यद्यप्येषां प्रयोगोऽत्र पारम्परिकविधिना कृतस्तथाप्यपूर्वत्वेन मौलिको मन्यते ।

व्याख्यात्रा हरिप्रसादेन शारदाप्रभाव्याख्यानमिदं द्विधा विभक्तमस्ति- प्राथमिकं द्वितीयकञ्चेति । प्रकृतव्याख्यानस्य प्रारम्भिको भागः प्रक्रियाक्रमेण ५३६ सूत्रेषु ६ वार्त्तिकेषु, प्रासङ्गिकपरिभाषादिषु पूरितो वर्तते । अत्र विशेषतः संस्कृतवाङ्मये प्रचलितानां रूपाणां पाणिनीयव्याकरणपद्धत्या साधनरीति प्रदर्शिताऽस्ति । तत्रैव संस्कृतभाषाशिक्षणाभ्या-सानुवादरीतिरपि समुल्लिखिता वर्तते । शिक्षकेभ्यो व्याकरणपाठनपद्धतिनिदर्शितेयं व्याख्याऽऽगमननिगमनपद्धत्योः संयोजनेन रचिता अस्ति । शारदाप्रभाया द्वितीयभागस्तु काशिकेव सूत्रक्रमेण विन्यस्तस्तयैव पद्धत्या व्याख्यातश्च दृश्यते ।

तृतीयोऽध्यायः

# व्याख्यानसिद्धान्तनिरूपणम्

## ३.१ विषयपरिचयः

प्रस्तुतेऽध्याये व्याख्यानबोधकानां तत्समीपवर्त्तिनाञ्च पदानां परिचयं प्रस्तुत्यार्थेन सह व्याख्यानस्य सम्बन्ध उपस्थाप्यते । तस्मिन् प्रसङ्गे शब्दार्थयोः सम्बन्धस्तन्माध्यमेनैव व्याख्यानस्य सम्भवत्वम्, शैलीविज्ञानेन सहास्य सम्बन्धः, व्याख्यानभेदाः, व्यावहारिकव्याख्यानप्रकारः, लोकवेदयोर्व्याख्यानस्य प्रयोग इत्यादयो विषयाश्चर्च्यन्ते । तदन्ते च वैदिकनिरुक्तीयोणादीयदर्शनोक्तसाहित्यिकाधारभूतव्याख्यानतत्त्वानि समुल्लिख्य शब्द-शास्त्रीयव्याख्यानतत्त्वानि निर्धार्यन्ते ।

## ३.२ व्याख्यानार्थबोधकानां पदानां व्युत्पत्तिरर्थश्च

संस्कृतवाङ्मये व्याख्यापदस्यार्थबोधनाय व्याख्या, व्याख्यानम्,विवरणम्, विवृतिः, चर्चा, टीका, भावप्रकाशनम्, स्पष्टीकरणम्,पदस्फोरणम्, निर्वचनमित्यादीनि पदानि प्रयुज्यन्ते । तथैव तेषां सन्निकटवर्त्तित्वेन व्याकृतिः, वर्णनम्, भाष्यम्, संसूचनम्, विवरणम्,पञ्जिका, समालोचनम्, समीक्षा, मीमांसा इत्यादयो यत्किञ्चित् समानार्थकप्रत्यायकाः शब्दा अपि व्यवह्रियन्ते । एतेषां सर्वेषामेकैकस्थः पारिभाषिकोऽर्थो लोकप्रयोगश्च यद्यपि समानो नास्ति तथापि सन्निकटरूपेण एते वैयाकरणनिकाये भाषावाङ्मये साहित्यसमालोचने व्यवहारे च समुपयुज्यन्ते । एतेषु व्याकरणक्षेत्रे प्रसिद्धानां प्रमुखानां पदानां व्युत्पत्तिरर्थश्चात्र क्रमशः प्रस्तूयते ।

### ३.२.१ व्याख्या, व्याख्यानञ्च

व्याङ्पूर्वकात् ख्या प्रकथने धातोः आतश्चोपसर्गे (पा.सू.३-३-१०६) इति सूत्रेण भावार्थेऽङि आलोपे वर्णकार्ये स्त्रीत्वविवक्षायां टापि सवर्णदीर्घे उपसर्गयोर्यणि च कृते व्याख्यापदं सिध्यति । वाचस्पत्यकोशकारः शब्दमिमं वि+आ+ख्या इत्यस्मादच्प्रत्ययेन टाबादिना च साधयति ।[८३] व्याङ् पूर्वकात् ख्या प्रकथने धातोरेव ल्युट्प्रत्ययेऽनादेशे

[१]. तारानाथतर्कवाचस्पतिः, *वाचस्पत्यम्* (षष्ठो भागः) वाराणसी : चौखम्बासंस्कृत-सिरिज, (२०४६) पृ.४९८६ ।

व्याख्यानपदमपि निष्पद्यते । व्याख्यानं कीदृशं भवतीत्यत्र सारस्वतीसुषमापत्रिकायां शशिदेवो लिखति-

> पदं चैव पदार्थश्च क्रमशो गुरुलाघवम् ।
> समासविस्तरो वापि पर्यायवचनं तथा ॥
> आक्षेपपरिहारश्च दृश्यन्ते यत्र सर्वदा ।
> सद्व्याख्या सा बुधैः प्रोक्ताऽन्यथाऽसत्प्रलापिता ॥[८४]

## ३.२.२ विवरणम्, विवृतिः

वीत्युपसर्गपूर्वकाद् वृञ् वरणे धातोर्भावे ल्युटि तस्यानादेशे णत्वे च कृते विवरणपदं निष्पद्यते । कोशकारेण आप्टेमहोदयेन व्याख्यानस्य वृत्तिः, भाष्यम्, टीकादिषु पर्यायेषु विवरणमप्युल्लिखितम् ।[८५] तथैव विपूर्वकाद् वृञ् धातोर्भावे स्त्रियां क्तिनि सति विवृतिपदं निष्पद्यते ।

## ३.२.३ चर्चा

चुरादिगणीयादध्ययनबोधनार्थकाच्चर्च्धातोरथवा तुदादिगणीयाद् निन्दार्थकात् चर्च् धातोर्भावेऽङ्प्रत्यये स्त्रियां टापि च कृते चर्चापदं सिध्यति । अस्य प्रयोगो महाभाष्यकारेण पतञ्जलिना लक्ष्यलक्षणे व्याकरणमिति वार्त्तिके- न केवलं चर्चापदानि व्याख्यानम्-वृद्धिः, आत्, ऐज् इति । किं तर्हि ? उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवती[८६]ति कथनद्वारा व्याख्यानार्थे कृतो दृश्यते ।

## ३.२.४ टीका

टीक्यते गम्यते प्रविश्यते ज्ञायते वाऽनयेति विग्रहे टीकृ गतौ धातोरङ्प्रत्यये स्त्रियां टापि सति टीकापदं सिध्यति । टीकाटिप्पणी शब्दौ महाभाष्योपरि रचितासु नागेश-कैयटादीनां व्याख्यासु, काशिकोपरि रचितासु न्यास-पदमञ्जरी-काशिकाविवरणपञ्जिकादिषु, सिद्धान्तकौमुद्यास्तत्त्वबोधिनी-बालमनोरमाद्यासु च व्याख्यासु प्रचलिता वर्तते । 'ग्रन्थस्य

---

[२]. शशिदेवः, 'व्याख्यानप्रक्रिया' *सारस्वतीसुषमा* (वर्ष-३०,अङ्क-३-४),वाराणसी : सं.सं.वि., (२०३२) पृ.७७ ।

[३]. वामनशिवराम आप्टे, संस्कृतहिन्दीकोशः, दिल्ली : मोतीलालबनारसीदासः, (१९९३) पृ.९५३ ।

[४]. पतञ्जलिः, व्याकरणमहाभाष्यम्, (द्वि.सं.), दिल्ली : मोतीलालब., (१९९५) पृ.४१ ।

ग्रन्थान्तरं टीके'ति लोकप्रसिद्धिर्वर्तते । संस्कृतस्याप्टेकोशो व्याख्याटीकाभाष्यशब्दान् पर्यायत्वेन प्रयोजते ।[८७] हेमचन्द्रकोशकारस्तु 'टीका निरन्तरव्याख्या' इत्युक्त्वा विषमाणां सुगमानाञ्च पदानां निरन्तरव्याख्यानं टीकेत्युल्लिखति । संस्कृतपरम्परायां 'ग्रन्थस्य ग्रन्थान्तरं टीके'ति प्रचलनमप्यस्ति । तारानाथतर्कवाचस्पपतिमहोदयेन वाचस्पत्यकोशे 'विषमपदव्याख्यायिका टीके' त्युक्त्वा सा परिभाषिता वर्तते । टीकायाः किं लक्षणमित्यत्र शशिदेव एकत्र लिखिति-

टीकाकारकसम्बद्धो व्याख्या प्रतिपदं बहु ।
समासव्यासबहुला सा स्यात् टीकेति संज्ञिता ॥[८८]

शशिदेवस्यानेन कथनेन ग्रन्थव्याख्याने समासव्यासश्चेति द्विविधा सरणिः प्रसिद्धेति निश्चीयते ।

## ३.२.५ भावप्रकाशनम्

भूधातोर्भावार्थे घञि भावशब्दो निष्पद्यते । प्रकाशनमित्यस्य योगेन भावस्य प्रकाशनमिति विग्रहपूर्वकषष्ठीतत्पुरुषसमासे भावप्रकाशनपदं सिद्ध्यति । भावस्य विचारस्य आशयस्य तात्पर्यस्य वा प्रकाशनमिति तस्यार्थः । विशिष्टवाक्यपदादीनां व्याख्यानेनैव भाव आशयो वा प्रकाशितो भवतीति पदमिदं व्याख्यानस्य पर्यायत्वेन प्रयुज्यते । पदमिदं विशेषतःकविताया आशयप्रकाशनार्थमायाति ।

## ३.२.६ निर्वचनम्, निरुक्तिः

निरूपसर्गपूर्वकाद् वच परिभाषणे धातोर्भावे ल्युटि तस्यानादेशे च कृते निर्वचनपदं निष्पन्नं भवति । निरित्युपसर्गपूर्वकादेव वच्धातोस्त्रियां क्तिनि सम्प्रसारणेन वकारस्योकारे कृते निरुक्तिशब्दस्य सिद्धिर्भवति । पदस्य व्युत्पत्तिसहिता व्याख्या निरुक्तिर्निगद्यते । महामुनिना यास्केन निरुक्तेः 'अथ निर्वचनम्' (नि.सू.२-१-१) इति सूत्रद्वारा निर्वचनपदं तत्प्रकृतिश्च व्याकृता वर्तते । यास्कीयं तत्सूत्रं व्याख्यायन् निरुक्तविवृतिकारो दुर्गाचार्यस्तत्राह- "अपिहितार्थस्य परोक्षवृत्तावपरोक्षवृत्तौ वा शब्दे निष्कृष्य विगृह्य वचनं निर्वचनम् । स एष निर्वचनाभ्युपाय उच्यते ।[८९] अर्थात् प्रत्यक्षपरोक्षादिभिर्वृत्तिभिर्धातु-

---

[५] वामनशिवराम आप्टे, संस्कृतहिन्दीकोशः, पूर्ववत्, (इ.१९९३) पृ.४१३ ।

[६] शशिदेवः,'व्याख्यानप्रक्रिया' *सारस्वतीसुषमा* (वर्ष-३०,अङ्क-३-४), वाराणसी : सं.सं.वि., (२०३२) पृ.७८ ।

[७] दुर्गाचार्यः (व्या.), *निरुक्तम्,* दिल्ली : चौखम्बासंस्कृतप्रतिष्ठानम्, (२००२) पृ.५७ ।

प्रातिपदिकादिकं विच्छिद्य निहितार्थनिष्पादनं निर्वचनमिति तस्य शाब्दिकोऽर्थः । यास्कमते शब्दा द्विविधाः- समर्थस्वरसंस्कारा असमर्थस्वरसंस्काराश्च । तयोर्मध्ये समर्थस्वरसंस्कारान् शब्दान् विशेषेण व्याख्यायतामिति यास्कस्य निर्देशो दृश्यते, तद्यथा-"तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयादिति ।[९०] अतो निरुक्तकारो यास्कः प्रकृतिप्रत्ययादिस्फोरणपूर्वकं कृतं पदव्याख्यानं निर्वचनमित्यर्थापयतीति स्फुटम् ।

### ३.२.७ वृत्तिः

वृतु वर्तने धातोर्भावार्थे स्त्रियां क्तिन् (पा.सू ३-३-९४) इति क्तिन् प्रत्यये सति वृत्तिपदं निष्पन्नं भवति । वैयाकरणैः पदमिदं बहुत्र कात्यायनप्रोक्तवार्त्तिकबोधनाय प्रयुक्तम् । काव्यमीमांसाकारस्य राजशेखरस्य मते 'सूत्राणां सकलार्थसारविवरणं वृत्तिः' । अस्यां परिभाषायामपि सूत्रार्थ एव ध्वनितो वर्तते । महर्षियास्कविरचिते निरुक्ते 'विशयवत्यो हि वृत्तयो भवन्ती'ति वाक्यतस्तासां बहुसंशयवतीत्वमुक्तम् निरुक्तविवृतिकारो मुकुन्दझा शर्मा तत्र लिखति- "नाना भावेनाऽर्थेषु शब्दानामवस्थिता वृत्ति एवं स्यात् नैवं स्यादिति विचारयन्तः सन्तः प्रतिपत्तिसम्मोहाच्छेरत इवास्मिन्निति विशयः संशयोऽस्य धर्मः ।"[९१] अत्र तु वृत्तिपदतोऽर्थबोधिका शक्तिर्ध्वनिता प्रतीयते । सा च परार्थमभिव्यञ्जयति । कौमुद्यामपि परार्थाभिधानं वृत्तिरिति परिभाष्य कृत्तद्धितसमासैकशेषसनाद्यन्तधातुत्वेन तस्याः पञ्चविधत्वमुक्तमस्ति ।[९२] एकत्र तु वृत्तिर्व्याख्यानाङ्गाधिकरणत्वेनापि प्रस्तुत्य व्याख्यातो वर्तते । तत्र पञ्च वृत्तयः समुल्लिखिताः,यथा-

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
सिद्धान्तश्चेति पञ्चैते शास्त्रेऽधिकरणम् स्मृतम् ॥[९३]

एवं सति वृत्तौ विषयस्य समुपस्थापनम्, तदुपरि विशयनमर्थात् संशयस्योद्भावनम्, तस्मिन् संशये पूर्वपक्षीयेन वा प्राथमिकेन तर्केण खण्डनं ततोऽन्ते सिद्धान्तपक्षेणोत्तरपक्षीयविचार-संस्थापनम्, मण्डनञ्च पञ्चतत्त्वानि भवन्तीति तेषामाशयः । निरुक्तटीकायामेकत्रार्थबोधिका शक्तिर्वृत्तित्वेन व्याख्याता, तद्यथा- "न हि निरुक्ते कारकहारकलावकादिशब्दा व्युत्पाद्यन्ते । सुबोधैव तेषां वृत्तिः- व्याकरणे । य एव दुर्बोधाः परोक्षातिपरोक्षवृत्तयो बिल्मकृदरोदारवैतस

---

८. यास्कः *निरुक्तम्,* पूर्ववत्, *(२००२)* पृ.५७ ।

९. दुर्गाचार्यः (व्या.), *निरुक्तम्,* पूर्ववत्, *(२००२)* पृ.५७ ।

१० भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी (सम्पूर्णा), मुम्बई : खेमराजश्रीकृष्णदासः, (१९७४) पृ.२६० ।

११. यास्कः, *निरुक्तम्,* पूर्ववत्, (२००२) पृ.५७ ।

पर्वादयः शब्दास्त एव ह्यत्र व्युत्पाद्य निरुच्यन्ते ।" [९४] अनेन प्रकारेण वृत्तिशब्दतो नैकेष्वर्थेष्वभिव्यञ्जितेष्वप्यत्र महर्षियास्कप्रयुक्तो व्याख्यानार्थ एव गृह्यते । शशिदेवो वृत्तिमेवं परिभाषते-

सूत्रपाठोऽथ सूत्रार्थो व्याख्योदाहरणस्य च ।
प्रत्युदाहरणस्यापि वर्तनाद् वृत्तिरुच्यते ॥ [९५]

### ३.२.८ स्पष्टीकरणम्

अस्पष्टं स्पष्टं कुरूत इति विग्रहे स्पष्टोपपदपूर्वकात् कृ धातोरभूततद्भावेऽर्थे च्विप्रत्यये कृञः कर्मणि ल्युटचनादेशे दीर्घे च कृते स्पष्टीकरणं सिध्यति । पदमिदं सामान्यतः साहित्यिकव्याख्यानसन्दर्भे रूढम्, तथापि शब्दशास्त्रीयव्याख्यायामपि यदाकदा प्रयुज्यते ।

### ३.२.९ व्याकृतिः

व्याङ्पूर्वकात् डुकृञ् करणे धातोस्त्रियां क्तिनि व्याकृतिपदं निष्पन्नं भवति । अस्यार्थो व्याख्यानं भवतीति वामनः शिवराम आप्टे स्वकीये कोशे लिखति । [९६]

### ३.२.१० पदस्फोरणम्

पद्यतेऽसाविति पदम् । स्फुर्धातोर्भावे ल्युट्प्रत्ययेऽनादेशे णत्वे च कृते स्फोरणम्, स्फुरणमिति च । पदानां स्फोरणमिति विग्रहे षष्ठीतत्पुरुषसमासे पदस्फोरणमिति । पदमिदं विशेषतः शब्दशास्त्रीयपदव्याख्याने पदनिर्वचनपर्यायत्वेन पदमिदं प्रयुज्यते । व्याकरणे प्रथमतः पदनिर्वचनं विधायैव विश्लेषणादिकं विधीयते । तस्य व्याख्यानाङ्गत्वेन पदस्फोरणमपि व्याख्यानेऽन्तर्भवति ।

### ३.२.११ भाष्यम्

भाष्यते स्पष्टमुच्यते विवृततया वर्ण्यतेऽसावनेन वेति व्युत्पत्तौ भाष्व्यक्तायां वाचि धातोः कर्मणि करणे वा ण्यत्प्रत्यये भाष्यपदं निष्पद्यते । प्रायः कोशकारा व्याख्या-विवृत्ति-टीका-वर्णनादिष्वर्थेषु भाष्यपदं प्रयुञ्जते । सूत्रार्थस्फोरणसाधको ग्रन्थ इति तस्यार्थः ।

---

[१२] यास्कः, *निरुक्तम्,* पूर्ववत्, *(२००२)* पृ.५७ ।
[१३] शशिदेवः, 'व्याख्यानप्रक्रिया' *सारस्वतीसुषमा,* पूर्ववत्, (२०३२) पृ.७८ ।
[१४] वामनशिवराम आप्टे, *संस्कृतहिन्दीकोशः,* पूर्ववत्, (१९९३) पृ.९७९ ।

चूर्णिरिति तस्य पर्यायः । हेमचन्द्रनामककोशकारोऽपि सूत्रार्थप्रकाशकं ग्रन्थं भाष्यमिति व्यवहरते । महाकवेर्माघस्य शिशुपालवधमहाकाव्ये भाष्यपदं व्याख्यान एवं प्रयुक्तमस्ति-

सङ्क्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः ।
सुविस्तरतरा वाचो भाष्यभूता भवन्तु ते ॥ [१७]

अर्थाद् यथा सूत्राणि अल्पाक्षराणि वा सङ्क्षिप्तानि, सारभूतानि, अर्थगभीराणि, सिद्धान्तप्रकाशकानि च भवन्ति तथैव भगवच्छ्रीकृष्णस्य वाचोऽपि तत्समाना एव सन्तीति बलरामस्य कथने भाष्यपदमत्र प्रयुक्तं वर्तते, अत्रत्यभाष्यशब्दाद् गभीरव्याख्यानमित्यर्थो ध्वनितः।

शशिदेवस्तु भाष्यमेवं लक्षयति-

टीकेव व्याकृतिर्यस्य क्वचिद् वृत्तिवदिष्यते ।
भाषणे त्वीषदर्थस्य क्वचिद् भाष्यस्य लक्षणम् ॥ [१८]

## ३.२.१२ पञ्जिका/पञ्चिका

पिञ्जयतेऽर्थोऽस्यामिति विग्रहे भाषार्थबोधकाच्चुरादिगणीयात् पिजिधातोरिदित्वान्नुमि ततो गुरोश्च हलः (पा.सू. ३-३-१०३) सूत्रेणाप्रत्यये धातोरनुवन्धलोपे वर्णयोगेऽनुस्वारपरसवर्णे पिञ्ज इति जाते ततः स्वार्थे कनि पृषोदरादित्वादिकारस्य द्वितीयवर्णे गमने पञ्जिक इति जाते स्त्रियां टापि सवर्णदीर्घे पञ्जिकापदं निष्पन्नं भवति । पञ्जिका सकलपदव्याख्या इति प्रसिद्धमेव । हेमचन्द्रकोशकारस्तु पञ्जिका पदभञ्जिका इत्यर्थीकृत्य- पञ्ज्यन्ते व्यक्तीक्रियन्ते पदार्था अनयेति व्युत्पत्या पिञ्ज् धातोः पञ्जिकापदं साध्नोति । अतो या विषमाणि पदान्येव भनक्ति सा पदभञ्जिका पञ्जिकेति हेमचन्द्रकोशकारस्य मतम् । कोशकारोऽसौ ‘टीकानिरन्तरव्याख्या पञ्जिकापदभञ्जिका’ इत्युल्लिख्य टीकायाः पर्यायत्वेन विशेषतो विषमपदभञ्जिनीरूपेण च पदमिदं व्याख्याति । पदमिदं पचि विस्तारवचन इत्यस्माद्धातोरपि साधयितुं शक्यम् । पच्धातोरच्प्रत्यये नुम्यनुस्वारपरसवर्णे ततः स्वार्थे कप्रत्यये पञ्चक इति जाते स्त्रीत्वविवक्षायां टापि कप्रत्यययात् पूर्वमित्वे पञ्चिका इति जाते निपातच्चकारस्य जश्वेन जकारे पञ्जिकेति । एतत् पदं धात्वर्थे व्याख्याने/विस्तार उपयुक्तमिति प्रकृतानुसन्धातुर्धारणा। अमरकोशेऽपि टीकायाः पर्यायत्वेन पदमिदं प्रयुक्तं दृश्यते, तद्यथा

---

१५. माघः, *शिशुपालवधमहाकाव्यम्,*(पञ्चसं.) वाराणसी : चौखम्बासंस्कृतविद्याभवनम्, (इ.१९८४) पृ.६९ ।
[१६]. शशिदेवः, ‘व्याख्यानप्रक्रिया’ *सारस्वतीसुषमा* पूर्ववत्, (२०३२) पृ.७८ ।
[१७]. अमरसिंहः, *नामलिङ्गानुशासनं नामामरकोशः,* वाराणसी : चौखम्बासंस्कृतभवनम् , (२०००) पृ.४५१ ।

"लङ्काशेफालिकाटीकाधातकीपञ्जिकाढकी इति ।"[९९] काशिकाया न्यासव्याख्यात्रा जिनेन्द्रबुद्धिना न्यासव्याख्यानस्यापरं नाम काशिकाविवरणपञ्जिकेति कृतम् । व्याख्याकारोऽयं मङ्गलाचरणस्थे 'क्रियते पञ्जिका यथा' इति वाक्ये पञ्जिकापदं प्रयुङ्क्ते ।[१००] कतिपये व्याख्यातारस्तत्पदं पञ्चिकातोऽपभ्रंशत्वेन सञ्जातमामनन्ति । सम्भवतो न्यासकारेण पञ्चकं व्याख्यानम् (पदच्छेदपदार्थोक्तिरित्यादौ पञ्चैव अथवा विषयो विशयश्चैव इत्यत्रापि पञ्चैव) इत्यर्थे स्त्रीत्वबोधकव्याख्यापदस्य विशेषणत्वेन पञ्चिका प्रयुक्ता, सा चापभ्रंशीभूय कालान्तरे पञ्जिका जातेति भाषाविदोऽनुमापयन्ति । शशिदेवः पञ्जिकामेवं परिभाषते-

विषमाणां पदानान्तु विवृतिः पञ्जिका/पञ्चिका स्मृता ।
तस्यास्तु विषमव्याख्या पदानां टिप्पनं स्मृतम् ॥[१०१]

## ३.२.१३ मीमांसा

मीमांसाशब्दोऽयं मातुमिच्छा जिज्ञासा वेति विग्रहे माङ् माने धातोर्मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य (पा.सू. ३-१-६) इति सनि द्वित्वेऽभ्यासस्य हलादिशेषे ह्रस्वेऽनेनैवाभ्यासदीर्घे स्त्रीत्वे टापि सति च सिद्ध्यति । यद्यपि पाणिनिना जिज्ञासार्थे सन्प्रत्ययो न विहितस्तथापि प्रायः परम्परानुयायिनः पाणिनीयाः पाणिनीयेतराश्च प्रत्ययमिमं प्रायो जिज्ञासार्थे प्रयुञ्जते ।[१०२] अतः मापनविषयिणी जिज्ञासेति मीमांसाशब्दस्य शाब्दिकोऽर्थः । अथातो धर्मजिज्ञासा, अथातो ब्रह्मजिज्ञासेत्यादिषु सूत्रेषु व्याख्यातृभिर्मीमांसा-जिज्ञासाशब्दौ पर्यायत्वेन प्रयुक्तौ दृश्येते । शब्दोऽयं विचारमन्थने परामर्शीकरणे, तन्माध्यमेन व्याख्याने च प्रायो दर्शने क्वचिद् व्याकरणादिष्वपि प्रयुज्यते । कोशकार आप्टे गभीरविचारे, परामर्शे,परीक्षणे,अनुसन्धानादिषु च शब्दमिमं प्रयुङ्क्ते ।[१०३] अतो व्याख्याने मीमांसाया अपि सम्बन्धो दृश्यते ।

संस्कृतव्याकरणे मूलतस्त्रिविधप्रयोजनाय व्याख्यापदं प्रयुक्तं दृश्यते, प्रथमं- पदनिर्वचनाय, द्वितीयं- काशिका कौमुद्यादीनां टीकारूपार्थप्रबोधनाय, तृतीयन्तु

---

[१८]. जिनेन्द्रबुद्धिः (व्या.), *काशिकावृत्तिः* (प्रथमो भागः),वाराणसी : प्राच्यभारतीप्रकाशनम्, (१९८५) पृ.१ ।
[१९]. शशिदेवः, '*व्याख्यानप्रक्रिया'सारस्वतीसुषमा* पूर्ववत्, (२०३२) पृ.८० ।
[२०]. युधिष्ठिरमीमांसकः, *मीमांसाशबरभाष्यम्,* हरयाणा : युधिष्ठिरमीमांसकः, (२०३४) पृ. भू. ।
२१. वामनशिवराम आप्टे, *संस्कृतहिन्दीकोशः*, पूर्ववत्, (इ.१९९३) पृ.८०२ ।

समालोचनात्मकदार्शनिकग्रन्थेषु शब्दभावादीनां विवृतिकरणाय, अतो व्याकरणशास्त्रीयं व्याख्यानं त्रिषु विषयेष्वेव केन्द्रितमिति निश्चेतुं शक्यते ।

संस्कृतव्याकरणेऽनेकेषु व्याख्याबोधकेषु पदेषु सत्स्वपि प्रायो व्याख्या, भाष्यम्, पञ्जिका, वृत्तिः, टीका, निर्वचनम्, निरुक्तम्, चर्चापदानि विशेषरूपेण प्रयुक्तानि प्राप्यन्ते । तेषां सहायकत्वेन विवृतिः, पदस्फोरणम्, भावप्रकाशनम्, स्पष्टीकरणम्, वर्णनम्, संसूचनम्, व्याकृतिरित्यादीनि पदानि सामान्यतः प्रयुक्तानि दृश्यन्ते ।

## ३.३ व्याख्यानपदप्रयोगः

व्याख्यापदं वा तद्वाचकपर्यायशब्दाश्च वेदेषूपनिषत्सु, रामायणमहाभारतादिषु, निरुक्ते, श्रीमद्भागवते, महाभाष्ये तथान्येषु शास्त्रीयग्रन्थेषु, काव्येषु, व्याकरणशास्त्रीयग्रन्थेषु च प्राप्यन्ते । तादृशानां पदानां प्रयोगः कस्मिन्नर्थे कस्मिन् सन्दर्भे कुत्र कुत्र च प्राप्यत इति अत परमुल्लिख्यते ।

क) शुक्लयजुर्वेदे- '*अष्टौ व्यख्यत् ककुभः.... वार्याणि* '[१०४] मन्त्रेऽस्मिन् प्रयुक्तं 'व्यख्यत्' इति व्याख्यानार्थकं पदं शुक्लयजुर्वेदसंहितायाश्चतुस्त्रिंशत्तमेऽध्याये तदन्तर्गते चतुर्विंशतितमे मन्त्रे वर्तते । भाष्यकारेण उवटेन कृतव्याख्यानुसारेणात्रत्यं व्यख्यत् पदं 'प्रकाशयन्' इत्यर्थे प्रयुक्तम् वर्तते ।[१०५] तत्पदं साधयन् भाष्यकारो महीधरो लिखति- ख्याप्रकथने धातोः सामान्यभूते लुङि च्लौ तस्य स्थाने अस्यतिवक्तिख्यातिभ्योऽङ् (पा.सू.३-१-५२) इति सूत्रेण च्लेरङादेशे आलोपे धातोः प्रागडागमे च कृतेऽख्यत् इति सिध्यति, ततो वीत्युपसर्गेण योगे यणि च व्यख्यदिति भवति । धातूनामनेकार्थत्वादत्र प्रकाशनमित्यर्थो ग्राह्य इति भाष्यकारस्याशयः ।[१०६] व्याख्या, व्यख्यत् इति द्व एव पदे ख्याप्रकथने धातोर्वि इत्युपसर्गयोगेन निष्पन्ने । धातुपाठे तस्य प्रकथनमित्यर्थे सत्येऽपि वैदिकप्रयोगे प्रकाशनमित्यर्थो भाष्यकारेण महीधरेण दर्शितः, तदुपसर्गयोगतो धातूनामनेकार्थत्वाद्वा सम्भाव्यते ।

ख) ऐतरेयोपनिषदि '*अभिव्यैख्यत्*' - शुक्लयजुर्वेद इव कतिपयेषूपनिषत्सु व्यख्यत्, अभिव्यख्यत्, व्याख्याता, व्याख्या, विचचक्षिरे, व्याख्यास्यामः इत्यादीनि तत्सदृशान्यन्यापि

---

२२. अज्ञातः (भाष्यकारावुवटमहीधरौ), *शुक्लयजुर्वेदसंहिता,* वाराणसी : मोतीलालब., (१९७८) पृ.५६६ ।

२३. उवटः (व्या.),*शुक्लयजुर्वेदसंहिता, पूर्ववत्,* (१९७८) *पृ.५६६ ।*

२४. महीधरः (व्या.), पूर्ववत् ।

पदानि प्रयुक्तानि दृश्यन्ते । अत्र क्रमशस्तेषामर्थापनं विधीयते, तत्र प्रथममभिव्यैख्यत्-पदमिदमैतरेयोपनिषदः प्रथमाध्याये तृतीयखण्डे पठितमस्ति, एवं- "स जातो भूतान्यभिव्यैख्यत्, किमिहान्यः वावदिषदिति ।"[१०७] परमात्मना सृष्टो मनुष्य उत्पत्यनन्तरं प्रथमं विचित्रमयमेतादृशं जगतमभिव्यैख्यत्- सर्वत्र दृष्टवान् इति तस्यार्थः । अभिव्याङित्युपसर्गपूर्वकात् ख्याधातोर्लुङि निष्पन्नमेतत् पदं प्रदर्शनार्थे वर्तते, तथैवान्यत्राप्येतत् पदं तस्मिन्नेवार्थे प्रयुक्तं प्राप्यते । तैत्तरीयोपनिषदः प्रथमवल्यास्तृतीयानुवाके पदमिदं वर्णनार्थमभिव्यनक्ति, तद्यथा- "इतीमा महाँसंहिता य एवमेता महाँसंहिता व्याख्याता वेद, संधीयते प्रजया पशुभिः ब्रह्मवर्चसेन्नाद्येन सुवर्गेण लोकेन ।"[१०८] इतः पूर्वोक्तासु पञ्चसंहितासु अधिलोकमधिज्योतिषमधिविद्यमधिप्रज मध्यात्ममित्यादिविषयकान् विचारान् प्रतिपाद्य उपनिषत्कार आह- येन मनुष्येणोपरि व्याख्याता/वर्णिता महाँसंहिता ज्ञाताः, तेन प्रजाभिः पशुभिः ब्रह्मवर्चसेन अन्नेन च स्वर्गलोकस्य भोगः प्राप्यते ।[१०९] अत्र व्याख्यातेति पदस्य वर्णिता इत्यर्थः कृतः । परमस्यैवोपनिषदः प्रारम्भे तु 'उपनिषदं व्याख्यास्यामः'[११०] इत्यत्र व्याख्यास्याम इति पदं व्याख्यानार्थे प्रयुक्तम् प्राप्यते, अतो भावविस्तारो ह्युपनिषदीयव्याख्यानस्य तात्पर्यमित्यवसीयते ।

ग) शिवोपनिषदि व्याख्यानपदप्रयोगः -

व्याख्याने तत्समाप्तौ च सम्प्रश्ने स्नानभोजने ।
भुक्त्वा च शयने स्वप्ने नमस्कुर्यात् सदा गुरुम् ॥[१११]

शिवोपनिषदः सप्तमाध्याये स्थितेऽस्मिन् पद्ये व्याख्यानपदस्य विषयविस्तार इत्यर्थः कृतः । पद्यव्याख्याता तत्राह- विषयस्य विशदीकरणे वा विषयवस्तुन उत्थापने, समापने, भोजनान्ते, शयनकाले, स्वप्ने च सर्वदैव गुरुं नमेदिति तस्यार्थः ।[११२] अत्र प्रवचनार्थे/विषयविस्तारे व्याख्यानपदं प्रयुक्तमस्ति ।

---

२५. हरिकृष्णगोयन्दका (व्या.), *ईशादि नौ उपनिषद्*, गोरखपुर : गीताप्रेस, (२०५०) पृ. ३०३ ।
२६. हरिकृष्णगोयन्दका (व्या.), पूर्ववत्, (२०५०) पृ.३०३ ।
२७. पूर्ववत् ।
२८. पूर्ववत्, पृ.३२२ ।
२९. जगदीशशास्त्री (व्या.), *उपनिषत्सङ्ग्रहः*, दिल्ली : मोतीलालब., (१९८०) पृ.३६६ ।
३०. पूर्ववत्, पृ.३६६ ।

घ) निरुक्ते- *"समाम्नायः समाम्नातः स व्याख्यातव्यः"* श्रीमद्यास्कमुनिविरचिते निरुक्ते समाम्नायः समाम्नातः स च व्याख्यातव्य इति वाक्ये व्याख्यापदप्रयोगः प्राप्यते । स च व्याख्यातव्योऽर्थाद् विभज्य इमान्यत्र नामानि, इमान्याख्यातानि, इमे उपसर्गाः, इमे निपाताः, इदं सामान्यलक्षणम्, इदं विशेषलक्षणम्, इमान्येकार्थानि,इमान्यनेकार्थानि, इमान्यवगत-संस्काराणि, इमान्यनवगतसंस्काराणि, इदमभिधानम्, इदमभिधेयवचनम् इदमभिधानस्य निर्वचनमित्येवं विधया आमर्यादया परिपाट्या यथा समाम्नातमाख्यातव्यो निर्वक्तव्य इति तस्यार्थः ।[११३] अस्यां व्याख्यायां पदविभाजनम्, सामान्यविशेषयोर्निर्धारणम्, एकानेकार्थबोधकानां पदानां तत्तदर्थबोधनमवगतसंस्कार-प्रबोधनमभिधानमभिधेयवचनस्य ज्ञानं चापेक्षितम् । एतादृशैर्विभागैर्वैदिकनिर्वचनतत्त्व-निर्धारणमपि सुकरं भवति ।

## ३.४ व्याख्यानमुद्रा

संस्कृतपरम्परायां व्याख्यानमुद्राया अपि प्रचलनं दृश्यते । दक्षिणज्येष्ठाङ्गुष्ठतर्जन्योर्योगे तन्मुद्रा भवतीति संस्कृतकोशकारः समुल्लिखति, एवं-

दक्षिणाङ्गुष्ठतर्जन्यावग्रलग्ने पराङ्मुखे ।
प्रसार्य सहितोत्थाना ह्येषा व्याख्यानमुद्रिका ॥[११४]

## ३.५ व्याख्यानस्यार्थेन सह सम्बन्धः

व्याख्यानस्य निर्वचननिष्पन्नोऽर्थो विशेषप्रकारेण कथनं भवति । ख्या धातोः प्रकथनमर्थः, तत्र व्याङुपसर्गयोर्योगेन विशिष्टार्थोऽवबुध्यते, अतो व्याख्यापदतो विशिष्टं कथनमित्यर्थोऽवगम्यते । व्याख्यापदस्य कोऽर्थ इत्यत्र वैयाकरणाः पदनिर्वचनेन शाब्दिकार्थप्रकाशनेन च लाक्षणिकार्थ-व्यङ्ग्यार्थ-रूढार्थप्रकाशनमिति निगदन्ति । काव्यशास्त्रादिषु प्रयुक्तं व्याख्यापदमपि सान्दर्भिकार्थ-सन्निहितार्थादीन्नवगमयति ।शब्दस्य प्रयोगोऽर्थबोधनाय भवति, अर्थापनञ्च व्याख्यानेन सम्भवतीति व्याख्यानशब्दस्यार्थशब्देन सह साक्षात् सम्बन्धो दृग्गोचरीभवति, अतोऽत्र अर्थं निरूपय तेन सह व्याख्यानस्य सम्बन्धः स्थाप्यते ।

---

३१. दुर्गाचार्यः (व्या.), *निरुक्तम्,* दिल्ली : चौखम्बासंस्कृतप्रतिष्ठानम्,(२००२) पृ.२ ।
३२. फणीन्द्रपाण्डेयः, *संस्कृतनेपाली बृहत् शब्दकोश* (द्वि.सं.) दाङः : म.सं.वि.,(२०५७) पृ. १२३९ ।

## ३.६ अर्थस्य लक्षणम्

अर्थः कः ? तस्य किं लक्षणमिति विषयेऽत्र विचार्यते- वैयाकरणनिकाये भर्तृहरेरर्थलक्षणं सुप्रसिद्धमस्ति, तं प्रा.भोजराजढुङ्गेल एवं समुद्धरते -

यस्मिन्नुच्चरिते शब्दे यदा योऽर्थः प्रतीयते ॥
तमाहुरर्थस्तस्यैव नान्यदर्थस्य लक्षणम् ॥[११५]

उच्चारणकाले शब्दतो योऽर्थः प्रतीयते, अर्थस्य तदेव लक्षणम्, इतोऽन्यद् लक्षणं नास्तीति भर्तृहरेः कथनमिदमुच्चारणकालिकं सान्दर्भिकं प्रासङ्गिकं चार्थं सङ्केतयति । एतेनार्थस्य गतिशीलता स्पष्टीभवति ।

अर्थं परिभाषयन् भर्तृहरिः स्वपूर्वजकृतद्वादशलक्षणान्येवं समुद्धरते-

१) अर्थो निराकारः । २) अर्थः साकारः ।

३) अर्थोऽसत्याभासः सत्यम् । ४) अर्थोऽवयवी, स च बहुभिरवयवैर्विनिर्मितः ।

५) अर्थोऽनिश्चितः । ६) अर्थोऽध्यास एव ।

७) अर्थे नास्ति शक्तिसर्वस्वम् । ८) अर्थेऽस्ति शक्तिसर्वस्वम् ।

९) अर्थः परिवर्तनशीलः । १०) अर्थो बौद्धः ।

११) अर्थो बुद्धिग्राह्यः,साधनग्राह्यश्च ।

१२) अर्थोऽसत्योऽनित्यो वा, स वस्तूनां जाति-गुण-क्रिया-संसर्गै रूपाणि गृह्णाति ।[११६]

अर्थसम्बद्धेष्वेतेषु बहुवैकल्पिकेषु विचारेषु विस्तृतमन्वेषणमावश्यकम् । भर्तृहरेरुत्तरोद्भवा बहवश्चिन्तकास्तमेव लक्षणं विशदीकृत्य व्याख्यान्ति, अत्र न्यायपदमञ्जरीकारोऽपि तमर्थमेवं विवृणुते, तथाहि-

अयमस्य पदस्यार्थ इति केचित् स तेन वा ।
योऽर्थः प्रतीयते यस्मात् स तस्यार्थ इति स्मृतः ॥

---

३३. भोजराजढुङ्गेलः, *सामान्य र प्रायोगिक भाषाविज्ञान, काठमाडौं : एम.के. पब्लिसर्स,* (२०६७) *पृ.२५७ ।*
३४. पूर्ववत् ।

अर्थाद् यस्माच्छब्दाद् यदर्थस्य प्रतीतिः, तस्यार्थोऽपि स एवेति भर्तृहरेर्विचारोऽत्राप्यनुकृतो दृश्यते । अस्यां परिभाषायामपि शब्दस्याधारोऽर्थः, अर्थस्याधारो शब्द इति निर्धार्यते । अर्थविषये कुमारिलभट्टोऽप्येकत्राह- "तत्र योऽन्वेति यं शब्दमर्थस्तस्य भवेदसौ" [११७] अर्थाद् योऽर्थेऽन्वेति स शब्दः, यश्च शब्देऽन्वेति सोऽर्थः, अतः शब्दार्थयोर्नित्यसम्बन्धः स्फुटः, तथापि द्वयोर्मध्येऽर्थ एव प्रधानः । अर्थनिमित्तकशब्दत्वादर्थः साध्यः शब्दस्तु साधनमेव, अस्मात् शब्दापेक्षयार्थस्य बलवत्वमुररीक्रियते । शब्दापेक्षयार्थस्य बलवत्वं पतञ्जलिरपि स्वीचकार, एवं - अर्थगत्यर्थः शब्दप्रयोगः, कथनमप्यस्ति- सर्वो हि शब्दोऽर्थप्रत्ययनार्थं प्रयुज्यते । आचार्यो यास्कोऽपि- अर्थो हि प्रधानस्तद् गुणभूतः शब्द इत्युल्लिखति ।

व्याख्यानस्य पृष्ठभूमिरर्थापनमित्यत्र नास्ति कस्यापि विमतिः । आङ्ग्लसाहित्ये व्याख्यानसमीपवर्तित्वेन स्थितौ एक्स्प्लानेसन-इन्टरप्रिटेसन (explanation, enterpritasation) शब्दावप्यर्थबोधकेन सिमेन्टिक्स (semantics) शब्देन सह सन्निकटाविति तेषां प्रयोगद्वारा ज्ञायते, अतो न संस्कृत एवापितु आङ्ग्लसाहित्येऽपि व्याख्यानार्थबोधकानां शब्दानामर्थेन सह सामीप्यं दृश्यते । यद्यपि व्याख्याने विषयगतविभाजनार्थगतस्पष्टीकरणसन्दर्भगतनिर्देशनानि चातिरिक्ततत्त्वानि भवन्ति । तादृशतत्त्वसमुपेतमर्थापनमेव साहित्ये व्याख्यानं निगद्यते, यथा- अर्थापने व्युत्पत्तिः, परिभाषा, पर्यायः, विपर्यायः, भिन्नार्थः, अर्थगतसमावेशोऽसमावेशः, श्रुतिसमभिन्नार्थकताप्रभृतीनि तत्त्वानि समायान्ति, तथैव व्याख्यानेऽपि व्युत्पत्तिपरिभाषोदाहरणानि समायान्ति, अतोऽर्थापनव्याख्यानयोः संरचनागततात्विकसम्बन्धः स्पष्टो भवति ।

## ३.७ अर्थप्रकाराः

यस्य कस्यापि शब्दस्य कतिविधा अर्था भवन्त्यस्मिन् विषये गवेषकाः प्राहुः - धारणात्मक-व्याकरणात्मक-कोशीय-सन्दर्भपरक-साहचर्यात्मकभेदैरर्थः पञ्चविध इति ।[११८] तेषु धारणात्मककोटिभिर्निर्धारितोऽर्थो धारणात्मक उच्यते । यस्य कस्यापि शब्दस्योच्चारणे तद्विषयिणी धारणा जागर्ति । गौरित्युक्तेः सास्नालाङ्गुलादिमद्, वनमित्युक्ते पशुवृक्षवनस्पत्यादिमद्, गृहमित्युक्तेः मानववदिति धारणा स्वतः समुदेति, कतिपयेषु विषयेषु

---

३५. कुमारिलभट्टः, *श्लोकवार्तिकम्,* वाराणसी : रत्ना पब्लिकेसन्स, (१९७८) पृ.६९८ ।

३६. भोजराजढुङ्गेलः, *सामान्य र प्रायोगिक भाषाविज्ञान, पूर्ववत्,* (२०६७) *पृ.२५७ ।*

तस्य बिम्बोऽपि सम्मुखीभवति अत एव धारणात्मकार्थस्यावश्यकतानुभूयते । धारणात्मकस्यार्थस्य व्याख्याता पश्चिमदेशोद्भवः प्रसिद्धो दार्शनिको वर्टेल्ड रसेलमहोदयः शब्दद्वारा मानवबुद्धौ प्रविष्टः प्रत्ययो विचारोऽथवा बोध एव तादृशार्थ इति परिभाषते । वस्तुनोऽवधारणद्वारा शब्दः समुत्पद्यते, स च श्रोतॄणां मनसि विशेषप्रकारिकां धारणामुत्पादयति, अतः पदपदावलीवाक्यादिभिरभिव्यक्तः शाब्दिकार्थतो व्यतिरिक्तो विलक्षणोऽर्थो धारणात्मक इति तस्य विचारः ।[११९] पुनश्च स आह- शब्दो नाम मानसविकल्पस्य धारणाया वाऽभिव्यञ्जकः प्रतीक एव, अतः शब्दे विचारस्य प्रतिनिधित्वं प्राप्यत इति । एवञ्च सत्यासत्यभेदेन शब्दो द्विविधः, गृह-काष्ठ-घोटक-हस्तादिलौकिकार्थबोधकः शब्दो वास्तविकश्चेत् शशशृङ्गम्, आकाशपुष्पम्, बन्ध्यासुत इत्याद्यर्थबोधकोऽवास्तविको बौद्धो वा । अत्रत्यैः शशशृङ्गादिभिः पदैर्धारणात्मकोऽर्थ एवाभिव्यक्तः, अतो व्याकरणे धारणात्मकार्थस्य विशिष्टं महत्वमस्तीति ।[१२०]


अर्थस्य द्वितीये प्रकारे व्याकरणार्थो समायाति । व्याकरणात्मककोटिभिर्लिङ्ग-वचनपुरुषकालपक्षभाववाच्यकारकादिभिर्व्यक्तोऽर्थो व्याकरणार्थः Grammatical meaning इति, तद्यथा- मनुष्यो व्याघ्राद् बिभेति, व्याघ्रो मनुष्याद् बिभेति । अत्रत्ये वाक्यद्वये समागतौ मनुष्यशब्दौ कोशीयदृष्ट्या यद्यपि समानौ तथापि व्याकरणार्थदृष्ट्या भिन्नौ । तयोर्मध्ये प्रथमो मनुष्यशब्दः प्रथमपुरुषस्यैकवचन-पुँस्त्वबोधकः कर्तास्ति चेद् द्वितीयस्त्वपादानकारकत्वेन वाक्ये समायातो वर्तते, तस्माद् व्याकरणार्थः पूर्वार्थतो भिन्न आवश्यकश्चेति निश्चीयते ।[१२१]

अर्थस्य तृतीये प्रकारे कोशीयार्थः समायाति । विभिन्नविभक्तिसंयुक्तेष्वपि शब्देषु प्रातिपदिकार्थरूपेण प्रतीतपदार्थस्तृतीयः कोशीयार्थः । आधुनिका एनं शब्दस्याधारभूत-मर्थमामनन्ति । मानवा हसन्ति, वनेचरो मानवान् हासयति, देवो मानवान् सत्पथयति इत्यादिषु वाक्येषु प्रयुक्तैर्व्यक्तिबोधकैर्मानवपदैर्मनुनामकस्य राज्ञः सन्ततिरित्यर्थोऽवबुध्यते, तस्मात्तेषु सर्वेषु स्थिरीभूतोऽर्थः कोशीयार्थ इति निश्चीयते ।

---

३७. टंकन्यौपाने तथान्ये, *सामान्य र प्रायोगिक भाषाविज्ञान, काठमाडौं : सन लाइट,* (२०६८) *पृ.१३४ ।*
३८. पूर्ववत् ।
३९. पूर्ववत् ।

अर्थस्य चतुर्थे प्रकारे सन्दर्भपरकार्थः समायाति । कतिपयैश्शब्दैः सन्दर्भतः प्रसङ्गतश्च भिन्नभिन्नार्था अवबुध्यन्ते । शब्दस्य तादृशोऽर्थः सन्दर्भपरकः, तद्यथा- 'बहुकालानन्तरम् मित्रदर्शनसुखं समुपलब्धम्' यद्येतद् वाक्यं पौषकालिकशैत्यमनुभवन् कोऽपि वदेच्चेदत्रत्य मित्रशब्देन सूर्यदर्शनं प्राप्तमित्यर्थोऽवगम्यते यदि सुहृद्दर्शनसमुत्सुको जनो वदेच्चेद् मित्रशब्देन सुहृदित्यर्थो बोध्यते ।[१२२] अनेन प्रकारेण सन्दर्भतः प्रसङ्गतश्च एकस्मादेव शब्दाद् वाक्याद्वा पृथक् पृथगर्थावबोधः सान्दर्भिकार्थः । अधो निर्दिष्टः सङ्केतोऽपि सन्दर्भपरकमर्थमवगमयति, यथा-




अनेन प्रकारेण  सन्दर्भं प्रसङ्गञ्च विचार्य शब्दस्य वाक्यस्य वाऽर्थो व्याख्यातव्यो भवति । अत अर्थो न स्थिर इति अस्य तात्पर्यम् ।

अर्थस्य पञ्चमे प्रकारे साहचर्यात्मकोऽर्थ आयाति । स च पदसाहचर्येण  पदसान्निध्येन वा गम्यते, यथा- 'मधुमासे समागते वृक्षेषु कृष्णवर्णः खेचरो रौति' एतस्मिन् वाक्ये मधुमासशब्दस्य साहचर्यात्  कृष्णवर्ण इति विशेषणाच्च खेचर शब्दस्य कोकिल इत्यर्थः क्रियते । तथैव स्त्री, योषित्, अबला, नारी, महिला इत्यादीनि पदानि यद्यपि समानार्थकानि (पर्यायवाचकानि) तथापि- विदुषी विद्वत्सभां सम्बोधयतीति वाक्यस्थे विदुषी पदेऽवलाप्रभृतयः पर्यायाः प्रयोक्तुं न शक्यन्ते, अतः शब्दस्य वाक्यस्य वा साहचर्यात्मकोऽर्थो निश्चितपदसान्निध्येषु रूढो भवति । शब्दस्यार्थगतसम्बन्धे पर्यायगतसम्बन्धः, असमावेशात्मकार्थसम्बन्धः, समावेशात्मकार्थसम्बन्ध प्रभृतयोऽनेके सम्बन्धाः समायान्तीति प्रायोगिकभाषाविज्ञानव्याख्याता यादवप्रकाशलामिछाने महोदयः सूचयति ।[१२३] द्वाभ्यां बहुभिर्वा पदैः समानार्थध्वननं पर्यायः । यद्यपि सकलदृष्ट्या समानानि पदानि दुर्लभानि तथापि बहुधर्माणां समानेन तेषां पर्यायत्वं निर्धायत इति भाषावैज्ञानिकानामभिमतम् । यथा- पिता, जनकः, तात एतेषु पूर्वपुरुषोऽभिभावकः, वयस्कप्रभृतिषु शब्देषु स्थितानां बहुविधार्थानां

४०. टंकन्यौपाने तथान्ये, *सामान्य र प्रायोगिक भाषाविज्ञान, पूर्ववत्,* (२०६८), *पृ. १३४ ।*
४१. यादवप्रकाशलामिछाने, *सामान्य र प्रायोगिक भाषाविज्ञान, काठमाडौं : विद्यार्थी.,* (२०६८), *पृ. २११ ।*

सामान्येऽपि पितृशब्दः- पाति रक्षतीति विग्रहाद् रक्षार्थे, जनको- जनयतीति विग्रहे जन्मप्रदाने तथैव तातस्तु- तनोति विस्तारयति गोत्रादिकमित विग्रहे गोत्रविस्तारणे च रूढः । एतानि त्रीणि पदानि भिन्नार्थकानि सन्तीति निश्चितमेव तथापि तेषु स्थितैरभिभावकाद्यर्थाधिक्यैः पर्यायत्वेन प्रयुज्यन्त इत्यवधेयम् ।

प्रतिपाद्यार्थतो भिन्नार्थस्यासमावेशने समावेशात्मकता परिलक्ष्यते, यथा- एषा विधवा अस्तीति वाक्ये सधवा नेत्यर्थस्य बोधस्तथा एष मृत इत्युक्ते जीवितो नास्तीति ज्ञानं तस्मात् सुकरम्, अतो द्वयोरर्थयोर्विपर्ययेण बोध एवासमावेशात्मकार्थसम्बन्धः, पुष्पशब्दस्योच्चारणेन चम्पा-कमल-मल्लिका-शतपत्रिकाप्रभृतीनामनेकपुष्पाणां बोधनं समावेशात्मकार्थसम्बन्धः । अर्थस्य समावेशसम्बन्धादेव देशतो नेपाल-भारत-चीनादयोऽवबुध्यन्ते । पशुशब्देन गो-महिष-व्याघ्र-गज-मृगादयो नदीशब्दतो गङ्गा-कर्णाली-गण्डकी--कौशिक्याद्यो बुध्यन्ते ।[१२४] तथैव प्रकरणतोऽपि शब्दार्थबोधो भवतीति भाषाविदः । केनापि सैन्धवमानय इत्युक्ते भोजनप्रसङ्गे लवणस्य यात्रा प्रसङ्गे घोटकस्य बोधो भवति । सैन्धवशब्दतः तादृशार्थबोधनं प्रकरणत एव सम्भवस्तस्मात् प्रकरणार्थविज्ञानमत्रत्यार्थबोधनसन्दर्भ आवश्ययकमित्यवधेयम् । तेनैव प्रकारेण संयोगविप्रयोगसाहचर्यविरोधादिभिरप्यर्थो निर्धार्यत इति समालोचकाः ।

उपर्युक्तैर्बहुविधैरर्थैस्सह व्याख्यानस्य कीदृशः सम्बन्धः ? इति जिज्ञासा समुदेति, तत्रैतद् वक्तव्यं भवति- व्याख्यानमर्थविस्तर एव, अथवा व्याख्यानमर्थनिर्धारणानन्तरमेव सम्भवम् । अर्थापनानन्तरमेव तस्य भावः आशयो वा कः ? कीदृशो वा भवितुं शक्नोतीति विचार्यते । यद्यपि निर्वचनप्रधाने व्याख्याने शब्दनिर्वचनस्य प्रामुख्यं विलोक्यते तथापि तस्य व्युत्पत्तिकरणेऽर्थ एव कारणमिति निर्वचनप्रधानेऽर्थनिष्पादकः शब्द एव प्रधान इव प्रतीयते । व्याख्यानेऽप्यस्य सर्वोच्चं स्थानं भवतीति निश्चप्रचमेव ।

## ३.८ शब्दार्थयोः सम्बन्धः

शब्दार्थयोः कीदृशः सम्बन्ध इत्यत्र वैयाकरण-मीमांसक-नैयायिका विवदन्ते । वैयाकरणेष्वपि विभिन्ना धारणा दृश्यन्ते । शाब्दिकाः शब्दार्थयोर्वाच्य-वाचकभाव-कार्य-कारणभाव-योग्यतेतरेतराध्यासमूलान् सम्बन्धान् साधयन्ति । अत्र सङ्क्षेपेण एतेषां चर्चा विधीयते-

---

४२. यादवप्रकाशलामिछाने, पूर्ववत्,(२०६८), पृ.२१२ ।

## ३.८.१ वाच्यवाचकभावसम्बन्धः -

परमलघुमञ्जूषाकारो नागेशः शक्तिनिरूपणप्रसङ्गे सम्बन्धमिमं विवृण्वन्नाह- "पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, वाच्यवाचकभावापरपर्यायाः । तद् ग्राहकञ्चेतरेत-राध्यासमूलकं तादात्म्यम्, तदेव सम्बन्धः । दीपादिगतप्रकाशकत्वशक्तावपि आलोकविषयगतसम्बन्धे सत्येव वस्तुप्रकाशकत्वं नान्यथेति दृष्टत्वात् ।"[१२५] अत्र नागेशेन शब्दार्थयोर्वाच्यवाचकभावसम्बन्धः प्रदर्शितः । गां नय गामानय इत्यादिषु वाक्येषु शब्दतोऽर्थावबोधनाद् वाच्याद्वा तयोर्मध्ये एतादृशः सम्बन्धः प्रख्यापितः । शब्दार्थयोर्मध्ये परिकल्पितोऽयं सम्बन्धः प्रदीपवद् वर्तत इत्युदाहरन् व्याकरणदर्शनभूमिकानामके पुस्तके रामाज्ञापाण्डेयोऽभिवदति- "यथा प्रदीपोऽन्यान् प्रकाशयन् स्वात्मानमपि प्रकाशयति तथैव शब्दोऽपि वाचकमर्थमभिधीयमानतया प्रकाशयन् प्रत्ययस्य (ज्ञानस्य) शब्दानुविद्धत्वादात्मानमभिधेयतयैव प्रकाशयति तथा चायं गौरयमर्थ इति शब्दार्थयोरभेदेनावभासनाद् गोशब्दः स्वरूपार्थमभिदधान एव अन्यार्थमभिधत्ते ।"[१२६] अतः शब्दार्थयोः परिकल्पितश्चैष सम्बन्धः तयोर्बोधने समर्थोऽस्तीति प्रतीयते ।

## ३.८.२ कार्यकारणभावसम्बन्धः -

केचन शब्दार्थयोः कार्यकारणभावसम्बन्धमामनन्ति । प्रयोक्तृभिः प्रायेण परिकल्पितोऽयं सम्बन्धो वाक्यपदीयस्य 'शब्दः कारणम्' इति वाक्यान्निरूपितः । सम्बन्धेऽस्मिन् शब्दस्य कारणत्वादर्थस्य कार्यत्वमित्यवसीयते, अर्थात् शब्दस्य सत्तायामर्थस्याप्युपस्थितिः, तदभावेऽर्थस्याप्यभावोऽनुपस्थितिर्वा भवतीति । सम्बन्धमिमं व्याख्यायन्नेकत्र रामाज्ञापाण्डेयो लिखति- "ये बाह्यस्यार्थस्य वाच्यत्वं नेच्छन्ति, तन्मतोपस्कारार्थं वक्त्राभिप्रायारूढस्यैव शब्दार्थत्वे कार्यकारणभावसम्बन्धमाह, तथा च शब्दः कारणमित्युक्त्वा शब्दार्थयोः कार्यकारणभावसम्बन्धो व्यवस्थापित इति ।"[१२७]

## ३.८.३ योग्यतासम्बन्धः -

शब्दार्थयोर्विद्यमानो योग्यतासम्बन्धो वैयाकरणभूषणे शक्तिनिर्णयप्रकरण इत्थं व्याख्यातः -

---

४३. नागेशः, *परमलघुमञ्जूषा,* वाराणसी : चौखम्बासुरभारतीप्रकाशनम्,(१९९८), पृ.२८ ।
४४. रामाज्ञापाण्डेयः, व्याकरणदर्शनभूमिका, वाराणसी : सं.सं.वि., (२०३९) पृ. ८५ ।
४५. पूर्ववत्,पृ.८३ ।

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।

अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥[१२८]

इन्द्रियेषु विषयग्रहणे स्थिताऽनादियोग्यता इव शब्देष्वप्यर्थग्रहणेऽनादियोग्यता सिद्धा सैव शब्दार्थयोः सम्बन्धः, सैव शक्तिरिति भूषणकारिकायाः आशयः, अतो कारिकाकारमते शब्दार्थयो र्योग्यतासम्बन्धोऽपि दृश्यते । अन्ये व्याख्यातारो योग्यतासम्बन्धं न ख्यापयन्ति ।

### ३.८.४ इतरेतराध्यासमूलक-सम्बन्धः

एके गां बधान, पुस्तकमानय प्रभृतिषु वाक्येषु शब्दार्थयोरितरेतराध्यासमूलकं सम्बन्धमुपस्थापयन्ति । उपरितनस्थिते प्रथमवाक्ये शब्दतोऽर्थो गृह्यते द्वितीयेऽपि शब्दोऽर्थं कार्यं वा गृह्णातीति द्वयोर्ग्राह्यग्राहकयोरितरेतराध्यासमूलकः सम्बन्धो वर्तत इति निश्चीयते, परं गामुच्चारय इति वाक्येऽर्थो न अपि तु शब्द एवोच्चार्यते, अतस्तादृशः सम्बन्धः स्पष्टतया न परिलक्ष्यते तथापि व्याख्यानद्वारा एतयोरितरेतराध्यासमूलकः सम्बन्धः परिकल्पनीय इति तद्व्याख्यातारः । एतादृशः सम्बन्धो द्विष्ठो भवतीति व्याख्यायन्तो वैयाकरणा आहुः- "सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकोऽ-भियुक्तव्यवहाराद् यथा घटवद्भूतलमित्यादौ संयोगसम्बन्धः सम्बन्धिभ्यां भिन्नो द्विष्ठः, घटनिरूपितसंयोगाश्रयो भूतलमिति विशिष्टबुद्धिनियामकश्चेति ।" [१२९] सम्बन्धो नाम द्विष्ठस्तथापि तद्भिन्नश्चेति अत्रत्येन घटवद्भूतलमित्युदाहरणेन ज्ञायते, यद्यपि घटे भूतले च विद्यमानोऽयं संयोगरूपसम्बन्धः घटमात्रे भूतलमात्रे च नास्ति तथापि द्वयोरेवावस्थितत्वाद् द्विष्ठः, अत एवाभियुक्तैर्विशिष्टबुद्धिनियामकोऽयं सम्बन्ध इत्युक्त्वा विशिष्टीकृतः ।

महाभाष्यकारः पतञ्जलिरपि पदपदार्थयोरितरेतराध्यासमूलकं सम्बन्धमेव सङ्केतपदेन व्यवहरति, तद्यथा- सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मको योऽयं शब्दः सोऽर्थः, योऽर्थः स शब्द इति । भाष्यकारमते शब्दार्थयोरितरेतराध्यासमूलकः सम्बन्धः । तन्मते- येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणीनां सम्प्रत्ययो भवति स एव शब्द इति ।[१३०] गौरित्युच्चारिते सास्नालाङ्गूलादिभिर्युतस्य तादृशपशुविशेषस्य बोधो जायते, एतादृशो

---

[४६] भट्टोजिदीक्षितः(कारिकाकारः),वैयाकरणभूषणसारः, वाराणसी : ओरियान्टाला' (२००५), पृ.४०२ ।
४७. नागेशः, *परमलघुमञ्जूषा,* पूर्ववत्, (१९९८) पृ.२६ ।
४८. पतञ्जलिः, *व्याकरणमहाभाष्यम्,*वाराणसी : चौखम्बासंस्कृतसंस्थानम्, (२०५२) पृ.११ ।

धारणात्मको बोधो शब्दत एव सम्भवति । एतादृशीमवस्थां परिज्ञायैव महाभाष्यकारेण योऽयं शब्दः सोऽर्थः, योऽर्थः स शब्द इत्युक्त्वा शब्दार्थयोरितरेतराध्यासमूलकस्तादात्म्यसम्बन्धः परिकल्पितः, महाभाष्यकारस्त्वमुं सङ्केतपदेन व्यवहरति । एतादृशे सम्बन्धे शब्दः शक्तश्चेदर्थस्तु शक्यः, तद्यथा- तस्य च तादात्म्यस्य निरूपकत्वेन विवक्षितोऽर्थः शक्यः, आश्रयत्वेन विवक्षितः शब्दः शक्त इत्युच्यते ।[१३१] पुस्तकमानयेति वाक्ये श्रावणप्रत्यक्षः शब्द एव, अतोऽसौ शक्तः, अयमाश्रयत्वेन निरूपितत्वात् शक्त इत्युच्यते, अर्थस्तु तादात्म्यसम्बन्धस्य निरूपकत्वेन विवक्षितो वर्तते, अतोऽर्थः- प्रधानः,व्यङ्ग्यः,बोध्य,ग्राह्य इवात्र शक्यः । अर्थे तादृशशक्तिग्राहकसङ्केतस्य विद्यमानत्वादेव 'रामेति द्व्यक्षरं नाम मानभङ्गपिनाकिनः' इत्यादौ रामशब्दोच्चारणसमकालमेवार्थबोधनेन शिवस्य गर्वभङ्गो जात इत्यर्थावबोधः सुगमः । अनयैव प्रक्रियया वृद्धिरादैजिति सूत्रस्थेन वृद्धिपदेन आदैचां बोधः सुकरः । एतादृशं तादात्म्यञ्च परिभाषयन्नागेशः प्राह- "तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्, भेदाभेदयोः समनियतत्त्वम्, अभेदस्याध्यस्तत्वात् तयोर्न विरोधः ।"[१३२] नागेशमते तादात्म्यबोधकौ शब्दार्थौ भिन्नौ तथापि तयोरभेदत्वावभासनाद् भेदप्रतीतिः, अनेन प्रकारेण शब्देऽर्थस्यार्थे शब्दस्य चारोपपरिकल्पनाद् द्वयोर्मध्ये नास्ति विरोधः । इत्थं शब्दार्थयोरितरेतराध्यासमूलकस्तादात्म्यसम्बन्धो महाभाष्यकारेण पतञ्जलिना तथा तदनुवर्तिना नागेशेन च साधितो दृश्यते ।

### ३.८.५ नित्यसम्बन्धः

महाभाष्ये 'नित्ये शब्दार्थसम्बन्धे' इत्युक्तत्वात् तथा भर्तृहरिणापि शब्दार्थयोर्नित्यसम्बन्धस्य व्याख्यातत्वाच्च शब्दार्थयोः नित्यसम्बन्धोऽथवा समवायसम्बन्धोऽस्तीति ज्ञायते । एतादृशं सम्बन्धं व्याख्यायन् महावैयाकरणो भर्तृहरिर्वाक्यपदीये लिखति-

नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः ।
सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥ (१/२३)[१३३]

सूत्रकारो महर्षिपाणिनिर्वार्तिककारः कात्यायनो महाभाष्यकारः पतञ्जलिश्च शब्दमर्थं तयोः सम्बन्धं च नित्यं स्वीचक्रुरिति कथयन्नत्र भर्तृहरिस्तत्कारिकाव्याख्याता हरिवृषभश्च मुनित्रयवचनानि उदाहरतः । तत्र वृषभाचार्य आह- पाणिनेस्तदशिष्यं संज्ञाप्रमाणत्वात् (पा.सू.


---

४९. नागेशः, *परमलघुमञ्जूषा*, पूर्ववत्, (१९९८)पृ.३४ ।
५०. पूर्ववत्, पृ.३५-३६ ।
५१. भर्तृहरिः, *वाक्यपदीयम्* (ब्रह्मकाण्डम्), वाराणसी : चौखम्बाविद्याभवनम् , (इ.१९९०) पृ.१३२ ।

१-२-५३) इति सूत्रम्, कात्यायनस्य- सिद्धेः शब्दार्थसम्बन्धेः, आकृत्युपदेशात् सिद्धम्, स्फोटः शब्दो ध्वनिस्तस्य व्यायाम उपजायते, सर्वे सर्वपदादेशाः प्रभृतीनि वार्त्तिकानि, नित्येषु शब्देषु कूटस्थैर्वर्णैरविचालिभिर्भवितव्यम्, संग्रह एतत् प्राधान्येन परीक्षितं नित्यः शब्द इत्यादीनि नैकानि महाभाष्यवाक्यानि च शब्दं तदर्थं तयोस्सम्बन्धं च नित्यं प्रमाणीकुर्वन्ति । वैयाकरणसिद्धान्तकौमुद्याः 'निमित्तात्कर्मयोगे' (का.वा. सप्तम्य...पा.सू.२-३-३६ इति सूत्रे) इति वार्त्तिकस्थितायां चर्मणि द्वीपिनं हन्तीत्यादिकारिकायां चर्मदन्तयोः, सीमापुष्कलयोश्चायुतसम्बन्धत्वेन समवायसम्बन्धः स्वीकृतो दृश्यते । अन्यत्रापि बहुत्र मुनित्रयैस्तदनुवर्तिभिरनेकैश्च वैयाकरणैश्शब्दार्थयोः समवायसम्बन्धः प्रख्यातः प्राप्यते, अतः समवायसम्बन्धोऽप्यस्तीति निश्चीयते।


## ३.९ शैलीविज्ञानेन सह व्याख्यानस्य सम्बन्धः

संस्कृतव्याकरणसम्बद्धस्य व्याख्यानस्याधुनिकेन शैलीविज्ञानेन सह सामीप्यसम्बन्धो दृश्यते । व्याकरणात्मके व्याख्याने यथा-पदनिर्वचनम्,अर्थापनम्,पारिभाषिकीकरणम्,सम-भिन्नपदयोर्विश्लेषणमित्यादीनि व्याख्यानतत्त्वानि भवन्ति तथैव शैलीवैज्ञानिकेऽध्ययनेऽपि कलात्मकवाक्यनिर्मापकं पदविचलनम्, अग्रभूमिनिर्माणम्, समानान्तर्यम्, रूपगतकमनीयत्वम्, भाषिकसौष्ठवञ्च प्राप्यन्ते । भाषाया द्विविधे स्वरूपे- कलात्मिकाऽकलात्मिके च । तत्र साहित्येतरवाङ्मयसम्बद्धा भाषा प्रायः कलाशून्या अकलात्मिका भवति चेत् साहित्यिकरचनासु प्रयुक्ता भाषा तु विशेषकलायुक्ता कलात्मिका निगद्यते । कलात्मिकायां भाषायामपि भाषिक-साहित्यिकभेदेन द्विविधे सौन्दर्येऽवतिष्ठेते, अनयोर्मध्ये भाषिकसौन्दर्यस्याध्ययनं शैलीविज्ञानं करोति। अतः शैलीविज्ञाने भाषासौन्दर्ययोः समन्वयः संश्लेषणञ्च परिलभ्यते । प्रा. पारसमणिभण्डारी प्रायोगिकभाषाविज्ञानस्य कतिपये पक्षा नामके पुस्तकेऽधस्थितेन रेखाचित्रेणानयोः सामञ्जस्यं दर्शयति ।[१३४]




५२. यादवप्रकाशलामिछाने, *प्रायोगिक भाषाविज्ञानका कतिपय पक्ष, काठमाडौं : विद्यार्थी.,* (२०५४) *पृ.५९ ।*

शैलीविज्ञानस्यानुसन्धात्रा भाषायां कलायाञ्च निपुणेन भाव्यमिति तस्याशयः । शैलीविज्ञानं सौन्दर्येण सार्धं भाषिकपक्षद्वारमपि समुद्घाटयति । एतद्विज्ञानं भाषायाः काँस्कान् पक्षान् प्रकाशयतीत्यत्र शैलीविज्ञानमित्यस्य पुस्तकस्य लेखको मोहनराज शर्मा स्वकीये पुस्तके निम्नचित्र[१३५] द्वारा विषयमिमं विशदयति ।




साहित्यिकधरातले समुपलब्धासु एतासु संरचनासु शैलीविज्ञानं कलापक्षं विश्लेषयन् भाषिकपक्षमपि विवृणुते । एतदन्तर्गतानि व्याकरण-शब्द-ध्वनिव्यवस्थादीनि च तत्र स्वतः विश्लिष्यन्ते । सूक्ष्मरूपेणावलोकिते सति ध्वनि-वर्ण-रूप-पद-वाक्योपवाक्यसङ्कथनमित्येतेषा-मुपस्थितिः, तेषामवस्थितिः, उचितानुचितत्वञ्च वर्णरूपादिभिर्विहितप्रभावाधारेण विविच्यते, अतः शैलीवैज्ञानिकमध्ययनमपि भाषिकव्याख्यानतुल्यमस्तीति वक्तुं शक्यते ।[१३६] व्याकरणविषयसम्बद्धस्य व्याख्यानस्य शैलीविज्ञानेन सह पार्थक्यं तु- व्याकरणं स्वविषयसम्बद्धानि वाक्यपदादीन्येव विवृणोति, शैलीविज्ञानन्तु कलात्मकरचनासम्बद्धां भाषामपि विश्लेषयति ।

---

५३. मोहनराजशर्मा, *शैलीविज्ञानम्* (द्वि.सं.), काठमाडौं : ने.रा.प्र.प्र., (२०५९), पृ.६ ।
५४. मोहनराजशर्मा, *शैलीविज्ञानम्*, पूर्ववत्, (२०५९) पृ.६ ।

### ३.१० शब्दार्थयोः सम्बन्धेनैव व्याख्यानसम्भवः

शब्दार्थसम्बन्धद्वारैव व्याख्यानं सम्भवति, यतो हि शब्दः तत्सम्बद्धमर्थमेव प्रकाशयति नासम्बद्धम्, अत एव वाक्यान्तर्गतेषु पदेषु प्रकृतिप्रत्यार्थसम्बद्धार्थस्य प्रतीतिर्भवति । तथैव अनुच्छेदे वाक्यस्य, महावाक्ये चानुच्छेदस्य प्रतीतिराकाङ्क्षादिवशादेव सम्भवः, प्रत्येकं नित्यसम्बन्ध इति प्रमाणितो भवति ।

### ३.११ व्याख्यानभेदाः

वेदे, निरुक्ते, धर्मशास्त्रे, व्याकरणे, काव्यशास्त्रादिषु च विषयभेदाद् व्याख्यानभेदा अपि भिन्नाः । अत्रैतेषां परिचयः, भेदाश्च क्रमशः प्रस्तूयन्ते ।

### ३.११.१ वैदिकं व्याख्यानम्

तत्त्वदर्शिभिर्महर्षिभिर्ध्यानतपोयोगसाधनादिर्भिदृष्टो मन्त्रसमूहो वेदः, अतो वेदोऽनेकेषां मन्त्रद्रष्टॄणां ऋषीणां सङ्कलनं मन्यते । अतो वेदो गायत्री-त्रिष्टुपनुष्टुब्-जगतीप्रभृतिषु वृत्तेष्वन्यदीयेष्वनुशासनेषु च निबद्धः । तत्रत्येषु मन्त्रेष्वपि कुत्रचिदतिरिक्तं पदं त्याज्यं भवति चेत् कतिषु स्थानेषु पूर्ववर्तिभ्यो मन्त्रेभ्यरनुवर्त्यं पदमानेयं भवति । तेनैव प्रकारेण मन्त्रेषु दूरवर्तीनि कानिचन पदानि सन्निकटमानेयानि भवन्ति । वैदिकव्याख्यानं प्रायो निर्वचनमूलकम्, यौगिकार्थनिष्पादनेनाभीप्सितार्थप्रकाशकं च मन्यते । एतादृशानि नैकानि तत्त्वानि वेदेऽपि प्रयुक्तानि सन्ति । वेदेऽतिरिक्तपदत्याग-हीननिवेश-विप्रकृष्टसंयोजनानु-पूर्वीप्रकल्पन-लिङ्गधातुविभक्त्यादीनां संयोजनानि तत्त्वरूपेण ख्यातानि सन्ति । एतेषां परिचयः वैदिकव्याख्यानतत्त्वानीति शीर्षके दीयते ।

### ३.११.२ निरुक्तीयं व्याख्यानम्

व्याख्यानस्य लक्षण-तत्त्व-स्वरूपादिविषयेषु निरुक्तकारो यास्काचार्यो ग्रन्थारम्भे लिखति- "समाम्नायः समाम्नातः स व्याख्यातव्य इति ।"[१३७] निरुक्तीयं प्रकृतसूत्रं तद्व्याख्याता दुर्गाचार्य एवं विशदयति- "सम् सम्यक् आमर्यादया म्नायते अभ्यस्यतेऽयमित्यर्थे समाङ्पूर्वकाद् म्नातेः 'अकर्तरि च कारके संज्ञायाम्' (पा.सू.३-३-१९) इति कर्मणि घञि युगागमे च कृते समाम्नायः । गवादिदेवपत्न्यन्तो वैदिकशब्दसमुदायः समाम्नाय इत्युच्यते । स च समाम्नातोऽर्थात् प्राक्तनै र्मुनिभिः पञ्चाध्यायीशास्त्रसङ्ग्रहभावेनैकस्मिन्नाम्नाये

---

५५. यास्कः, *निरुक्तम्,* पूर्ववत्, (२००२) पृ.१ ।

निघण्ट्वपरनामके ग्रन्थे समावेशितः ।" १३८ अर्थादिमान्याख्यातानि, इमे उपसर्गाः, इमे निपाताः, इदं सामान्यलक्षणमिदं विशेषलक्षणम्, इमान्येकार्थानि, इमान्यनेकार्थानि, इमान्यवगतसंस्काराणि, इमान्यनवगतसंस्काराणि, इदमभिधानम्, इदमभिधेयवचनम्, इदमनभिधानस्य निर्वचनमित्येवं विधया मर्यादया व्याख्येय इति निरुक्तकारस्य तात्पर्यम् । एतादृशैर्व्याख्यानैर्निरुक्तीयं व्याख्यानमपि शब्दशास्त्रीयमिव शब्दधात्वादिस्थोपसर्गप्रत्ययधातु-प्रातिपदिकादिनिर्धारकं तद्व्याख्यायकञ्च भवतीति निश्चीयते । निरुक्तकारस्तादृशं व्याख्यानं सामान्या वैशेषिकी चेति द्वेधा विभजते, तत्र सामान्या सर्वेषां नाम्नामिदं सामान्यलक्षणम्, इदमाख्यातानामिदमुपसर्गाणामिदं निपातानामित्यादिः । विशेषस्तु तत्त्व-पर्याय-भेद-सङ्ख्यादिभिर्व्याख्यानतत्त्वैर्निर्वचनम् । पुनश्च निरुक्तीयानि पदानि प्रत्यक्षपरोक्षाति-परोक्षादिभिर्वृत्तिभिर्व्याख्यायन्त इति दुर्गाचार्यः सङ्केतयति । स एकत्राह- "त्रिविधाः हि शब्दा भवन्ति प्रत्यक्षवृत्तयः परोक्षवृत्तयोऽतिपरोक्षवृत्तयश्च । तत्रोक्तक्रियाः प्रत्यक्षवृत्तयः । अन्तर्लीनक्रियाः परोक्षवृत्तयः । अविज्ञातक्रिया अतिपरोक्षवृत्तयः । तत्र निघन्टव इत्यतिपरोक्षवृत्तिः, निगन्तव इति परोक्षवृत्तिः, निगमयितार इति तु प्रत्यक्षवृत्तिः ।" १३९ अर्थात् यत्र प्रत्यक्षतया क्रिया भासते सा प्रत्यक्षा, यथा- निपूर्वकात् ण्यन्तात् गमिधातोस्तृच्प्रत्ययेन निष्पन्नाद् निगमयितृशब्दात् वेदमन्त्र इत्यर्थः प्रत्यक्षतया भासित अत सा प्रत्यक्षा वृत्तिः । किन्तु निपूर्वकाद् गमेस्तुन्प्रत्ययेन निष्पने निगन्तुशब्दे मन्त्रबोधनार्थो न प्रत्यक्षोऽपि तु लीनः, अतस्तादृशी वृत्तिः परोक्षा । निपूर्वकात् गम्धातोस्तुन् प्रत्ययेनानुबन्धलोपेन गकारस्य घकारेण तकारस्य टकारेण मकारस्यानुस्वारपरसवर्णेन च निर्मिते निघण्टुशब्दे तु मन्त्रार्थस्येत्सङ्केतोऽपि न दृश्यते तथैव तस्य प्रकृतिप्रत्ययादिकमपि दुर्भेद्यमत साऽतिपरोक्षावृत्तिः, अनेन प्रकारेण निरुक्ते तिसृभिर्युक्तिभिर्निर्वचनं विधीयते । निरुक्तकार तिसृस्वपि वृत्तिषु तृतीयामाश्रयत इति निरुक्तावलोकनेन ज्ञायते ।

निरुक्ते गमेस्तुन्प्रत्ययः केन सूत्रेण भवति ? गकारस्य घकारस्तकारस्य टकारश्च केन विधीयत इति प्रश्नो नापेक्षणीयः, यतो हि यथा पाणिनीयं व्याकरणं रूपसाधने स्वतन्त्रं तथैव निरुक्तमपि तत्रत्यैर्वाक्यरूपैः सूत्रैरावश्यकरूपनिर्माणे स्वतन्त्रमिति तट्टीकाकारो बह्मलीनमुनिः सङ्केतयति ।[१४०] अत एव तत्र वर्णागमनवर्णविकारादीनि पञ्चविधानि कार्याणि स्वतन्त्रतया विधीयन्त इति कारिकेयं निर्दिशति, तदित्थं-

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।

---

५६. दुर्गाचार्यः (व्या.), *निरुक्तम्,* पूर्ववत्, (२००२) पृ.१-२ ।
५७. दुर्गाचार्यः, पूर्ववत्, पृ.३ ।
५८. ब्रह्मलीनमुनिः (व्या.), *निरुक्तम्,* गुजरात : लेखकः, (२०२७) पृ.३ ।

धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥ [१४१]

निरुक्ते मूलतो धातुमादाय पदं विव्रियते । तत्रत्ये एकस्मिन्नेव पदे वर्णागमः,वर्णविकारः,वर्णविपर्ययः, वर्णनाशः,धात्वर्थस्य प्रत्ययेन तदर्थेन च सह सम्बन्धश्च प्रदर्श्यते । एतानि व्याख्यानस्य सामान्यतत्त्वान्येवेति टीकाकारः । व्याख्यानस्य विशेषलक्षणन्तु सामान्यतः किञ्चिद् भिन्नमष्टतत्त्वसमन्वितमिति तद्व्याख्याता दुर्गाचार्यः सूचयति । तेषां चर्चा निरुक्तीयव्याख्यानतत्त्वानीति शीर्षके क्रियते ।

## ३.११.२.१ यास्कीयनिर्वचनशैली

यास्कः सन्निहितं धातुं परिकल्प्य निर्वचनीयेन शब्देन सह तस्यार्थसाम्यावस्थाऽस्ति न वेति विचिन्त्य प्रत्यक्षपरोक्षादिभिर्युक्तिभिर्निर्वचनं कुरूते । तत्र सति सम्भवे लक्ष्यार्थोऽपि समाश्रयते । 'तत्र नामान्याख्यातजानीति' शाकटायनमत[१४२]व्याख्याता यास्को यथाकथञ्चिदपि शब्दानां धातुजत्वं साधयितुं प्रयतते । स निरुक्तस्य द्वितीयाध्यायारम्भे आह- 'अविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयात्, न त्वेवं निर्ब्रूयात्' [१४३] अर्थाद्धातोर्निर्धारणे काठिन्येऽनुभूयमानेऽपि धातुना सह प्रकृतेर्वर्णगतं स्वरगतमर्थगतं वा यथाकथञ्चित् साम्यं साधयित्वैव शब्दो व्याख्यातव्य इति तस्यार्थः ।

आधुनिका व्याख्यातारस्तु यास्कीयं निर्वचनं यौगिकं व्याख्यानं (आङ्ग्लभाषायां इटोमोलोजिकल मिनिङ) (etymological meaning) मन्यन्ते, पुनश्च ते यास्केन व्याख्यातं 'सर्वं धातुजमाह' इति सिद्धान्तमसहन्ते । पाणिनिरपि तत्रासहमत इति 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' (पा.सू.१-२-४५) इति सूत्रेऽधातुः प्रातिपदिकमिति तदीयकथनेन ज्ञायते । एतादृशं वैचारिकं मतभेदं विलोक्य पाश्चात्त्यो भाषाविद् कोल्डमहोदयः घोषयति- यास्कः शब्दनिर्वचनक्रमे सम्यगुदाहरणमुपन्यसति परं तस्य सिद्धान्तस्तु न समीचीन इति । [१४४]

पाणिनीयव्याकरणं निरुक्तञ्च द्वावपि ग्रन्थौ शब्दनिर्वचनमूलके व्याख्याने समर्पितौ, अतः पाणिनीयाष्टाध्याय्या व्याख्यानतत्त्वनिर्णये निरुक्त आधारो भवितुं शक्नोति । यास्कस्य निर्वचनप्रणाली प्रश्नोत्तरात्मिका वर्तते, तद्यथा- "नद्यः कस्माद् ? नदना भवन्ति शब्दवत्य

---

५९. पूर्ववत् ।

६०. यास्कः, *निरुक्तम्,* पूर्ववत्, (२०२७) पृ.६७ ।

६१. पूर्ववत्,पृ.६८ ।

६२. उमाशङ्करः (व्या.), *निरुक्तम्,* पूर्ववत्, (२०२७) पृ. ६९ ।

इति नदी"[१४५] नदी सदैव शब्दं करोतीति प्रसिद्धिरेव, तस्मादेव नदी जातेति निरुक्तीयं व्याख्यानम् । महाभाष्यकारेणापि निरुक्तप्रणाली समनुकृतेति उमाशङ्करो निरुक्तभूमिकायां सङ्केतयति । यास्कः कया रीत्या शब्दनिर्वचनं करोत्यत्र मूलतसस्तिस्रो रीतयः प्राप्यन्ते, ताः यथा-

१. निर्वक्तव्यः शब्दः समानार्थबोधकं धातुमेव सङ्केतयति चेत् प्रथमतः तादृशधातुरेव चयनीयः, तत्र सति सम्भवे प्रचलितव्याकरणनियमत एव शब्दनिर्वचनं कार्यम्, यथा- दधातीति धातुः ।[१४६] डुधाञ् धारणपोषणयोरित्यस्मादौणादिकतुना धातुपदनिष्पादनम् ।

२. निर्वक्तव्यात् शब्दाद्धातोर्भिन्नत्वे बाधके वा सति तत्सन्निकटस्थो धातुरन्वेषणीयः, यथा-प्रकाशार्थकराजृदीप्तावित्यस्माद् राजा इत्यस्य निर्माणम् ।[१४७]

३. यत्र स्वरूपगतमर्थगतमपि साम्यं न लभ्यते तत्र तु स्वरव्यञ्जनयोर्मध्ये कस्यापि वर्णस्य साम्यमाधृत्य धातुः परिकल्पनीयः, यथा- रूपशब्दव्युत्पत्तौ रुच्धातोर्वर्णसान्निध्यमादाय तस्मात् प्रत्ययकल्पना क्रियते ।[१४८]

अतो यस्मिन् शब्दे स्वरसंस्कारः प्रादेशिकगुणश्च विद्यते तत्र प्रत्यक्षतया, यत्र प्रादेशिकविकारस्तत्रार्थसम्बन्धेन यत्र तु शब्दार्थयोर्मध्ये द्वयोरेव गुणाभावस्तत्राक्षरवर्णसमानतया निर्वचनं कार्यमिति निरुक्तीयनिर्वचनस्य निष्कर्षः ।

पाणिनीयव्याकरणेऽपि आदिमध्यान्तलोपै रूपाणि साधितानि, यथा- आदिलोपे अपिनद्ध-पिनद्धः,अवगाह-वगाहः,मध्यलोपे गम्-जग्मतुः (गमोऽलोपः), अन्त्यलोपे राजन्-राजा, इत्यादिप्रकारेण आदिमध्यान्तलोपैः शब्दनिर्वचनं व्याकरणेऽपि प्रसिद्धम् । पाणिनीयव्याकरणपरम्परायामपि परोक्षातिपरोक्षेषु च शब्देषु वर्णागम-वर्णविकार-वार्णनाशादिभिः शब्दनिर्वचनं क्रियते । अत्र तादृशी प्रक्रिया पृषोदरादित्वेन प्रसिद्धा । अत्र पृषोदरादीनि यथोपदिष्टम् (पा.सू.६-३-१०९) इति सूत्रेण साधितानि कानिचन रूपाण्यत्रोदाह्रियन्ते- भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् ।

गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम् ॥[१४९]

---

६३. पूर्ववत्, पृ.भू.१० ।
६४. पूर्ववत्,पृ.भू.३३ ।
६५. पूर्ववत, पृ.३२२ ।
६६. पूर्ववत, पृ.३२२ ।

अत्र हस्धातोः पचाद्यच्यनुस्वारागमेन हंसः,हिसि हिंसायामित्यस्मात् पचाद्यचि इदित्वान्नुमि वर्णविपर्ययेण च सिंहः,गूढ आत्मा यस्येति बहुव्रीहौ उत्तरपदादेराकारस्योकारेण गुणेन च गूढोत्मा, पृषदुदरमस्येति बहुव्रीहौ पृषोदरादित्वात्तलोपेन गुणेन च पृषोदरमित्यादीनि रूपाणि साध्यन्ते । तथैव बलाहकप्रभृतीन्युदाहरणान्यपि सिद्धचन्ति । एतैरुदाहरणैरतिपरोक्षे पाणिनिरपि शिष्टाश्रयणेन अक्षरवर्णादिस्वरूपसामञ्जस्येन रूपाणि निर्वक्तीति तात्पर्यम् ।

## ३.११.२.२ यास्कपाणिन्योर्निर्वचनसम्बन्धः

यास्को निरुक्तं विद्यास्थानं वक्ति । अत्र विद्या शब्देन व्याकरणं सङ्केतितमतो निरुक्तिप्रक्रियायाः पूरकं निरुक्तम् । निरुक्तिप्रक्रिया अपि धातुस्वरूपनिर्धारणाय, शब्दसाधुत्वप्रदर्शनाय च व्याकरणप्रक्रियां समाश्रयते । पाणिनेर्निरुक्तिस्तु यास्कीयां निरुक्तिं नाऽनुचकार ।

अष्टाध्याय्यां निरुक्तीयाः कतिपये पारिभाषिकशब्दाः शब्दान्तरेणाङ्गीकृताः[१५०] दृश्यन्ते, यथा-

| *निरुक्ते* | *अष्टाध्याय्याम्* | *अर्थः* |
|---|---|---|
| कासि | णिजन्तः | प्रेरणार्थः |
| चर्करीतः | यङ्लुङन्तः | क्रियासमभिहारः |
| चिकीर्षितः | सन्नन्तः | इच्छार्थः |

निरुक्ते चतुर्धा पदानि विभक्तानि नामाख्यातोपसर्गनिपाताश्चेति । महाभाष्येऽपि चत्वारि शृङ्गाः त्रयोऽस्य पादा इत्यादिमन्त्रं व्याकरणदृष्टचा व्याख्यायता चत्वार्येव पदानि समुल्लिखितानि । प्रकारान्तरेण पाणिनीये व्याकरणे सुप्तिङन्तं पदम् (पा.सू.१-४-१४) इति सूत्रद्वारा सुबन्तं तिङन्तञ्चेति द्विधा विभक्तम् । पाणिनीयव्याकरणे सर्वविश्वोभयादिषु सङ्कुचिताः सर्वनामशब्दाः यास्केन सर्वाणि नामान्यथवा सर्वेषु भूतेषु नमतीति विग्रहद्वारा व्यापकीकृताः । तेन निपातस्यापि उच्चावच्चेषु स्थानेषु निपतन्तीत्यर्थः कृतः । उदात्तानुदात्तयोः लक्षणेऽपि यास्कपाणिन्योः शाब्दिको भेदः प्राप्यते । पाणिनीयव्याकरणे उच्चैरुदात्तः (पा.सू. १-२-२९) इति सूत्रे ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्त [१५१] इत्युक्त्वा परिभाषितोऽयमुदात्तो निरुक्ते तु तीव्रार्थतरमुदात्तमित्युक्त्वा लक्षितम् । तथैव

---

६७. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी*, वाराणसी : चौ.सु.भा.प्र.:, (१९८७) पृ.१९१ ।

६८. उमाशङ्करः (व्या.), *निरुक्तम्*, पूर्ववत्, (२०२७),पृ. ८६ ।

६९. भट्टोजिदीक्षितः,*वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), मुम्बई : खेमराजश्रीकृष्णदासः, (१९७४) पृ.५ ।

पाणिनीयपरम्परायां नीचैरनुदात्तः (पा.सू.१-२-३०) इति सूत्रे ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽजनुदात्तः[१५२] इति लक्षितोऽनुदात्तो निरुक्तेऽल्पीयोऽर्थतरमनुदात्तमिति व्याख्यातम् । यास्केन कतिपयशब्दनिर्वचने धातोराधारं गृहीत्वा अन्ये विलोपिताः, यथा- प्र+दा+क्त=प्रत्तः, अव+दा+क्त=अवत्तः । एतादृशी प्रक्रिया पाणिनीयव्याकरणेऽपि विद्यते, यथा- अस्+तस् =स्तः, अस् +अन्ति=सन्ति । वैदिककालतो यास्ककालमतीत्य पाणिनीयकालपर्यन्तं समागता कतिपयेषु शब्देषु तदर्थसङ्कोच-विस्तर-प्रकर्षापकर्षाश्च सञ्जाताः सन्ति । यथा वैदिककाले सकलपशुबोधनाय प्रयुक्तोऽयं मृगशब्दः पाणिनीयकालेऽर्थसङ्कोचीभूय पशुविशेषवाचकरूपेण हरिणे प्रयुक्तो दृश्यते । अनेन प्रकारेण यास्कपाणिन्योर्निर्वचनशैलीषु नैकेषु भेदेषु सत्स्वपि बहुत्र समानताऽपि दृग्गोचरी भवति । यास्कोत्तरकालिके लौकिके युगे समुत्पन्नेन महर्षिणा पाणिनिना पूर्वकालिकान् कतिचिद् नियमान् संशोध्य लोकानुकूलञ्च कृत्वा पुनर्लक्षिता इति अत्र स्थितेन स्वरूपद्वयविश्लषणेन ज्ञायते ।

### ३.११.३ व्याकरणशास्त्रीयं व्याख्यानम्

संस्कृतव्याकरणमिति पदेन प्रायशो जनाः पाणिनीयमेव व्याकरणमवबुध्यन्ते । तस्य व्याकरणस्य व्याख्यानारम्भः स्वयमेव पाणिनिना छात्रप्रवचनमाध्यमेन कृत इति तत्सूत्रस्थैर्बहुभिः पदैरवगम्यते । भाषायाः प्राच्योदीच्यादीनां भेदानां सम्यग् ज्ञाता मुनिरसौ स्वोपज्ञटीकामाध्यमेन व्याकरणशास्त्रीयं व्याख्यानमारब्धवानिति गवेषकाः प्राहुः ।[१५३] ततः पश्चात् कात्यायनेन वार्त्तिकानां माध्यमेन, भगवता पतञ्जलिना महाभाष्यमाध्यमेन, वामनजयादित्याभ्यां काशिकावृत्तिद्वारा, भट्टोजिदीक्षितेन सूत्रार्थापनादिप्रक्रियाद्वारा, नागेशेन पूर्वचिन्तने समालोचनपूर्वकं नवीनमतस्थापनेन, भर्तृहरिकौण्डभट्टादिभिर्व्याकरण-शास्त्रस्यार्थपक्षं समाख्याय व्याकरणशास्त्रीयं व्याख्यानं पल्लवितम् । एतन्मध्ये एकपक्षे सूत्रक्रमानुगामिनी तथापरपक्षे प्रक्रियाक्रमानुरोधिनी व्याख्यानशैली च विकसिता । उपर्युक्तयोर्द्वयोः पक्षयोरपि समालोचनम्, प्राच्यमतखण्डनपूर्वकं नव्यमतसंस्थापनम्, नव्यमतस्योहापोहनम्, टिप्पणसमालोचनञ्च जातम् । सूत्राणां व्याख्याने एव जातामुक्तानुक्तदुरुक्तचिन्तामपाकर्तुं सूत्रपूरकाणि वार्त्तिकानि, सूत्रवार्त्तिकयोर्नियमान् द्रढयितुं

---

७०. पूर्ववत् ।

७१. युधिष्ठिरमीमांसकः, *संस्कृतव्याकरणशास्त्रेतिहासः* (प्रथमभागः) (तृ.सं.) हरयाणा : रामलाल क.ट्र. (२०३०) पृ.४३६ ।

महाभाष्यञ्च विरचितम् । तत्रैव महाभाष्येण विषदीकृता विचाराः सिद्धान्ताश्च काशिकावृत्तिद्वारा सारल्येनोपस्थापिता । भर्तृहरिणा ताः सरलतया श्लोकेषूपनिबद्धाः । प्रक्रियापथानुगामिनो व्याख्याकारस्य भट्टोजिदीक्षितस्योत्तरवर्तिनि काल एव शब्दशास्त्रीयान् धातु-तिङ्कृत्तद्धितसमास-शब्दशक्ति-लक्षणा-व्यञ्जना- लकारार्थ-निपातार्थ-स्फोटसिद्धान्तान् तत्सदृशाञ्च बहूनर्थसम्बद्धान् सिद्धान्तान् भर्तहरि-कौण्डभट्ट-नागेश-प्रभृतयो व्याकृतवन्तः । एतान् व्याख्यान-समालोचनार्थसिद्धान्तप्रतिपादकान् सकलग्रन्थान् मूलतः प्रक्रियावलम्बिनी व्याख्यानपद्धतिः, समालोचनात्मिका व्याख्यानपद्धतिः, भाष्यधर्मिणी व्याख्यानपद्धतिः, दर्शनशास्त्रव्याख्यात्री व्याख्यानपद्धतिरिति चतुर्षु व्याख्यापद्धतिषूपनिबद्धुं शक्यते ।

व्याकरणशास्त्रीये व्याख्याने कानि व्याख्यानतत्त्वानि भवन्तीति विषये शब्दशास्त्रीयव्याख्यानतत्त्वानीति शीर्षके निरूपयिष्यते ।

### ३.११.४ दर्शनशास्त्रीयं व्याख्यानम्

संस्कृतवाङ्मयेऽपि विषयभेदेन प्रायो भिन्नानि व्याख्यानतत्त्वानि प्राप्यन्ते । तन्त्र उपोद्घात-पदस्फोरण-पदविग्रहादीनि तत्त्वानि भवन्ति चेद् व्याकरणशास्त्रीये व्याख्याने तु पदच्छेदसमाससूत्रसन्धानादिकं भवतीति शशिदेवः सारस्वतीसुषमापत्रिकायामेवं सङ्केतयति-

उपोद्घातपदं चैव पदार्थपदविग्रहः ।
चालनाप्रत्यवस्था च व्याख्या तन्त्रस्य षड्विधाः ॥
आदौ कुर्यात् पदच्छेदं समासस्तदनन्तरम् ।
समासात् सूत्रसन्धानं ततः सूत्रार्थमादिशेत् ॥ [१५४]

एवमेव काव्यशास्त्रादौ, दर्शनेऽन्यत्र च व्याख्यानतत्त्वानि भिन्नानीति निश्चप्रचम् । संस्कृतदर्शने निर्धारितानामेतेषां व्याख्यानतत्त्वानां चर्चा दर्शनोक्तव्याख्यानतत्त्वानीति शीर्षके भविष्यति ।

### ३.११.४.१ दर्शनोक्तव्याख्यानवैशिष्टचम्

दर्शनशास्त्रसम्बद्धं व्याख्यानं न हि पदपदार्थविश्लषणे केन्द्रितं तथापि तत्त्वमस्यादि वाक्यानां वाच्यार्थ-लक्ष्यार्थ-गूढार्थ-तात्पर्यार्थ-व्यङ्ग्यार्थादिप्रतिपादनाय पल्लवितम्, अतो व्याख्यानमिदं साहित्यव्याकरणसम्बद्धेभ्यो व्याख्यानेभ्यो भिन्नोऽनुभूयते । वेदान्तसूत्राणां व्याख्यातृभिः स्वाभिमतवादानुसारेणैवार्थापनं विधीयते । भगवतः शङ्कराचार्यस्याभिमत-

---

७२. शशिदेवः, 'व्याख्यानप्रक्रिया' *सारस्वतीसुषमा* (वर्ष-३०,अङ्क-३-४),वाराणसी : सं.सं.वि.,(२०३२) पृ.७८ ।

सिद्धान्तोऽद्वैतवादो निगद्यते । तेन ब्रह्मसूत्रभाष्यं व्याख्यायताङ्गीकृता प्रक्रिया सङ्क्षेपेणात्र प्रस्तूयते- दर्शनसम्बद्धमेकं सूत्रं गृहीत्वा तस्य पदविभागस्ततः प्रत्येकपदानामर्थापनम्, पदपदार्थयोः सम्बन्धस्थापनम्, तात्पर्यस्य विशदीकरणम्, सूत्रतात्पर्यस्य पूर्वापरविषयस्य च सम्बन्धनिर्धारणञ्च तत्र क्रियते ।

### ३.११.४.२ दर्शनोक्तव्याख्याननिदर्शनम्

दर्शनशास्त्रीये व्याख्याने विषयप्रवेशः,विषयोपरि संशयः, पूर्वपक्षस्थापनम्,उत्तरपक्षेण तत्खण्डनम्,सिद्धान्तपक्षस्थापनञ्चेति विधीयते । एतेषां सङ्गमनप्रकारः दर्शनोक्तव्याख्यान-तत्त्वानीति शीर्षके विधास्यते ।

आद्यगुरुणा शङ्कराचार्येण ब्रह्मसूत्रभाष्यं व्याख्यायता वर्ण्यं विषयवस्तु गृहीत्वा दर्शनशास्त्रोक्तपद्धत्या विवृतम् । निदर्शनायात्र ‘अथातो ब्रह्मजिज्ञासा’ इति सूत्रव्याख्यानं प्रस्तूयते-

१. बादरायणसूत्रम् - अथातो ब्रह्मजिज्ञासेति ।
२. अत्राथ शब्द आनन्तर्यार्थः, धर्मजिज्ञासाया आनन्तर्यमिति पूर्वपक्षीयसम्बन्धः प्रपञ्चितः । ततश्चानन्तर्यार्थकेनाथशब्देन साधनचतुष्टयस्य प्रतिपादनं विहितम् ।
३. द्वितीयस्यातः शब्दस्य हेत्वर्थः प्रतिपादितः, तस्य हेतोरर्थः सप्रमाणं व्याख्यातः ।
४. ब्रह्मपदस्यार्थः प्रपञ्चितः,तस्य जिज्ञासापदेन सह कर्मणि षष्ठीति निर्धारितः । अत्रापि प्रत्यक्षकर्मत्वमिति सिद्धान्तो विशदीकृतः । तथैव जिज्ञासापदस्य सूत्रे निवेशस्यावश्यकता नास्तीत्यपि विचारितश्च । अत्र श्रुतेर्निरूपणञ्च विहितम् ।
५. तद् विजिज्ञासस्व तद् ब्रह्मेति विग्रहद्वारा ज्ञातुमिच्छा जिज्ञासेत्यर्थो निर्धारितः तस्य ज्ञानेन सह सम्बन्धश्च दर्शितः ।
६. ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म इत्यादिना ज्ञानस्य ब्रह्मणश्च सम्बन्धः पुनर्निरूपितः, पुनः सिद्धान्तः प्रत्यपादि- तस्माद् ब्रह्म जिज्ञसितव्यमिति निष्कर्षः । ततश्च ब्रह्मस्वरूपनिर्णये ब्रह्मस्थितौ वादोपवादाः सङ्गृहीताः, अनेन प्रकारेण शाङ्करभाष्येऽर्थप्रतिपादनम्, तात्पर्यार्थकथनम्, पूर्वापरसम्बन्धनिर्धारणम्,सारनिरूपणम्, तात्पर्यार्थावबोधनमित्यादीनि धर्माणि प्राप्यन्ते ।[१५५]

---

७३. रहसविहारीद्विवेदी, ‘व्याख्यानपद्धतिः’ *सारस्वतीसुषमा* (वर्ष-५१,अङ्क १-४), वाराणसी : सं.सं.वि.(२०३२), पृ.७८ ।

एतादृशं व्याख्यानं साहित्यव्याकरणसम्बद्ध-व्याख्यानतः किञ्चिद् भिन्नं प्रतीयते ।

### ३.११.५ काव्येषु प्रचलितं व्याख्यानम्

साहित्यिकव्याख्याने समासव्यासविधी प्रचलितौ दृश्येते । विषयस्य सङ्क्षेपीकरणेन भावप्रकाशनं विश्लेषणं वा समासव्याख्यानस्य लक्षणम् । यदि विषयवस्तूनि विस्तार्य व्याख्यायन्ते तर्हि तद् व्यासविधिपरकं व्याख्यानं भवति । निरुक्तीये द्वितीयाध्यायस्थे तृतीयाध्यायस्थे च व्याख्याने महामुनिना यास्केन समासविधिरङ्गीकृतः, चतुर्थाध्यायतो द्वादशाध्यायपर्यन्तं तु प्रायेण व्यासविधिरङ्गीकृतोऽभ्युपेयते । काव्येषु शास्त्रीयसूत्रव्याख्यानेषु च पूर्वोक्तयोर्द्वयोरेव सरण्योरूपयोगः प्राप्यते ।

### ३.१२ व्याख्यानपदस्य लोकव्यवहारे प्रयोगः

काव्यशास्त्रे, व्याकरणे, भाषावाङ्मय इव नैकेषु प्रयोजनेषु लोकोऽपि व्याख्यापदं प्रयुङ्क्ते । तत्रापि व्याख्यापदस्य विशदीकरणमर्थस्फोरणं सन्देहनिवारणमर्थापनं जटिलतादूरीकरणमित्यादयोऽर्थाः प्रकल्प्यन्ते । सामाजिकव्यवहारे समागताया जटिलतायाः व्याख्यानद्वारा ज्ञाते सति मानसिकतुष्टिर्लभ्यते, अतो व्याख्यानं न केवलं भावादिबोधकमेवापि तु मानसिकतुष्टिप्रदायकमित्यपि तेषां निष्कर्षस्तत्र मनोवैज्ञानिका अपि सहमता दृश्यन्ते । 'पक्वमाम्रफलं वृक्षतः पतती'ति वाक्ये आम्रफलं कथं पततीति संशये समुत्पन्ने पृथिव्या आकर्षणशक्तिप्रभावेण पततीति कथनं तस्य व्याख्यानम् । यद्यपि व्याख्या बुद्धिबलापेक्ष्या इति लोकोक्त्या बोद्धुर्विद्याबुद्धिबोधशक्त्यादीनां प्रभावतो व्याख्येयं नैकेषु प्रकारेषु विभज्यते तथापि मुख्यतो वैज्ञानिक-प्रचलितभेदेन द्विधा विभागः कृतोऽभ्युपेयते ।

### ३.१२.१ वैज्ञानिकं प्रचलितञ्च व्याख्यानम्

वर्षर्तौ कथमधिकं जलं वर्षति ? ग्रीष्मर्तौ तु न ? इति प्रश्ने ग्रीष्मकालिकेन प्रचण्डतापेनाकाशं प्राप्य बहुसञ्चितो जलकणः क्रमशः शीते प्रबर्द्धिते पृथिव्यां वर्षतीति कथिते सामान्यजनानां शङ्का दूरीभवति परं वैज्ञानिका एतावता न तुष्यन्ति । तेषां परितोषाय वैज्ञानिकं व्याख्यानमावश्यकम् भवति ।[१५६] वैज्ञानिकास्तु जलवर्षणे जलस्य वाष्पीकरणम्,तस्योर्ध्वगमनम्, वर्षारूपेण परिवर्तनम् ततो वर्षणञ्चेत्यादीनि कारणानि व्याख्यानमपेक्षन्ते, एतदेव वैज्ञानिकं व्याख्यानम् । सामान्यजनैरपेक्षितं व्याख्यानं

---

७४. अशोककुमारवर्मा, *सरल आगमन तर्कशास्त्र,* दिल्ली : मोतीलालब., (१९७३),पृ.१७८ ।

सामान्यलक्षणतः क्रियते चेद् वैज्ञानिकव्याख्यानन्तु वस्तुतथ्योद्घाटनेन विधीयते । सामान्यव्याख्या अप्राकृतिकीं रूढधारणां गृहीत्वा क्रियते, यथा- ग्रामीणा रोगादिप्रकोपपीडायामेतत् सर्वं दैवभूतादीनां प्रकोपमिति व्याख्यान्ति परं वैज्ञानिकास्तु तत्र कीटाणुसङ्क्रमणेन रोगा जायन्त इति उल्लिखन्ति । वैज्ञानिकाः पृथ्वी सूर्यं कथं परिक्रमते ? रात्रिदिवसयोः परिवर्तनं कथं भवतीत्यादीनां जिज्ञासानां समाधानं वैज्ञानिकविधिना कुर्वन्ति । प्रचलितं व्याख्यानन्तु प्रायेण संवेगप्रधानम्, भावनामयम्, कल्पनाप्रसूतमन्तरदृष्टिप्रधानञ्च भवति, अतः प्रचलितवैज्ञानिकव्याख्यानयोर्भेदः स्पष्टतया परिलक्ष्यते ।

### ३.१२.२ सामाजिकव्याख्यानानि

प्रतिपादयितव्ये यस्मिन् कस्मिन्नपि विषये, नियमे, सिद्धान्ते वा मूलधारणायाः विशदीकरणाय दुर्बलत्वदूरीकरणाय च व्याख्यानमावश्यकं भवति । कस्या अपि घटनाया अवबोधनाय तत्रत्यजटिलत्वस्फोरणाय च व्याख्यानमपरिहार्यमनुभूयते, परं नैरन्तर्येण दृष्टेषु विषयेषु तथानुभूतनियमादिषु तु व्याख्यानमनावश्यकमिति सर्वैरनुभूतमेव । विडालः कीदृशः ? तस्य कति पादाः ? स किदृगाकारवान् ? इत्यादिषु विषयेषु व्याख्यानं नापेक्षितं भवति, परं वने नवीनवन्यजन्तुदर्शने स कः ? कीदृशः ? कुत्र वसतीत्यादिव्याख्यानमावश्यकं भवत्येव । जगति व्याख्येया विषया अनके सन्ति, मनुष्याणां क्षमताश्च विभिन्ना भवन्ति, तस्माद् विषयभेदेन, प्राणिभेदेन, प्रसङ्गभेदेन च व्याख्यानसामग्रीणां वैविध्यमपि स्वाभाविकमेव । एतादृशाः सामाजिकव्याख्यानभेदाः-विश्लेषणम्,युक्तिशृङ्खला,बृहत्तरनियमाधीनता चेति त्रिधा विभज्यन्ते ।[१५७]

### ३.१२.२.१ विश्लेषणम्

कमपि जटिलविषयमुदाहरणादिभिः स्पष्टीकृत्यानेकेषु प्रकारेषु विभज्यैकेन सिद्धान्तमुखेन विशदीकरणं विश्लेषणम् । जटिलस्य विषयस्य विश्लेषणीकरणं स्पष्टीकरणमेव वा विश्लेषणमिति प्रामाणिका वदन्ति,[१५८] यथा- प्रथमं पयोधराणां सङ्घर्षः,ततः प्रकाशदर्शनम्,तदनन्तरमेव शब्दः, अत्र त्रीण्युपकरणानि । प्रथमं मेघसङ्घर्षणेन विद्युदुत्पादनम्,

---

७५. अशोककुमारवर्मा, पूर्ववत्, (१९७३), पृ.१८२ ।
७६. बालकृष्णपोखेलादयः, *नेपाली बृहत्शब्दकोश,* काठमाडौं : ने.रा.प्र.प्र.,(२०५२) पृ.१२३४ ।

द्वितीयं तदवस्थाया दूरतः प्रतीतिः, तृतीयं शब्दश्रवणम्, एतदवस्थात्रयमेव दूरस्था जनाः पयोधरो गर्जतीति विश्लेषयन्ति । [१५९]

### ३.१२.२.२ युक्तिशृङ्खला

कयोरपि द्वयोः घटनयोरन्योन्याश्रयसम्बन्धस्थापनं युक्तिशृङ्खला ।[१६०] यदा कदा दीर्घकालिकेऽन्तराले भिन्नभिन्नेषु स्थानेषु घटितानां घटनानां सत्स्वनेकेषु सम्बन्धेष्वपि तेषां परस्परसम्बन्धपरीक्षणाभावेन तद्रहस्यं गर्भस्थमेव भवति, यथा- कनामके स्थाने सञ्जातविस्फोटस्य रहस्येऽपरिज्ञाते किञ्चित्समयान्तराले खनामके स्थाने जातं विस्फोटनं पुनरनुसन्धीयते । तत्र प्राप्तवस्तुप्रमाणादिभिस्तेषां प्रथमेन सह दृष्ट्या समानप्रकृत्या उपकरणैश्च द्वयोर्घटनयोरायोजक एक एवेति निश्चीयते । एतादृशीभिर्युक्तिशृङ्खलाभिरपि व्याख्यानं पूर्णतामेतीति ज्ञायते ।

### ३.१२.२.३ बृहत्तरनियमाधीनता

विशेषनियमस्यास्पष्टतायां गभीरतायां वा तत्सम्बद्धेन सामान्यनियमेन स्पष्टप्रतिपत्ति-र्बृहत्तरनियमाधीनता ।[१६१] 'प्रकृतिः सकलप्राणिनो गतिशीलान् कुरूते' इति वाक्यतोऽर्थबोधने काठिन्येऽनुभूते सति शीतप्रदेशोत्पन्नानां चमर्यादीनां दीर्घकेशशालिनत्वम्, मण्डूकानां मृण्मयत्वञ्च दृष्ट्वा प्रकृती रक्षतीति व्याख्याय सामान्यनियमतो विशेषनियमः स्पष्टीक्रियते, अतो बृहत्तरनियमाधीनताऽपि व्याख्यानाङ्गं मन्यते ।

### ३.१२.३ व्याख्यायाः सीमानः

अस्पष्टो विषयो व्याख्याद्वारा स्पष्टीक्रियते, अतः सरले विषये व्याख्यानमनावश्यकं मन्यते । रामरावणयोः कौरवपाण्डवयोर्वा युद्धं कीदृशमासीदिति प्रश्ने तयोस्तुलनमसम्भवमत एतादृशा अतुलनीया विषया व्याख्यातुं न शक्यन्ते, तेन साहित्ये प्रचलितमस्ति

गगनं गगनाकारं सागरः सागरोपमः ।

---

७७. अशोककुमारवर्मा, *सरल आगमन तर्कशास्त्र,* पूर्ववत्, (१९७३) पृ.१७८ ।
७८. अशोककुमारवर्मा, *सरल आगमन तर्कशास्त्र,* पूर्ववत्, (१९७३) पृ.१८२ ।
७९. पूर्ववत् ।

रामरावणयोर्युद्धं रामरावणयोरिव ॥[१६२]

तेनैव प्रकारेण मनसो मौलिकी दशा गन्धस्पर्शाद्याः, वस्तूनां विस्तारगत्यादयो गुणाः तेषामनन्तरूपाणि च न व्याख्येयविषयाः ।[१६३] यद्यपि सकलकार्याणि कारणाधीनानि तथापि समेषां कारणानामन्वेषणं व्याख्यानञ्चासम्भवमिति तेषां व्याख्यानं न क्रियते किन्तु प्रमुखाणि कारणान्येवान्विष्यन्त इति गौणानामपर्यालोचनं व्याख्यानसीमा ।

### ३.१२.४ व्याख्यानदोषाः

प्रायशो जनाः किमपि लक्ष्यं पूरयितुं विषयं व्याख्यान्ति । जनैः कृतासु तादृशव्याख्यासु व्याख्यानतत्त्वानि प्रायो न भवन्ति अतो विषयस्यास्पष्टत्वेन, त्रुटिपूर्णबोधेन च भ्रम उत्पद्यते अतो व्याख्यातार एनं व्याख्यानदोषमामनन्ति । तादृशदोषा मूलतः पञ्चविधा [१६४] दृश्यन्ते-

### ३.१२.४.१ विषयस्याप्रतिपत्तिः

कतिपये व्याख्यातारो वैषयिकसूक्ष्मज्ञानाभावेनान्यैः कारणैर्वा विषयविस्तरणमकृत्वैव तस्य कारणमनुक्त्वैव वा पर्यायवाचिभिश्शब्दैः शब्दान्तरैर्वा तं ब'बोधयितुं प्रयतन्ते । एतादृशेन व्याख्यानेन प्रस्तुतविषयस्य प्रतिपत्तिर्न सम्भवति, अत एष व्याख्यानदोषो मन्यते ।

### ३.१२.४.२ भ्रमपूर्णं सामान्यीकरणम्

'सरलो विषयो न व्याख्येयः' इति सिद्धान्ते विद्यमाने सत्यपि कतिपये विषया व्याख्यानं विना न स्पष्टीभवन्ति, परं तत्रापि भ्रमपूर्णं सामान्यीकरणं कृत्वा न व्याख्यायते, यथा- 'पृथ्वी सूर्यं किमर्थं परिक्रमते' इति प्रश्ने सामान्यजनाः-'पृथिव्या स्वभावोऽयम्' इति भ्रमपूर्णं सामान्यीकरणं कृत्वा उत्तरयन्ति, एतादृशव्याख्यानेन विषयो न प्रतिपद्यते, अतोऽयं व्याख्यानदोषः ।

### ३.१२.४.३ सर्वोच्चनियमोऽव्याख्येयः

प्रकृतिद्वारा निर्धारितः सर्वोच्चनियमो न व्याख्याय्यते, अपि तु वर्ण्यत एव, यदि कोऽपि तं व्याख्यानार्थं चेष्टते चेत् तद् दोषाय भवति, यथा- गुरुत्वाकर्षणनियमः । प्रकृतिनिर्धारितं नियममिमं पक्षविपक्षाभ्यां वर्णयितुं शक्यते तथापि कोऽपि व्याख्यानार्थं प्रयतते चेत्तद्

८०. जयदेवः, *चन्द्रालोकः*, वाराणसी : चौखम्बासुरभारतीप्रकाशनम्,(१९९९) पृ.८२ ।
८१. अशोककुमारवर्मा, पूर्ववत्, (१९७३),पृ.१८३ ।
८२. अशोककुमारवर्मा, पूर्ववत्, (१९७३), पृ.१८३ ।

दोषावहमेव भवति व्याख्यानासम्भवात्, अत एतादृशो दोषोऽपि व्याख्यानदोष एव ।[१६५] एवमेव पृथिवी कथं समुत्पन्नेति प्रश्ने मयनामकदानवस्यास्थिमज्जाभिर्निर्मितेति धार्मिकैर्व्याख्यायते । तद् व्याख्यानमपि वैज्ञानिकदृष्ट्या दोषावहमेव मन्यते, अतो व्याख्याने व्याख्यानतत्त्वानुसरणं तत्परिशीलनञ्चावश्यकम् भवति ।

## ३.१३ आङ्ग्लसाहित्ये व्याख्यानम्

आङ्ग्लसाहित्ये व्याख्यानपदे प्रयोक्तव्ये एक्स्प्लानेसन (explanation) पदं प्रयुज्यते । परन्तु तस्य साहित्यिकपरम्परा न दृश्यते । तत्र तु साहित्यिकव्याख्याने इन्टरप्रिटेशन (interpretation) प्याराफ्रेज (paraphrase) पदं प्रयुज्यते, अत्र तयोर्द्वयोः सङ्क्षिप्तपरिचयः प्रस्तूयते ।

### ३.१३.१ आशयप्रकाशनम् (interpretation)

पदमिदमाख्यानसम्बद्धायास्तदितररचनायाश्च मूलभावविश्लेषणार्थं प्रयुज्यते । संस्कृतसाहित्ये विग्रहसमासादिभिः पदस्फोरणम्, पर्यायादिभिरर्थापनम्, तात्त्विकार्थविशदीकरणं मूल्याङ्कनं च विधाय व्याख्यानं विधीयते, परमाङ्ग्लभाषासाहित्ये तादृशी परम्परा नैव प्राप्यते । तत्र तु वाक्यस्यानुच्छेदस्य वा समग्रभाव आशयो वा विव्रियते, अतस्तत्राप्रत्यक्षरूपेण वाक्यादीनामाशयस्य भावस्य विचारस्य वा प्रकटीकरण-(interpretation) मेव क्रियते ।[१६६] तेषां विचारे कथांशेऽन्तर्गर्भितस्य कथनस्य प्रकाशनमेव व्याख्यानम् । आङ्ग्लपरम्परायां साहित्यिककृतिभिः सहान्तर्क्रियाकरणे चतस्रः प्रक्रियाः सन्ति- प्रथमतः शाब्दिकबोधः, ततो विश्लेषणम्, तदनन्तरं समालोचनमन्ते स्वीयत्वेन ख्यापनञ्चेति । तेषु प्रथमचरणे साहित्यिकांशस्य शाब्दिकार्थावबोधनं भवति । द्वितीयचरणे मूलांशस्य भावो विव्रियते । तृतीयचरणे तत्रोक्तविचारोपरि समालोचनपद्धतिद्वारा विश्लेषणं विधीयते । ततोऽन्ते आत्मसात्क्रियते । तत्र साहित्यिकरचनासम्बद्धान् विषयान् भिन्नपरिस्थितिषु पृथग् रीत्या सिद्धान्तैर्वा व्याख्यातुं शक्यते न वेति विचार्यते, एवमेवानुच्छेदादीनामालङ्कारिकार्थ-प्रकाशनमपि interpretation भवतीति तज्ज्ञाः प्राहुः[१६७] अत एव तदपि साहित्यिकव्याख्यानसन्निकटमस्तीति प्रतीयते ।

---

८३. पूर्ववत्, पृ.१८४ ।
८४. मोतीनिशानी तथान्ये, *फ्ल्याक्स गोल्डेन टेल्स* काठमाडौं : एकताबुक्स, (इ.२०१३) पृ.२१ ।
८५. पूर्ववत् ।

### ३.१३.२ शब्दान्तरैर्व्याख्या (paraphrase)

यत् किमपि वाक्यमनुच्छेदादिकं वाऽवान्तरसरल-समानार्थकविकारीपदैः पुनर्लेखनं प्याराफ्रेजः इति निगद्यते, यथा 'वयं संस्कृतानुसन्धानकेन्द्रस्यान्तेवासिनः' इति वाक्यस्थे जटिलेऽन्तेवासिन इति पदेऽपरं 'छात्रः' इति सरलं पदं प्रयुज्याथवा समग्रे वाक्य एव पर्यायान् प्रयुज्य वाक्यनिर्माणं प्याराफ्रेज इत्युच्यते । अस्यां प्याराफ्रेजोपकल्पितायां व्याख्यानशैल्यां न केवलं पदवाक्यादिकमेवापि तु सङ्कथनमहावाक्यादिकमपि पुनः कथयितुमपि शक्यते । आङ्ग्लसाहित्येऽस्य प्रयोगः साहित्यिकगुणैर्विशिष्टीभूतानां जलिटसंरचनाभिर्ग्रथितानाञ्च वाक्यादीनां भावसारल्यार्थं कृतो दृश्यते । प्याराफ्रेजीये व्याख्याने मूलपाठे स्थितानां शब्दानां सरलशब्दप्रयोगैर्भावग्रहणं विधीयते । अनेन प्रकारेण भावं प्रकाशयता द्व उद्देश्ये पूर्येते- प्रथमं शब्दान्तरेण स्वकीयशैल्या च मूलभावप्रकटीकरणसामर्थ्यमुपलभ्यते, द्वितीयं बौद्धिकस्तेयत्वारोपण (plagiarism) द्वारा मुक्तिः ।[१६८] प्याराफ्रेजशब्दं परिभाषयन् पिटर एस. गार्डनर्महोदयो लिखति- "एषः सारांशतुल्यः प्रतीयते, परन्तु सारांशो मूलपाठतो न्यूनाकारको भवति, प्याराफ्रेजस्तु प्रायः समान एव । अतो यदा कदा एनं पुनः प्रकथनमपि निगद्यते । अस्मिन् व्यख्याने मूलपाठस्थं विषयं यथावत् संस्थाप्य शब्दान्तरैर्भावसरलीकरणं क्रियते, अतः प्याराफ्रेजः शोधप्रबन्धस्य महफ्वपूर्णं स्रोतो भवितुं शक्नोति ।[१६९] यद्यपि प्याराफ्रेजः पद-वाक्यानुच्छेदादीनां जटिलतापहारकम्, संशयच्छेदकम्, समानसंरचनायां प्रकथनञ्चास्ति तथापि संस्कृतव्याख्यानतः किञ्चित् पृथगाकारकं दृश्यते । संस्कृतव्याख्याने मूलपाठतः शब्दा प्रबर्ध्यन्ते, तत्र शब्दप्रबर्धनस्य नास्ति कापि सीमा परं प्याराफ्रेजाख्ये प्रकथने समानभाव आशयः प्रकाश्यतेऽतो विषयस्यार्थापने सरलरीत्या भावप्रकाशने च द्वयोरपि सामान्यं नैकट्यं प्राप्यते ।

### ३.१४ स्कीथमहोदयस्य निर्वचनसिद्धान्तः

आङ्ग्लभाषापरम्परायां स्कीथ-(skeath) महोदयेन शब्दनिर्वचनकोशः प्रत्यपादि । तेन कोशनिर्माणक्रमे दशसूत्रेषु तादृशः सिद्धान्तः प्रत्यपादि । तस्य सिद्धान्तोऽत्र सङ्क्षेपेण प्रस्तूयते ।

---

८६. विलियम आर. स्मोल्सरः, *राइट टु वि रिड (द्वि.सं.), दिल्ली : क्याम्ब्रिज युनि. प्रेस* (२०१४), *पृ. १७ ।*
८७. पिटर एस. गार्डनर, *न्यु डिरेक्सन* (द्वि.सं.) *दिल्ली : क्याम्ब्रिज युनि. प्रेस,* (२०१०) *पृ. १८ ।*

१. शब्दस्य प्रथमं रूपं किमिति विचार्यम्, तस्य प्रयोगश्च कस्मिन्नर्थे सन्दर्भे वा भवतीत्यप्यवधेयम् ।

२. शब्दनिर्वचने तस्येतिहासः, तत्समीपवर्ति भूक्षेत्रमपि परीक्षणीयम्, यतो हि केचन शब्दा अनुषङ्गतो भिन्नभाषिकपरिवारादपि समागन्तुं शक्नुवन्ति ।

३. निर्वचनक्रमे शब्दस्य ध्वनिनियमः, स्वरव्यञ्जननियमश्च सम्यगवलोकनीयः ।

४. निर्वचनप्रसङ्गे शब्दस्य सकलांशसमन्वयिनी व्युत्पत्तिरावश्यकी ।

५. परस्पराऽसम्बद्धभाषासु रूपगतसाम्ये दृष्टेऽपि ततः समागतोऽयं शब्द इति झटिति न वक्तव्यम् ।

६. अनुकृतानुकार्यभाषयोर्बहुत्र शब्दार्थसाम्ये सत्येव एकस्मादपरोऽनुकृतेति निर्णेतव्यः । [१७०]

स्कीथमहोदयेन निर्धारिता व्याख्यानप्रक्रिया मूलतो निरुक्ताश्रयिणी वर्तत इति उपर्युक्तैः कथनैर्ज्ञायते ।

## ३.१५ पारम्परिकसमालोचने तत्त्वार्थे पद्धत्यादीनां प्रयोगः

संस्कृतव्याख्यानपरम्परायां कुत्रचिद् व्याख्यानलक्षणशब्देन कतिपयेषु स्थानेषु व्याख्यानपद्धतिशब्देनापि व्याख्यानतत्त्वानि समुल्लिखितानि प्राप्यन्ते । निरुक्तीये द्वितीयाध्यायारम्भे समालोचकः (पारम्परिकभाषायां भाष्यकारः) दुर्गाचार्यो व्याख्यानलक्षण-तस्तदन्तर्गतानि तत्त्वपर्यायादीन्यष्टौ तत्त्वानि विवेचितवानिति निरुक्तीयव्याख्यानमिति शीर्षके पूर्वमेवाम्नातम् । पौरस्त्यसमालोचनेषु यत् किमपि प्रयुक्तं स्यादत्राधुनिकसरणिमनुसृत्य व्याख्यानशरीरेऽवयवत्वेन स्थितानि तत्त्वानि क्रमश उल्लिख्यन्ते । पुनश्च वैदिक-नैरुक्त-दर्शनोक्त-काव्यशास्त्रीयोणादीय-वाङ्मयप्रसिद्ध (आधारभूत) शब्दशास्त्रीय-व्याख्यानतत्त्वानि समुल्लिख्य विव्रियन्ते ।

### ३.१५.१ विधिशब्दस्यार्थः

विधानं विधिरिति विग्रहात् कार्यविधामनुष्ठानमभ्यासः कृत्यं, कार्यं, कर्म वा विधिरिति तस्य शाब्दिकोऽर्थः । एतादृशं शाब्दिकं प्रयोगं कृत्वैव भर्तृहरिरेकत्र लिखति

---

८८.उमाशङ्करः, *निरुक्तम्,* पूर्ववत्, (२०२७) पृ.भू.११० ।

"ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्येति [१७१] परं शिक्षणानुसन्धानक्षेत्रे विधिशब्दोऽयं प्रक्रियात्वेन प्रविधित्वेन पद्धतेः सर्वाङ्गवाचकत्वेन वा प्रयुज्यते । मोहनराजशर्मा तु शोधविधिनामके पुस्तके विधिशब्दं पद्धतेः पर्यायत्वेन प्रयुङ्क्ते । तत्राऽसौ विधिं शोधानुसन्धानप्रक्रियात्वेन, प्रविधित्वेन च परिचाययति, यथा "शोधानुसन्धानं विधिपूर्वकं करणीयं गभीरकार्यमस्ति..." [१७२] अतः सामान्यतः शिक्षणक्षेत्रेऽनुसन्धाने च शब्दोऽयं प्रक्रियात्वेन रीतित्वेन च प्रयुज्यते ।

## ३.१५.२ पद्धतिशब्दस्यार्थः

पद्धतिरियम् पादाभ्यां हतिरिति विग्रहात् 'कर्तृकरणे कृता बहुलम्' (पा.सू.२-१-३२)इति सूत्रेण तृतीयातत्पुरुषसमासेन 'हिमकाषिहतिषु च' (का.वा.'बह्वादिभ्यश्च' पा.सू.४-१-४५ इति सूत्रे) इति पद्भावेन स्त्रीत्वविवक्षायां 'बह्वादिभ्यश्च' (पा.सू.४-१-४५) इति वा ङीष्विधानेन च सिद्धयति । ङीषोऽभावपक्षे तु पद्धतिरेव ।[१७३] अमरकोशकारः पद्धतिं मार्गत्वेन एवं परिचाययति- अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिः, सरणिः पद्धतिः पद्या वर्तन्येकपदीति च । [१७४] अनेन प्रकारेण शैलीत्वेन वा मार्गरूपेण, सरणिरूपेण वा सामान्यतः प्रयुक्तोऽयं पद्धतिशब्दोऽनुसन्धाने शिक्षणे च शिक्षणप्रक्रियात्वेन नैकासां प्रक्रियाणां संवाहकत्वेन वा प्रयुज्यते । शिक्षणक्षेत्रे विशेषतो विध्यपेक्षया व्यापकाधारयुतत्वेन सैद्धान्तिकाधारदृढतरत्वेन वा शब्दोऽयमुपयुज्यते । प्रसङ्गतोऽत्र तत्सन्निकटवर्तिनं विधिशब्दमपि शिक्षाशास्त्रीयसिद्धान्तमुखेन व्याख्याय विधिपद्धत्योर्मध्ये कोऽस्ति भेद इति पर्यालोच्यते ।

## ३.१५.३ विधिपद्धत्योर्भेदः

विधिपद्धत्योर्मध्ये कोऽस्ति भेद इत्यत्र शिक्षाशास्त्रिणां पाश्चात्त्यविदुषां मतमतान्तराणि निर्मथ्य तयोः पार्थक्यं प्रदर्शयन्ति । 'नेपाली भाषा तथा साहित्यशिक्षणम्' नामके पुस्तके प्राध्यापकः केदारप्रसादशर्मा एतयोर्भेदमेवं समुल्लिखति- "भाषाशिक्षणसन्दर्भे भाषावैज्ञानिक-मनोवैज्ञानिक-शैक्षिकसिद्धान्तपृष्ठभूमिषु स्थापिता शिक्षणप्रक्रिया पद्धतिरस्ति चेत् तदपेक्षया न्यूनाधारयुता शिक्षण प्रक्रिया तु विधिरस्ति । [१७५] एतया परिभाषया एकस्यां पद्धतौ अनेके

---

८९. वामनशिवराम आप्टे, पूर्ववत् (१९९३), पृ. ९३७ ।
९०. मोहनराजशर्मा, *शोधविधि,* काठमाडौं : साझाप्र.,(२०५२) पृ. भू. ।
९१. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (प्रथमभागः), वाराणसी : चौ.सु.भा. प्र., (१९९६) पृ. ६५२ ।
९२. अमरसिंहः, *नामलिङ्गानुशासनं नामामरकोशः,* दिल्ली : चौ. सं. प्रति., (१९९७) पृ. ११४ ।
९३. केदारप्रसादशर्मा, *नेपाली भाषा र साहित्यशिक्षण,* काठमाडौं : न्यू हिरा बुक्स, (२०६०) पृ. ४५ ।

विधयो भवितुं शक्नुवन्तीति वक्तव्यं भवति । शर्ममहोदयः स्ववचनं द्रढयितुममेरिकादेशीयं प्रायोगिकभाषावैज्ञानिकं 'एडवार्ड एन्थोनी' महोदयमेवं समुद्धरते -"पद्धतिरियं सम्बद्धमान्यतानां समूहोऽस्ति, या च भाषाप्रशिक्षणशिक्षणस्वभावं च विवृणोति परं पद्धतिस्तु स्वयंसिद्धा भवति या शिक्षणीयविषयवस्तूनां प्रकृतिं वर्णयति । विधिस्तु भाषासामग्रीणां क्रमबद्धप्रस्तुतीकरणे समष्टिगतयोजना एव । अत्रत्येषु अंशेषु विविधता न दृश्यते । तादृशा अंशाः पद्धतिमन्तर्भवन्ति, तथैव पद्धतिः स्वयंसिद्धा भवति चेद् विधिस्तु प्रक्रियात्मक एव । एकस्यां पद्धतौ अनेके विधयोऽन्तर्भवितुं शक्नुवन्ति ।[१७६] प्रविधिस्तु कक्षायां निहितो दृश्यते । स कक्षाप्रकोष्ठे सञ्चालितप्रक्रिया-विश्लेषण-सम्बद्धो भवति । प्रविधिरयं व्यावहारिकप्रक्रिया सम्बद्धत्वेन मूलतः पद्धतिविधिभ्यां निर्दिष्टां प्रक्रियां प्रयोगदिशां च प्रयुङ्क्ते । अनेन प्रकारेण विधिपद्धत्योः सामान्यव्यापकयोरिति सैद्धान्तिकाधारभिन्नत्वेन पार्थक्येन विद्यमानयोरपि कतिपये लेखकाः पर्यायत्वेन शब्दद्वयं प्रयुञ्जते, यद्यपि राजशेखरेण काव्यमीमांसायां- 'सूत्रविवेचनं पद्धतिः'[१७७] इत्युक्त्वा सूत्रविश्लेषणशैली पद्धतिरिति निदर्शिता, तथापि सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः प्रकाशितायां सारस्वतीसुषमापत्रिकायां रहसविहारी-द्विवेदीमहोदयेन 'व्याख्यानपद्धतिः'[१७८] शीर्षकद्वारा व्याख्यातत्त्वानि व्याख्यातानि सन्ति । तस्याः पत्रिकाया एव (वर्ष : ३० अङ्क ३-४,वि.सं.२०३२) शशिदेवविरचिते 'व्याख्यानप्रक्रिया' शीर्षकीभूते आलेखे तु प्रक्रियाशब्दतस्तत्त्वानि व्याख्यातानि सन्ति । शशिदेव एव तत्रापि 'व्याख्यानहेतवः' इत्युपशीर्षकतः अर्थ-प्रकरण-लिङ्गान्यशब्दसन्निधि-संयोग-विप्रयोग-साहचर्यविरोधादीनि व्याख्यानतत्त्वानि समुपदिशति, अतः संस्कृतपरम्परायां व्याख्यानतत्त्वबोधनाय कः शब्दः प्रयोक्तव्य इत्यत्र नास्ति निर्धारणम् । एकस्यामेव 'सारस्वती सुषमा' पत्रिकायामपि रहसविहारीद्विवेदी पद्धतिशब्दतः, शशिदेवस्तु प्रक्रियाशब्देन तत् सङ्केतयति । शशिदेवस्तु एकस्मिन्नेव लेखेऽपि स्थानान्तरे व्याख्यानहेतुशब्दमपि प्रयुङ्क्ते । पद्धतिशब्दोऽपि कदाचित् शैलीत्वेन कदाचित्तु तत्त्वरूपेण प्रयुक्तः प्राप्यते । राजशेखरः सूत्रविवेचनं पद्धतिरिति लक्षणे सूत्रव्याख्यानशैलीं सङ्केतयति, तथैवाधुनिकशिक्षाशास्त्रिणोऽपि पद्धतिशब्दतः शैलीमेव सूचयन्ति अतः पद्धतिरियं बहुत्र शैलीख्यापने प्रसिद्धेति बोद्धव्यम्, तदपेक्षया व्याख्यानहेतु-प्रक्रियाशब्दौ तत्त्वसन्निकटौ मन्येते, अतोऽत्र पद्धतिं शैलीसन्निकटवर्तिनं प्रक्रियां हेतुं तु तत्त्वसन्निकटं मत्वा व्याख्यायते । तथैव प्रक्रिया अपि तत्त्वसन्निकटवर्त्तिनी मन्यते । संस्कृतव्याख्यानपरम्परायां प्रायः तत्त्वनिर्धारणं

---

९४. केदारप्रसादशर्मा, *पूर्ववत्,* (२०६०) पृ. ४५ ।
९५. राजशेखरः, *काव्यमीमांसा* , वाराणसी : चौखम्बाविद्याभवनम्,(१९६२) पृ. १० ।
९६. रहसविहारीद्विवेदी, 'व्याख्यानपद्धतिः' *सारस्वतीसुषमा* पूर्ववत्, (२०३२) पृ.५४६ ।

तदनुरूपव्याख्यानञ्च न विधीयत अस्मात् तद्विषये विशदं व्याख्यानं न भवेदित्यवमन्तव्यम् । अथवा स्थान-काल-प्रसङ्गादिभेदैरेकस्मात् शब्दादपि नैके अर्था अभिव्यङ्ग्या भवन्तीति बोद्धव्यम् ।

## ३.१६ व्याख्यानतत्त्वानि

सङ्घटकावयवस्तत्त्वम्, यथा हस्तपादादीन्यङ्गानि शरीरसङ्घटकावयवास्तथैव शब्दशास्त्रीये व्याख्याने स्थिता अधिकारानुवृत्तिविग्रहादयोऽपि व्याख्यानशरीतत्त्वानि । तानि रचनाविधानरूपेण, सङ्घटकावयवत्वेनोपकरणशब्देन च शब्दशास्त्रे व्यवह्रियन्ते । तान्यत्र समुल्लिख्य व्याख्यायन्ते ।

प्रस्तुतशीर्षके वैदिककालतोऽद्यावधि प्रचलितानि वैदिकव्याख्यानतत्त्वानि, निरुक्तीयव्याख्यानतत्त्वानि, उणादीयशब्दनिर्वचनतत्त्वानि, दर्शनोक्तव्याख्यानतत्त्वानि, काव्यशास्त्रीयव्याख्यानतत्त्वानि, आधारभूतव्याख्यानतत्त्वानि तथा शब्दशास्त्रीयव्याख्यानतत्त्वानि च सङ्क्षेपतः प्रस्तुत्योदाहरणेषु सङ्गमः क्रियते ।

### ३.१६.१ वैदिकव्याख्यानतत्त्वानि

शुक्लयजुर्वेदसंहितायाः सायणोवटमहीधरैर्व्याख्या कृता । तासु व्याख्यासु निहितानि समानानि विशिष्टानि च तत्त्वानि सङ्कलय्य व्याख्यात्रा उवटेन शुक्लयजुर्वेदारम्भे व्याख्याधर्मा इति शीर्षकेन व्याख्यानतत्त्वानि निर्धारितानि, तानि यथा -

अतिरिक्तं पदं त्याज्यं हीनं वाक्ये निवेशयेत् ।
विप्रकृष्टं तु संदध्यादानुपूर्व्यञ्च कल्पयेत् ॥
लिङ्गं धातुं विभक्तिञ्च योज्यवाक्यानुलोमतः ।
यद्यत् स्याच्छान्दसं वाक्ये कुर्यात्तत्तु लौकिकम् ॥ [९७]

अतो वैदिके व्याख्याने- अतिरिक्तपदत्यागः, पदानुवृत्तिः/हीननिवेशः, विप्रकृष्टसंयोजनम्, आनुपूर्विप्रकल्पनम्, लिङ्ग-धातु-विभक्तिसंयोजनम्,पदक्रममेलनादिकमित्यादीनि व्याख्यानतत्त्वानि स्वीकृतानीत्यवगम्यते ।

अतः परमेतेषां व्याख्यानतत्त्वानां वैदिकमन्त्रेषु प्रयोगपरीक्षणं विधीयते ।

---

९७. उवटः (व्या.), *शुक्लयजुर्वेदसंहिता,* दिल्ली : मोतीलालब. (१९७८) पृ.३ ।

### ३.१६.१.१ अतिरिक्तपदत्यागः

पादपूरणादिप्रयोजनेन वेदमन्त्रे प्रयुक्तमनावश्यकपदमेवातिरिक्तं पदम् । तादृशपदलोपो ह्यतिरिक्तपदत्यागः । वेदमन्त्रेष्वतिरिक्तेषु पदेषु सत्सु तानि लोपार्हाणि, यथा- 'इमानु कं भुवना सीषधामेश्चन्द्रः...' (शु.य.२५-४६) [१८०] "इमानि भुवनानि भूतजातानि वयं वशीकुर्मः, तत ऐश्वर्यवान् इन्द्रः विश्वेदेवादित्यमरुद्भिश्च सहास्मान् भेषजानि करोतु, तैर्भेषजैर्नीरोगं भूत्वा सपुत्रा वयं यज्ञं सम्यक् कुर्मः" [१८१] इत्यर्थयुतेऽस्मिन् प्रकृतमन्त्रे नु कमित्यनर्थकौ निपाताविति निर्धार्य महीधरो मन्त्रव्याख्यानं करोति, अतस्तादृशानर्थकनिपातत्यागः कृतो महीधरेणेति विज्ञायते।अत स व्याख्यानधर्मे वा व्याख्यातत्त्वे त्याज्यत्वेनाऽऽयाति ।

### ३.१६.१.२ हीननिवेशः

आवश्यकं पदं पूर्वमन्त्रैरानीय व्याख्यानं हीननिवेशः पदानुवृत्तिरिति वदन्ति विचक्षणाः । मन्त्रात्मके वाक्ये पदन्यूनतायां तदभावे चाऽर्थापनस्य काठिन्येऽनुभूते सूत्रेषु सूत्रान्तरादिव पूर्वमन्त्रात् तदनुवर्तनीयं भवति, यथा- 'अस्मादन्नादिति भागमवेक्षते..' ( शु.य.२-२५ दिवि विष्णुरिति मन्त्रस्योत्तरार्द्धः)[१८२] इति मन्त्रे 'अस्मादनिर्भक्तः...' (शु.य.२-२५) इत्यस्मात् तस्यैव मन्त्रस्य पूर्वार्द्धात् निर्भक्त इति पदं संयोज्य वाक्यपूरणमर्थापनञ्च कार्यम्,तच्च भाष्यकारो महीधर एवं कुरूते -"अस्मादन्नादिति भागमवेक्षत इति । योऽयं भागोऽवेक्ष्यते अस्मादन्नाद् यजमानभागनिर्भक्त इति वाक्यशेषोऽनुवर्तनीयः ।" [१८३] अनेन प्रकारेण हीनपदसन्निवेशेनार्थापनमपि व्याख्यानधर्मः ।

### ३.१६.१.३ विप्रकृष्टसंयोजनम्

मन्त्र उपसर्गेण सह योज्यं दूरे स्थितं पदं समीपमानीय संयोजनं विप्रकृष्टसंयोजनम्, तदपि व्याख्यानधर्मः, यथा-'सं रेवतिर्जगतिभिः पृच्यताम्...' (शु.य.१-२१, देवस्य त्वा सवितुरिति मन्त्रस्योत्तरार्द्धः) [१८४] इति मन्त्रे पृच्यतामिति क्रियापदतो दूरस्थं समित्युपसर्गं

---

९८. अज्ञातः, *शुक्लयजुर्वेदसंहिता,* दिल्ली : मोतीलालब.(१९७८) पृ.४७२ ।
९९. महीधरः, (व्या.) *शुक्लयजुर्वेदसंहिता,* पूर्ववत्, (१९७८) पृ.४७२ ।
१००. अज्ञातः, *शुक्लयजुर्वेदसंहिता,* दिल्ली : मोतीलालब. (१९७८) पृ.३३ ।
१०१. महीधरः (व्या.), (१९७८) *शुक्लयजुर्वेदसंहिता,* पूर्ववत्, पृ.४६५ ।
१०२. अज्ञातः, *शुक्लयजुर्वेदसंहिता,* दिल्ली : मोतीलालब. (१९७८)पृ. ४७२ ।

संयोज्य संपृच्यताम्  इति विधीयते । वेदे एतादृशविप्रकृष्टप्रयोगो यत्र तत्र प्राप्यते अतस्तेषां क्रमान्वयोऽपि व्याख्यानस्याङ्गभूतमिति विदन्ति वैदिका व्याख्यातारः ।

### ३.१६.१.४ आनुपूर्विप्रकल्पनम्

मन्त्रे द्वितीयतृतीयादिषु पादेषु स्थितं पदसमूहं प्रथमे संयोज्याथवा प्रथमपादसमूहं द्वितीयादिषु नीत्वा व्याख्यानं वाऽनुपूर्विकल्पनम्, यथा- 'मानो मित्रो वरुणो अर्यमायुः..' (शु.य.२५-२४) [१८५] इत्यत्र मन्त्रस्योत्तरवर्त्तिन पदात् 'यद् वाजिनो देवजातस्य' इति पदसमूहमानीय  "यज्ञे वाजिनो चरित्राणि यत् प्रवक्ष्यामस्तत्र मित्रादयो देवा अस्मान् न निन्दन्तु, यद्यप्यश्वानां स्तुतिरित्युक्त्वा गर्हा उचिता, तथाप्यश्वमाध्यमेन देवस्तुतिविहितत्वात्"[१८६] इत्यर्थः कृतः । तत्रत्यं द्वितीयं पदं प्रथमे आनीयार्थापितत्वादन्यत्रापि बहुत्रानुपूर्विप्रकल्पनात्तस्य व्याख्यानतत्त्वं स्वीकृतम् ।

### ३.१६.१.५ लिङ्ग-धातु-विभक्तिसंयोजनम्

लिङ्गधातुव्यत्ययस्थले तेषां संयोजनं लिङ्गधातुविभक्तिसंयोजनम् । लिङ्गं धातुं विभक्तिञ्च यथायथं सङ्गमयेदिति नियमतस्तदपि व्याख्यानतत्त्वं मन्यते, यथा- 'पवित्रेस्थो वैष्णव्यौ सवितुर्व...' (शु.य.१-१२) [१८७] इति मन्त्रे पवित्र इति नपुंसकीयप्रथमा-विभक्तेर्द्विवचनान्तरूपं तद्विशेष्यीभूतं वैष्णव्यौ इति तु पुँलिङ्गीयप्रथमद्विवचनान्तमतः विशेष्यविशेषणयोर्लिङ्गभेदः स्पष्टः, तत्र वैष्णव्ये इति कार्यमिति भाष्यकार उवट एवं सूचयति- "अत्र वैष्णव्ये इति प्राप्ते वैष्णव्याविति लिङ्गव्यत्ययः ।" [१८८] एवमेव धातुं धात्वर्थं सङ्गमयेदर्थात् कस्माद्धातो रूपमिदं निष्पन्नमिति सन्देहे श्रुतिद्वारा निर्णयः कार्यः, यथा- 'देवीरापो अग्रे गुवो अग्रेपुवोग्र...' (शु.य.१-१२ पवित्रेस्थ इति मन्त्रस्योत्तरार्द्धः) इत्यत्र पुव इति पिबतेः पवतेर्वा रूपमिति सन्देहे श्रुतिद्वारा 'ता यत् प्रथमा सोमस्य राज्ञा भक्षयन्ती'ति व्याख्यानेन तत् पिबतेरेवेति निर्णीयते ।[१८९]  तथैव विभक्तावपि यथायथं सङ्गमयेत्, यथा- 'कस्मै देवाय हविषा विधेम' (शु.य.२३-३, यः प्राणतो निमिषत... इति मन्त्रस्योत्तरार्द्धः)[१९०]

---

१०३. अज्ञातः,  पूर्ववत्, (१९७८) पृ.४७२ ।
१०४. महीधरः (व्या.), *शुक्लयजुर्वेदसंहिता,* दिल्ली : मोतीलालब. पृ. ४६५ ।
१०५. अज्ञातः, *शुक्लयजुर्वेदसंहिता,* दिल्ली : मोतीलालब. (१९७८) पृ. ११ ।
१०६. उवटः (व्या.), *शुक्लयजुर्वेदसंहिता,* दिल्ली : मोतीलालब., (१९७८) पृ. ११ ।
१०७. उवटः (व्या.), पूर्ववत्, (१९७८) पृ.३ ।
१०८. अज्ञातः, *शुक्लयजुर्वेदसंहिता,* दिल्ली : मोतीलालब. (१९७८) पृ.४३१ ।

इत्यत्र विभक्तिव्यत्ययीभूतं हविषेति तृतीयान्तं पदं दानकर्मार्थकधाधातुयोगे विभक्तिविपरिणामेन द्वितीयान्तं कुर्यादिति ।[१९१] अनेनैव प्रकारेण छान्दसवाक्ये स्थिता विभक्तिव्यत्यय-दूरान्वय-पदक्रमभङ्गादय दोषा व्याख्यानतो निराकरणीया इति वैदिकव्याख्यानधर्मस्य निष्कर्षः ।

निश्चयमेव विषयभेदात् तत्त्वभेदस्तस्माद् व्याख्यानशैलीभेदोऽपि जायत एव । साहित्येऽन्वय-पदसङ्गति-विग्रह-छन्दोऽलङ्कारादीनि तत्त्वानि व्याख्याने प्राथमिकतयाऽऽयान्ति, तत्रातिरिक्तपदत्याग-हीनत्वनिवेश-विभक्तिव्यत्यय-दूरान्वयाद्यः समस्या न्यूना एव दृश्यन्ते । व्याकरणीये व्याख्यानेऽपि एतादृशाः समस्या न्यूनतरा एव सन्ति । प्राचीनसंस्कृतवाङ्मयसम्बद्धे वेदमन्त्रे तादृशी स्थितिः स्वाभाविकी मन्यते, अतो विषयभेदतो व्याख्यानतत्त्वभेद इति इत्यवधेयम् ।

## ३.१६.२ निरुक्तीयव्याख्यानतत्त्वानि

निरुक्तस्य द्वितीयाध्याये 'अथ विशेषलक्षणं वर्णयिष्ये' इति शीर्षकतो व्याख्यानविशेषतत्त्वानि समुल्लिख्य विवृतानि सन्ति । अत्राधुनिकाः समालोचका भाषाविदश्च यानि तत्त्वरूपेण समुल्लिखन्ति तानि निरुक्तव्याख्यातारो दुर्गाचार्यादयो लक्षणत्वेन परिभाषन्ते । सूक्ष्मेक्षिकया विचारिते लक्षणतत्त्वयोर्भेदः स्पष्टतः परिलक्ष्यते । लक्षणं तु तस्य चिह्नं, तद्बोधकसङ्केतः तत्परिचायक एकस्मादभिन्नोऽव्याप्त्यतिव्याप्त्यसम्भवदोषरहितो गुणः, परं तत्त्व तु वस्तुनः स्वरूपम्, यथा मानवीयाङ्गभूतानि हस्तपादादीनि समग्रं मानवस्वरूपं परिचाययन्ति तथैव व्याकरणसाहित्यादिशास्त्रसम्बद्धान्यङ्गान्यपि तत्तच्छास्त्रमवबोधयन्तीति शास्त्रसङ्घटने तेषामप्यनिवार्यत्वं सुसिद्धमेव ॥ निरुक्ते प्रयुक्तास्तत्त्वपर्यायादयो व्याख्यानबोधकावयवा न तु लक्षणानि, लक्षणन्तु तत्रत्यानां प्रत्येकतत्त्वानां भवितुमर्हति, यथा-पर्यायवचनं प्रसिद्धेनाभिधानेनाप्रसिद्धस्यार्थस्य ख्यापनमित्यादिः, अतो दुर्गाचार्येण लक्षणत्वेनोक्तं भेदसङ्ख्यादिकमत्र तत्त्वरूपेणावगन्तुं शक्यते ।

निरुक्तीयव्याख्याने कानि तत्त्वानि सन्तीत्यत्र तद्व्याख्याता दुर्गाचार्यः प्राह-"अथ किं लक्षणमसौ व्याख्याया नैघण्टुके प्रकरणे ? अत्र ब्रूमः- तत्त्व-पर्याय-भेद-संख्या-सन्दिग्धोदाहरण-तन्निर्वचन-विभागेन यदाख्यानं सा व्याख्येति ।[१९२] निरुक्ते व्याख्यानलक्षणतः प्रस्तुतान्येतानि तत्त्वानि वेदमन्त्रस्थातिपरोक्षशब्दव्याकृतिकरणाय समर्थानि दृश्यन्ते । एतत्क्रमे व्याख्यात्रा

१०९. उवटः (व्या.), *शुक्लयजुर्वेदसंहिता,* दिल्ली : मोतीलालब. (१९७८) पृ.३ ।
११०. दुर्गाचार्यः (व्या.), *निरुक्तम्,* पूर्ववत्, (२००२)पृ.७० ।

यास्केन बहुत्र व्यासविधिरङ्गीकृतस्तथापि अन्यापेक्षया द्वितीयतृतीयाध्याययोः समासशैली वर्तत इति तद्व्याख्याता उमाशङ्करशर्मा सङ्केतयति ।[१९३] स व्याख्यानतत्त्वान्यपि दुर्गाचार्यप्रस्तुततत्त्वतः किञ्चित् पार्थक्येन प्रस्तौति, इत्थं-

तत्त्वपर्यायशब्देन व्युत्पत्तिश्च द्वयोरपि ।
निगमो निर्णयश्चेति व्याख्येयं नैगमे पदे ॥[१९४]

उमाशङ्करमते तु निरुक्ते- तत्त्व (शब्दसमुल्लेखः),पर्यायः, द्वयोरेव व्युत्पत्तिः, वैदिकोदाहरणम्, निर्णयश्चेति पञ्च तत्त्वानि भवन्ति । दुर्गाचार्येण निर्धारितेषु सप्ततत्त्वेषु उमाशङ्करस्य वैदिकोदाहरणनिर्णयौ विहायान्यानि सर्वाणि प्राप्यन्ते, एतद्द्वयमप्यनिवार्यमतस्तदपि संयोज्य निरुक्तीये व्याख्याने नवतत्त्वानि निर्धार्य व्याख्यायन्ते ।

### ३.१६.२.१ तत्त्वम्

अत्रत्यस्तच्छब्दो निर्वक्तव्यं शब्दं सूचयति, अतः प्रथमतस्तदुल्लेखनमावश्यकमिति तस्य सङ्केतः,यथा- तत्त्व तावद् गौरिति पृथिव्या नामधेयमित्येवमादि ।[१९५]

### ३.१६.२.२ पर्यायः

पर्यायवचनं-प्रसिद्धेनाभिधानेनाप्रसिद्धस्य ख्यापनम्, यथा-पृथिव्या नामधेयं गौरिति ।[१९६] व्याख्यानक्रमे पर्यायशब्दसमावेशनमपि आवश्यकं भवति, यथा- पृथिवीशब्दे गोत्रा,कु, पृथ्वी, धरणी, रसा, विश्वम्भरा इत्यादयः । तादृशपर्याया अपि शब्दं विवृण्वन्त इति पर्यायोऽपि व्याख्यानतत्त्वम् ।

### ३.१६.२.३ भेदः

भेदस्य व्युत्पत्तिरित्यर्थान्तरम्, तद्यथा- यद्दूरं गता भवति इत्येवमादिः[१९७] अर्थाद् भेदो नाम विभागः, यथा- गोशब्दः कथं पृथिव्या अर्थे समाविष्ट इत्यत्र- यस्मादियं दूरमध्वानं प्रति गता भवति, नह्यस्या अन्तो लभ्यते, यस्मिन्नाधारे प्राणिनो गच्छन्तीत्यर्थे गम्धातोः

---

१११. उमाशङ्करः (व्या.), *निरुक्तम्,* वाराणसी : चौखम्बाविद्याभवनम्, (२००१) पृ.४७ ।
११२. उमाशङ्करः (व्या.), *निरुक्तम्,* वाराणसी : चौखम्बाविद्याभवनम्, (२००१) पृ.४७ ।
११३. दुर्गाचार्यः (व्या.) *निरुक्तम्,* पूर्ववत्,(२००२), पृ.७० ।
११४. पूर्ववत् ।
११५. दुर्गाचार्यः (व्या.), *निरुक्तम्,* पूर्ववत्,(२००२), पृ.७० ।

'गमेर्डोः' (उ.सू. २.६९) इति कर्तर्यधिकरणे वा डोप्रत्ययेन टिलोपेन च गोशब्दोऽयं साधितः, अतो गमनशील इति तस्यार्थो निष्पद्यते, अथवा- गातेऽस्यां भूतानि गच्छन्तीति विग्रहे गाङ्गतौ इत्यस्माद् डोप्रत्यये आकारलोपे गो इति जाते तस्मात् प्रातिपदिकसंज्ञायां प्रथमैकवचने गौरिति । एवंविधैरनेकैर्व्युत्पत्तिभेदैर्यास्केन पदनिर्वचनं कृतमिति भेदोऽपि व्याख्यानतत्त्वम् ।

### ३.१६.२.४ सङ्ख्या

संख्या नाम एकत्वद्वित्वादयः, यथा- पृथिवी नामधेयान्येकविंशतिरित्यर्थात् एक-द्वि-त्रि-चतुरादीनि सङ्ख्यावाचकपदान्यपि शब्दं विवृण्वन्तीति तान्यपि व्याख्यानतत्त्वानीति दुर्गाचार्यः[१९८] परं ते पर्यायेऽन्तर्भवन्तीति पृथगुपादानं नापेक्षितमिति धिया उमाशङ्करः सङ्ख्यां न पृथगुपन्यस्तवान् ।

### ३.१६.२.५ सन्दिग्धोदाहरणम्

संदिग्धोदाहरणन्यासोऽपि व्याख्यानतत्त्वम् । पृथिवीबोधको निर्ऋतिशब्दः कथं व्युत्पन्नः ? तस्य च निर्वचनात्मकोऽर्थः कः ? इत्यत्र यास्काचार्यः प्राह- "तत्र निर्ऋतिर्निरमणादृच्छतेः कृच्छ्रापत्तीतरया पृथिव्याः सन्दिह्यत इत्येवमादिः ।"[१९९] निर्ऋतिशब्दे निरन्तरं भूतानि रमन्ते सुखमनुभवन्ति यस्यामिति उत नियता ऋतिर्यस्या सेति विग्रहेण निष्पद्यत इति सन्देहे निर्ऋतिर्निरमणादिति व्याख्यानतोऽर्थनिर्णयो विधीयते अतो निर्ऋतिशब्दो निरन्तरं भूतानि रमन्तेऽस्यामिति विग्रहक एव न तु नियता ऋतिः (घृणा) यस्या सेति विग्रहेण निष्पन्नो नारकीयदुःखार्थको निर्ऋतिशब्दोऽत्रापेक्षितः ।[२००] अनेन प्रकारेण सन्देहे व्याख्याद्वारा निर्णयो विधीयते अतः सन्दिग्धोदाहणविन्यासोऽपि व्याख्यानतत्त्वमेव । अत्र टीकाकारेण दुर्गाचार्येण सन्देहं सन्दिग्धोदाहरणं च पृथक् पृथगुपन्यस्य प्रथमस्येतद् द्वितीयस्य तु "य ईं चकार इत्येवमादिः"[२०१] इत्युदाहरणं प्रदत्तं तथापि प्रथमेऽपि वैदिकोदाहरणमेवोपन्यस्तमिति द्वयोः पृथगुपन्यासस्य नास्त्यौचित्यम् ।

---

११६. पूर्ववत् ।
११७. दुर्गाचार्यः (व्या.), *निरुक्तम्,* पूर्ववत्, (२००२) पृ.७६ ।
११८. दुर्गाचार्यः (व्या.), पूर्ववत्, (२००२)पृ.७७ ।
११९. दुर्गाचार्यः (व्या.), (२००२), *निरुक्तम्,* पूर्ववत्, पृ.७० ।

### ३.१६.२.६ निर्वचनम्

प्रत्यक्षतया धातोः स्वरूपेऽज्ञाते, धातोर्यथार्थस्वरूपेऽन्तर्लीने वा शब्देषु तत्त्वपर्यायभेदादिभि र्युक्तिभिर्वर्णागमवर्णविकारादिभिश्च शब्दनिर्वचनं निरुक्तस्य प्रमुखलक्ष्यमतो निर्वचनं प्रमुखतत्त्वम् । निर्वचनतो भेद-सन्देहादीन्यन्यान्यपि तत्त्वानि स्पष्टीभवन्ति । प्रकृतिप्रत्यययोरस्पष्टत्वे, अर्थनिर्धारणस्य दुष्करत्वे च निर्वचनमेव तत् स्पष्टयति, यथा- जहा इति पदं कथं निष्पन्नमित्याशङ्कायाम् ? तत्र को धातुरिति सन्देहे च हन्धातोरेवैतदिति निर्वचनद्वारा स्पष्टीक्रियते, तदेवं-"अत्र हन्तेर्जहातेर्वेति सन्देह इति जहेत्यनेनावगतसंस्कारेणोक्तो भवति । तथा च हन्तेरेवेदं रूपं न जहातेरित्यर्थः ।"[२०२] तस्य साधनं च हन्तेर्लिटि परस्मैपदीयोत्तमपुरुषैकवचने णलि धातोर्द्वित्वेनाभ्यासकुत्वेन जश्त्वेन उपधादीर्घेण छान्दसत्वाद् धातोः कुत्वाभावेन नलोपेन पररूपेण च विधीयत इति तट्टीकाकारो मुकुन्दझाशर्मा दर्शयति ।[२०३] परमपरष्टीकाकार उमाशङ्करस्तु- महर्षियास्को यद्यपि रूपमिदं हन्तेरेव साधयति परं वैदिकसाहित्येषु जहा इति रूपमोहाक्धातोरपि साधितं प्राप्यत इति निदर्शयन् द्वयोरेव रूपसाधनं सुकरमितिसम्भवमिति सङ्केतयति ।[२०४] अनेन प्रकारेणावगतसंस्कारेष्वनवगतसंस्कारेषु च शब्देषु सम्भावितधातुभिः शब्दनिर्वचनं यास्कस्य प्रमुखो धर्म इति निर्वचनं प्रमुखतत्त्व सिद्ध्यति ।

### ३.१६.२.७ वैदिकोदाहरणम्

सकलो नैगमो वैदिकोदाहरणस्य निधिरिति सुविदितमेव । अत्र सर्वत्र वैदिकान्युदाहरणानि विन्यस्तानि सन्ति, तेभ्य एकमत्र प्रस्तूयते-

अहश्च कृष्णमहरर्जुनञ्च वि वर्तेते रजसी वेद्याभिः ।
वैश्वानरो जायमानो न राजावातिरज्योतिषाग्निस्तमांसि ॥ (ऋ.म.४-५-११-१)

मन्त्रेऽस्मिन् प्रयुक्तस्याह इत्यस्य तद्विशेषणेन सह संयोजनं कृत्वा रात्रिदिवं चेति द्विविधार्थः कृतो दृश्यते । तत्र आहरन्ति अस्मिन् कर्माणीति विग्रहेण हृधातोरहपदं साधितम् ।

---

१२०. पूर्ववत्,पृ.१५९ ।
१२१. उमाशङ्करः (व्या.), *निरुक्तम्,* वाराणसी : चौखम्बाविद्याभवनम् , (२००१) पृ.४८ ।
१२२. पूर्ववत् ।

तत्र द्विविधार्थबोधसन्देहे रात्रिबोधकेन कृष्णपदेन सह संयोजिते तस्माद्रात्रिरिति, श्वेतबोधकेनार्जुनेन सह युक्ते तु दिवेत्यर्थो बोधयते, एतादृशानामुदाहरणानामेव निधिर्वेदः ।

### ३.१६.८ निर्णयः

कुत्रचिदेकस्यापि शब्दस्य बहवोऽर्था दृश्यन्ते, तेषु कतरोऽर्थः सान्दर्भिकः प्रासङ्गिको वेति ज्ञानाय संशयच्छेदको निर्णय आवश्यकः । निरुक्ते एतादृशनिर्णयश्च लभ्यते, यथा- गोशब्दः पृथिव्याः कथं पर्यायः ? इति जिज्ञासायां यास्कः प्राह- यद्दूरं गता भवति, यस्यां भूतानि गच्छन्ति अतः पृथिवीयं गौरुच्यते अर्थाद् दूरमध्वानपर्यन्तं गता विस्तृता वर्तते, अस्यां सर्वाणि भूतानि गच्छन्ति तस्माद् गौरिति पृथिव्या नामधेयमिति । यदा पशुविशेषबोधनाय गोशब्दः प्रयुज्यते तदा गच्छत्यसावभिमतदेशे सञ्चरणाय अथवा गच्छति चास्यां रसभावाय इति विग्रहं कृत्वा पशुविशेषार्थ इति निर्णीयते ।[२०५] अनेन प्रकारेण संशयेषु समुत्पन्नेषु विग्रहसमासभेनेनार्थभेदो निर्धार्यते । अर्थापनं यास्कीयनिर्वचनप्रणाल्या वैशिष्टचन्तु जानन्त्येव सुधियः ।

### ३.१६.३ उणादिशब्दनिर्वचनतत्त्वानि

अष्टाध्याय्या आयनेयीनीयिय...(पा.सू.७-१-२) इति सूत्रे महाभाष्यकारः- 'उणादयोऽ-व्युत्पन्नानि प्रातिपदिकानी'त्याह अतः पाणिनीये व्याकरणे तान्यव्युत्पन्नानि अर्थादनादिकालतो रूढीभूतानीति प्रसिद्धिः, परमनुसन्धाता दयानन्दसरस्वतीवर्यस्तु- पाति रक्षतीति पायुः, ग्रसत इति ग्रीष्मः, वातीति वायुः, नन्दतीति ननान्दा,पातयत्यस्मादात्मानं पापमित्यादिविग्रहद्वारा तेषां बहुत्र यौगिकत्वं कतिपये तु योगरूढत्वमपि स्वीकुरूते । एतादृशविग्रहैरुणादिशब्दानामपि निर्वचनप्रक्रिया पाणिनीयव्याकरणेन समाना अस्तीति प्रतीयते । निरुक्तावुणादावष्टाध्याय्यां च प्रायः समानैव शब्दनिर्वचनप्रक्रियेति ग्रन्थत्रयतोलनेन ज्ञायते । उणादयो बहुलम् (पा.सू. ३-३-१) इत्यत्र स्थितैका कारिका तत्रत्यां व्याख्यानप्रक्रियां सामान्यतः सङ्केतयति-

संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद् विद्यादनुबन्धमेतच्छास्त्रमुणादिषु ॥ [२०६]

---

१२३. यास्कः, *निरुक्तम्,* पूर्ववत्,(२००२) पृ. ७० ।
१२४. भट्टोजिदीक्षितः, *सिद्धान्तकौमुदी* (सम्पूर्णा), मुम्बई : खेमराजश्रीकृष्णदास, (१९७४) पृ.६४६ ।

वायुदारूप्रभृतिषूणादिशब्देषु प्रकृतिप्रत्यादिसन्देहे प्रथमतो धातुस्ततः प्रत्ययः तदनन्तरमनुबन्धादिकं वर्णागमवर्णनाशादेशादिकं कार्यं विधाय रूपाणि साधनीयानीति तस्याशयः । पाणिनीयव्याकरणस्येतिहासलेखको युधिष्ठिरमीमांसको दशपादीयोणादिसूत्राणि पाणिनिविरचितानीति मनुते । यद्यप्यष्टाध्याय्या उणादिसूत्राणाञ्चेकत्रैव कर्तेति पक्षे उणादिसूत्रान्तर्गताः प्रक्रिया अपि समाना इति तत्र प्रयुक्तान्येव व्याख्यानतत्त्वान्यत्रापि ग्रहितुं शक्यन्ते तथाप्युपर्युक्तायां कारिकायां समागतानि- धातुप्रकल्पनम्, प्रत्ययप्रकल्पनम्, अनुबन्धलोपः, वर्णागमवर्णनाशादीनि चत्वारि तत्त्वानि शब्दशास्त्रीयव्याख्यानतत्त्वतो भिन्नानीति द्वयोः पार्थक्यं दृश्यते । यद्यप्युपर्युक्तानि चत्वारि कार्याणि पाणिनीयव्याकरणस्थे रूपसाधनेऽपि विधीयन्त इति हेतोरुणादिप्रक्रियापि पाणिनीयव्याकरणसमाना इव प्रतिभाति तथापि पाणिनीयप्रक्रियायामेतेषां गौणत्वात्तत्र त्वधिकारादीन्येव मुख्यानीति भिन्नं स्पष्टमेव, अत उणादौ चत्वारि व्याख्यानतत्त्वानि स्वीकरणीयानि भवन्तीति निष्कर्षः । धातुप्रत्ययादीनां प्रकल्पने किं मानमित्यत्र उणादयो बहुलम् (पा.सू. ३-३-१) इति सूत्रं व्याख्यायन् कौमुदीकारो दीक्षित आह- एते वर्तमाने संज्ञायां च बहुलः स्युः, केचिदविहिता अप्यूह्या इति [२०७] अर्थादनादिकालतः प्रचलितासु संज्ञासु तथा पाणिनीयव्याकरणतोऽनिष्पादितास्वपि कोशादिषु प्रसिद्धेषु शब्देषु बाहुलकैर्धातुप्रत्ययागमवर्णलोपादिभी रूपाणि साधनीयानीत्युणादिव्याख्यानस्य निष्कर्षः । अत्र बहुलग्रहणं पाणिनीयप्रक्रियातो बहिर्भूतानां शब्दानामिष्टसाधनार्थमतो हृषेरेव व्यवस्थापित उलच् प्रत्ययः शङ्केरपि भवतीति तत्त्वबोधिनीकारस्य सङ्केतः ।[२०८] अतः परमेतानि तत्त्वान्युणादिशब्देषु घटन्ते न वेत्युणादिशब्दनिर्वचनद्वारा परीक्ष्यते ।

## ३.१६.३.१ धातुप्रकल्पना

औणादिकानि पदानि धातोः ...(पा.सू. ३-१-९१) इत्यस्य, कृदतिङ् (पा.सू.३-१-९३) इत्यस्य चाधिकारे संसाध्यन्ते अतस्तानि कृदन्ततुल्यानि सन्ति । तानि च बाहुलकात् सूत्रेणाविहिते स्थानेऽपि विधीयन्त इति व्याख्यातारः सूचयन्ति, तथाहि- हृष तुष्टाविति धातोर्हृषेरुलच् (उ.सू.१-९६) इति सूत्रेणोलच्प्रत्ययं विधाय तत्र लघूपधगुणं च कृत्वा हर्षुल इति रूपन्तु निर्मीयते परं चटुल-शङ्कुलवर्तुलप्रभृतीनि तस्मान्न सिद्धयन्ति प्रकृतसूत्रे धातुग्रहणात्, तर्हि तेषां निष्पादनं कथं भवतीत्यत्र व्याख्यातारः प्राहुः- उणादयो बुहलमिति सूत्रे बाहुलकग्रहणात् चटुल इत्यस्य साधनाय 'चटे वर्षावरणयो'रिति तथा शङ्कुलस्य

---

१२५. पूर्ववत् ।
१२६. ज्ञानेन्द्रसरस्वती (व्या.), *सिद्धान्तकौमुदी* (सम्पूर्णा) पूर्ववत्, पृ.६४६ ।

साधनाय च सम्भावितो धातुः शकि शङ्कायामिति परिकल्प्यते, तेनैव प्रकारेण वृतु वर्तने इति धातुं परिकल्प्य वर्तुल इति निर्मीयते । अतो धातुप्रकल्पनेन पूर्वोक्तानि रूपाणि साधयन्त इति धातुप्रकल्पनमपि व्याख्यानतत्त्व मन्यते ।

### ३.१६.३.२ प्रत्ययप्रकल्पनम्

लोकप्रचलितेषु शब्देषु प्रत्ययानामस्पष्टत्व उदाहरणान्तराण्यवलोक्य प्रत्ययकल्पन मप्युणादिशब्दसाधनस्य वैशिष्टचमतस्तदपि व्याख्यानतत्त्व मन्यते । उणादौ पठितेन उषिकुषिगार्तिभ्यस्थन् (उ.सू.२-४) इति सूत्रेण यथा- उष दाहे धातोस्थन्प्रत्ययेन लघूपधगुणेन ष्टुत्वेन च यथा ओष्ठः, कुष निष्कर्षे इत्यस्मात् पूर्ववत् प्रक्रियया कोष्ठम्, गै शब्दे इत्यस्माद् धातोरात्वेन पूर्ववत् प्रक्रियया स्त्रीत्वे टाप्प्रत्ययविधानेन गाथा, तथा ऋ गतावित्यस्मात् थन्प्रत्ययेन धातोर्गुणेन चार्थ इति साध्यते तयैव प्रक्रियया बाहुलकात् थन्प्रत्ययपरिकल्पनेन शुगतौ धातोः श्वयथुरित्यर्थबोधकः 'शोथः' इति रूपमपि निर्मीयते अतः प्रत्ययकल्पनमप्युणादौ भवतीति तदपि व्याख्यानतत्त्वम् ।

### ३.१६.३.३ अनुबन्धलोपः

पाणिनीयपरम्परायां यथा तस्यापत्यम् (पा.सू. ४-१-९२) इत्यादिभिर्विहितानामणादिषु स्थितानां णकारादीनामनुबन्धलोपः क्रियते तथैवोणादिप्रक्रियायामपि धातु-प्रातिपदिक-प्रत्ययागमादीनामनुबन्धलोपो विधीयते । तादृशकार्याणि च गुणवृद्धिनिषेधादिवशाद् भवन्तीत्यनुबन्धलोपादीन्यपि व्याख्यानतत्त्वेनोररीक्रियन्ते, यथा- पॄभिदिव्यधिगृधिधृषिभ्यः कुः (उ.सू.१-३) इत्यनेन कुप्रत्ययविधानेन- पॄपालनपूरणयोरित्यस्मात् पुरुः, भिदेर्भिन्दुः, गृधेर्गृधुः प्रभृतीनि रूपाणि साध्यन्ते । अत्र विहितस्य कुप्रत्ययस्य कित्वाद्गुणवृद्ध्यादीनि निषिध्यन्ते अतस्तानि गुणनिषेधादिविशेषप्रयोजनोपस्थापकानीत्यनुबन्धलोपोऽपि व्याख्यानतत्त्वम् ।

### ३.१६.३.४ वर्णलोपनाशादिः

पाणिनीयव्याकरणसमानायामुणादिप्रक्रियायामिष्टरूपसाधनाय वर्णागमवर्णविकार-वर्णलोपादीनि कार्याण्यपि विधीयन्त इति हेतोस्तान्यपि व्याख्यानतत्त्वानि । अन्येषामैश्वर्यं कुम्बत्याच्छादयतीति विग्रहे कुबि आच्छादने धातोः कुम्बेर्नलोपश्च (उ.सू.१-५९) इत्येरक्प्रत्यये इदित्वान्नुमागमेन प्रकृतसूत्रेणैव नकारलोपेन च कुबेर इति साध्यते ।

इदित्वान्नुमागमविधानम्, तस्य लोपश्चात्रापि विधीयत इति हेतोरत्र वर्णागमवर्णलोपोऽपि व्याख्यानतत्त्वम् ।

### ३.१६.४ दर्शनोक्तव्याख्यानतत्त्वानि

पौरस्त्यदर्शने विषयप्रवेशः,संशयः,पूर्वपक्षः,उत्तरपक्षे सङ्गतिश्चेति मूलतो चत्वारि व्याख्यानतत्त्वानि प्राप्यन्ते । तानि च दार्शनिकग्रन्थेषु कथं घटन्त इत्यत्र विचार्यते ।

#### ३.१६.४.१ विषयप्रवेशः

यस्मिन् कस्मिन्नपि व्याख्यानेऽनुसन्धानपूर्णे लेखे वा प्रथमं विषयप्रवेश आवश्यकः । स च पुस्तकभेदेन प्रसङ्गभेदेन वा पृष्ठभूमि-प्राक्कथन-परिचयप्रभृतिभिः शीर्षकैः क्वचिद् विषयपरिचायकैः शीर्षकैः कुत्रचिच्च शीर्षकं विनापि स प्रस्तुतो दृश्यते । 'अनुसन्धानविधीनां कतिपये पक्षाः' नामके पुस्तके वासुदेवत्रिपाठीवर्यः प्राक्कथनं शीर्षकद्वारा व्याख्येयविषयं परिचाययति ।[२०९] 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्युपनिषद्वाक्यस्य व्याख्याने - वेदोपनिषदादिभिरङ्गुष्ठप्रमाणत्वेन समुल्लिखिते आत्मनि चिन्तनं विधेयमिति विषयः विषयप्रवेशरूपेण निर्दिष्टो वर्तते ।

#### ३.१६.४.२ विशयः

अनवधारणात्मकं ज्ञानं संशयः स एव विशयः । स त्रिविधः- साधारणधर्मासाधारणधर्मविप्रतिपत्तिर्लक्षणभेदात् ।[२१०] तथैव वाचस्पतिमिश्रविरचिते न्यायसूत्रे संशयस्य पञ्चभेदा वर्णिताः-समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरूपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इति ।[२११] विषयोपरि संशयकरणं सन्देहः । संस्कृतव्याकरणे, मीमांसादिषु दर्शनेषु, उपनिषदादिषु च शब्दोऽयं व्याख्यानतत्त्वरूपेणाऽधिकरणाङ्गत्वेन वा प्रयुक्तो दृश्यते । दर्शने विशयशब्दतः पूर्वोक्तविषयोपरि आशङ्कनमित्यर्थोऽवबुध्यते । यदि मीमांसकेन ईश्वरोऽस्तीति विषय उपस्थापितश्चेत् तत्रेश्वरः कथमस्तीति संशयनं विशयः । भारतीतीर्थमुनिना 'जन्माद्यधिकरणः' इति सूत्रे ब्रह्मणोऽस्तित्वमस्ति न वेत्युक्त्वा एवं

---

१२७. वासुदेवत्रिपाठी, *अनुसन्धानविधिका केही पक्ष,* काठमाडौं : ने.रा.प्र.प्र.,(२०६०) पृ.१४ ।
१२८. माधवाचार्यः, *सर्वदर्शनसङ्ग्रहः* , वाराणसी : चौखम्बाविद्याभवनम्, (१९६४) पृ.४६३ ।
१२९. माधवाचार्यः (१९६४), पूर्ववत्,पृ.४६४ ।

संशयोपस्थापितः- “यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद् विजिज्ञासस्व तद् ब्रह्म, सत्यज्ञानमनन्तं ब्रह्म इत्यादिश्रुतिवाक्यद्वारा प्रतिपादिते ब्रह्मणि श्रूयमाणं ब्रह्मलक्षणं घटते न वेति विशयनं संशयः ।”[२१२] उपरिस्थितेन निदर्शनेन ज्ञायते यद् दर्शनशास्त्रेषु संशयशब्दोऽयं संशयोपस्थापने प्रयुज्यत इति ।

### ३.१६.४.३ पूर्वपक्षः

विवादे प्रथमदर्शनाधारस्तर्कः पूर्वपक्षः,प्रथमपक्षः पूर्वपक्षीयसिद्धान्तो वा ।[२१३] शास्त्रीयविषयव्याख्याने व्याख्याता सिद्धान्तपक्षस्थापनपूर्वमेकदेशीयैर्वाक्यैस्तत्र जिज्ञासामुद्भावयति, समाधानाभासं प्रस्तौति च, परं तत्रत्यं समाधानं क्षीणतर्कयुतं भवति । दर्शनेषु व्याकरणशास्त्रे च बहुत्र एतादृशी पूर्वपक्षोक्तिर्लभ्यते । वैयासिकन्यायमालाकारोऽपि आत्मा वाऽरे द्रष्टव्य...इत्यादीनां श्रुतिवाक्यानां व्याख्यानक्रमे- केचन जडवद् व्यवहर्तुर्ब्रह्मणश्चिन्तनमनावश्यकमिति वदन्ति चेदपरे तु ब्रह्मणो विचारोऽनावश्यक इति पूर्वपक्षीयान् सिद्धान्तानेवमुपस्थापयन्ति-“तमःप्रकाशवद् विरुद्धस्वभावयोर्जडाजडयोर्देहात्मनो शुक्तिरजतवदन्योन्यतादात्म्याऽध्यासो न निरूपयितुं शक्यते, तस्मादभ्रान्ताभ्यां श्रुत्यहंप्रत्ययाभ्यां ब्रह्म विचारणीयो विषयो नास्ति, नापि तत्र प्रयोजनं पश्यामः । उक्तप्रकारेण ब्रह्मात्मनि निश्चितेऽपि मुक्त्यदर्शनात्, तस्माद् ब्रह्म विचार अनर्हम् इति शास्त्रमनारम्भणीयमिति पूर्वपक्षः ।”[२१४] अनेकैः श्रुतिभिः प्रमाणैश्च ईश्वरोऽस्तीति प्रमाणिते सत्यप्यत्र तद्विचारोऽनावश्यक इत्युक्त्वात्र पूर्वपक्षोपस्थापितः ।

### ३.१६.४.४ सिद्धान्तो व्याख्यानतत्त्वसङ्गतिश्च

सिद्धो वादिप्रतिवादिभ्यां निर्णीतोऽन्तोऽवसानं यस्य स इति व्युत्पत्या वादिप्रतिवादिनोः शास्त्रार्थेन प्रमाणीकृतो वादो निष्कर्षो वा सिद्धान्त इति निश्चीयते । अक्षपाददर्शनेऽपि सिद्धान्तस्य लक्षणं सामान्यतः पूर्वोक्तसदृशमेव । तत्र दर्शनकार आह-प्रामाणिकत्वेनाभ्युपगतोऽर्थः सिद्धान्त ।[२१५] इति अर्थात् प्रामाणिकमिति मत्वा सर्वैः

---

१३०. पूर्ववत्, पृ.४ ।
१३१. वामनशिवराम आप्टे, *संस्कृतहिन्दीकोशः*, पूर्ववत्, (१९९३) पृ.६३१ ।
१३२. भारतीतीर्थमुनिः,*वैयासिकन्यायमाला,* वाराणसी : सत्यानन्दसरस्वती, (२०२९) पृ.११ ।
१३३. माधवाचार्यः, *सर्वदर्शनसङ्ग्रहः* , पूर्ववत्, (१९६४) पृ.४६५ ।

साधितोऽर्थः सिद्धान्तः, अतो वादिप्रतिवादिभ्यां विचारविमर्शतो निर्णीतोऽर्थ एव सिद्धान्त इति निर्धार्यते ।

अक्षपाददर्शने सिद्धान्तस्य सर्वतन्त्र-प्रतितन्त्राधिकरणाभ्युपगमैश्चत्वारो भेदाः [२१६] वर्णिताः सन्ति । तेषु सर्वशास्त्रेषु स्वीकृतानां पञ्चमहाभूतपञ्चेन्द्रियादीनामस्तित्वस्वीकारः सर्वतन्त्रः । तथैव प्रायः समानविचारयुतः प्रतितन्त्रः, यथा-वैशेषिकेण सह प्रायः समानतायुतो न्यायसिद्धान्तः प्रतितन्त्रपदेनाभिधीयते । तेनैव प्रकारेण एकस्य प्रमाणीकरणेनानुषङ्गिकानामन्येषामपि बोधोऽधिकरणम्, एवमेव पूर्वजैरप्रतिपादितोऽ- नुमानगम्यो ज्ञापकद्वारा बोध्यश्च विषयोऽभ्युपगमपदेन गृह्यत इत्यक्षपाददर्शनव्याख्याता ज्ञापयति । [२१७] एतादृशसिद्धान्तप्रयोगः प्रायः पूर्वपक्षखण्डनेन स्वमतस्थापनेन च कृतो दृश्यते । वैयासिकन्यायमालाकारः 'अङ्गुष्ठमात्रपुरुषो मध्य आत्मनि तिष्ठती'ति उपनिषद् वाक्ये वर्णित अङ्गुष्ठपरिमाणवान् सूक्ष्मजीवः कथमीश्वरः सम्भवेदिति संशयं निवारयन् सिद्धान्तमतेन तस्य सत्तां साधयति, एवं-"परमात्माऽङ्गुष्ठमात्रः, कुतः ? ईशानो भूतभव्यस्य इत्यतीतानागतजगदीशितृत्वश्रवणात् ।" [२१८] अर्थात् भूतस्य भविष्यतश्च शासकत्वमीश्वरे विद्यते,परं प्राणधारिणि जीवे शासकत्वमसम्भवं यतो हि जीवस्य शास्यत्वात् । पुनश्चाल्पपरिमाणत्वं देहमध्यस्थत्वञ्चेश्वर एव घटत इति श्रुतिनिर्दिष्टोऽङ्गुष्ठमात्रपुरुष ईश्वरोऽस्तीति सङ्गच्छते ।

व्याख्यानस्याधाररूपेण स्वीकृतेषु पूर्वोक्तेषु चतुर्षु तत्त्वेषु क्रमिकतया पूर्वापरसम्बन्धोऽस्तीति सैव सङ्गतिः । एतद्विधा सङ्गतिर्विषयस्य संशयेन तस्य च पूर्वपक्षेण तस्यश्चोत्तरपक्षेण सहावश्यकी । ताभिः सहान्वये सत्येव व्याख्यानं पूर्णतामेतीति समालोचकाः प्राहुः ।

### ३.१६.५ काव्यशास्त्रीयव्याख्यानतत्त्वानि

काव्येषु शास्त्रीयग्रन्थेषु च प्रसिद्धाया व्याख्यायास्तत्त्वनिर्धारणे विवेचकेषु टीकाकारेषु च मतवैभिन्यं प्राप्यते । प्रस्थानभेदेन व्याख्याशिल्पप्रभेदेन व्याख्यातुर्बुद्धिभेदेन चात्र महद्वैभिन्यं

---

१३४. उमाशङ्करः (व्या.) *निरुक्तम्,* वाराणसी : चौखम्बाविद्याभवनम्, (२००१) पृ.४६५ ।
१३५. पूर्ववत्,पृ.४६६ ।
१३६. भारतीतीर्थमुनिः, *वैयासिकन्यायमाला,* पूर्ववत्, (२०२९) पृ.६२ ।

दृश्यत आयाति च । व्याख्यानस्य शिल्पं कियदाकारकमित्यत्र प्रो. रहसविहारीद्विवेदी एकं पद्यमुद्धरति, तद्यथा -

या लीनमर्थं प्रथते सुबोधं लुप्तं सदर्थं स्फुटितं विधत्ते ।
अल्पञ्च शास्त्रं विदधात्यनल्पं व्याख्यासमार्थैर्विवृतिः पदैः सा ॥ [२१९]

एतेन पद्येनानुच्छेदादीनां समग्रार्थस्य च ख्यापनं व्याख्यानं विवृतिस्तु पदपदार्थप्रतिपादनमिति निश्चयीक्रियते, तथैव लीनार्थस्य प्रकाशनम्, सरलभाषया जटिलतास्फोरणमल्पविषयानां विशदीकरणञ्च व्याख्यानं भवतीति ज्ञायते । संस्कृतवाङ्मये व्याख्याशब्दसन्निकटा अन्येऽपि शब्दाः प्रचलिताः सन्ति, तेषां सर्वेषां वैशिष्ट्यं राजशेखरेण काव्यमीमांसायां प्रकटितम्, तद्यथा-

“सूत्राणां सकलविवरणं विवृतिः, सूत्रविवेचनं पद्धतिः, आक्षिप्यभाषणाद् भाष्यम्,अन्तर्भाव्यं समीक्षा अवान्तरार्थविच्छेदाश्च सा,यथासम्भवमर्थस्य टीकनं टीका, विषमपदभञ्जिका पञ्जिका पञ्चिका वा, अर्थप्रदर्शनकारिका कारिका, उक्तानुक्तदुरुक्तचिन्तापहारकं वार्त्तिकमिति शास्त्रभेदाः । तेनैव प्रकारेण शास्त्रैकदेशप्रक्रिया प्रकरणम्, अध्यायादयस्त्ववान्तरभेदाः, शब्दार्थयोर्यथावत् सहभावेन प्रथिता विद्या साहित्यविद्या इति ।”[२२०]

मीमांसाकार एतानि पदानि व्याख्यायन्नपि मीमांसापदं न व्याकृतवान् । तदप्यत्र व्याख्यानाय प्रयत्नो विधीयते, तथाहि- अनुमानतर्कादिभिर्गहनविषयवस्तुनस्तत्त्वनिर्धारणं मीमांसेति । काव्यमीमांसायां कारयित्री-भावयित्रीति द्विविधयोः प्रतिभयोरुल्लेखो मिलति । तयोर्मध्ये प्रथमा प्रतिभा काव्यसृजनकर्मिका, द्वितीया प्रतिभा तु काव्यालोचनव्याख्यात्मिका भवति । व्याख्याविधौ भावः प्रथमतो ग्राह्य इति बोधिकेयं शैल्यपि प्रसङ्गेऽस्मिन् स्मरणीया दृश्यते । व्याख्यानं पदपदार्थबोधे तस्य भावबोधे च केन्द्रितं तच्च व्याकरणकोशादिभिः सम्भवतीति तदाह -

शक्तिग्रहं व्याकरणोपमानं कोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥[२२१]

---

१३७. रहसविहारीद्विवेदी, ‘व्याख्यानपद्धतिः’ *सारस्वतीसुषमा,* पूर्ववत्,(२०३२) पृ. ५४६ ।
१३८. राजशेखरः, *काव्यमीमांसा,* वाराणसी : चौखम्बाविद्याभवनम्, (१९६२) पृ. १० ।
१३९. विश्वनाथपञ्चाननः, *न्यायसिद्धान्तमुक्तावली,* वाराणसी : हरिनि.भ., (२०४३), पृ.९० ।

तादृशपदार्थबोधस्त्रिविधैर्ग्रन्थैर्विधीयते, तथा च प्रभुसम्मितोऽर्थोपदेशो वैदिकवाक्यैः, सुहृत्सम्मितोपदेशः पुराणेतिहाससम्बद्धैर्वाक्यार्थैर्भवति तथैव काव्यशास्त्रसम्बद्धोपदेशस्तु कमनीयवचोभिः कान्तातुल्यवचनैः क्रियते इति विश्लेषकाः प्राहुः । अत्रापि व्याख्यातुः शैलीभेदेन विषयख्यापने भेदः सञ्जायते । अतः प्रथमः आदेशात्मकः, द्वितीयः परामर्शात्मकः तृतीयो लोकोत्तराह्लादात्मकश्चेति साहित्यिकानामाकूतम् ।

काव्यानां व्याख्यानसरणिः केत्यत्र रहसविहारीद्विवेदी महोदयः प्रशस्तकवेर्भणितिमुद्धरन् सम्प्रेषणयोग्यां वाचं निर्दिशति । व्याख्यानस्याशयो विषयस्य स्पष्टीकरणे, जटिलतास्फोरणे, विषयसम्प्रेषणे च केन्द्रितो भवति । तत्र यानि कान्यपि तत्त्वानि स्युः, तानि सर्वाणि समुद्रे नदीवत् सम्प्रेषणेऽन्तर्भवन्तीति सम्प्रेषणस्यैव मुख्यत्वं प्रकटयति । विषयोऽयमधस्तनस्थितैः श्लोकैः स्फुटमभिहितं, तद्यथा-

सन्दर्भोऽथ प्रसङ्गश्च विग्रहश्चान्वयक्रमः ।<br>
कवेरिष्टश्च शब्दार्थो गुणालङ्काररीतयः ॥<br>
रसो ध्वनिश्च वक्रोक्तिः शब्दसन्दर्भसूचना ।<br>
छन्दःकोशादिसङ्केतो भावसाम्यप्रदर्शनम् ॥<br>
इत्येतान्येव तत्त्वानि यथा लब्धानि काव्यतः ॥<br>
काव्यव्याख्यासु चीयन्ते मल्लीनाथादिसूरिभिः ॥[२२२]

अत्र सङ्कलितानि तत्त्वानि काव्यव्याख्यान आवश्यकानि, मल्लीनाथादिभिः प्रमुखव्याख्यातृभिरङ्गीकृतानि च । तानि क्रमेणात्र प्रस्तूयन्ते- सन्दर्भनिर्देशनम्, प्रसङ्गसमुत्थापनम्, पदस्य विग्रहः, श्लोकस्यान्वयनिर्धारणम्, कवेरिष्टार्थप्रतिपादनम्, गुणालङ्काररीतिप्रदर्शनम्, रसध्वनिव्यङ्ग्यार्थादीनां सूचनम्, शास्त्रसन्दर्भसूचनञ्चेति व्याख्यानतत्त्वानि ।

मल्लीनाथनामकेन व्याख्यात्रा सन्दर्भप्रदर्शनम्, प्रसङ्गोत्थापनम्, पदविग्रहः, अन्वयक्रमनिर्धारणम्, साहित्यिकार्थख्यापनम्, गुणालङ्काररीत्यादिनिर्धारणम्, रसध्वनिवक्रोक्त्यादीनां निदर्शनम्, शास्त्रीयवचनस्य सूचनम्, छन्दःकोशादीनां सूचनम्, सन्दिग्धे स्थले शङ्कामुद्भाव्य समाधानम्, तान्त्रिकविधेरनुपालनम्,

---

१४०. रहसविहारीद्विवेदी (२०३२), 'व्याख्यानपद्धतिः' *सारस्वतीसुषमा*, पूर्ववत्, पृ. ५४६ ।

शब्दार्थसम्बन्धसमुत्थापनञ्चेति विंशत्यधिकानि व्याख्यानतत्त्वानि निर्धारितानि । नेपालदेशीयोऽनुसन्धाता माधवपोखेलमहोदयः सूचयति । तथैवासौ पूर्वोक्तं मल्लीनाथनिदर्शनमाश्रित्य वागर्थाविवसम्पृक्तौ... इति मङ्गलपद्ये पूर्वोक्तेभ्यस्तत्त्वेभ्यः सप्तव्याख्यानतत्त्वानि निर्धारयति, तदेवं-

१. कोशीयार्थस्य वाच्यार्थस्य वा निर्धारणम् ।

२. पदनिर्वचनद्वारा व्याकरणार्थस्य निर्धारणम् ।

३. अन्वयादिकं कृत्वा वाच्यार्थ-लक्ष्यार्थ-व्यङ्ग्यार्थ-व्यञ्जनार्थादीनां प्रकाशः ।

४. प्रतिपादितार्थस्य सम्पोषणाय कोश-शास्त्रीयोद्धरण-मीमांसा-तन्त्रादिभिः प्रमाणोपन्यासः ।

५. कवितासु समुपलब्धानां छन्दोऽलङ्कारादीनां प्रदर्शनम् ।

६. स्वविश्लेषितविषयपोषणाय पूर्ववर्तिभ्यः सहयोगग्रहणम् ।

७. अर्थे केन्द्रितो भूत्वा सकलव्याख्यानप्रक्रियाणां प्रविधीनाञ्च प्रयोगः ।[२२३]

एतादृशं साहित्यिकं व्याख्यानं निर्वचनमूलकाद् व्याकरणशास्त्रीयव्याख्यानतत्त्वात् किञ्चिद् भिन्नमिति निश्चीयते ।

### ३.१६.६ आधारभूतव्याख्यानतत्त्वानि

संस्कृतवाङ्मये प्रचलितेषु नैकविधेषु व्याख्यानतत्त्वेषु 'भाषावृत्ति' विवृतिकारस्य सृष्टिधराचार्यस्य पदच्छेदपदार्थोक्तीत्यादीनि तत्त्वान्याधारभूतव्याख्यानतत्त्वरूपेण प्रयुक्तानि सन्ति, कुत्रचिद् व्याख्यानप्रकारत्वेन क्वचित्तु व्याख्यानलक्षणरूपेणापि गृहीतानि प्राप्यन्ते । तथापि तानि न व्याख्यानप्रकाराणि, यतो हि प्रकारे पूर्वापरेष्वन्तःसम्बन्धो नापेक्षते परं तत्र प्रथमतः पदच्छेदपूर्वकं विग्रहः ततोऽर्थापनं तदनन्तरं वाक्ययोजनमित्याद्यः सङ्गतयोऽपेक्ष्यन्ते, अत एतानि व्याख्यानतत्त्वान्येवेति निश्चीयते ।

सृष्टिधराचार्यकृते पदच्छेदपदार्थोक्तिरिति पद्ये समागतानि व्याख्यानतत्त्वानि भाषिकेषु शब्दशास्त्रीयेषु च ग्रन्थेषु घटन्ते न वेति परीक्षणायात्र प्रथमतः पद्यसमुल्लेखनं विधीयते-

पदच्छेदपदार्थोक्तिर्विग्रहो वाक्ययोजना ।

---

१४१. माधवपोखेलः (२०६५), 'प्राच्यानुसन्धानविधिः' *अनुसन्धानप्रकाशः* (वर्ष-१,अङ्क-३), काठमाडौं : ने.सं.वि.अनु.के.,पृ.२२ ।

आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं स्मृतम् ॥[२२४]

कतिपये समालोचकास्तु तत् किञ्चित् परिवर्त्य पञ्चतत्त्वेषु सङ्कोचीकुर्वन्ति, तद्यथा-

पदच्छेदपदार्थश्च विग्रहो वाक्ययोजना ।

पूर्वपक्षसमाधानं व्याख्यानं पञ्चलक्षणम् ॥[२२५]

उपर्युक्तेषु षड्व्याख्यानतत्त्वेषु- पदच्छेदः, पदार्थोक्तिः, समस्तपदविग्रहः, वाक्ययोजना, आक्षेपः, समाधानञ्च समायान्ति चेत् पञ्चतत्त्वेषु- पदच्छेदाऽऽर्थापन-विग्रह-पूर्वापरीभूतेऽन्वय-साक्षेपसमाधानानि निर्धायन्ते । एतयोर्द्विविधयोर्व्याख्यातत्त्वयोर्मध्ये कतरो ग्राह्य इत्यत्र द्वयोः संयोजनेन पदच्छेदः, पदार्थोक्तिः, विग्रहः, वाक्ययोजना, आक्षेपपूर्वकं समाधानमिति पञ्चतत्त्वानि गृह्यन्ते । तत्र युधिष्ठिरमीमांसकोऽपि सहमतः, तानि चात्र व्याख्यायोदाहरणेषु सङ्गमय्यन्ते ।

### ३.१६.६.१ पदच्छेदः

छेदनमिति विग्रहे छिदिर् द्वैधीकरणे धातोर्भावे घञि छेदपदं सिद्ध्यति । तत्र पदमित्यस्य योगेन पदस्य पदानां वा छेद इति विग्रहपूर्वकं षष्ठीतत्पुरुषसमासे पदच्छेद इति पदं सिद्ध्यति । क्षिधातोर्द्वैधीकरणार्थत्वात् पदानां खण्डीकरणम्,पृथक्करणं, द्वैधीकरणं वा पदच्छेदः । शब्दशास्त्रे प्रथमतो विग्रहसमासादिभिर्धातुप्रातिपदिकादिकं परिच्छिद्य तदनन्तरमेवार्थापनं विधीयते । तत्र को धातुः ? किं प्रातिपदिकम् ? कः प्रत्ययः उपसर्गयोगोऽस्ति न वा ? इत्यादिकं विभाजनं कृत्वैवार्थापनं क्रियते । शब्दशास्त्रीया एतादृशी परम्परा सम्भवतो वैदिकव्याकरणतः समागता भवेदिति गोपथबाह्मणस्येतद् वाक्यसमूहः सङ्केतयति- "ओङ्कारं पृच्छामः - को धातुः ? किं प्रातिपदिकम् ? किं नामाख्यातम्? किं लिङ्गम् ? किं वचनम् ? का विभक्तिः ? कः ? प्रत्ययः ? कः स्वरः ? उपसर्गो निपातः किं वै व्याकरणम् को विकारः ? को विकारी ? कति मात्राः ? कति वर्णाः ? कत्यक्षराः ? कति पदानि ? कः संयोगः ? ..." [२२६] यद्यप्यत्र विग्रहसमासौ पृथक् पृथङ् निर्दिष्टौ तथापि उपर्युक्तेषु वाक्यसमूहेषु जिज्ञासितानि धातुप्रातिपदिकप्रत्ययनिपातादीन्येव पदच्छेदेऽन्तर्भवन्ति । एतादृशपदच्छेदो वैदिकव्याकरणतो यास्कीये निरुक्ते, तत्परवर्तिषु पाणिनिशाकटायनादीनां

---

१४२. मुकुन्दझाशर्मा (व्या.), *निरुक्तम्,* पूर्ववत्, (२००२) पृ.१ ।

१४३. रहसविहारीद्विवेदी, 'व्याख्यानपद्धतिः' *सारस्वतीसुषमा,* पूर्ववत्, (२०३२) पृ. ५५० ।

१४४. क्षेमकरणदासत्रिवेदी(सम्पा., *गोपथब्राह्मणभाष्यम्,* (द्वि.सं.),इलाहावाद : इन्द्रदयालसेठ, (१९७७)पृ.२४ ।

सकलव्याकरणेषु काव्यशास्त्रीयेषु दर्शनतन्त्रीयेषु च व्याख्यानेषु प्रयुज्यते । संस्कृते लोकप्रचलितरूढ्यर्थापेक्षया बहुत्र यौगिकार्थस्य, योगरूढार्थस्य च प्रचलनं प्राप्यते, अतस्तत्र पदच्छेदविग्रहसमासादिभिर्व्याख्यानं क्रियते तथार्थापनपरम्परा च सुदृढा वर्तते, अस्मात् पदादीनामर्थापने व्याख्याने च पदच्छेदेन शब्दनिर्वचनं क्रियत इति स नितरामावश्यकः ।

३.१६.६.२ पदार्थोक्तिः

पद्यते गम्यतेऽर्थोऽनेनेति पदम् । पदस्य पदानां वार्थः पदार्थः, पदार्थस्योक्तिः कथनं वचनं वा पदार्थोक्तिः । पदद्वारा ज्ञातस्य शक्यस्यार्थस्याभिव्यङ्ग्यस्य शाब्दिकार्थस्य यौगिकार्थस्य वा निष्पादनं प्रकटीकरणं वा पदार्थोक्तिः । को नाम पदार्थ इत्यत्र नेपालीकोशकारो वसन्तशर्मनेपाल आह- पदगम्यस्य वाच्यार्थस्य प्रकटीकरणमेव पदार्थः ।[२२७] उपर्युक्तव्याख्यानेन व्यावहारिकप्रयोगपरीक्षणेन च पदार्थोक्तिशब्दतोऽभिधेयरूपेण यौगिकार्थः प्रतीयते चेत् तत्सम्बद्धा लाक्षणिकव्यङ्ग्यर्था अपि सहृदयहृदयबोध्यत्वेन प्रकाशिता भवन्तीति बोद्धुं शक्यते । संस्कृते प्रायः सर्वेषु विषयेषु शब्दधातुप्रत्ययादिमेलनेन गम्या अर्था निष्पाद्यन्ते । सूत्रप्रधानीभूतेष्वष्टाध्यायी-ब्रह्मसूत्रभाष्य-दर्शन-निरुक्तादिषु यौगिकार्थस्य (यं आङ्ग्लभाषायां इटोमोलोजिकल मिनिङ इति कथ्यते (Etymologycal meaning) स्यैव प्राधान्यं दरीदृश्यते । प्रसिद्धो वैयाकरणो नागेशः पदे पदार्थे च बोधात्मिका शक्तिर्भवतीति व्याख्यायन् आह-"पदपदार्थयोः सम्बन्धान्तरमेव शक्तिर्वाच्यवाचकभावापरपर्यायाः । तद्ग्राहकञ्चेतरेतराध्यासमूलकं तादात्म्यं तदेव सम्बन्ध इति ।" [२२८] तादृशी शक्तिर्रूढिर्योगो योगरूढिश्चेति त्रिविधा, तासु शास्त्रकल्पितावयवार्थनिरूपा शक्तिर्योगः,यथा- पाचकः, अर्थात् शास्त्रेण/ व्याकरणेन, कल्पिता/ व्युत्पादिता, ये अवयवाः/ भागास्तेषां योऽर्थस्तेन निरूपिता/ निर्धारिता शक्तिः/ अर्थावयवसामर्थ्यं योग इति ।[२२९] यौगिकशक्त्या पदवाक्य-श्लोक-लक्षणवाक्य-सूत्रवार्त्तिकभाष्य-मन्त्राणाञ्चार्थापनं विधीयते । तत्र प्रथमतो यौगिकार्थं कृत्वैवार्थान्तरेषु प्रविश्यते अतः पदार्थोक्तिरपि व्याख्यानस्याधारभूततत्त्वम् । पाचकपदगम्यः पाककर्ता इत्यर्थः प्रकृतिप्रत्ययविच्छेदेन प्राप्तो यौगिकार्थ एव । प्रकृतिप्रत्ययादिभिरर्थबोधनाय काठिन्ये संयोगविप्रयोगादिभिरप्यर्थोऽनुमेय इति हरिकारिकामुद्धरन् नागेश आह-

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।

---

१४५. वसन्तकुमारशर्मनेपालः, *नेपालीशब्दसागर,*(द्वि.सं.),काठमाडौं : भाभापुस्तकभण्डारः,(२०५८), पृ.७९१ ।
१४६. नागेशः, *परमलघुमञ्जूषा,* (द्वि.सं.), वाराणसी : चौ.सु.भा.प्र., (१९९८) पृ.२८ ।
१४७. लोकमणिदाहालः (व्या.), *परमलघुमञ्जूषा,* पूर्ववत्, (१९९८)पृ.४८ ।

अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचितिर्देशः कालो व्यक्तिस्वरादयः ।
शब्दस्यार्थानवच्छेदे विशेषस्मृतिहेतवः ॥ [२३०]

साहित्यशास्त्रे प्रसिद्धा अभिधाशक्तिरपि यौगिकार्थसन्निकटेति 'निश्चितार्थाभिधायिनी शक्तिरभिधे'ति लक्षणतो ज्ञायते । तत्रत्यो मुख्यार्थश्चतुर्विधानर्थान् बोधयतीति पौरस्त्यकाव्यशास्त्रमुद्धरन् ईश्वरकुमारश्रेष्ठः स्वकीये व्याख्यानग्रन्थे ज्ञापयति, तदेवं -

मुख्यार्थतो गम्यार्थाः
१.रूढो वा लोकप्रसिद्धार्थः ।
२.प्रत्यक्षो वा बाधरहितार्थः ।
३.साक्षाद् वा सङ्केतितार्थः ।
४.व्याकरणात्मको वा कोशीयार्थः । [२३१]

अभिधाशक्तितो बोध्येषु एतेष्वर्थेषु व्याकरणशक्त्या वा प्रकृतिप्रत्ययाभ्यां निष्पन्नोऽर्थो यौगिकार्थ इत्युक्त्वा भाषाविद्भिः-विद्यालयः, समीक्षा, पाठकः, कर्ता, श्रोता, दर्शकः, गणितम् प्रभृतयः शब्दा उदाह्रियन्ते । पौरस्त्या व्याकरणोपमानकोषाप्तवाक्यादिभिरष्टभिः प्रकारैः शक्तिग्रहो भवतीति स्वीकुर्वन्ति । तेष्वष्टप्रकारेषु व्याकरणं प्रथममिति तत्कारिकायां ते समुल्लिखन्ति च, अतः प्रथमतो यौगिकार्थस्य निर्धारणं विधायैव लक्ष्यार्थव्यङ्ग्यार्थादिषु प्रवृत्तिभवतीति शक्यार्थस्य प्राधान्यं सर्वत्रैवेति तेषामभिप्रायः ।

### ३.१६.६.३ विग्रहः

वृत्त्यर्थावबोधकं वाक्यं विग्रहः ।[२३२] अर्थात् समासवृत्तेरर्थबोधकं वाक्यं विग्रहः । तादृशविग्रहश्च लौकिकालौकिकभेदेन द्विविधः । लोके प्रयोगयोग्यो राष्ट्रस्य सेवकः, वने गमनम्, नेपालस्यैतिह्यं प्रभृतयः प्रथमश्चेदुपर्युक्तेषूदाहरणेषु समागतः सविभक्तिकः राष्ट्र + ङस् सेवक सु, वन + ङि गमन सु, नेपाल + ङस् ऐतिह्य सु प्रभृतयोऽलौकिकाः । पुनश्च पदप्रयोगाधारेण विग्रहो द्विविधः-स्वपदाश्वपदश्च । तयोः किं लक्षणमित्यत्र स्वपूर्वजान् वैयाकरणानुद्धरन् सोमनाथसिग्द्यालः प्रतिसंस्कृतासिद्धान्तकौमुदीनामके ग्रन्थे प्राह-"समस्यमानैः

---

१४८. नागेशः, *परमलघुमञ्जूषा,* पूर्ववत्, (१९९८) पृ.५२ ।
१४९. ईश्वरकुमारश्रेष्ठः, *पूर्वीय एवम् पाश्चात्य साहित्य...*, (च.सं.),काठमाडौं : साझाप्र.,(२०६२) पृ.२७ ।
१५०. वरदराजः, *लघुसिद्धान्तकौमुदी* (त्रयोदशसं.), वाराणसी : मोतीलालब., (१९९७) पृ.९२ ।

पदैरेव यत्र विग्रहः क्रियते स स्वपदविग्रहः, यत्र तु बाह्यं पदमन्तर्भाव्य विग्रहः क्रियते स चास्वपदविग्रहः ।"[२३३] हरिश्च हरश्च हरिहरौ, चक्रं पाणौ यस्य स चक्रपाणिः, कृष्णश्चासौ सर्पः कृष्णसर्पः प्रभृतिषु समस्यमानपदैरेव विग्रहकरणात् तानि स्वपदविग्रहस्योदाहरणानि । तथैव शक्तिमनतिक्रम्य यथाशक्ति, जन्मपर्यन्तमाजन्म, कृष्णस्य समीपमुपकृष्णमित्यादीन्यस्व-पदविग्रहस्योदाहरणानि ।

समस्तपदात् कीदृशोऽर्थो बुध्यत इति तद्विग्रह एव निर्धारयति । विग्रहभेदेन न केवलमर्थदोष अपि तु स्वरादिदोषा अपि आपतन्तीति इन्द्रशत्रुर्वर्धस्व इत्यत्र स्थितेन विग्रहभेदेनावगम्यते । तत्र इन्द्रस्य शत्रुरिन्द्रशत्रुः स (वृत्रः) वर्धस्वेत्यन्तोदात्तस्वरयुक्ते विग्रहे कर्तव्ये इन्द्रः शातयिताऽस्ति यस्येति विग्रहः त्वष्टा'नामकेन वृत्रगुरुणा कृतस्तस्माद् बहुव्रीहिर्ज्ञापित आद्युदात्तस्वरश्च जातोऽतः स्वरदोषाद् वृत्रो हत इति पुराणे प्रसिद्ध एव । अतो निहितार्थबोधाय तादृशस्वरसहितो विग्रह एव आवश्यक इति महाभाष्यकारः पस्पशाह्निके एवमाह-

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥[२३४]

एतादृशो विग्रहो वैदिकमन्त्रेषु, सूत्रेषु, लाक्षणिकग्रन्थेषु काव्येषु, वाङ्मयस्यान्यक्षेत्रेषु चाभीष्टार्थप्राप्तये आवश्यकोऽतो व्याख्यानस्यानिवार्य तत्त्व मन्यते ।

### ३.१६.६.४ वाक्ययोजना

उच्यतेऽनेनेति विग्रहे वचपरिभाषणे धातो ऋहलोर्ण्यत् (पा.सू.३-१-१२४) इति ण्यति आदिवृद्धौ चकारस्य ककारे च कृते वाक्यपदं सिद्ध्यति । तथैव युज्धातोः भावे ल्युटि तस्यानादेशे लघूपधगुणे स्त्रीत्वे टापि च सति योजना पदमपि निष्पद्यते । युजिर्धातोर्योगार्थः । वच्धातोः परिभाषणार्थः, इत्थं वाक्यस्य वाक्यानां वा योजनेति विग्रहेण षष्ठीतत्पुरुषसमासे कृते वाक्ययोजनेति साधुः, अतो द्वयोर्बहूनां वा वाक्यानामन्तःसम्बन्धस्थापनम्, परस्परेषु पदगतमर्थगतं वा सङ्गतिकरणम्, पूर्वापरवाक्यानां आकाङ्क्षायोग्यतासत्यादिसम्बन्धेन योजनं वाक्ययोजनम् । आप्टेमहोदयः योजनाशब्दमर्थापयन्नाह-"व्याकरणसम्मतशब्दान्वयो

---

१५१. सोमनाथसिग्द्यालः, *प्रतिसंस्कृता सिद्धान्तकौमुदी,* काठमाडौं : ने.रा.प्र.प्र., (२०१७) पृ.१८६ ।
१५२. पतञ्जलिः, *व्याकरणमहाभाष्यम्,* वाराणसी : चौखम्बाविद्याभवनम्, (२००९), पृ.१३ ।

योजना ।"[२३५] तत्र वाक्येति योजिते वाक्ययोजना भवति, अतोऽनुच्छेदादौ स्थितेषु वाक्येषु पदादिषु वा शब्ददृष्टयाऽर्थदृष्टया वाऽन्वयस्थापनमेव वाक्यान्वयो वाक्ययोजना वा । नेपालीकोशकारो वसन्तकुमारशर्मनेपालस्तु वाक्यनिर्माणम्, वाक्यस्य प्रयोगं, वाक्यरचनाम्, तद्योजनादिकमेव वा वाक्ययोजनमिति परिभाषते।[२३६] काव्ये वृत्तानुरोधेन भावावेशेन वा विशृङ्खलितेषु वाक्यान्तर्गतेषु पदेषु व्याख्यातृभिरन्वयीकरणेनार्थाप्यते अतः काव्यव्याख्यानेऽपि वाक्ययोजनमावश्यकं प्रतीयते । तथैव व्याख्यानतत्त्वान्तर्गतेषु पदच्छेदपदार्थोक्त्यादिषु पञ्चाङ्गेष्वपि पूर्वापरान्तःसम्बन्धोऽपेक्ष्यते दर्शने स सङ्गतिरुच्यते तादृशी सङ्गतिरेवात्र वाक्ययोजनेत्युच्यते । व्याकरणेऽपि वाक्ययोजनमधिकारनाम्नाऽनुवृत्तिनाम्ना च प्रसिद्धा, अतो वाक्ययोजनमपि व्याख्यानस्यानिवार्यं तत्त्वम् ।

### ३.१५.६.५ आक्षेपपूर्वकं समाधानम्

प्राथमिकैस्तर्कैर्विषयोपरि सन्देहमुपस्थाप्य तदन्ते उत्तरपक्षीयेण तर्केण सिद्धान्तकथनेन वा शङ्कानिवारणमाक्षेपपूर्वकं समाधानम् । तर्कप्रधानेषु दार्शनिकग्रन्थेष्वेतत् पूर्वपक्ष-सिद्धान्तपक्षश्चेति द्वाभ्यां तत्त्वाभ्यां प्रसिद्धम् । उपरि पठिते षड्विधलक्षणेऽपि आक्षेपोऽथ समाधानमिति एतद् द्वयं पार्थक्येन निर्दिष्टमस्ति ।

अत्र पूर्वपक्षीयैः कृतं तर्कं खण्डयता समाधानं विधीयते, यद्यप्यस्य प्रयोगो दर्शनादिषु केन्द्रितं तथापि तत्त्वमिदं साहित्यव्याकरणदर्शनमीमांसाधर्मशास्त्रसम्बद्धेषु लाक्षणिकग्रन्थेषु तत्त्वमिदं सार्वभौमरूपेण प्रयुज्यते ।

## ३.१६.७ शब्दशास्त्रीयव्याख्यानतत्त्वानि

रूपसिद्धिप्रक्रियाविश्लेषणकेन्द्रितेषु प्रक्रियाग्रन्थेषु कानि कानि व्याख्यानतत्त्वान्यावश्यकानीत्यत्र पूर्वाचार्याः किमपि न भाषन्ते । यद्यपि सूत्रक्रमेण प्रक्रियाक्रमेण च व्याख्यातानां पाणिनीयव्याकरणसम्बद्धानां शताधिकग्रन्थानां विषयोत्थापन-तद्विश्लेषण-तत्रान्यमतसमुल्लेखनतत्खण्डनपराणि ग्रन्थस्वरूपविश्लेषकाणि च नैकानि तत्त्वानि सन्त्येव तथापि पूर्वाचार्यैः समीक्षकैश्च तेषामनुल्लेखनादधुनावधि तानि गर्भेऽन्तः निहितान्येव, तथा सत्यप्यत्रकाशिकाकौमुद्यादिभिराधारग्रन्थैः शब्दशास्त्रीयव्याख्यानतत्त्वानि निर्धार्यन्ते ।

---

१५३. वामनशिवराम आप्टे, *संस्कृतहिन्दीकोशः*, पूर्ववत्, (१९९३) पृ. ८४० ।
१५४. वसन्तकुमारशर्मनेपालः, *नेपालीशब्दसागर*, पूर्ववत्, (२०५८), पृ.११९१ ।

### ३.१६.७.१ शब्दशास्त्रीयव्याख्यानग्रन्थेषु व्याख्यानपद्धतिभेदः

संस्कृतव्याकरणे शताधिका व्याख्यानग्रन्था विरचिताः सन्ति । तेषु केचन महाभाष्य-प्रौढमनोरमा-शेखरसदृशाः समालोचनप्रधानाः सन्ति चेत् केचन वाक्यपदीय-भूषणसार-मञ्जूषाप्रभृतयोऽर्थसिद्धान्तसम्पोषकाः सन्ति तथैव कतिपये काशिका-प्रक्रियाकौमुदी - सिद्धान्तकौमुदीतुल्या रूपसिद्धिप्रक्रियाद्वारा शब्दसाधुत्वसम्पादने समर्पिताश्च विद्यन्ते । एतेषु मूलतस्त्रिविधेषु शब्दशास्त्रीयव्याख्याग्रन्थेषु ग्रन्थस्वरूपतो व्याख्यानपद्धतावपि स्पष्टो भेदः परिलक्ष्यते । एतेषु सूत्रमेव लक्ष्यीकृत्य व्याख्यातेषु काशिकादिषु, प्रक्रियैव प्रमुखमुद्देश्यं मत्वा विवृतेषु सिद्धान्तकौमुद्यादिषु च रूपसिद्धिद्वारा शब्दसाधुत्वसम्पादनमेव प्रमुखं लक्ष्यं दृश्यते, अत एव प्रक्रिया(रूपसधान)प्रधानीभूता उभयविधा ग्रन्था अपि प्रक्रियाग्रन्थत्वेन तयोर्व्याख्यानपद्धतिश्च प्रक्रियामूलकव्याख्यानपद्धतित्वेन यदा कदा व्यवहृतो दृश्यते । तत् शास्त्रीयमुत व्यावहारिकमेवेति अतः परं विचार्यते ।

### ३.१६.७.२ प्रक्रियाशब्दस्य सूत्रप्रक्रियाक्रमिकयोर्ग्रन्थयोः प्रयोगः

प्रक्रियन्ते प्रकृतिप्रत्ययविभागेन व्युत्पाद्यन्ते शब्दा याभिस्ता इति व्युत्पफ्या प्रक्रियाशब्दो निष्पद्यते । अष्टाध्यायीप्रणालीद्वारा पाणिनीयसूत्राणां पठन-पाठनपद्धतौ काठिन्यमनुभूय लघुना प्रयासेन संस्कृतव्याकरणप्रवेशाय शर्ववर्मप्रभृतिभिराचार्यैः कातन्त्रादिकं नैकविधं पाणिनीयेतरं प्रक्रियाव्याकरणमाविष्कृतम् । तेषां सर्वेषां व्याकरणानामुद्देश्यं शब्दसाधुत्वसम्पादनमेव दृश्यते अतस्तदानी प्रक्रियाशब्दो रूपसिद्धिप्रक्रियायां रुढ आसीत्, परं गच्छति काले पाणिनीयव्याकरणसंरक्षणार्थं सम्बर्द्धनार्थञ्च समर्पितैर्वैयाकरणैः पाणिनीयसूत्रेषु समाश्रिताः प्रक्रियाव्याख्यानभूता ग्रन्था आविष्कृताः, तदनन्तरं प्रकरणक्रमेण व्याख्यातानां प्रक्रियारत्न-प्रक्रियाकौमुदी-रूपावतारः-रूपमाला-सिद्धान्तकौमुदीप्रभृतीनां ग्रन्थानां कृतेः शब्दस्यास्य प्रयोगः प्रचलितोऽभूत्, परन्त्वत्र प्रक्रियन्ते प्रकृतिप्रत्ययविभागेन व्युत्पाद्यन्ते शब्दा याभिस्ता इति व्युत्पत्तिमूलकं व्याख्यानमिति यौगिकार्थं कृत्वा तत्र व्युत्पत्तिजन्यं रूपनिर्माणमिति[२३७] कोशीयार्थञ्च संयोज्य शब्दव्युत्पादनमूलकं व्याख्यानमिति व्यापकोऽर्थः क्रियते । अतोऽत्र प्रक्रियाशब्दतः पाणिनीयसूत्रव्याख्यानसमर्पितैः काशिकादिभिर्गृहीता सूत्रक्रममूला रूपावतारादिभिरङ्गीकृता प्रकरणप्रधाना चेति द्विविधैव सरणिर्ग्राह्या । अनयोर्मध्ये एकस्यां सूत्राणापरस्यामुदाहरणानाञ्च मुख्यत्वेऽपि द्वयोरप्युद्देश्यं व्युत्पत्यादिभिः

---

[१५५] वामनशिवराम आप्टे, *संस्कृतहिन्दीकोशः,* पूर्ववत्, (१९९३) पृ. ६४१ ।

शब्दसाधुत्वनिष्पादनमेवेत्यवधेयम्, अत उभयविधात्मकग्रन्थेष्वपि प्रक्रियाशब्दस्य प्रयोगो भवितुमर्हतीति विचार्य रूपसिद्धिबोधनाय शब्दोऽयमतः परं प्रयुज्यते ।

## ३.१६.७.३ उभयविधप्रक्रियाग्रन्थेषु व्याख्यानतत्त्वसाम्यम्

काशिकायां कानि कानि व्याख्यानतत्त्वानि सन्तीत्यत्र एको व्याख्याता-अनुवृत्तिनिदर्शनोदाहरणदान-प्रत्युदाहरणस्थापन-शङ्कासमाधान- गणपाठसङ्केतेष्टि-परिष्करणानि व्याख्यानतत्त्वरूपेणोररी कुरूते ।[२३८] अष्टाध्यायीभाष्यस्य रचयिता ब्रह्मदत्तजिज्ञासुरपि काशिकाशैल्या पाणिनीयसूत्राणि व्याकुर्वन् काशिकाकारेणानूक्तानि पदच्छेदविभक्तिसमासानुवृत्यर्थोदाहरणभाषार्थाश्चेति व्याख्यानतत्त्वानि[२३९] पूर्वोक्तेषु तत्त्वेषु संयोज्य व्याख्यानतत्त्वानि निर्धारयति । स्वयं काशिकाकारोऽपि ग्रन्थारम्भे इष्टचुपसङ्ख्यानवती... इति वस्तुनिर्देशनात्मकमङ्गलाचरणद्वारा सूत्रेणासङ्गृहीतानां लक्ष्याणां सङ्ग्रहित्रीणामिष्टीनां व्याख्यानम्, गणपाठं निर्धार्य व्याख्यानम्, सूत्राणामर्थापनम् रूपसिद्धिप्रक्रियाप्रबोधनञ्चेति मुख्यतः[२४०] चत्वारि व्याख्यानतत्त्वानि स्वीकरोति । उपर्युक्तानामेतेषां तत्त्वानां संयोजनेन काशिकायामधस्तनानि व्याख्यानतत्त्वानि भवितुं शक्नुवन्तीति विचार्य निर्धार्यते ।

१. अधिकारानुवृत्त्योर्निदर्शनम् ।

२. विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम् ।

३. शङ्कामुत्थाप्य समाधानम् ।

४. मूल एव गणपाठन्यासः

५. रूपसिद्धिप्रक्रियासङ्केतः ।

६. इष्टिभिर्वार्तिकादिभिश्च जटिलतास्फोरणम् ।

७. सूत्रक्रमविन्यासपोषणम् ।

८. अन्याचार्यमतसङ्ग्रहः ।

---

१५६. जयशङ्करलालः (व्या.), *काशिकावृत्तिः* (प्रथमो भागः), वाराणसी : तारा प्रिन्टर्स, (१९८५) पृ. भू. ।
१५७. ब्रह्मदत्तजिज्ञासुः, *अष्टाध्यायीभाष्यम्*, हरयाणा : रामलाल कपुरट्रस्ट, (२०४२) पृ. भू. २-२४ ।
१५८. वामनजयादित्यौ, *काशिकावृत्ति* : (प्रथमो भागः), पूर्ववत्, (१९८३) पृ. ३ ।

सिद्धान्तकौमुद्या मूलेऽधिकारसङ्केतः स्पष्टरूपेण समुल्लिखितो दृश्यते । कौमुदीकारो दीक्षितः पूर्वत्रासिद्धमित्यत्राधिकारोऽयमिति [२४१] वाक्यद्वारा तत् स्पष्टं निर्दिशति । तत् सूत्रव्याख्याता तत्त्वबोधिनीकारोऽपि सूत्रस्यास्य विधित्वे पूर्वं प्रति परमसिद्धमित्येव वाक्यार्थं स्यादित्युक्त्वा तस्याधिकारसूत्रत्वं पुष्णाति ।[२४२] तत्र बालमनोरमाकारोऽप्यधिकारपदं व्याकुर्वन्- अधिक्रियत उपरितनसूत्रजालशेषेण पठ्यत इत्यधिकार इति व्युत्पत्तिद्वारा कर्मणि घञन्तत्वमेव परिपोषयन् तस्य स्वतन्त्रविधित्वस्वीकारे मञः उञो वो वा (पा.सू.८।३।३) इत्यादावनुवृत्तिरसम्भवात् तस्याधिकारसूत्रत्वमेव समर्थयति [२४३] तथैव प्राग्रीश्वरान्निपाताः (पा.सू.१।४।४५) इति सूत्रे इत्यधिकृत्यपदद्वारा प्रत्ययः (पा.सू.३।१।१) परश्च (पा.स.३।१।२) सूत्रयोरापञ्चमाध्यायपरिसमाप्तेरधिकारोऽयमिति वाक्यद्वारा तथैव धातोः (पा.सू.३।१।९१) सूत्रे आतृतीयसमाप्तेरधिकारोऽयमिति वाक्यद्वारा च दीक्षितोऽधिकारसूत्राणि संप्रस्तौतीति व्याख्याने तस्यानिवार्यत्वं स्पष्टीभवति ।

भट्टोजिदीक्षितः, अचो यत् (पा.सू.३।१।९७) इति सूत्रे धातोरिति सूत्रादनुवर्तनीयं धातुरिति पदं, येन विधिस्तदन्तस्येति (पा.स.१।१।२७) सूत्रेण तदन्तविधिं कृत्वा - अजन्ताद्धातोर्यत्स्यादिति सूत्रार्थं कुरूते । अत्र सिद्धान्तकौमुद्याः पाठकाः पूर्वनिर्दिष्टसूत्रार्थः कथमायातीति निश्चेतुं न शक्नुवन्ति परं काशिकाकारस्तु तत्र धातोरित्यावर्तत इति निर्दिश्य स्पष्टतया सूत्रमर्थापयति । काशिकाया अपि प्रक्रियाग्रन्थाङ्गत्वे तत्कृतप्रयोगोऽपि व्याख्यानस्यानिवार्यं तत्त्व मन्तव्यम् ।

सिद्धान्तकौमुदीकाशिकादयः सर्वेऽपि व्याकरणसम्बद्धव्याख्यानग्रन्थाः पदच्छेद-व्युत्पत्ति-विग्रह-प्रकृतिप्रत्ययोदाहरण-प्रत्युदाहरणनिदर्शनेषु समर्पिताः सन्ति, अतः पदच्छेदद्वाराऽ-भीष्टार्थप्रतिपादनमस्य मुख्यं लक्ष्यम् । यथा-उपदेशेऽजनुनासिक इत् (पा.स.१।३।२) इति सूत्रे उपदेशपदं व्याख्यायन् दीक्षित उपदेशनमुपदेश इति व्युत्पत्तिं प्रदर्श्य तस्य भावघञन्तत्वं साधयित्वा आदेच उपदेशेऽशिति सूत्रस्थं भाष्यमुद्धरन् धातुसूत्रगणोणादीनुपदेशपदार्थत्वेन समुल्लिखति । एतत् सर्वं पदच्छेदव्युत्पत्यादिभिर्लभ्यमित्यवधेयम् । सिद्धान्तकौमुद्यां व्युत्पत्ति-विग्रहः-प्रकृतिप्रत्यय-पदच्छेदादिभिरर्थापने शिष्टशरणमङ्गीकृतं प्राप्यते, सिद्धान्तकौमुदीकारः

---

१५९. भट्टोजिदीक्षितः, *सिद्धान्तकौमुदी,* पूर्ववत्, (१९७४) पृ. ७ ।
१६०. ज्ञानेन्द्रसरस्वती (व्या.), पूर्ववत् (१९७४) पृ. ७ ।
१६१. वासुदेवदीक्षितः, *सिद्धान्तकौमुदी* (प्रथमभागः), वाराणसी : चौ. सु. भा. प्र., (१९९६) पृ. ३१ ।

पृषोदरादीनि यथोपदिष्टमिति सूत्रे शिष्टपरम्परामनुसृत्य साधनीयानां केषाञ्चन रूपाणां निर्माणप्रक्रियामेवं सङ्केतयति-

भवेद् वर्णागमाद्धंसो सिंहो वर्णविपर्ययात् ।

गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम् ॥ [२४४]

अतो न केवलं प्रकृतिप्रत्यादिविच्छेद एव व्याकरणस्योद्देश्यमपि तु वर्णागमवर्णविपर्यय-वर्णविकार-वर्णनाशैरुदाहरणनिर्माणं तेनैव माध्यमेन शब्दसाधुत्वसम्पादनमप्यस्योद्देश्यं प्रतीयते। अतः-पदच्छेद-विग्रह-प्रत्युदाहरणोदाहरणसंस्थापनं प्रक्रियाप्रधानायाः सिद्धान्तकौमुद्या मुख्यमभीष्टमिति निगदितुं शक्यते ।

रामचन्द्राचार्यस्य प्रक्रियाकौमुदीमाश्रित्य तत्रत्योदाहरण-प्रत्युदाहरण-शङ्कासमाधानादिकञ्च पर्यालोच्य विरचितायां सिद्धान्तकौमुद्यां समासविग्रहादिकरणे, वार्त्तिकसमीक्षणे शङ्कामुद्भाव्यसमाधाने च प्रक्रियाकौमुद्यपेक्षया व्यापकदृष्टिरवलम्बिता वर्तते । दीक्षितोऽयं कतिपये स्थाने वृत्तिद्वयं कृत्वापि सूत्रमर्थापयते, तादृशमुदाहरणमेकं सन्वल्लघूनि....(पा.सू.७।४।९३) इति सूत्रे प्राप्यते । तत्र महाभाष्यकारो द्विविधामेव वृत्तिं समुल्लिखति, तदनुकर्ता दीक्षितोऽपि तत्रत्यां भाष्यवृत्तिं यथावदुपन्यसति, तथाहि- चङ्परे इति बहुव्रीहिः, स चाङ्गस्येति द्वयमप्यावर्तते, अङ्गसंज्ञानिमित्तं यत् चङ्परं णिरिति यावत्, तत्परं यल्लघुस्तत्परो योऽङ्गस्याभ्यासस्तस्य सनीव कार्यं स्यात् णावग्लोपेऽसति । अथवा अङ्गस्येति नावर्तते, चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपरस्तस्येत्यादि प्राग्वत् ।[२४५] इत्थं शङ्किते स्थाने द्विविधाभ्यामेव वृत्तिभ्यां समाधानं सिद्धान्तकौमुद्या धर्मः । अन्यविधाः सामान्यशङ्कास्तु कौमुद्यां यत्रतत्र प्राप्यन्ते । तेभ्य उदाहरणमेकं घेर्ङिति (पा.सू.७।३।१११) इत्यतो गृह्यते, यथा- घेः इति किम् ? सख्ये, ङिति किम् ? हरिभ्याम्, सुपि किम् ? पट्वी ..।[२४६] एतादृशीभिः शङ्काभिः समाधानैश्च कौमुदीकारः सूत्रस्थं पदमन्वर्थीकुरूते । अतः शङ्कामुत्थाप्य समाधानमपि कौमुद्याः प्रमुखं तत्त्वम् ।

---

१६२. भट्टोजिदीक्षितः, *सिद्धान्तकौमुदी* (सम्पूर्णा) पूर्ववत् (१९७४), पृ. २६९ ।
१६३. भट्टोजिदीक्षितः, *सिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४) पृ. ४२७ ।
१६४. पूर्ववत् पृ. २७८ ।

काशिकायामिव सिद्धान्तकौमुद्यां प्रक्रियाकौमुद्याञ्च मूल एव गणपाठो नैवोपन्यस्तो वर्तते । द्वयोः कौमुद्योः परिशिष्टभागे गणपाठो समुपन्यस्तः । काशिकायान्तु मूल एव तदुपन्यस्तः, अतो मूले गणपाठप्रयोगः काशिकाया वैशिष्ट्यं प्रतीयते ।

सिद्धान्तकौमुदीकाशिकादीनां प्रक्रियाव्याख्यानग्रन्थानां बालमनोरमान्यासादीनां तट्टीकानामपि प्रमुखमुद्देश्यं प्रक्रियानिरूपणमेव । अतोऽत्र प्रक्रियाया विशदव्याख्यानं विश्लेषणञ्च समुपलभ्यते, अस्मिन् क्रमे कतिपयासु रूपसाधनप्रक्रियासु काशिकासिद्धान्तकौमुदीप्रक्रियाकाराः परस्परं विभजन्ते । प्रक्रियाकौमुद्यां मनोरथ इति रूपसिद्धयेऽवलम्बिता प्रक्रियात्रोदाहरणाय प्रस्तूयते- "मनस् रथ इत्यत्र रुत्वे कृते हशि च इत्युत्वे तथा रोरि इति रेफलोपे च प्राप्ते पूर्वत्रासिद्धम् इत्युत्वमेव मनोरथः ।[२४७] प्रक्रियाकारोऽत्र रेफलोपोत्वयोरेकत्रप्राप्तयोः पूर्वत्रासिद्धमिति सूत्रद्वारा उत्वं साधयति परं सिद्धान्तकौमुदीकारस्तु विप्रतिषेधे परं कार्यमिति सूत्रद्वारा पूर्वत्रासिद्धमिति सूत्रस्थं त्रिपादीशास्त्रमसिद्धं विधायोत्वं कारयति, अर्थात् प्रक्रियाकौमुद्यां विप्रतिषेधे परं कार्यमित्यस्य चर्चामकृत्वैव पूर्वत्रासिद्धमिति नियमेन समाधानं विहितम्, सिद्धान्तकौमुद्यान्तु विप्रतिषेधसूत्रस्मरणपूर्वकं भाष्याशयानुकूलं समाधानं पूर्वत्रासिद्धमिति सूत्रोपस्थापनेन विहितमिति विशेषः ।

सिद्धान्तकौमुदीप्रक्रियाकौमुद्योर्भाष्यवचनसङ्ग्रहितॄणामिष्टीनां साक्षात् प्रयोगो न प्राप्यत इति गवेषकाः प्राहुस्तथापि तत्रेष्टचर्थकबोधकानि (द्विपर्यन्तानामेवेष्टिः, गतिकारकेतरपूर्वपदस्य यण् नेष्यते प्रभृतीनि) दशाधिकानीष्टिवार्त्तिकानि प्राप्यन्ते । तेषामपि व्याख्याने सामान्यं योगदानं दृश्यते । तथैव प्रक्रियाव्याख्यानग्रन्थेषु समागताः वार्त्तिक-फक्किका-कारिका-परिभाषान्यायादयो रूपसाधने समागतां जटिलतां, सूत्रार्थापने जायमानं काठिन्यञ्च दूरीकुर्वन्ति । तीयप्रत्ययान्तेभ्यः शब्देभ्यः सर्वनामसंज्ञाया अभावेन द्वितीयतृतीयशब्दाभ्यां स्मैस्मादादिष्वादेशेष्वप्राप्तेषु प्रक्रियाकारः 'तीयस्य ङित्सु वा सर्वनामता वाच्या' इति वार्त्तिकद्वारा तत्साधयति । तत्रैव प्रकाशव्याख्याता प्रकारवचने जातीयर् (पा.सू. ५।३।६९) इत्यनेन जातीयर् प्रत्ययनिष्पन्नानां पटुजातीयः ब्राह्मणजातीयः इत्यादीनां पूर्वोक्तेन वार्त्तिकेन सर्वनामता भवति नवेति शङ्कामुद्भाव्य द्वे स्तीयः (पा.सू. ५।२।५४), त्रेः सम्प्रसारणञ्च (पा.सू. ५।२।५५) इत्याभ्यां विहितानां तीयप्रत्ययान्तानामेवात्र सर्वनामता

---

१६५. रामचन्द्राचार्यः, *प्रक्रियाकौमुदी* (स्त्रीप्रत्ययान्ता), वाराणसी : सं. सं. वि., (१९७७) पृ. १७८ ।

नान्यस्येति प्रक्रियाक्रमप्राप्तायाः शङ्कायाः समाधानञ्च दर्शयति ।[२४८] काशिकाकारोऽपि बहुत्र वार्त्तिकादिभी रूपाणि साध्नोतीति प्रक्रियाव्याख्यानस्य तत्त्वरूपेण वार्त्तिकादीनां प्रयोगोऽपि स्वीकरणीयो भवति ।

अन्येषामाचार्याणां मतस्थापने विश्लेषणे च काशिकाकौमुद्यादयः समानाः प्रतीयन्ते । यद्यपि कोऽधिकतरमन्येषां मतं सङ्गृह्णातीति सन्देहे सिद्धान्तकौमुद्येव सर्वोच्चं स्थानमावहति तथापि न्यूनाधिकरूपेण सर्वैरेव व्याख्यातृभिः सादरमन्येषां मतानि सङ्गृहीतानि दृश्यन्ते । बहुव्रीहौ सर्वनामता भवति नवेति संशये प्रक्रियाकौमुदीकारः प्रथमं सूत्रकारमतमुपस्थाप्य तत्रान्यमतान्यपि सादरं प्रस्तौति, तदेवं- "सूत्रकारमते बहुव्रीहौ न सर्वनामता, भाष्यकारमते तु गौणत्वमात्रे, त्वत्कपितृको मत्कपितृक इत्यत्र समासावयवयोर्युष्मदस्मदोः सर्वनामत्वादनङ्गकार्यत्वेनाकच् स्यात् स मा भूत् किं तु कप्रत्यय एव स्यात् इत्येतदर्थमिदं सूत्रमिति न्यासकृन्मतमिति ।"[२४९] अत्र प्रक्रियाकारेण सूत्रात्मकतया सूत्रकारस्य, महाभाष्यस्य, न्यासकारस्य च मतं सादरं गृहीतं दृश्यते । सिद्धान्तकौमुदीकारोऽपि कुत्रचित् स्वमतसुदृढीकरणाय कुत्रचिद् मतभेदप्रस्तुतीकरणाय च बहुत्र अन्याचार्यमतं गृह्णाति, तेभ्यो बृद्धिविषयकमुदाहरणमेकं प्रस्तूयते । क्विप् प्रत्ययेन 'कवि' इत्यस्माद्धातोर्लुङि सिचि वृद्धि परस्मैपदेषु (पा.सू ७-२-१) इति वृद्धिर्विधीयते नवेति सन्देहे दीक्षितोऽत्र कैयटमाधवयोर्मतमेवमुपस्थापयति- "सिचि वृद्धि... इत्यत्र धातोरित्यनुवृत्त्य धातुरेव यो धातुरिति व्याख्यानात् नामधातोर्न वृद्धिरिति कैयटादयः, अतोऽकवयीत् इत्येव, माधवस्तु नामधातोरपि वृद्धिमिच्छति, अतोऽकवायीत् इति ।"[२५०] अतः प्रायो व्याख्यातारः पूर्ववर्त्तिनां समकालिकानां वा प्रथिताचार्याणां मतं सादरं गृह्णन्तीति अन्याचार्यमतसङ्ग्रहोऽपि व्याख्यानतत्त्वम् । अतः प्रक्रियाकेन्द्रितासु काशिका-कौमुद्यादिषु व्याख्यानग्रन्थेष्विष्टिव्याख्यानं मूल एव गणपाठस्योपस्थापनञ्चेति तत्त्वद्वयं परित्यज्यान्यानि सकलतत्त्वानि गृहीतव्यानीति । तथैव ग्रन्थस्वरूपम्, सूत्रवार्त्तिकरूपादीनां भाषायाः शैल्याश्च स्वरूपं कीदृशमस्तीत्यपि प्रकृतप्रसङ्गे स्मरणीयं वर्तते, अतोऽत्र प्रकरणसङ्घटनं शैलीशिल्पमपि व्याख्यानतत्त्वरूपेण ग्राह्यमिति सम्मेल्य सप्तव्याख्यानतत्त्वान्यधस्तात् क्रमशो निर्धार्यन्ते ।

---

१६६. श्रीकृष्णः (व्या.), *प्रक्रियाकौमुदी,* पूर्ववत्, (१९७७)पृ. २३० ।
१६७. रामचन्द्राचार्यः, पूर्ववत् (१९७७) पृ. २२५ ।
१६८. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (उत्तरार्धम्), दिल्ली : मोतीलालब., (२००५) पृ. ५१८ ।

### ३.१६.७.४ पूर्ववर्त्तिभ्य उभयविधप्रक्रियाग्रन्थेभ्यो व्याख्यानतत्त्वनिर्धारणम्

पाणिनीयसूत्रोपरि ग्रथितानां प्रक्रियाग्रन्थानां व्याख्यानं केन विधिना, कया प्रक्रियया पद्धत्या वा विधेयमिति जिज्ञासायाः सन्तुष्टिकारकः कोऽपि सिद्धान्तग्रन्थो शोधः, सुलेखो वाद्यावधि न सम्प्राप्तः, अतः पूर्वोक्तविश्लेषणेन प्राप्तानि व्याख्यानतत्त्वानि तस्य सिद्धान्तो वाऽवधारणरूपेणात्र स्थापितानि सन्ति । एतेषां निर्माणे संस्कृतस्याधारग्रन्थैः सह नेपालीयपरम्परायां रचिताः सिद्धान्तग्रन्था अप्याधारत्वेनाङ्गीकृताः सन्ति ।

निश्चितमानकसिद्धान्ताभावेऽपि रूपावतारतः सिद्धान्तकौमुदीपर्यन्तं प्रक्रियाक्रमेण रचिता व्याख्यानग्रन्थास्तदुपरि ग्रथिता बालमनोरमाद्यष्टीकाश्च प्रायोऽधिकारानुवृत्ती निदर्शयन्त्यः पदच्छेदोदाहरणादिभिः सूत्रार्थापनेन, तत्रत्येषु कतिपयविषयेषु शङ्कोत्थापनेन, रूपसिद्धिप्रक्रियां सङ्केतयन्त्यो वार्त्तिकादीनि व्याख्यायन्त्यः, परमतमपि समुल्लिखन्त्यश्च स्वकीयं व्याख्यानं पूरयन्ति, अतः काशिकाकौमुद्यामवस्थितानि तट्टीकायाञ्च विद्यमानान्येतान्येव तत्त्वानि व्याख्यानस्रोतांसीति निर्णीय तान्यधस्तात् क्रमशः प्रस्तूयन्ते-

(१) अधिकारानुवृत्त्योर्निदर्शनम् ।

(२) विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम् ।

(३) शङ्कामुद्भाव्य समाधानम् ।

(४) रूपसिद्धिप्रक्रियावबोधः ।

(५) वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम् ।

(६) अन्याचार्यमतसङ्ग्रहः ।

(७) प्रकरणसङ्घटनं शैलीशिल्पञ्च ।

उपर्युक्तानि प्रस्तावितव्याख्यानतत्त्वानि मानकसिद्धान्तं मत्वा उत्तरवर्त्तिष्वध्यायेषु शारदाप्रभायाः सन्धि-सुबन्त-तिङन्तोत्तरतिङन्त-कृदन्त-कारक-तद्धित-समासप्रकरणानि तदन्तर्गतानि विषय- वस्तूनि क्रमशः समीक्षन्ते ।

### ३.१७ अध्यायनिष्कर्षः

भाषावाङ्मये, साहित्ये च व्याख्याबोधकानि-चर्चा-व्याकृति-वर्णन-भाष्य-संसूचन-विवरण-पञ्जिका-टीका-समालोचन-समीक्षा-मीमांसाप्रभृतीनि दशाधिकानि पदानि प्रचलितानि सन्ति । यद्यपि तेषां क्षेत्रं स्वेषु सङ्कायेषु सङ्कोचीभूतमस्ति तथापि तानि सर्वाणि वर्णन-व्याख्याद्यर्थबोधनायैव प्रयुज्यन्ते ।

संस्कृतव्याकरणे प्रथमतः शब्दनिर्वचनं कृत्वा शब्दस्य यौगिकार्थमभिधाय तदुपरि पक्षविपक्षाभ्यामाशङ्क्यान्त उत्तरपक्षेण समाहितं सति सम्भवे वैकल्पिकसमाधानमपि प्रस्तुतं रूपसिद्धिप्रक्रियासमन्वितं कृतवर्णनतुलनादिकं स्वरूपमेव व्याख्यानमित्याम्नाय्यते । व्याख्यानस्यैतत् स्वरूपं दर्शन-निरुक्त-साहित्यादिशास्त्रसम्बद्धे व्याख्यानेऽप्यंशतो मिलति ।

व्याख्यानस्य किं स्वरूपम् ? अत्र कानि तत्त्वानीति गवेषयता वेद-निरुक्त-दर्शन-व्याकरण-साहित्य-लोकव्यवहारेषु विभिन्नानि तत्त्वानि प्राप्तानि । वेदभाष्यकार उवटोऽतिरिक्तपदत्याग-हीननिवेश-विप्रकृष्टसंयोजनानुपूर्वकल्पन-लिङ्ग-धातु- विभक्ति-संयोजनादीनि वैदिकव्याख्यानतत्त्वानीति प्रोक्तवान् । तथैव निरुक्तव्याख्याता दुर्गाचार्यः-तत्त्व-पर्याय-भेद-सङ्ख्या-सन्दिग्धोदाहरण-विभाग-निर्वचनानि निरुक्तीयव्याख्यानतत्त्वानीति स्वीकृतवान् । तेनैव प्रकारेण दर्शनीयतत्त्वनिर्धारकाः समालोचका विषयप्रवेश-संशय-पूर्वपक्ष-सिद्धान्तसङ्गतीश्चेति चत्वारि तत्त्वान्युररीकृतवन्तः । एवमेव साहित्यशास्त्रे व्याख्यानतत्त्वानि निर्धारयता व्याख्यात्रा मल्लीनाथेन सन्दर्भ-प्रसङ्ग-विग्रहान्वयेष्टशब्दप्रयोग-छन्दोऽलङ्कार-गुण-ध्वनि-रस-रीत्यादीनि समुल्लिखितानि । तथैवाधारभूतव्याख्यानतत्त्वरूपेण संस्कृतवाङ्मये पदच्छेद-पदार्थोक्ति-विग्रह-वाक्ययोजनाऽऽक्षेपपूर्वकसमाधानानि प्रस्तुतानि ।

संस्कृतव्याकरणे व्याख्यानसङ्घटकावयवबोधनाय व्याख्यानतत्त्वं न प्रयुक्तम् । अतः शब्दशास्त्रे प्रयुक्ता व्याख्यानप्रक्रिया, व्याख्यानहेतुः, व्याख्यानपद्धतिः, व्याख्यानविधय एव प्रस्तावितव्याख्यान तत्त्व निर्धारणे स्रोतांसि वर्तन्ते । उपर्युक्तेषु पदेषु मध्ये विधिपद्धती न तत्त्वबोधके । ते तु शैलीसन्निकट इति समालोचकानां मतम् । अतः संस्कृतपरम्परायां प्रचलिता व्याख्यानप्रक्रिया वा हेतुरेवाधुनिकैः समालोचकैराम्नातं व्याख्यानतत्त्वम् । प्रकृतेऽध्याये वैदिककालतोऽद्यावधि भाषावाङ्मसम्बद्धेषु व्याख्यानग्रन्थेषु प्रच्छन्नरूपेण स्थितानि तान्येव तत्त्वानि प्रस्तुतानि सन्ति ।

शब्दशास्त्रेऽपि प्रौढमनोरमा-शेखर-महाभाष्यसदृशाः समालोचनात्मका वाक्यपदीय-भूषणसार-मञ्जूषातुल्या विषयव्याख्यानपराः, काशिका-रूपावतार-प्रक्रियाकौमुदी-सिद्धान्त कौमुदीसमानाः प्रक्रियाप्रधानाश्च व्याख्यानग्रन्थाः सन्ति । एषु प्रक्रियाप्रधानेषु ग्रन्थेष्वपि प्रक्रियाकौमुद्याः शब्दसाधुत्वसम्पादनम्, काशिकाया गणपाठेष्टयादिभिः सूत्रव्याख्यानं तथा कौमुद्या रूपसाधनैः शङ्कासमाधानञ्चेति प्रमुखं वैशिष्टयं दृश्यते । अतो ग्रन्थोद्देश्यानुरूपं तेषु ग्रन्थेषु तात्त्विकं वैभिन्यमपि स्वाभाविकम् । तथापि सर्वविधानां ग्रन्थानामालोडनेन समन्वयेन च- अधिकारानुवृत्त्योर्निदर्शनम्, विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम्, शङ्कामुद्भाव्य समाधानम्, रूप सिद्धिप्रक्रियावबोध, वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम्, अन्याचार्यमतसङ्ग्रहः, प्रकरणसङ्घटनं शैलीशिल्पञ्चेति सप्त व्याख्यानतत्त्वान्यत्र निर्धार्यन्ते तथा शारदाप्रभानामके व्याख्यानशरीरे तानि सबलरूपेण स्थितानि सन्ति न वेत्यपरेष्वध्यायेषु परीक्ष्यन्ते ।

चतुर्थोऽध्यायः

# शारदाप्रभायाः संज्ञा-सन्धि-सुबन्तप्रकरणसमीक्षा

## ४.१ विषयपरिचयः

माहेश्वरसूत्र-स्थानप्रयत्न-संज्ञानां निरूपणेऽज्झल्सन्धिपर्यालोचनेऽजन्तहलन्तशब्दानां रूपसिद्धाऽव्ययशब्दनिदर्शने च केन्द्रितं शारदाप्रभायाः प्राथमिकं सुबन्तप्रकरणमष्टाध्यायीक्रमेण प्रारभ्य प्रायः प्रक्रियाक्रमेणाग्रे गच्छति । व्याख्यानेऽस्मिन् बहुत्र कौमुदीक्रमविन्यासो विद्यते, तथापि हल्सन्धितोऽच्सन्धिनिरूपणे, सर्वादित्यदादीनामेकत्रैव पुँस्त्वस्त्रीत्वक्लीबत्वबोधक-रूपशिक्षणेऽकारान्ततो दीर्घेकारान्तस्तत आकारान्तस्तत इकारान्तशब्दसाधुत्वसम्पादने तथैवाजन्तहलन्तपुलिङ्गेऽपि तिङन्तकृदन्तसमासतद्धितान्तर्गतानामुदाहरणानां निदर्शने चायं विन्यासो विच्छिन्नो दृश्यते । अत्रत्येषु पञ्चशताधिकेषु सूत्रेषु व्याख्याताऽयं सूत्रप्रक्रियाक्रमाभ्यां व्यतिरिक्तमपूर्वं क्रममपि निर्धारयति । अत्रैतासां सकलप्रक्रियाणां विमर्शन-परीक्षणं तृतीयाध्यायान्ते समुल्लिखितैर्व्याख्यानतत्त्वैर्विधीयते । पुनश्चावश्यके भाषावृत्ति-कौमुदी-काशिका-प्रक्रियाकौमुद्यादिभिः सह परस्परतोलनेनावश्यकार्थनिस्सारणञ्च क्रियते । वर्णसमाम्नायसूत्रेषु, संज्ञाप्रकरणान्तर्गतेषु स्थानप्रयत्नादिषु चाधिकारानुवृत्ति-विग्रह-रूपसिद्ध्यादिभिः पूर्वोक्ततत्त्वैः परीक्षणासम्भवेन विषयपरिचय-विश्लेषण-तोलनमूल्याङ्कना-दिभिर्व्याख्येयविषयो विव्रियते, एतेषां ग्रहणमत्र प्रक्रियाशब्दतो भविष्यति ।

## ४.२ संज्ञाप्रकरणसमीक्षा

भट्टोजिदीक्षितादिभिः संज्ञाप्रकरणमित्याम्नाते प्रकृतग्रन्थान्तर्गते प्रथमप्रकरणे शारदाप्रभाकारेण माहेश्वरसूत्राणि, स्थानानि, आभ्यन्तरप्रयत्नाः, स्पर्शोऽन्तःस्थोष्मस्वरा इति चतस्रः संज्ञा निरूपिताः सन्ति । तेषां व्याख्यानं शारदाप्रभाकारेण कया पद्धत्या केन विधिना कथं कृतमिति विषयेऽत्र चर्च्यते ।

शारदाप्रभाया व्याख्यायाः प्ररम्भः शिवपार्वत्योर्नमस्कारात्मकमङ्गलाचरणद्वारा कृतोऽस्ति । ग्रन्थारम्भे द्वाभ्यां श्लोकाभ्यां पार्वतीपरमेश्वरौ स्मृत्वा पाणिनीयव्याकरणप्रवक्तॄन्

त्रीन् मुनीन् च संप्रार्थ्य व्याख्यानग्रन्थोऽयं प्रारब्धो वर्तते, तस्मिन् क्रमे ग्रन्थपृष्ठस्योपरि भागे स्थूलाक्षरैर्माहेश्वरसूत्राणि विलिख्याधस्ताद् वर्णविच्छेदप्रक्रियां बोधयित्वा क्य,ख्य,ग्यादिषु संयुक्तवर्णेषु स्वरव्यञ्जनानां पृथक्करणं तिलतण्डुलवत् सरले सत्यपि स्वरव्यञ्जनयोः पार्थक्यप्रदर्शनन्तु पयश्शर्करावत् कठिनं भवतीति सूचितमस्ति । तदनन्तरं माहेश्वरसूत्राध्ययनप्रक्रिया, तेभ्यः प्रत्याहारनिर्माणविधिः, बालेभ्यः सरलतया प्रत्याहारशिक्षणप्रविधयः प्रस्तुताः सन्ति । एते सर्वे विषया वृद्धिरादैच् (पा.सू.१-१-१) इत्यतः पूर्वमुपक्रमरूपेण प्रस्तुता विद्यन्ते ।

## ४.२.१ वर्णसमाम्नायसूत्राणां व्याख्यानप्रक्रिया

शारदाप्रभाव्याख्याया उपक्रमरूपेण समुपन्यस्तेषु माहेश्वरसूत्र-स्थानप्रयत्न-संज्ञेति नामधेयेषु प्रकरणेषु माहेश्वरवर्णसमाम्नायसूत्रं प्रथमतः प्रस्तुतमस्ति । तत्रापि प्रथमं वर्णविच्छेदप्रक्रियां बोधयित्वा माहेश्वरसूत्राणि व्याख्यातानि वर्तन्ते । व्याख्यानेऽस्मिन् 'व्यञ्जनं स्वरेण सः व्यञ्जन'मिति महर्षेर्याज्ञवल्क्यस्य, 'स्वरो उच्चः स्वरो नीचः स्वरितः स्वर एव च स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वर'मिति कात्यायनस्य, न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणं भवतीति महाभाष्यस्य वचनञ्च प्रस्तुत्य स्वरव्यञ्जनेऽर्थापिते । अत्र प्रातिशाख्यमहाभाष्यादिभ्यो व्याकरणग्रन्थेभ्यः प्रासङ्गिकं समुद्धरणमुद्धृतमतः प्रकरणमिदं विश्लेषणात्मकं तुलनात्मकञ्च प्रतीयते । यद्यपि व्याख्याकारोऽयमत्र प्राचीनां पद्धतिमनुसरन्नष्टाध्यायीक्रमेणैव वर्णसमाम्नाय-स्थानप्रयत्न-पाणिनीयसंज्ञादीनां समुल्लेखनं व्याख्यानञ्च कृत्वा प्रकरणमिदमारभते तथापि 'अथ शब्दानुशासनम्' इति माङ्गलिकं सूत्रं न विवृणुते । भाषावृत्तिकारः पुरुषोत्तमदेवस्तु किमर्थं वर्णानामुपदेशः ? इति जिज्ञासामुद्भावयन् "वर्णनामुपदेशः क्रमसन्निवेशानुबन्धासञ्जनार्थम्, तदुभयं संज्ञार्थम्, संज्ञा च लाघवेन शास्त्रप्रवृत्यर्था"[२५१] इत्याह । तत्राकारस्य विवृतोपदेशोऽपि आकारग्रहणार्थ इति तत्रैवाह । हरिप्रसादस्य व्याख्यानशैली तु पूर्ववर्तिभ्यो भिन्नतरा । असौ माहेश्वरसूत्राणां पठनपाठनमावश्यकमिति निर्दिश्यापि तेषां प्रथमपठनप्रयोजनं न ज्ञापयति । अतः किमर्थमिमानि सूत्राणि पठितव्यानीति प्रारम्भिकश्छात्रो ग्रन्थारम्भ एव दिग्भ्रान्तो भवति । काशिकायान्तु 'अइउण्' इत्यादीनि चतुर्दशसूत्राणि महाभाष्यरीत्या व्याख्यातानि सन्ति । तत्र

---

[१]. पुरुषोत्तमदेवः, *भाषावृत्तिः,* वाराणसी : रत्ना पब्लिकेसन्स, (१९८९) पृ. १ ।

प्राथम्येन स्वरवर्णानां विन्यासस्य कारणमुपस्थाप्य ततः सन्ध्यभावकारणम्, हकारस्य द्विरुक्तिप्रयोजनमकारस्य विवृतोपदेशप्रयोजनञ्च प्रस्तुतं विद्यते । तत्राथ शब्दानुशासनमिति सूत्रमपि व्याख्यातमस्ति, तदेवम् "अथ शब्दानुशासनम्, केषां शब्दानां ? लौकिकाना वैदिकानाञ्च, किमर्थं वर्णानामुपदेशः ? प्रत्याहारार्थः, प्रत्याहारो लाघवेन शास्त्रप्रवृत्यर्थं...'[२५२] इत्यादिः । पुनश्च काशिकाकार अइउण् इत्यादौ वर्णानुबन्धनप्रयोजनम्, अकारादिक्रमेण वर्णोपदेशकारणं च निर्दिशति तदित्थं- "अइउ इत्यादिक्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम्, तस्य ग्रहणं भवत्येकेन उरण् रपरः (पा.सू.१-१-५१) इत्यकारेण"[२५३] उपरि स्थितेन निदर्शनेन ज्ञायते यत् काशिकाभाषावृत्यादौ विषयविवेचनं लक्ष्यमस्तिचेत् शारदाप्रभायान्तु सुकुमारमतीनां छात्राणां सारल्येन विषयावबोधो भवत्विति चिन्तनं प्राप्यते, अतोऽत्र विषयविवेचनं तत्र गाम्भीयञ्च सामान्यरूपेणैवापेक्षणीयमिति ।

## ४.२.२ स्थान-प्रयत्न-संज्ञानिरूपणम्

शारदाप्रभायां माहेश्वरसूत्राणां समुल्लेखनानन्तरमथ स्थानानीति शीर्षकद्वारा कण्ठताल्वादीनि स्थानान्येकादशवाक्यैर्निरूपितानि सन्ति । तदनन्तरमथ संज्ञेति शीर्षकद्वारा स्पर्शोऽन्तःस्थोष्मस्वरा इति चतस्रः संज्ञा निरूपिता वर्तन्ते । तत अथाऽभ्यन्तरप्रयत्ना इति शीर्षकद्वारा स्पृष्टेषत्स्पृष्टेषद्विवृत-विवृतप्रयत्ना उल्लिखिताः सन्ति ।

अत्र सिद्धान्तकौमुदी-प्रक्रियाकौमुद्यौ व्यतिक्रम्य शीर्षकाणि निर्धारितानि दृश्यन्ते । दीक्षितवरदराजयोः कौमुदीत्रये प्रथमतः स्थानम्, तत आभ्यन्तरप्रयत्नः, ततो बाह्यप्रयत्नः, ततः संज्ञा निरूपिताः सन्ति । प्रक्रियाकौमुद्यामपि स्थानाभ्यन्तरप्रयत्नानन्तरमेव संज्ञाः समुल्लिखिता दृश्यन्ते परमत्र तु स्थानप्रयत्नमध्य एव- कादयो मावसानाः स्पर्शाः प्रभृतयः संज्ञा निरूपिताः प्राप्यन्ते, अतः शारदाप्रभायां परम्पराप्रचलितः स्थानादिनिर्धारणक्रमः किमर्थं व्यतिक्रान्त इति विचारणीयो विषयः । तथैव शारदाप्रभाकारेण प्रयत्ननिर्धारणप्रसङ्गे बाह्यप्रयत्नो न व्याख्यातः, तेन बाह्यप्रयत्नस्तु झयो होऽन्यतरस्यामिति सूत्रे वाग्घरि-वाग्हरिरिति रूपं साधयता सरूपनिर्देशनेन प्रस्तुतः । प्रक्रियाकौमुदीकारो बाह्यप्रयत्नान् न

---

२. वामनजयादित्यौ, *काशिकावृत्तिः* (प्रथमो भागः),वाराणसी : ताराप्रिन्टर्सवर्क्स, (१९८५) पृ. १४ ।

३. पूर्ववत्, पृ.१५ ।

समुल्लिखति, सवर्णसंज्ञायां तेषामनुपयुक्तत्वमभ्युपगम्यैवाऽयं तान् न समुपदिशतीति मन्ये । स्थाननिरूपणप्रसङ्गे शारदाप्रभाकार एकत्राह-

संस्कृतैः प्राकृतैश्चैव देशभाषादिभिस्तथा ।
गद्यपद्याक्षरैश्चैव बोधयेत् स गुरूः स्मृतः ॥ [२५४]

ब्लुमफिल्ड-नोमचम्स्कीप्रभृतय आधुनिक-भाषाविदः प्राथमिकाञ्छात्रान् प्राकृतभाषया देशभाषया च शिक्षयत्विति निर्दिशन्ति । तथा प्रदत्ता शिक्षा तेषां कृते सुबोध्या सरला च प्रतीयते, तथाविधं शिक्षणमपि प्रभावकं भवतीति तेषां निष्कर्षः, अतस्तादृशसिद्धान्ताननुसरन् आधुनिकं भाषाविज्ञानं प्राथमिकवक्तृभ्यः परिष्कृतां भाषां नाऽपेक्षते । भाषाविदः सोत्साहमुद्घोषयन्ति- "भाषाया अध्ययने तस्याः कथ्यलेख्यावुभावपि भेदौ समानरूपेण ग्राह्यौ । तथाकृते सत्यपठितैः प्रयुक्ता भाषाऽपि कालान्तरे लोकप्रचलनमाध्यमेन साधुत्वमवाप्नोतीति ।" [२५५] हरिप्रसादेन 'देशभाषादिभिश्च शिक्षयेत्' इति सिद्धान्तमनुसरता तादृशीभिर्भाषाभिरपि व्याकरणं शिक्षणीयमिति निर्दिष्टम् । स्वकीये व्याख्यानग्रन्थे बहुत्र तादृशसिद्धान्तः प्रयुक्तश्च । बोल्लितुं, सारितम्, फालयति, मेटयति सदृशीनां क्रियाणां प्रयोगः, संस्कृतमध्येऽपि कठिनस्थाने हिन्दीनेपालीति भाषाद्वयप्रयोगः, नेपालीपरिवेशानुकूलसंस्कृतप्रयोगः, तदनुकूलभाषिकसंरचनानामुपयोगश्च तादृशसिद्धान्त-प्रयोगस्य निदर्शनानि । पारम्परिकाः संस्कृतवैयाकरणा भाषायाः शुद्धं मानकं शास्त्रेषु प्रचलितं रूपमेव व्यवहारेऽप्यपेक्षन्ते । भाषिकशुद्धतायै दृढतरप्रयासमपेक्षन्ते, अतस्ते- नापभाषितवै, समानायामर्थायामवगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः क्रियत इत्याद्युद्घोषयन्ति, परं हरिप्रसादस्तु प्रयोगात्मकविधिमवलम्बमानः परम्परातो नितान्तभिन्नः प्रायोगिकश्च प्रतीयते । स भाषा गतिशीला भवति, सा नदीवत् निरन्तरं प्रवहतीति तर्कयन् संस्कृतेऽपि देशभाषायाः सम्मिश्रणमपेक्षते । यद्यप्येतादृशी शैली परम्परावादिभ्यो न रोचते । ते तादृशी भाषा स्तरहीना सामान्यैव भवतीति टिप्पणयन्ति तथापि प्राच्यानामालोचनं गृह्णन्नपि व्याख्यातायं प्रकृते ग्रन्थेऽर्वाचीनां पाश्चात्यैः स्वीकृतां प्रायोगिकीं पद्धतिमेवोपयुङ्क्ते ।

अकारहकारादीनां वर्णानामुच्चारणं कथं भवति ? फुस्फुसा (नेपालीभाषायां फोक्सो) अन्तर्गतो वायुरकारादिषु कथं परिवर्तते ? इत्यादिषु प्रश्नेष्वाधुनिकभाषावैज्ञानिक-

---

[४]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ. भू. ऐ ।
[५]. भोजराजढुङ्गेलः (२०६७) *सामान्य र प्रायोगिक भाषाविज्ञान*, काठमाडौं : एम. के. पब्लिसर्स पृ. ७४ ।

पाणिन्योर्विचारौ भिन्नौ प्रतीयेते । तत्राधुनिकाः नेपालीभाषाविदः प्राहुः- "ध्वनिर्वस्तुतो वायोर्घर्षणमेवाथवा वायोर्विशेषकम्पनमेव । वर्णाद्युच्चारणक्रमे मस्तिष्कं प्रथमतोऽभिवदनीयानि वर्ण-शब्द-वाक्यादीनि निर्धारयति । ततो मस्तिष्कं स्नायुं फुस्फुसाञ्च ध्वन्युच्चारणप्रक्रियासञ्चालनाय निर्दिशति । उपर्युक्तनामङ्गानां प्रेरणया फुस्फुसातो निःसृतो वायुः प्रथमं स्वरयन्त्रं ततः कण्ठ-तालु-मूर्धा-दन्तादीनभिहन्ति, एतन्मध्ये श्वासप्रवाह-श्वासदिशा-श्वासमात्रा-कण्ठद्वारादीनामपि समुचितं सन्तुलितञ्च योगदानमपेक्षितं भवतीति।"[२५६] परं पाणिनीयशिक्षायां तथा तत्परम्परायान्तु स्थानप्रयत्ननिर्धारण आधुनिकापेक्षं भिन्नतरं मतं प्राप्यते । संस्कृतेऽपि वाक्यपदीये वायोर्विकारो वर्ण इत्यस्य विकल्परूपेणाणुमनोविकारौ उल्लिखितौ । तत्र वाचस्तिस्रोऽवस्थाः- पश्यन्ती-मध्यमा-वैखरीति समुल्लिखितास्ता व्याख्याताश्च । एताभ्यः प्रागवस्था परा तु योगिनां समाधावेव गम्या, अतस्तस्याध्ययनं भाषाविज्ञानस्य कृते दुस्साध्यमिति वाक्यपदीयकाराभिमतम् । अवशिष्टासु तिसृष्ववस्थासु पश्यन्ती वाग् जीवात्मरूपेणान्तश्चेतसि तिष्ठति । सैव वाक् ध्वनौ परिवर्तितुकामा सती प्राणवायौ विवर्तते । ततो जठराग्निना प्रेरितो वायुर्हृदयप्रदेशात् कण्ठप्रदेशान्तमागच्छन् मध्यमारूपतां प्राप्नोति । तत्रैव किं वक्तव्यमिति निर्णीय तदर्थं वर्णकल्पनमपि भवति । ततो मुखप्रदेशाद् निस्सरन् कण्ठ-तालु-दन्तोष्ठ-मूर्धादिष्वभिहत्य वैखरीरूपेण वर्णान् जनयति । तादृशसिद्धान्तं टंकप्रसादन्यौपानेवर्यः स्वकीये भाषाविज्ञानग्रन्थ एवं समुद्धरते-

मूलाधारात् प्रथममुदितो यस्तु भावः पराख्यः
पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः ।
वक्त्रे वैखर्यथ रुरुदिवोरस्य जन्तोः सुषुम्णा
बद्धस्तस्माद् भवति पवनः प्रेरितो वर्णसंज्ञः ॥ [२५७]

पाणिनीयशिक्षानुसारेण तु वर्णोच्चारणनिर्देशक आत्मैव । सोऽयमात्मा बुद्ध्या सहयोगेनार्थनिर्णयाय भावप्रकटनाय वा प्रथमं मनो नियुङ्क्ते । मनः कायाग्निं कायाग्निश्च वायुं नियोजयन् वर्णोच्चारणार्थमभिप्रेरयति । सोऽयं वायुः प्रथमतो हृदयेऽव्यक्तं

---

[६]. टंक न्यौपाने, *सामान्य र प्रायोगिक भाषाविज्ञान,* काठमाडौं : सन लाइट., (२०६८)पृ. ४१-४२ ।
[७]. टंक न्यौपाने, *भाषाविज्ञानको रूपरेखा,* धरान, : नेपाल बुक डिपो, (२०५१) पृ. ११२ ।

ध्वनिमुत्पादयति । ततो मुखविवरे प्राप्तेऽनेकान् ध्वनीन् जनयतीति पाणिनीयशिक्षेत्थं सङ्केतयति-

आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया
मनः कायाग्निमाहन्ति सः प्रेरयति मारूतम् ।
मारूतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ।
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारूतः ॥
वर्णान् जनयते ...।[२५८]

एतेषु त्रिषु भिन्नसिद्धान्तेषु वायुविकार एव शब्द इति बहुभिरूररीकृत इत्यवधेयम् । अणोर्विकार शब्द इत्यत्र मनोर्विकार इत्यत्र वाऽन्य आधुनिकचिन्तका न कुत्रापि चर्चन्ते ।

## ४.२.३ प्राचीनाधुनिकयोर्भाषाविदोरूच्चारणस्थानविभागः

वर्णानां कण्ठताल्वादिस्थानविभागं प्रथमतः संस्कृतवैयाकरणैरेव कृतम् । तदेवाश्रित्य नैपालकैर्भाषाविद्भिरप्याधुनिकपद्धत्या स्थानानि विभक्तानि । देवनागर्यां लिप्यामेव निबद्धायां नेपालीभाषायां यथा संस्कृतवर्णा अनुकृतास्तथैव स्थानान्यप्यनुकृतानि । स्थाननिर्धारणस्य पद्धतिरपि गृहीता । अतः शास्त्रीयव्यवहारे परिसीमितायाः संस्कृतभाषाया स्थानविभागो नेपालीभाषया सह मिलतीति विचार्यात्र स्थानविभाजनप्रसङ्ग आधुनिकशब्देन नेपालीभाषा गृहीता वर्तते । एतस्याः स्थानानि पाश्चाफ्यमतावलम्बिभिर्नैपालकैर्भाषाविद्भिः कैराधुनिकैरूपकरणैः कृतानीत्यत्र चर्च्यते ।

वर्णोत्पत्तिप्रक्रियायामिव वर्णानामुच्चारणस्थानप्रयत्नयोर्निर्धारणेऽपि पाणिनीयव्याकरणा-पेक्षयाऽऽधुनिकं भाषाविज्ञानं सूक्ष्मतरं प्रतीयते । प्राचीना योग-ध्यान-मनन-पुनःपुनरुच्चारणैस्तेषां स्थानादिकं निर्धारयन्ति स्म, परमाधुनिकास्तु ध्वनिरुच्चारकैः- पैलेटोग्राफ (palatograph), ओसिलोग्राफ (oscillograph), इन्क राइटर (ink writer), टेपरिकर्डर (tep recorder), स्पेक्टोग्राफ (spectrograph), स्पिच् ट्रेचर (speech stretcher), पैटर्न प्ले व्याक (pattern playback), काइमोग्राफ प्रभृतिभिः ध्वनिरूपकरणैः[२५९] परीक्ष्य तान् निर्धारयन्ति, अतः प्राचीनविभागापेक्ष्ययाऽऽधुनिकविभागः सूक्ष्मतरः स्वाभाविकश्च मन्तव्यः । पुनश्चाधुनिकाः पूर्वाचार्यकृते विभागे कुत्र त्रुटयः सन्तीति विचार्य तान्

---

८. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्,(२०६०), पृ.९५६ ।
९. भोजराजढुङ्गेलः, *सामान्य र प्रायोगिकभाषाविज्ञान,* पूर्ववत्, (२०६७) पृ. ८०-८१ ।

संशोधयन्तीति तेषां वैशिष्टचम् । अत्र तुलनार्थं प्राचीनाधुनिकयोरुच्चारणस्थानविभागः प्रस्तूयते-

तालिका सङ्ख्या : १० प्राच्याधुनिकयोरुच्चारणस्थानविभागः

| पाणिनिमते | स्थानानि | आधुनिकभाषाविज्ञानमते स्थानानि |
|---|---|---|
| अ,क,ख,ग,घ,ङ,ह | कण्ठः/कण्ठ्यम् | क,ख,ग,घ,ङ । |
| - | कण्ठमूलीयम् | ह । |
| इ,च,छ,ज,झ,ञ,य,श | तालु/तालव्यम् | य । |
| ऋ,ट,ठ,ड,ढ,ण,र,ष | मूर्धा/वर्त्स्यम् | - |
| - | फलकीयवर्त्स्यम् | च,छ,ज,झ,स । |
| - | शिखरवर्त्स्यम् | न,र,ल । |
| - | वर्त्स्यम् | ट,ठ,ड,ढ । |
| लृ,त,थ,द,ध,न,ल,स | दन्तः/दन्त्यम् | त,थ,द,ध । |
| उ,प,फ,ब,भ,म । | ओष्ठः/ओष्ठ्यम् | प,फ,ब,भ,म,व । |
| व | दन्तोष्ठ्यम् | - |
| ए,ऐ | कण्ठतालु: | - |
| ओ,औ | कण्ठोष्ठम्/कण्ठोष्ठ्यम् | - |
| ङ,ञ,ण,न,म | नासिका/नासिक्यम् | - |

यद्यपि कौमुद्यामकुहविसर्जनीयानां कण्ठ इचुयशानां तालु इत्यादिक्रमेण कृतः स्थानविभागो महर्षिणा पाणिनिना पाणिनीयशिक्षायां वृद्धपाठत्वेन लघुपाठत्वेन च कृतस्य सूक्ष्मविभागस्य सारसङ्क्षेप एवेति युधिष्ठिरमीमांसकः संस्कृतव्याकरणशास्त्रेतिहासनामके ग्रन्थे पाणिनीयशिक्षां समुद्धरनुल्लिखति ।[२६०] पुनश्चासौ महर्षिणा पाणिनिना- अकुहविसर्जनीयाः कण्ठ्याः, हविसर्जनीयावुरस्यावेकेषामित्यादिक्रमेण वृद्धपाठे तथा लघुपाठेऽपि प्रायः समानैर्वाक्यैः

---

१०. *पाणिनीयवृद्धपाठे स्थानविभागः* - अकुहविसर्जनीयाः कण्ठ्याः । हविसर्जनीयावुरस्यावेकेषाम् । जिह्वामूलीयो जिह्वः । कवर्गवर्णानुस्वारजिह्वामूलीया जिह्व्या एकेषाम् । कण्ठचनास्यमात्रामित्येके । इचुयशास्तालव्याः । ऋटुरषा मूर्धा । रेफो दन्तमूलीय एकेषाम् । दन्तमूलस्तु तवर्गः । लृतुलसा दन्त्याः । वकारो दन्त्योष्ठचः । सृक्किणीस्थानमेकेषाम् । उपूपध्मानीया ओष्ठचाः । अनुस्वारयमा नासिक्याः । कण्ठचनासिक्यमनुस्वारमेके । यमाश्च नासिक्यजिह्वामूलीया एकेषाम् । ए ऐ कण्ठचतालव्यौ । ओ औ कण्ठचोष्ठचौ । ञमङणनमाः स्वस्थाननासिकास्थानाः । द्विवर्णानि सन्ध्यक्षराणि । सरेफ ऋवर्णः । संयुक्ता वर्णाः । *लघुपाठे वृद्धपाठाद् विशेषस्तु-* कवर्गाऋवर्णश्च जिह्व्यः । एदैतो कण्ठ्चतालव्यौ ..

युधिष्ठिरमीमांसकः, *संस्कृतव्याकरणशास्त्रका इतिहासः* (तृतीयो भागः) हरयाणा : लेखकः, (२०४१) पृ.७३ ।

स्थानानि विभाजितान्यासन्निति ज्ञापयति तथापि महर्षिणा पाठद्वयेऽपि कृतो विभागः सुविस्तृतोऽप्याधुनिकविभागापेक्षया भिन्नतरः, कौमुद्यां कृतेन विभागेन सह प्रायः समानश्चेत्यवधेयम् । प्राच्यनवीनयोर्स्थानविभाग एतदपि वैषम्यं यत् प्राचीनाः 'ञमङणनानां स्ववर्गीयं स्थानं नासिकास्थानञ्च स्वीकुर्वन्ति । नवीनास्तु नासिकास्थानमेव नासिकाप्रयत्नं मन्यन्ते ।[२६१]

## ४.२.४ प्राचीनाधुनिकयोर्भाषाविदोः प्रयत्नविभागः

प्रयतनं प्रयत्नः । वक्त्रा आद्यावयवत ओष्ठान्तैश्चलायमानैर्वर्णप्रत्यायक-ध्वन्युत्पादकैः शरीरावयवैः कृतः प्रयास एव प्रयत्नः । स च संस्कृतभाषावैज्ञानिकैराभ्यन्तरो बाह्यश्चेति द्विधा विभक्तो दृश्यते । वर्णोच्चारणार्थं मुखविवरादाभ्यन्तरिकैरङ्गैः कृतोऽभ्यासस्तस्मान्निसृतो वर्ण आभ्यन्तरस्तस्माद्बहिर्भूतैरङ्गैस्तु बाह्य इति पाणिनिमुनिना तयोः क्षेत्रनिर्धारणमपि कृतम् । आधुनिकास्तु बाह्यप्रयत्नं न स्वीकुर्वन्तीति तेषामुपेक्षया स्पष्टो भवति । प्रक्रियाकौमुदीकारोऽपि प्रयत्नविभागे बाह्यप्रयत्नचर्चां कुत्रापि न कुरुते । शारदाप्रभाकारस्तु वाग्घरिरिति रूपसाधने बाह्यानप्युल्लिखतीति पूर्वमेवोक्तम् । अत्र हरिप्रसादेन स्थानप्रसङ्गे निरूपितस्तथाधुनिकैः सह तुलनाकृतश्चाभ्यन्तरप्रयत्न आधुनिकैः सह तुलनार्थं प्रस्तूयते-

तालिकासङ्ख्या : ११ प्राच्याधुनिकयोराभ्यन्तरप्रयत्नविभागः

| पाणिनिमते | आभ्यन्तरप्रयत्नः | आधुनिकभाषावैज्ञानिकमते |
|---|---|---|
| क,ख,ग,घ,ङ,च,छ,ज,झ,ञ,ट,ठ,ड,ढ, ण, थद,ध,न,प,फ,ब,भ,म । | स्पृष्टम्/स्पर्शी | क,ख,ग,घ,ट,ठ,ड,ढ,त,थ,द,ध,प, फ,ब,भ । |
| - | स्पर्शसङ्घर्षी | च,छ,ज,झ । |
| - | सङ्घर्षी | स,ह । |
| - | नासिक्यः | ङ,न,म । |
| - | प्रकम्पितः | र । |
| - | पार्श्विकः | ल । |
| य,व,र,ल । | ईषत्स्पृष्टम्/अर्धस्वरः | य,व । |
| श,ष,स,ह, अ-अः पर्यन्ताः स्वराः | विवृतम् | - |
| अ (प्रयोगे) | संवृतम् | - |
| अ (प्रक्रियादशायाम्) | विवृतम् | - |

[२६१] हेमाङ्गराज अधिकारी, *समसामयिक नेपाली व्याकरण,* काठमाडौं : कुञ्जलप्रकाशन, (२०४९) पृ.६ ।

स्थाननिर्धारणप्रसङ्ग एकत्र शारदाप्रभाकारो लिखति-"महाभारतयुद्धोत्तरकालात् क्रमशो यथोत्तरं विकृतायां शिक्षापद्धतौ वर्णोच्चारणपरिपाटी भ्रष्टा सञ्जाता, अतोऽद्यत्वे वर्णोच्चारणमात्रेण सर्वेषां वर्णानां स्थानानि निश्चेतुं न शक्यन्ते, तस्मादेवात्र प्रत्येकं वर्णानामुच्चारणस्थानान्युपदेश्यानि भवन्तीति ।"[२६२] एतस्मात् पाणिनिकाले वर्णानामुच्चारणपरिपाटी परिशुद्धाऽऽसीत्, तदा श-ष-सवर्णानामुच्चारणं शुद्धं भवति स्म । उच्चारणे कण्ठताल्वादीनां भेदोऽपि सुस्पष्टतरेण परिलक्ष्यते स्म, परन्त्वधुना शिक्षापद्धतौ भ्रष्टायां जातायां तान्युच्चारणतः परिच्छेत्तुं न शक्यन्त इति शारदाप्रभाकारस्य सङ्केतः ।

वस्तुतः पाणिनिकालिकी तत्पूर्ववर्त्तिन्युत्तरवर्त्तिनी वा स्थानादिनिर्धारणपद्धतिरन्तः साक्ष्यात्मिका चिन्तनमूला चासीत्, अतः तत्तुलनायामाधुनिकैः कृतो विभागोऽनेकैर्ध्वनिसंयन्त्रैः प्रमाणितो वस्तुतथ्यात्मकः प्राचीनविभाजनतः सूक्ष्मप्रक्रियया कृत इति प्रायशो भाषाविद आमनन्ति, तथापि परम्परानुरक्ता जना ध्वनिसंयन्त्रम्, कालान्तरे जातं भाषिकपरिवर्तनञ्च सामान्यतो न स्वीकुर्वन्ति, अतस्तादृशानां जनानां मनस्यधुना उच्चारणस्थानादीनि विकृतानि जातानीति भ्रान्तधारणा जागृता दृश्यते । गतिशीलासु भाषासु कालान्तर उच्चारणगतं संरचनागतञ्च परिवर्तनं जायत एव, तत् स्वाभाविकमपि, अतः स्थानादिषु परिलक्षितं परिवर्तनमपि कालजन्यं परिवेशजन्यं वा भवितुं शक्नोतीति शारदाप्रभाकारेण तत्र प्रस्तुता धारणा विचारणीया प्रतीयते ।

शारदाप्रभेयं प्राथमिकच्छात्रकेन्द्रिता, अतोऽत्रत्या विषयख्यापनशैली दृष्टान्तमूला । व्याख्याकारोऽयं स्थानशिक्षणसन्दर्भे- गावः कुत्र वसन्ति ? मत्स्याः कुत्र निवसन्ति ? इत्यादि प्रश्नान् कृत्वा गोमत्स्यादीनां नियतस्थानमिव कण्ठताल्वादिवर्णानामपि कण्ठ्यादिकं नियतं स्थानं दर्शयति । एतादृशा दृष्टान्ताः प्राथमिकप्रकरणेषु प्रायः पृष्ठेषु प्राप्यन्ते, उत्तरार्द्धेऽपि सामान्यतः सन्त्येव ।

शारदाप्रभाया वैशिष्ट्यन्तु शिक्षकनिर्देशनकेन्द्रीभवनम् । प्रस्तुतव्याख्याने यत्र कुत्रापि तादृशानि निर्देशनानि दरीदृश्यन्ते । अत्रापि स प्राह- भवद्भिः स्थानप्रयत्नयोः शास्त्रीयपरिभाषा न कर्तव्या, छात्रबोध्यभाषायां केवलविषयप्रबोधनमेव कार्यम् ..., पुनश्चापरत्र स निर्दिशन् प्राह- प्रश्नोत्तरपद्धत्या स्थानप्रयत्नौ शिक्षणीयौ, छात्रैः कण्ठस्थीकृते सत्येव पाठोऽग्रे वर्धनीयोऽन्यथा नेत्यादि..., पुनरपरत्राह- छात्रेभ्यो निरन्तरमभ्यासः कार्यः..,

[१२] हरिप्रसादशर्माचार्यः (व्या.) *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ.भू. ए ।

शारदाप्रभायामेतादृशानि निर्देशनानि यत्र तत्र प्राप्यन्ते । तानि शिक्षणविधिनिर्देशने विषयसरलीकरणे पुनः पुनर्मूल्याङ्कने चोपकुर्वन्ति ।

अत्र शारदाप्रभाकारः सिद्धान्त-प्रक्रियाकौमुदीनिर्दिष्टक्रमतो भिन्नरूपेण स्थानानि निरूपय ततः स्पर्शाद्याः संज्ञाः समुल्लिख्य तदनन्तरमेवाऽऽभ्यन्तरप्रयत्ननान् समुल्लिखति, अत्रत्ये क्रमव्यत्यये तेन न किमपि कारणं प्रस्तुतम् । पक्षेऽस्मिन् दृढतरतर्कोऽपि न प्राप्यते अतोऽत्रत्यः क्रमव्यत्ययो विचारणीयः प्रतीयते ।

## ४.३ सन्धिप्रकरणसमीक्षा

प्रकृतव्याख्याताऽत्र स्वादिसन्धिस्थान् विसर्गसन्धिस्थानपि विषयान् हल्सन्धावेव सङ्क्षेपतः प्रस्तुत्याच्सन्धौ प्रविशति । अच्सन्धावपि प्रकृतिभावसन्धौ व्याख्येयान् विषयान् परिचयात्मकरूपेणैवोपस्थाप्य विशेषतः सवर्णदीर्घ-गुण-वृद्धि-यणादीन् निरूपयति । अतः कौमुद्यां प्रस्तुता विसर्ग-स्वादि-प्रकृतिभावाख्याः सन्धयोऽत्र पूर्वोक्ते हल्सन्धावच्सन्धौ चान्तः गर्भीकृता दृश्यन्ते ।

अत्र शब्दशास्त्रीयव्याख्यानतफ्वदृष्टचा सन्धिद्वये स्थिता विषयाः क्रमशो विविच्यन्ते -

शारदाप्रभाकारो हल्सन्धिप्रकरणतः सन्धिप्रकरणमारभते । व्यञ्जनेऽन्तर्निहिताः स्वराः प्राथमिकेभ्यश्छात्रेभ्यो न दृग्गोचरीभवन्ति, व्यञ्जनानि तु स्पष्टतया परिलक्ष्यन्त अतः प्राथमिकच्छात्राणां कृते प्रथमं स्वरसन्धिशिक्षणं दुष्करं भवतीति तर्कयन् शारदाप्रभाकारो हल्सन्धितः सन्धिप्रकरणं प्रारभते ।

शारदाप्रभाया हल्सन्धिप्रकरणे न कौमुदीक्रमेण नाप्यष्टाध्यायीक्रमेण सूत्रादीनि न्यस्तानि । व्याख्यातायं वाऽवसाने (पा.सू. ८-४-५६), झलां जश् झशि (पा.सू. ८-४-५३), विसर्जनीयस्य सः (पा.सू. ८-३-३४), रो रि (पा.सू. ८-३-१४) आदीनि भिन्नप्रकरणान्तर्गतानि कानिचन सूत्राणि हल्सन्धौ समानीयात्रत्यान्यपि कानिचन सूत्राणि तु द्वितीयाध्ययनार्थमपसार्य पञ्चविंशतिसूत्रेषु षड्वार्त्तिकेषु च प्रकरणमिदं विन्यसति । पुनश्च कौमुद्यां विसर्गसन्धौ पठितानि ससजुषो रुः (पा.सू. ८-२-६६), भो भगोअघोअपूर्वस्य योऽशि (पा.सू.८-३-१७) प्रभृतीनि कानिचन सूत्राणि तु द्वितीयेऽच्सन्धिप्रकरणे विन्यस्य व्याख्याति । तथैव संज्ञाप्रकरणे पठनीयानि उपदेशेऽजनुनासिक इत् (पा.सू. १-३-२), अदर्शनं लोपः (पा.सू. १-३-६), अदेङ् गुणः (पा.सू. १-१-२) प्रभृतीनि संज्ञासूत्राण्यपि हल्सन्धावेव नयति । तेनैव प्रकारेण विधिसूत्रमध्य एव पूर्वत्रासिद्धम् (पा.सू. ८-२-१) इत्यधिकारसूत्रं उरण् रपरः (पा.सू. १-१-५१)

इति परिभाषासूत्रञ्च कार्यानुरोधेनैवात्र निर्धारयति । एतेषां सर्वेषां सूत्राणां प्रकरणान्तर उत्क्रमणं कार्यानुरोधेन सरलतापादानाय च कृतमिति व्याख्याकारोऽयं स्मारं स्मारं स्पष्टीकरोति । आगमनविधिनिदर्शका आधुनिका शिक्षाविद उदाहरणमुखेन लक्ष्यं साधयन्तीति शारदाप्रभाकारोऽपिताननुकुरुत इत्यत्रत्येन विन्यासेन ज्ञायते ।

शारदाप्रभाया अध्ययनसमीक्षणविमर्शनमनेकाभिर्युक्तिभिः शैलीभिश्च कर्तुं शक्यम्, तासु ताफ्विकविमर्शः प्रारम्भिको मन्यते । अद्यावधि कैरपि समालोचकैरनुसन्धातृभिश्च शारदाप्रभेयं न व्याख्याता नापि मूल्याङ्कनीकृता, अतः प्रथमाध्येतृत्वेन प्रकृतानुसन्धात्रा तृतीयाध्यायान्ते निर्धारितैरधिकारानुवृत्त्योर्निदर्शनम्, विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम्, शङ्कामुद्भाव्य समाधानम्, रूपसिद्धिप्रक्रियावबोधः, वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम्, अन्याचार्यमतसङ्ग्रहः, प्रकरणसङ्घटनं शैलीशिल्पञ्चेति सप्ततफ्वैः, ततः प्राक् प्रदत्तेन विषयपरिचयेन यथासम्भवं समीक्षण-विश्लेषण-मूल्याङ्कनैरन्यैः सह तोलनैश्चात्र प्रकृतप्रकरणस्था विषया विमृश्यन्ते ।

## ४.३.१ अधिकारानुवृत्त्योर्निदर्शनम्

अधिक्रियत असाविति व्युत्पत्याऽधिकारशब्दो निष्पद्यते । स च 'एकत्रोपात्तस्यान्यत्र व्यापारोऽधिकारः' इति लक्षणेन व्यापकदेशवृत्तिमानिति मन्यते । अष्टाध्यायीव्याख्याता ईश्वरचन्द्रवर्योऽधिकारानुवृत्त्योः प्रायः समानं धर्मं दर्शयति, तयोर्भेदस्त्वधिकारो दूरदेशान्तगतिमान्, अनुवृत्तिस्तु तदपेक्षया स्वल्पदेशगतिमतीति । तथैवाधिक्रियमाणं सूत्रं प्रायः समग्रमग्रेऽनुवर्तते चेदनुवृत्तिस्तु समग्रमर्धमंशं वाऽपि गच्छतीति भेदः ।[२६३] अधिकारसूत्रं कियद् दूरान्तं गच्छतीत्यत्र पाणिनिना न कुत्रापि सङ्केतिमतस्तज्ज्ञानाय व्याख्यानमेव शरणमिति स्वरितेनाधिकारः (पा.सू.१-३-११) इति सूत्रे नागेशः सूचयति ।[२६४] एतादृशोऽधिकारः सिंहावलोकनमिव, मण्डूकप्लुतिरिव, गङ्गाप्रवाह इव चेति पारम्परिकैर्व्याख्यातृभिस्त्रिधा विभाजितो दृश्यते ।

---

[१३.] ईश्वरचन्द्रः (व्या.) *अष्टाध्यायी*, (प्रथमो भागः), दिल्ली : चौखम्बासंस्कृतप्रति., (२००४) पृ. भू. ८-९ ।
[१४.] नागेशः *लघुशब्देन्दुशेखरः* वाराणसी : चौखम्बासुरभारतीप्रकाशनम्, (२००६) पृ. ११२ ।

## ४.३.१.१ सन्धिप्रकरणेऽधिकारनिरूपणम्

शारदाप्रभाया हल्सन्धावच्सन्धौ चैकमेवाधिकारसूत्रमायाति तच्च पूर्वत्रासिद्धम् (८-२-१) इति । तद् द्वितीयेऽच्सन्धिप्रकरणे छात्रा इमे, गुरा उत्क इति रूपसाधनक्रमे लोपः शाकल्यस्य (पा.सू. ८-३-१९) इति सूत्रादनन्तरं कार्यानुरोधेन निर्धारितम् । शारदाप्रभाकारोऽयं पूर्वव्याख्यातारं दर्शनकेशरिमहोदयमनुसरन्नधिक्रियमाणं समग्रमेव सूत्रं स्थूलाक्षरैः सङ्केतयति, अधिकारोऽयमष्टाध्याय्या अन्तावधिर्गच्छतीति सूचयति च । पुनश्चास्याधिकारादेव पूर्वं प्रति परमसिद्धमिति वाक्यार्थोऽन्वग्भवतीत्यपि बोधयति । एवमेव पूर्वत्रासिद्धमिति सूत्रस्थं पूर्वपदं विवृण्वन्- पूर्वपरयोः सापेक्षत्वम्, सपादसप्ताध्यायीत्रिपाद्योर्लक्ष्यञ्चात्रैव निर्धारयति । अष्टमाध्यायस्य द्वितीयपादारम्भे पठितादेतस्मात् सूत्रात् त्रिपाद्यां सर्वत्राधिकारगमनाद् गङ्गाप्रवाहवदस्याधिकारो मन्तव्यः ।

## ४.३.१.२ सन्धिप्रकरणेऽनुवृत्तिनिरूपणम्

अधिकारतुल्यत्वेऽपि स्वल्पदेशवृत्तिमत्यनुवृत्तिः । समग्रसूत्रानुवर्तनेंऽशानुवर्तने वा पाणिनिनिर्दिष्टा द्वितीया रीतिरियम् । लघूनोपायेन सूत्रार्थबोधाय पुनरुक्तिनिवारणाय च पाणिनिनाऽनुवृत्तिः परिकल्पिता, सा च पाणिनीयव्याकरणस्य सर्वोत्तमा प्राप्तिरिति समालोचकैराम्नाय्यते । एतादृश्यनुवृत्तिः च, अपि प्रभृतिभिः पदैः कुत्रचित् तेन विनापि सूत्रप्रसङ्गत आनीयते । तत्र सन्धिप्रकरणयोः स्थितेषु सूत्रेषु मध्ये- कुप्वोः क पौ च (पा.सू. ८-३-३७), खरि च (पा.सू. ८-४-५५), हशि च (पा.सू. ६-१-११४) इत्यादौ चकारेण पूर्वविषयोऽनुवर्त्यते चेत् ष्टुना ष्टुः (पा.सू. ८-४-४१) सूत्रे त्वनुवर्तकं पदं विनापि स्तोः श्चुना श्चुः (पा.सू. ८-४-४०) इति सूत्रात् स्तोः श्चुरिति पदद्वयं प्रसङ्गतोऽनुक्रियते । अनुवर्तनमपि कुत्रचिद् यथावत् कस्मिँश्चित्तु विभक्तिविपरिणामेन विधीयते, यथा- ष्टुना ष्टुरिति सूत्रे 'स्तोः श्चु'रिति पदद्वयं यथावदनुक्रियते चेत् तस्य लोपः (पा.सू. १-३-९) इति सूत्रे तु विभक्तिविपरिणामेन क्रियते । तथैवोपदेशेऽजनुनासिक इत् (पा.सू. १-३-२) इति सूत्रतोऽनुवर्तितमित्पदं षष्ठचन्ते विपरिणामेन प्रयुक्तम् ।

शारदाप्रभाया हलच्सन्धावच्सन्धौ च पठितेषु सूत्रेषु कानिचन मण्डूकप्लुत्या, कति गङ्गाप्रवाहवत् कतिचिच्च सिंहावलोकनमिवाग्रे पश्चाच्चानुकृष्यन्ते । तान्यत्र क्रमशः समुल्लिख्य व्याख्यायन्ते-

षष्ठाध्यायस्य प्रथमपादस्य एकाशीतितमे सूत्राङ्के पठितं एकः पूर्वपरयोः (पा.सू.६-१-८१) इति सूत्रमुत्तरवर्तिषु ऋत उत् (पा.सू.६-१-१११) सूत्रान्तं तथा प्रासङ्गिकवार्त्तिकेषु च धाराप्रवाहरूपेण गच्छति, अतोऽस्यानुवर्तनं गङ्गाप्रवाहतुल्यं मन्यते । शारदाप्रभाकारेणैतादृशानुवर्तनसङ्केतः स्थूलाक्षरेण सूत्रान्तेऽनुवृत्तिसीमानिर्धारणेन च कृतः, तदेवं-

क) ६-१-८७ **आद्** गुणः - ९६

(आद् इति पदं **उस्यपदान्तात्** पा.सू. ६-१-९६ इति सूत्रान्तं गच्छति ।

ख) ६-१-८८ **वृद्धिरेचि** -९२,८९

(वृद्धिः-**वा सुप्यापिशलेः** ६-१-९२ सूत्रान्तम्, एचि- **एत्येधत्यूठ्सु**(पा.सू.६-१-८९)इत्यन्तं गच्छति ।

ग) ६-१-१०१ **अकः** सवर्णे **दीर्घः** १०७,१०६

(अकः-अमि पूर्वः (पा.सू.६-१-१०७)इत्यन्तं,दीर्घः-**वा च्छन्दसि** (पा.सू.६-१- १०६) सूत्रान्तमनुवर्तते ।

अनेन प्रकारेणानुवर्तनीयानां पदानां गतिसीमादिकं निर्धार्य शारदाप्रभाकारः सरलतयानुवृत्तिं बोधयति । अत्रत्ये शर्परे विसर्जनीयः (पा.सू.८-३-३५), विसजनीयस्य सः (पा.सू.८-३-३४) इति सूत्रद्वये खरवसानयोर्विसर्जनीयः (पा.सू.८-३-५५) इति सूत्राद् मण्डूकप्लुत्या खरीति पदमनुवर्तत इति बालमनोरमाकारः सूचयति[२६५] तं प्रौढमनोरमाकारोऽपि समर्थयति, परं शारदाप्रभाकारस्त्वत्र खरीति पद कथं समागतमिति कारणं विनैवानुवृत्तिं निर्दिशति ।[२६६] अनुवर्तितं पदमपि कुत्रचिद् यथावद् विन्यसति चेत् कुत्रचित्तु विभक्तिविपरिणामेन प्रस्तौति, यथा- इको यणचि (पा.सू.६-१-७७) सूत्रादुत्तरसूत्रे गतमचीति पदं एचोऽयवायावः (पा.सू.६-१-७८), वान्तो यि प्रत्यये (पा.सू.६-१-७९) प्रभृतिषु सूत्रेषु यथावत् प्रयुज्यते चेदनुनासिकात्परोऽनुस्वारः (पा.सू. ८-३-४) इति सूत्रे तु- अत्रानुनासिकः पूर्वस्य तु वा (पा.सू.८-३-२) इति पूर्वसूत्रादनुवृत्तं पूर्वस्येति षष्ठ्यन्तं पदं पञ्चम्यन्ते विपरिणमय्य प्रयुक्तम्, अत एव भट्टोजिदीक्षितः प्राह-“अनुनासिकं विहाय रोः पूर्वस्मात्

---

[१५]. वासुदेवदीक्षितः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* वाराणसी : चौ.सु.भा.प्र.,(१९९६) पृ. १६३-१६४ ।
[१६]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ.७०४ ।

परोऽनुस्वारागमः स्यादिति ।[२६७] अत्र शारदाप्रभाकारस्त्वनुवर्तनप्रकारं विभक्तिविपरिमाणञ्च समुल्लिख्यैव प्रकृतसूत्रमेवमर्थापयते तदेवं-"अत्रानुनासिकं विहाय रूप्रकरणस्य विधेयात् पूर्वस्मात् वर्णात्  परतोऽनुस्वारागमो भवतीति । अत्र ल्यब्लोपे पञ्चमीति वार्त्तिकेन पञ्चमी विधानात् पूर्वस्येति षष्ठ्यन्तं पदमपि पञ्चम्यन्ताय कल्पत इति ।[२६८] अनेन निर्देशनेनाप्यनुवृत्तिसङ्केतविषये शारदाप्रभाकारः सुदृढोऽस्तीति निश्चयेन वक्तुं शक्यम् ।

सिंहस्यावलोकनमिवाग्रे पश्चाच्चावलोकनमस्ति यस्य स इति व्युत्पत्त्या बहुव्रीहिसमासेन सिंहावलोकनमिति पदं निष्पद्यते, तद्वदत्रापि समग्रसूत्राणां सूत्रस्थपदानां वाऽनुवृत्तिस्तस्मादुत्तरं कतिपये सूत्रे तत्पूर्वमपि गच्छतीति तादृशानुवर्तनस्य नामैव सिंहावलोकितमिति । परं सिंहावलोकनस्य प्रसिद्धिस्तु पश्चदर्शन एव दृश्यते । व्याकरणे तादृशी पश्चानुवृत्तिरपकर्षणपदेन व्यवह्रियते । तादृशोऽपकर्षो हलन्तपुँलिङ्गे अष्टन आ विभक्तौ (पा.सू.७-२-८४) इति सूत्रे तदुत्तराद् रायो हलि (पा.सू.७-२-८५) इत्यस्मादानीतोऽस्तीति तत्रैव निरूपयिष्यते ।

अत्र शारदाप्रभाकारोऽनुवर्तनस्य शास्त्रीये विषये न प्रविशति अतोऽनुवृत्तिप्रकारान् विभक्तिविपरिणामादीश्च स कुत्रापि न सङ्केतयति । नैपालदेशोद्भवेनैकेनापि पूर्ववर्त्तिना व्याख्यात्राऽनुसन्धात्रा वा पाणिनीयसूत्राणामनुवृत्तिनिदर्शरीतिर्न निर्दिष्टेति पाणिनीयसूत्रानुवृत्ति-शिक्षणे भविष्यति दुरवगमः स्यादिति विचार्य तेनात्र प्रथमतः सरलया रीत्या तादृशः सङ्केत एव कृत इति मन्तव्यम् । अत्र पुनर्विचारः, ऊहापोहनन्तु भविष्यति करिष्यन्त्येव सुधियः ।

### ४.३.२ विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम्

अत्रत्ये विग्रहे स्थितादादिशब्दाद् विग्रहसमासौ, उदाहरण अवस्थिताच्चोदाहरण-प्रत्युदाहरणेऽवबुध्येते ।

शारदाप्रभायां निर्धारितायां हल्सन्धावच्सन्धौ च पञ्चचत्वारिंशत् सूत्राणि सन्ति । तत्र कठिनपदस्फोरणाय सरलातिसरलतया विग्रहो विहितः । विग्रहेण साकमेव तेन प्रायः समासनिदर्शनमपि कृतं, किन्तु व्याकरणप्रविविक्षून् छात्रान् बोधभारादेतन्न पाठ्यतामिति तत्र सङ्केतितमस्ति ।

---

[१७] भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (प्रथमभागः), पूर्ववत् (१९९६), पृ. १६३ ।
१८. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.६९७ ।

शारदाप्रभायाः ग्रथनं पृष्ठस्योपरि स्थिते मूलेऽष्टाध्यायीक्रमेण सूत्राणि विन्यस्य विहितमस्ति । ततोऽधस्तात् स्थितं व्याख्यानमपि तेनैव क्रमेण कृतं विद्यते । तत्क्रमे पञ्चचत्वारिंशत् सूत्राण्येव प्राथमिकाध्ययनाय निर्धारितानि । अत्रत्येषु सूत्रेषु विग्रहसमासौ कथं दर्शितौ ? तत्क्रमे काशिका-बालमनोरमा-तत्त्वबोधिनीप्रभृतिभ्यः प्राग्वर्तिभ्यष्टीकाभ्य आश्रयो गृहीत उत स्वकीयपद्धत्यैव कृतः ? उदाहरणप्रत्युदाहरणादीनि च कौमुदीकाशिकादिभि-रानीतान्यथवा व्याख्यात्रैव समुपन्यस्तानीन्यतः परं विचार्यते ।

### ४.३.२.१ विग्रहसमासयोरवस्थितिः

शारदाप्रभायाः प्राथमिके हल्सन्धौ पठितेषु समस्तपदयुतेषु  सूत्रेषु स्तोः श्चुना श्चुः (पा.सू.८-४-४०), ष्टुना ष्टुः (पा.सू.८-४-४१), ढ्रलोपे पूर्वस्य दीर्घोऽणः (पा.सू.६-३-१११) इति सूत्रत्रयमेव दृष्टम् । एतेषु ढ्रलोपे... इत्यत्र शारदाप्रभाकार एवं विग्रहं दर्शयति- ढ्रौ-ढकाररेफौ लोपयतीति ढ्रलोपः,तस्मिन् ढ्रलोप इति[२६९] अत्र बालमनोरमाकारस्त्वेवं विग्रहयति- ढश्च रेफश्च ढरेफौ, तौ लोपयतीति ढ्रलोपः, ण्यन्तात्कर्मण्युपपदेऽण्, उपपदसमासः[२७०] इति । द्वयोस्तुलनायां शारदाप्रभाकारेणात्र कृतो विग्रहः, सर्वथा सरलः, सूत्रार्थापनपरश्च । अतोऽत्र नास्ति सूक्ष्मेक्षिका, प्रौढता च, तथाप्युत्तरवर्तिषु भ्वादिप्रभृतिषु गणेष्वनेनापि समासविग्रहादिभिः सूत्राण्यर्थापितानि सन्ति । प्राथमिकेषु सन्धिप्रकरणेषु विग्रहसमासयोर्दुर्बोध्यतया च ताभ्यां विनैव सूत्रमर्थाप्यमिति धिया शारदाप्रभाकारेण तथा कृतं दृश्यते । व्याख्याताऽयं सन्धिप्रकरणेऽन्यत्रापि समासविग्रहौ विनैव सूत्राण्यर्थापयति, एवम्-

| *पदम्* | *बालमनोरमाकारः* | *शारदाप्रभाकारः* |
|---|---|---|
| स्तोः | स् च तुश्चेति समाहारद्वन्द्वः, इतरेतरयोगो वा तयोः | × |
| ष्टुः | ष च टवर्गश्चेति समाहारद्वन्द्वः, इतरेतरयोगो वा तयोः | × |
| कुप्वोः | कुश्च पुश्चेति कुपूस्तयोः | × |
| अट्कुप्वाङ्नुम् | अट् च कुश्च पुश्च आङ् च नुम् च, तैर्व्यवाये | × |
| ससजुषोः | स च सजुष् च ससजुषौ, तयोः | × |
| भोभगोअघो | भो च भगो च अघो च एषां समाहारद्वन्द्वः | × |

---

[१९] हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.५२६ ।
[२०] वासुदेवदीक्षितः (व्या.) *वैयाकरणसिद्धान्तकौमुदी* (प्रथमभागः),पूर्ववत्, (१९९६) पृ. १९८ ।

अनेन प्रकारेण विग्रहप्रदर्शनं विनैवार्थापनं कृत्वा प्रकृतव्याख्यात्रा कठिनमिति मानितं पाणिनीयं व्याकरणं सरलीकृतम् । तत्क्रमे क्वचिद् व्याख्यानमध्ये सारल्येन विषयावबोधनाय हिन्दीनेपालीभाषयोरपि प्रयोगः कृतः ।

यद्यपि समासं विनैवार्थापनं न प्रौढताद्योतकम्, एतादृशेन छात्रानुरोधिना व्याख्यानेन नवीनशास्त्रीयविषया नोद्भाव्यन्ते तथापि व्याकरणविषयस्य पठनपाठने समुत्सुकाश्छात्रा अत्राकृष्यन्त इति सरलीकरणस्यापि पृथङ् महत्त्वम् ।

## ४.३.२.२ उदाहरणप्रत्युदाहरणैः सूत्रार्थापनम्

शारदाप्रभाया हल्सन्धावच्सन्धौ च निर्धारितेषु ४५ सूत्रेष्वेकमपि सूत्रं तत्रत्यं पदैकमपि न निरर्थकमिति पाणिनीयसूत्रस्थाः प्रत्येकं वर्णाः सार्थका इति महाभाष्यवचनाज्ज्ञायते । तानि सूत्राण्येवात्र उदाहरणान्तरैः पुनर्व्याख्यायन्ते । न्यायदर्शने तत्सत्वे तत्सत्वं तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्यां स्वप्रतिपादितसिद्धान्तोऽन्वर्थीकृतः प्राप्यते । किन्तु प्रकृतव्याख्यात्राऽन्वयमुखेनैव व्याख्याय पाणिनीयसूत्राणि सार्थकीकृतानि, यद्यपीतः पूर्ववर्त्तिभिर्महाभाष्य-काशिका-भाषावृत्ति-कौमुद्यादिभिरष्टाध्याय्याः सकलसूत्राणि उदाहरण-प्रत्युदाहरणादिभिः साङ्गोपाङ्गं सोहापोहञ्च व्याख्यायान्वर्थीकृतानि, तथापि व्याकरणप्रविविक्षुभ्यो बोधोद्देश्येन मौलिकोदाहरणप्रत्युदाहरणैः सरलातिसरलतयैतद् व्याख्यातमस्तीति मन्तव्यम्, अथवा 'इहान्वयमुखेनैव सर्वं व्याख्यायते मया' इति कथयन्तं मल्लीनाथसूरिमनुस्मरता शारदाप्रभाकारेणापि तथैव कृतं स्यादिति स्वीकर्तुं शक्यते ।

शारदाप्रभायाः सन्धिप्रकरणे प्राप्तान्युदाहरणानि प्रायः सरलानि, मौलिकानि, नैपालककलासंस्कृतिद्योतकानि च दृश्यन्ते । व्याख्याकारोऽयमत्र प्रथमतः प्रसिद्धं,सरलं मौलिकञ्चोदाहरणमुपस्थाप्य तदनन्तरमेव कौमुद्याः काशिकायाश्चोदाहरणानि प्रस्तौति । एतत्क्रमे स्रोतोग्रन्थेभ्यः कुत्रचित् प्रत्यक्षतः क्वचिदप्रत्यक्षतोऽप्युदाहरणानि गृह्णाति, एतादृशमुदाहरणं- स्तोः श्चुना श्चुः, ष्टुना ष्टुः सूत्रयोः प्राप्तुं शक्यते । काशिकाकारस्तत्र-वृक्षश्शेते, प्लक्षश्शेते इत्यादीन्युदाहरते चेद् हरिप्रसादस्त्वप्रत्यक्षतया तान्यनुकुर्वन् बालकश्शेते, पुरुषश्शेते इत्यादीनि प्रस्तौति, तादृशान्यप्रत्यक्षतो गृहीतानि बहून्युदाहरणान्यत्र प्राप्यन्ते तेभ्यः कानिचनात्र प्रस्तूयन्ते-

| *सूत्रम्* | *शारदाप्रभायाम्* | *काशिकायाम्* |
|---|---|---|
| ष्टुना ष्टुः | बालकष्टीकते,पिष्टम्,उड्डीयते | वृक्षष्टीकते,पेष्टा,अग्निचिड्डीनः |
| झलां जश् झशि | बद्धः | लब्धम् |
| विसर्जनीयस्य सः | यशस्तनोति | वृक्षश्चिनोति, प्लक्षश्चिनोति |
| खरवसानयोर्वि. | जनः करोति,कीनासः खनति | वृक्षस्तरति, प्लक्षस्तरति |
| मोऽनुस्वारः | खट्वायां स्वपिति | वनं याति, कुण्डं याति |
| हलि सर्वेषाम् | अघो याहि, देवा यान्ति | भो याति, अघो याति |
| कुप्वोः क पौ च | सूदः पचति, वृक्षः फलति | वृक्षः करोति, कः करोति |
| अनचि च | दद्ध्यस्ति /दध्यस्ति | दद्ध्यत्र/ दध्यत्र, मद्ध्वत्र |

अतोऽत्र काशिकातः प्रत्यक्षाप्रत्यक्षतो बहून्युदाहरणानि गृहीतानि सन्तीति निश्चीयते । प्रकृतव्याख्यात्राधिकान्युदाहरणानि तु दीक्षितवरदराजयोः कौमुदीभ्यां गृहीतानि । कतिषु सूत्रेषू-दाहरणान्तरान्वेषणगौरवेणाथवा कौमुद्यां स्थितानामुदाहरणानां सारल्येन यथावदुद्धृतानि दृश्यन्ते, यथा-

| *सूत्रम्* | *उदाहरणम्* |
|---|---|
| स्तोः श्चुना श्चुः | सच्चित् |
| यरोऽनुनासिकेऽनुनासिको वा | एतन्मुरारिः |
| इको यणचि | सुद्ध्युपास्यः |
| ढ्रलोपे पूर्वस्य दीर्घोऽणः | पुना रमते, हरी रम्यः,शम्भू राजते |
| हलि सर्वेषाम् | भो देवाः, भगो नमस्ते, अघो याहि |
| विसर्जनीयस्य सः | विष्णुस्त्राता |
| कुप्वोः कः पौः च | कः करोति, कः खनति |
| रषाभ्यां नो णः समानपदे | चतुर्णाम् |
| ष्टुना ष्टुः | रामष्षष्ठः, पेष्टा |
| अनुस्वारस्यययि परसवर्णः | शान्तः,अङ्कितः |
| वा पदान्तस्य | त्वं करोषि, त्वङ्करोषि |

एतादृशानि बहून्युदाहरणानि यत्र तत्र सन्ति । एतैरुदाहरणैर्वरदराजदीक्षितयोः कौमुदीत्रयं शारदाप्रभायामुदाहरणग्रहण आधार इति वक्तुं शक्यम् । व्याख्यातायं क्वचित्तु वेद-साहित्यवाङ्मयादिषु प्रचलितानि पदवाक्यादीन्यप्यत्रोदाहरणत्वेनोपस्थापयतीति मौलिकोदाहरणप्रदाने न्यूनत्वेऽपि शारदाप्रभाकारोऽयं यथासम्भवं तानि न्यसतीत्यपि

निश्चितम् । यद्यपि तेषां सङ्ख्या न्यूनतमा वर्तते तथापि तानि व्याख्यातुरनुसन्धानकौशलं प्रवर्द्धयन्तीति तान्यत्र प्रस्तूयन्ते -

| *सूत्रम्* | *उदाहरणम्* |
|---|---|
| यरोऽनुनासिकेऽनुनासिको वा | तन्मे मनः शिवसङ्कल्पमस्तु |
| एचोऽयवायावः | सकृद्दुःखकरावाद्यावन्तिमस्तु पदे पदे । |
| विसर्जनीयस्य सः | यैस्तु भक्त्या स्मृता नूनम् ... |
| खरि च | यत् करोषि यदश्नासि यज्जुहोषि ददासि यत् । |

अतो व्याख्याकारोऽयं वैदिकसंहितापुराणभाषावाङ्मयादीन्यपि यथासम्मभव-मुद्धरतीति निष्कर्षः ।

### ४.३.२.३ उदाहरणेषु प्रत्युदाहरणेषु च मौलिकता

शारदाप्रभाकारः सूत्राणामुदाहरण-प्रत्युदाहरण-समुल्लेखने प्रथमतो मौलिकतां निर्वहते । अत्रत्ये सन्धिप्रकरणे स्थितेषु विधिसूत्रेषु प्राथम्येन मौलिकान्युदाहरणानि न्यस्तानि । तादृशान्युदाहरणानि नेपालस्य राष्ट्रियताप्रवर्द्धकानि, कृषिप्रणालीसङ्केतकानि कतिपयानि तु राजसंस्थाप्रशंसायां समर्पितान्यपि सन्ति । सरलभाषायां निबद्धानि तादृशान्युदाहरणानि पाणिनीयं व्याकरणं न जटिलमिति प्रमाणीकुर्वन्ति,यथा-

| *सूत्रम्* | *उदाहरणम्* |
|---|---|
| स्तोः श्चुना श्चुः | सुमनश्चयः, तज्जयः |
| खरि च | उत्तिष्ठति, तत्कुरु |
| शश्छोऽटि | तच्छ्रुत्वा, तच्श्रुत्वा |
| वृद्धिरेचि | ममैतत्, ममौकः नेपालैतिॅ्यम्,सज्जनौदार्यम् |
| इको यणचि | पठत्ययम्, कर्त्रर्थम्, शक्लेकः |
| एचोऽयवायावः | जयति, भवति,चयनम् |
| खरवसानयोर्विसर्जनीयः | सूदः पचति, कीनासः खनति, जनः करोति |
| झयो होऽन्यतरस्याम् | इषद्धास्यम् |
| वा पदान्तस्य | त्वङ्गच्छ, दुग्धम् पिब, अहम् पठामि |
| अकः सवर्णे दीर्घः | तवासौ, नास्ति, महीयम्, धनीति, विष्णूपकारः |
| हशि च | बालको हसति, छात्रो वदति, शिष्यो नमति |

इतोऽप्यधिकानि मौलिकान्युदाहरणानि सन्धिप्रकरणे दृश्यन्ते । विस्तरभयादत्र दिङ्मात्रमेव सङ्केतितम् ।

शारदाप्रभाव्याख्येयं कौमुदी-काशिका-भाषावृत्तीनामपेक्षया सरलतराणि मौलिकान्युदा-हरणानि प्रस्तौति, एतदेवास्या महद् वैशिष्ट्यम् । काशिकाव्याख्या सूत्रस्थानि सकलपदान्युदाहरणैरन्वर्थीकुरुते । परन्तु व्याख्येयं सरलानुरोधेन मुख्यपदानामेवोदाहरणानि पुरस्कुरुते । तदपि कस्य पदस्योदाहरणमिदमिति समुल्लेखनं विनैव, तथा सति छात्रेषु भ्रमः समुत्पद्यते, एतदपेक्षया काशिकाभाषावृत्तिकारौ पदानामन्वर्थीकरणे नितरां सुस्पष्टौ प्रतीयेते । शारदाप्रभाकारस्य पक्षोऽयं विचारणीयः ।

## ४.३.२.४ उदाहरणेषु तुलना

अत्र स्तो श्चुना श्चुः इति सूत्रद्वारा काशिका-भाषावृत्ति-शारदाप्रभाणामुदाहणेषु तुलनां विधीयते -

क) *काशिकायाम्* -"सकारस्य शकारेण चवर्गस्य द्वाभ्यामपि सन्निपाते शकारो भवति । तवर्गस्यापि च शकारेण चवर्गेण सन्निपाते चवर्गो भवति ।" सकारस्य शकारेण सन्निपाते वृक्षश्शेते, तस्यैव चवर्गेण वृक्षश्चिनोति, तवर्गस्य शकारेण अग्निचिच्छेते, तस्यैव चवर्गेण अग्निचिच्चिनोति, अग्निचिच्छादयति, अग्निचिज्जयति, अग्निचिज्झकारम्, अग्निचिज्ञकारः...।"[२७१]

ख) *भाषावृत्तौ*- भाषावृत्तौ पुरुषोत्तमदेवोऽपि पदशोऽक्षरशश्च विधिसूत्राणि व्याख्याय तत्रत्यानि पदानि सार्थकीकुरुते, तथाहि- "सस्य शः, तवर्गस्य चवर्गः स्यात्, कदा ? श्चुभ्यां योगे,यथा- कश्श्रूयते, कश्चिनोति,कश्छात्रः, भवाञ्छेते, तच्चिनोति, तच्छिनत्ति, तज्जयति, प्रशाञ्चिनोति । श्चुना इति तृतीयानिर्देशात् पूर्वेणापि योगे श्चुत्वं यज्ञः, याच्ञा ।"[२७२]

ग) *शारदाप्रभायां*- श्चुना = शकारचवर्गाभ्यां सह मिलितयोः, स्तोः = दन्त्यसकारतवर्गयोः स्थाने, श्चुः = तालव्यशकारचवर्गौ भवतः, यथा- बालकश्शेते, तज्जयः, सुमनश्चयः, इच्छा, सकृच्चिनोति । [२७३]

---

२१. वामनजयादित्यौ, *काशिका (द्वितीयो भागः)*, वाराणसी : चौखम्बासंस्कृतसिरिज, (२०२९) पृ.४७२ ।
२२. पुरुषोत्तमदेवः, *भाषावृत्तिः*, वाराणसी : रत्ना पब्लिकेशन, (१९८९) पृ. ३८८ ।
२३. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०), पृ. ७२७ ।

प्रस्तुतसूत्रं विवृण्वता काशिकाकारेण विवरणशैल्या सकारस्य शकारेण सह च योगः प्रदर्शितः । तयोः वृक्षश्शेते, वृक्षश्चिनोति प्रभृतीन्युदाहरणानि चोपन्यस्तानि । तवर्गस्यापि चवर्गेण सह योगे चवर्गादेशविहितानामग्निचिच्छेते, सोमसुच्छेते,अग्निचिच्चिनोति, अग्निचिच्छादयति प्रभृतीनि चवर्गीयोदाहरणानि प्रदत्तानि । पूर्वत्र चवर्गयुतानां यज्ञो याच्ञा प्रभृतीनामपि निदर्शनं काशिकाकारेण कृतं दृश्यते । तेनैव प्रकारेण शात् (पा.सू.८-४-४४) इति निषेधज्ञापकाद् निमित्तकार्यिणोर्यथासङ्ख्यं नेष्यते, परं स्थान्यादेशयोस्तु इष्यत इत्यपि काशिकाकारेण ज्ञापितम्, एवमेव पूर्वेण परेण च योगे सति श्चुत्वविधानार्थं स्तोः श्चाविति निर्देशो न कृतोऽन्यथा स्तोः चाविति सूत्रेणापि स्यादित्यपि सूचितम् । भाषावृत्तिकारो शङ्का-समाधाने प्रायः काशिकामनुकुरुते, तथापि सूत्रस्थानां प्रत्येकपदानामक्षराणाञ्च मौलिकान्युदाहरणान्युपस्थाप्य ग्रन्थसौगन्धं प्रवाहयति ।

भाषावृत्तिकारोऽयं सूत्रेऽस्मिन्- कश्श्रूयते, कश्छात्रः, भवाञ्छेते, तच्चिनोति, तज्जयति, लज्जते, मज्जति प्रभृतीन्युदाहरणानि उपस्थापयति । असौ श्चुना इति तृतीयानिर्देशात् पूर्वेणापि योगे श्चुत्वं भवतीति काशिकावचनमत्रापि यथावदुपन्यसति तथैव तच्चिनोति सदृशेषु रूपेषु तकारस्य जश्त्वानन्तरमेव श्चुत्वविधानम्, संहिताया अविवक्षायां कः चिनोति, अग्निचित् शेते, तत् चिनोति, तत् जयति, इत्यादिषु श्चुत्वाभावसमुल्लेखः, पदस्य इत्यस्य सर्वत्राधिकाराभावत्वम् स्तोरिति समाहारत्वेऽपि सौत्रत्वादनपुंसकत्वख्यापनञ्च भाषावृत्तिकारस्य मौलिकं चिन्तनम् ।[२४]

शारदाप्रभाकारः सूत्रेऽस्मिन् पूर्वोक्ताः शास्त्रीयाः शङ्का नोपस्थापयति । अयं स्तोः श्चुना श्चुरिति सूत्रस्य पदानि पृथक्कुर्वन् स्तोः श्चुः पदद्वयमेव व्याख्याति । तत्र क्रमे प्रथमतः संस्कृते विग्रहमर्थञ्च प्रस्तुत्य तं नेपालीहिन्दीभाषाभ्यामर्थापयन् भावार्थमुपस्करोति,एवं- 'तालव्यशकारेण चवर्गेण वा सह मिलितयोर्दन्त्यसकारतवर्गयोः स्थाने तालव्यशकारचवर्गौ भवत इति ।[२५] अतः शारदाप्रभाया व्याख्यानशैली विषयावबोधपरैव न प्रौढेति निश्चितम् । तथैव शिक्षणे श्यामपाट्यादीनां शैक्षिकोपकरणानां निर्देशोऽस्या अभीष्टं मन्तव्यम् । व्याख्याताऽसौ स्थान्यादेशयोर्यथासङ्ख्यनिर्देशनमधस्तनस्थितेन नीतिपद्यदृष्टान्तेन कुरुते-

> शत्रुं मित्रं विपत्तिञ्च जय रञ्जय भञ्जय ।
> दीपनिर्वाणगन्धञ्च सुहृद्वाक्यमरुन्धतीम् ।

---

२४. पुरुषोत्तमदेव *भाषावृत्तिः*, वाराणसी : रत्ना पब्लिकेशन, (१९८९) पृ. ३८८ ।
२५. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ.७२७ ।

न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः ॥ [२६]

अनेन प्रकारेण लौकिकदृष्टान्तप्रयोगेणापि विषयावबोधनप्रयासोऽस्य स्तुत्यं कार्यं मन्तुं शक्यम् ।

### ४.३.२.५ प्रत्युदाहरणप्रयोगः

शारदाप्रभेयमुदाहरणप्रदर्शने यावती सबला प्रतीयते प्रत्युदाहरणप्रदर्शने न तावती । अन्वयमुखेन ग्रन्थव्याख्यानपरेण प्रकृतव्याख्यात्रा सूत्रस्थपदान्यन्वर्थयता न्यूनतराणि प्रत्युदाहरणान्येव प्रस्तुतानि । अष्टाध्याय्याः सरलीकरणप्रयासेन प्रक्रियाक्रमेण रचितायाः लघुकौमुद्याः पञ्चसन्ध्यन्तप्रकरणे नैकानि प्रत्युदाहरणानि प्रदर्शितानि, तत्रत्येषु एत्येधत्यूठ्सु, सर्वत्र विभाषा गोः, अवङ् स्फोटायनस्य, अदसो मात्, इको सवर्णे शाकल्यस्य ह्रस्वश्च, ऋत्यकः, अतो रोरप्लुतादप्लुते, ढ्रलोपे पूर्वस्य दीर्घोऽणः प्रभृतिषु सूत्रेषु 'ऋते च तृतीयासमासे' इति वार्त्तिके च प्रत्युदाहरणानि विन्यस्य तत्रत्यानि पदानि सार्थकीकृतानि । तेभ्यः कानिचन प्रत्युदाहरणान्यत्र प्रस्तूयन्ते-

| *सूत्रम् / वार्त्तिकम्* | *प्रत्युदाहरणम्* |
|---|---|
| एत्येधत्यूठ्सु (पा.सू.६-१-८६) | एचीत्यनुवृत्तेर्नेह- उपेत मा भवान् प्रेदिधत् । |
| ऋते च तृतीयासमासे (पा.सू.६-१-८६ सूत्रे) | तृतीयेत्युक्तेर्नेह- परमर्तः । |
| एतत्तदोः सुलोपो... (पा.सू.६-१-१२८) | अकोरित्युक्तेर्नेह- एषको ददाति, अनञ्समासे इत्युक्तेर्नेह- अनेषो ददाति, हलीत्युक्तेर्नेह एषोऽस्ति, सोऽस्ति । |
| प्रादुहोढोढ्येषैष्यु (पा.सू.६-१-८६ सूत्रे) | अर्थवद्ग्रहणपरिभाषया नेह- प्रोढवान् । |

उपर्युक्तैः प्रत्युदाहरणैरेच्-तृतीयासमासाकनञ्समासहलर्थवत्पदानि सार्थकीकृतानि । अतः सूत्राणां तत्रत्यपदानाञ्च सार्थकीकरणे प्रत्युदाहरणमावश्यकमित्यवधेयम्, तथापि शारदाप्रभाकारेण सारल्यानुरोधेनापि स्यादत्र बहूनि प्रत्युदाहरणानि न प्रत्तानि ।

शारदाप्रभायां समुपलब्धेषु प्रत्युदाहरणेषु प्रायः प्रश्नोत्तरात्मिका शैली न दृश्यते । व्याख्यातासौ प्रत्युदाहरणद्वारा सूत्रस्थं पदमन्वर्थीकुर्वन् सामान्यार्थकं वाक्यमेव प्रयुङ्क्ते, यथा- धातोस्तन्निमित्तस्यैव (पा.सू.६-१-७७) इति सूत्रे तन्निमित्तपदमन्वर्थयन् व्याख्याता प्राह-

२६. पूर्ववत् पृ. ७२८ ।

तन्निमित्तस्यैवेति नियमान्नेह- ओयते, औयत इति ।[२७७] अत्र कौमुदीकारो दीक्षितस्तु तन्निमित्तस्यैवेति किम् ? ओयते, औयते[२७८] प्रभृतिभिर्वाक्यैर्विषयमिमं विवृणुते, अतोऽस्याः शङ्कोत्थापनशैली पूर्वव्याख्यानापेक्षया भिन्नतरा सरलतरा चास्तीति वक्तुं शक्यम् । शारदाप्रभाकारोऽयमन्यत्र सामान्यशैल्या प्रत्युदाहरणानि प्रस्तौति, यथा- अट्कुप्वाङ्नुम्व्यवायेऽपि(पा.सू.८-४-२) इति सूत्रे पूर्वस्माद् रषाभ्यां नो णः समानपदे (पा.सू.८-४-१) इत्यस्मात् समानपदे इत्यनुवर्तनाद् रामनाम, गन्धर्वगानम्, इत्यादिषु खण्डितपदयुतेषु वाक्येषु णत्वं नेति सूचयति । रषाभ्यां नो णः इत्यादिसूत्रेष्वपि समानपदसार्थकीकरणाय वायुर्नयतीति प्रत्युदाहरणं न्यसति ।[२७९] तेनैव प्रकारेण न पदान्ताट्टोरनाम् (पा.सू.८-४-४२) इति सूत्रपठितेन पदान्तादिति पदेन इट्ट इति रूपे, टोरिति पदेन सर्पिष्टममिति रूपे, अनामिति पदेन षण्णामिति प्रयोगे च ष्टुत्वं साधितमिति सङ्केतयति । एतेषु प्रत्युदाहरणेषु अट्कुप्वाङ्..., तथा रषाभ्यां नो णः... इत्यनयोरेव प्रत्युदाहरणानि प्राथमिकच्छात्रेभ्यो पाठनीयानि, तदन्यानि तु द्वितीयाध्ययनार्थं पृथक्कार्यमिति व्याख्यातुर्निर्देशः ।

### ४.३.३ शङ्कामुद्भाव्य समाधानम्

शारदाप्रभायाः प्रारम्भिकप्रकरणानि प्राथमिकान् छात्रान् लक्ष्यीकृत्य संरचितानि तस्मादत्र सरलातिसरलानि सूत्राणि वार्त्तिकानि तेषामुदाहरणानि च प्रस्तुतानि, अतोऽच्सन्धिशिक्षणरीतौ हल्सन्धिशिक्षणरीतौ च शास्त्रीयाः शङ्काः प्रायेण नोत्थापिताः, उत्थापितास्वपि यदिच्छात्रा इच्छेरन् तदैव विषयोऽयं व्याख्येय इति स्पष्टीकृतो वर्तते । कतिपयेषु सूत्रेषु तु शङ्कामुद्भाव्य शिक्षकतः समाधेयेति निर्दिष्टमस्ति ।

शारदाप्रभाया हल्सन्धावच्सन्धौ च समुत्थापितानां शङ्कानां चर्चात्र विधीयते- अतो रोरप्लुतादप्लुते (पा.सू.६-१-११३) इति सूत्रे व्याख्याकारः शङ्कते-“अत इति तपरकरणादेव दीर्घप्लुतयोर्व्यावृतिसिद्धावप्लुतादप्लुते इति पदं किमर्थमिति ? अत्र यदिच्छात्राः स्वयं शङ्केरन् तदा शिक्षकेण समाधानं कर्तव्यम्, यदि छात्रा न शङ्केरन् तर्हि तु शङ्कामेव

---

२७. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ. ४५० ।
२८. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (प्रथमो भागः,चतुर्थसं.) पूर्ववत्,(१९९६), पृ.९६ ।
२९. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. ७२१ ।

नोद्भावयेदिति।”[२८०] तस्याः समाधानं तु व्याख्यात्रा एवं कृतं- अत्र अप्लुतादप्लुते इत्यनुवृत्तौ सत्यपि प्लुते इत्यस्यासिद्धत्वात् प्रकृतसूत्रस्य प्राप्तिसम्भवः स्यात्, अप्लुतादप्लुत इत्युक्तौ तूच्चारणसामर्थ्यादेव नोत्वमिति ।[२८१] सिद्धान्तकौमुद्यां विषयोऽयमेवं समुत्थापितः- ‘अप्लुतादिति किम् ? एहि सुस्रोत३ अत्र स्नाहि, प्लुतस्यासिद्धत्वादतः परोऽयम् । अप्लुतादिति विशेषणे तु तत्सार्थ्यान्नासिद्धत्वमिति । तपरकरणस्य तु न सामर्थ्यं दीर्घनिवृत्त्या चरितार्थत्वात् । अप्लुत इति किम् ? तिष्ठतु पय अ३ग्निदत्तः, अत्र गुरोरनृत इति प्लुतः ।[२८२] अत्र शारदाप्रभाकारः एहि सुस्रोत३ अत्र स्नाहीति प्रयोगे सुस्रोतर्३ अत्र इत्यवस्थायां दूराद्धूते च (पा.सू.८-२-८४) इत्यनेन रेफात् परः प्लुतस्यासिद्धिं मत्वा तत्र अतो रोर.. सूत्रद्वारा उत्वस्य प्रसक्तिं प्रदर्शयन् तद्वारणाय सूत्रेऽस्मिनप्लुतादिति पदमावश्यकमिति समाधत्ते । कौमुदीकारस्तु अतो रोर... इति सूत्र अकारेण सह पठितेन तकारेण दीर्घस्यैव प्लुत उत्वव्यावर्तनार्थमप्लुतादिति पदं सार्थकमिति समाधानं पुरस्करोति । अतः शङ्कायाः समाधाने कतिषु स्थानेषु कौमुदीकारशारदाप्रभाकारौ परस्परं विरूद्धौ प्रतीयेते ।

शारदाप्रभाकारेणान्या अपि सरलातिसरलाः सामान्याः काचन शङ्काः समुत्थाप्य समाहिताः । तादृश्यः शङ्का अणुदित्सवर्णस्य चाप्रत्ययः (पा.सू.१-१-६९) इति सूत्रे अणुदित् पदयोर्व्याख्याने, तपरस्तत्कालस्य (पा.सू.१-१-७०) इति सूत्रे तपरशब्दे द्विविधसमासप्रदर्शने, आदिरन्त्येन सहेता (पा.सू.१-१-७१) इतिसूत्रे आदिरन्त्ययोरर्थापने, न पदान्तर्द्विवचन... (पा.सू.१-१-५८) इति सूत्रे पदान्तविधिरित्यस्य समासनिर्णये, तस्मिन्निति निर्दिष्टे पूर्वस्य (पा.सू.१-१-६६) इति सूत्रे तस्योदाहरणनिर्णये च दृश्यन्ते । यद्यप्यत्रत्याः प्रायशः शङ्का गभीरान् शास्त्रीयविषयान् नोत्थापयन्ति तथापि व्याकरणप्रविविक्षूणां मनांसि समाकर्षयन्तीति तेषामपि पृथग् वैशिष्टचम् । कतिपयसूत्रे तु महाभाष्यात्मिकया प्रश्नोत्तरात्मिकया शैल्या शङ्कामुत्थाप्य समाहितान्युदाहरणान्यपि दृश्यन्ते । तपरसूत्रे एतादृशमुदाहरणं लभ्यते, यथा- “अत्र तकारपरकः खलु अकारो दीर्घप्लुताकारौ न गृ्ञाति, तात्परौ ए,ओ वर्णौ च प्लुतौ न गृह्णीतः, यद्येवं **ॠ**दोरप् (पा.सू.३-३-५७) इति सूत्रं दीर्घोकारान्तादण् प्रत्ययं न प्राप्नोति, कथं? तकारात्परः खलु तत्रोकारः ? नैष तकारः, कस्तर्हि ? दकारः, किमर्थो दकारः ? असन्देहार्थो मुखसुखार्थो वा । इह तर्हि दोषः- आद् गुण इति सूत्रमाकारादेवाचि गुणः प्राप्नोति

---

[३]०. पूर्ववत्, पृ. ४६० ।

३१. पूर्ववत् पृ. ४६१ ।

३२. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (प्रथमो भागः ), पूर्ववत्, (इ.१९९६) पृ. १८८ ।

न तु अकारात् । कथम् ? अशब्दस्य पञ्चम्यन्तं रूपमादिति ।"[२८३] अत्रत्ये आद् गुणः, अदेङ् गुण इति सूत्रद्वय एव तकाराभावादाद् गुण इति सूत्रस्थ आत् पदे अकाराभावाच्च तत्र तपरस्तत्कालस्येति परिभाषासूत्रस्य कथं प्रवृत्तिरित्याशङ्कायां समाधानकर्तारः प्राहुः- "अत्रत्ययोर्द्वयोः सूत्रयोस्तत्कालबोधकस्तकारो जश्त्वेन दकारीभूतः । आद् गुण इत्यत्र स्थिताकारस्त्वशब्दस्य पञ्चम्यन्तं रूपमित्यवधेयम् ।"[२८४] अत्रत्ये व्याख्याने महाभाष्यशैली स्पष्टतया परिलक्ष्यते, अतः शारदाप्रभायाः कतिपयेषु स्थानेषु महाभाष्यस्य प्रत्यक्षप्रभावोऽप्यस्तीति वक्तुं शक्यम् । अत शङ्कानामुद्भावनेन समाधानं शारदाप्रभाकारस्य रुचिक्षेत्रमिति निष्कर्षः ।

### ४.३.४ रूपसिद्धिप्रक्रियावबोधः

शारदाप्रभाव्याख्यानस्य मुख्यमुद्देश्यं सरलतया रूपसिद्धिप्रक्रियावबोधनमस्ति । पाणिनीयसूत्रतः कात्यायनवार्त्तिकतश्च साध्यमानानां रूपाणां सिद्धिप्रक्रियाप्रदर्शने एवास्य बहूनि व्याख्यानपृष्ठानि परिपूरितानि । अत्र यण्-गुण-वृद्धि-पररूप-स्वादिविसर्गादयः सन्धयः व्याख्याता तत्सम्बद्धानि उदाहरणानि च प्रस्तुतानि सन्ति ।

अतः परं शारदाप्रभायाः सन्धिप्रकरणसम्बद्धा रूपसिद्धिप्रक्रिया निरूपयते ।

शारदाप्रभायाः सन्धिद्वयप्रकरणे प्राथमिकाध्ययनाय निर्धारितेषु सप्तत्रिंशत् विधिसूत्रेषु त्रयस्त्रिंशत् भावरूपविधिना, अवशिष्टानि चत्वारि त्वभावविधिना प्रवर्तन्ते । अत्रत्यानि स्तोः श्चुना श्चुः प्रभृतीनि सूत्राणि कार्यं साधयन्ति चेत् ढो ढे लोपः (पा.सू.८-३-१३) रो रि (पा.सू.८-३-१४) प्रभृतीनि लोपविधायकानि सूत्राणि तु सन्धिक्रमे लोपनीयं वर्णं लोपयन्ति । अत्र प्रथमत आदेशविधायकानि ततो लोपविधायकानि च सूत्राणि क्रमशो निरूपयन्ते ।

व्याख्याकारोऽयं स्तोः श्चुना श्चुरिति सूत्रं व्याचक्षाणः सकारतवर्गयोश्शकारचवर्गाभ्यां योगे (पूर्वत्र वा परत्र) शकारचवर्गौ भवत इत्यर्थं प्रस्तूय सकारशकारयोः सकारचवर्गयोश्चोदाहरणानि प्रस्तौति । ततो रूपसिद्धिप्रक्रियाप्रदर्शने छात्रेभ्यो बोधभारं न स्यादिति विचार्य यथासङ्ख्यसूत्रं प्राथमिकेभ्यश्छात्रेभ्यो नोपयुज्यतामिति निर्दिशति, तदनन्तरं सुमनश्शय्या, सुमनश्चयः, इच्छा, तज्जयः, सच्चिदित्यादिषूदाहरणेषु श्चुत्वविधानप्रक्रियामपि सङ्केतयति । यद्यप्यत्रत्या रूपसाधनप्रक्रिया दिग्दर्शनमूलैव तथापि प्राथमिकेभ्यश्छात्रेभ्यो

---

३३. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. १७।
३४. पूर्ववत् ।

हितकारिणी । शारदाप्रभायां रूपसिद्धिप्रक्रिया कथं दर्शितेति ज्ञानाय मोऽनुस्वार इति सूत्रत उदाहरणमेकं प्रस्तूयते । व्याख्याकारस्तत्र प्राह- खट्वायाम् + शेत इति श्यामपाट्यां लिखित्वाऽङ्गुल्या मकारं दर्शयित्वा तत्स्थानेऽनुस्वारो भवति, यदि मकारात् परतो हल् भवेत् परतश्चात्र शकारो वर्तते । अत्र शकारो हल् प्रत्याहारे वर्तते नवेति छात्राः प्रष्टव्याः । तेभ्यः तथ्यमुत्तरं गृहीत्वा मकारस्य स्थानेऽनुस्वारो भवतीति उपदिशता खट्वायां शेते इति रूपं दर्शयितव्यम् ।[२८५] अनेन प्रकारेण कृतेन रूपसाधननिर्देशेन प्रश्नोत्तरेण च सामान्या अपि जिज्ञासव सलीलं मोऽनुस्वार इति सूत्रस्थां प्रक्रियां बुध्यत इति प्रक्रियासरलीकरणमेव शारदाप्रभाया वैशिष्ट्यं मन्तव्यम् ।

शारदाप्रभायाः सुबन्ते शिक्षककेन्द्रितो विधिरवलम्बितो दृश्यते । बालमनोरमादयोऽन्या व्याख्याः प्रायेण विषयकेन्द्रिताः सन्ति, ताः शिक्षणविधिं न निर्दिशन्ति परन्तु शारदाप्रभाकारस्तु स्थाने स्थाने 'भवान् छात्रान् एतादृशशैल्या पाठयतु, प्रश्नोत्तरात्मिकया पद्धत्या शिक्षयतु' इति शिक्षणविधिनिदर्शितैर्वाक्यैः शिक्षकानुपदिशति । मोऽनुस्वारः (पा.सू.८-३-२३) इति सूत्रेऽपि एतादृशी शैली स्पष्टतया परिलक्ष्यते, अत व्याख्येयं बालमनोरमादिभ्यो भिन्ना तस्मात् सुस्पष्टतरा सरला स्वल्पेनायासेनैवार्थबोधनक्षमा च प्रतीयते, तदपेक्षया बालमनोरमा शास्त्रीया, सूत्रात्मिका चास्ति । बालमनोरमाकारो मोऽनुस्वार इति सूत्रं व्याख्यायन् हरिं वन्दे इति रूपं सङ्क्षेपेणेवं साधयति- "मान्तस्य पदस्य योऽन्तयोऽल् तस्येत्यर्थः, पदान्तस्य मस्येति फलितम्, हरिम् + वन्दे इति स्थितेः मस्यानुस्वारः इति ।"[२८६] स्तोः श्चुना श्चुः (पा.सू.८-४-४०) सूत्रे यथासङ्ख्यसूत्रं न पाठनीयमिति निर्देशनम्, मोऽनुस्वारः सूत्रे यस्यार्थोऽस्ति तत् पदमिति पदस्य परिभाषा, भोभगोअघो... (पा.सू.८-३-१७) इति सूत्रे सन्धेरभावविषयकमौनता, रो रि (पा.सू.८-३-१४) इति सूत्रे रोरीत्यत्रावयवषष्ठी स्वीकर्तव्या परं विषयोऽयं छात्रेभ्यो नोपदेश्य इति निर्देशश्च व्याख्यातुर्विषयसरलीकरणरीतिं, शिक्षकनिर्देशनप्रधानं शिक्षणविधिञ्च सूचयति ।

शारदाप्रभायाः सन्धिद्वयप्रकरणे यण्-गुण-वृद्धि-पररूपकार्याणां सामान्या प्रक्रियैव सङ्केतिता । अत्र सूत्रेष्वनुवर्तनीयं पदमुल्लिख्य नेपालीहिन्दीभाषाद्वयमाध्यमेन सूत्रार्थं च स्पष्टयित्वा छात्रशिक्षणविधिं प्रक्रियाञ्च समुल्लिख्योदाहरणानि प्रदत्तानि । कतिपये स्थाने तु अनेन प्रकारेण लक्षणसमन्वयं करोतु इत्यादिवाक्यद्वारा शिक्षकनिर्देशनमपि विहितम्, यथा- 'अत्र विसर्गस्य स्थाने स' इति आदेशो भवति, अ 'इत्यस्यानुबन्धलोपे स् इत्यादेशो भवति,

---

३५. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.७०१ ।

३६. वासुदेवदीक्षितः (व्या.) *वैयाकरणसिद्धान्तकौमुदी* (प्रथमभागः), पूर्ववत्., (१९९६) पृ. १५३ ।

तत्र यैः+तु  इत्युदाहरणे लक्षणसमन्वयः कारयितव्यः' ।[२८७] एतादृशो निर्देशो नश्चापदान्तस्य झलि सूत्रस्य व्याख्यानेऽपि समुपलभ्यते, तदित्थं- 'पदस्यान्ते वर्तमानस्य मकारस्य स्थानेऽनुस्वारो भवति झलि परे, गम्+स्यते, हन्+सि, इत्यादिषु लक्षणसमन्वयः कारयितव्यः ।[२८८] अनेन प्रकारेण वर्णागमनवर्णविकारश्चात्र निर्दिष्टो वर्तत इत्यवधेयम् ।

शारदाप्रभायाः सन्धिप्रकरणे लोपविधायकानि चत्वारि विधिसूत्राणि निर्धार्य व्याख्यातानि सन्ति । रूपसाधनक्रमे तेषामुपयोगः शारदाप्रभाकारेण कथं कृत इति अतः परं विचार्यते- शारदाप्रभायाः प्राथमिकहल्सन्धिशिक्षणरीतावच्सन्धिशिक्षणरीतौ च ढो ढे लोपः (पा.सू.८-३-१३), रो रि (पा.सू.८,३ १४ लोपः शाकल्यस्य (पा.सू.८-३-१९), हलि सर्वेषाम् (पा.सू.८-३-२२) इति चत्वारि लोपविधायकसूत्राणि निर्धारितानि । एतेषु प्रथमसूत्रस्य प्रयोगो लीढः इत्यत्र विहितः । तत्र लिढ् +ढस् इत्यवस्थायां ढकारे परेऽनेन सूत्रेण पूर्वढकारलोपो विहितः,एवम्- "ढकारस्य ढकारे परे लोपो भवतीत्यर्थमुपदिश्य लिढ् + ढस् इति श्यामपाट्यां लिखित्वा लक्षणसमन्वयं छात्रैः कारयित्वा लिढ इति श्यामपाट्यामवशेष्य ढ्रलोपे... इति सूत्रमुपदिशेत्।"[२८९] एतादृग् लक्षणसमन्वयनिर्देशश्छात्रापेक्षया शिक्षकेभ्य उपयुक्तः । अत्रत्यौ सूत्रव्याख्यानरूपसाधननिर्देशौ च यद्यपि सङ्केतमूलकावेव एव तथापि रूपसाधने साहाय्याविति निश्चयेन वक्तुं शक्यम् ।

### ४.३.५ वार्त्तिकपरिभाषादिभिर्जटिलतास्फोरणम्

अत्र वार्त्तिकशब्दतः कात्यायनविरचितानि वार्त्तिकानि, परिभाषाशब्दतोऽसिद्धं बहिरङ्गमन्तरङ्गे प्रभृतयो वाचनिक-न्यायसिद्ध-ज्ञापकसिद्धाः परिभाषास्तथा लण् सूत्रेऽकारश्चेति सदृशाः फक्किकाः, रूपसाधनोपयोगिन्यः कारिकाः, इष्टसाधनतत्परा इष्टयश्च परिगृह्यन्ते । एताः सर्वाः रूपसाधनगतां जटिलतां स्फोरयन्तीति हेतोरत्र व्याख्यानतफ्वरूपेणोररीक्रियन्ते । रूपसिद्धौ तासां प्रयोगपरीक्षणमत्र विधीयते । शारदाप्रभाव्याख्यायां 'ऋवर्णाच्चेति वक्तव्यम्' इति वार्त्तिकं- तुल्यास्यसूत्रे, 'प्रत्यये भाषायां नित्यम्' इति यरोऽनुनासिके... इति सूत्रे, 'छत्वममीति वाच्यम्' इति शश्छोऽटि इति सूत्रे तथा 'शर्परे खरि वा विसर्गलोपो वक्तव्यः' इति च वा शरि (पा.सू.८-३-३६) इति सूत्रे निर्धारितम् ।

---

३७. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ. ७०३ ।
३८. पूर्ववत्, पृ. ७०२ ।
३९. पूर्ववत्, पृ. ७०२ ।

यद्यप्यत्र पठितानां वार्त्तिकानां सङ्ख्याऽधिकतरा विद्यते तथापि प्राथमिकाध्ययनार्थं तानि सर्वाणि न निर्धारितानि ।

अतः परं शारदाप्रभायाः प्राथमिकविभाजने निर्धारितानां वार्त्तिकानां प्रयोगस्थितिर्निरूपयते ।

ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यमिति वार्त्तिकं शारदाप्रभायां तुल्यास्यप्रयत्नं सवर्णम् (पा.सू.१-१-९) इति सूत्रादनन्तरं पठितम्, अत्र ऋलृवर्णयोः सवर्णसंज्ञार्थं तस्यावश्यकं फलञ्च दर्शितम् । बालमनोरमाकारेण तु वार्त्तिकमिदं विग्रहसमासादिभिरेवमर्थापितम्- "ऋलृवर्णयोः = मूर्धादन्तात्मकभिन्नस्थानकत्वात् सवर्णसंज्ञायामप्राप्तायां ऋकारलृकारयोः सवर्णविधिरिति वार्त्तिकमिदमर्थतः सङ्गृह्य पठति ऋलृवर्णयोरिति- आ च आ च रलौ, ऋशब्दस्य लृशब्दस्य च आ इति प्रथमैकवचनम् । तत्र ऋलृ+औ इति स्थिते लृकारस्य ऋतो ङि सर्वनामस्थानयोरिति गुण अकार उरण् रपर इति लपरत्वम् । ऋकारस्य यणादेशो रेफः, अतो रलौ च तौ वर्णौ च ऋलृवर्णौ तयोर्मिथः सावर्ण्यं वक्तव्यमिति ।"[२९०] अत्र बालमनोरमाकारस्य व्याख्यानं विग्रहसमासादिभिरर्थनिष्पादकं स्पष्टतया प्रयोजनाभिधायकं प्रक्रियापरकञ्च प्रतीयते, तदपेक्षया शारदाप्रभाकारस्त्वर्थकेन्द्रित इति प्रकृतं प्राथमिकं व्याख्यानमित्यव-गन्तव्यम् । 'शर्परे खरि वा विसर्गस्य लोपो वक्तव्यः' इति वार्त्तिकं शारदाप्रभायां कथं व्याख्यातमित्यत्र विचार्यते- शारदाप्रभाकारो वा शरीति सूत्रे शर्प्रत्याहारे परे तत्पूर्वस्य विसर्गस्य विकल्पेन लोपविधानप्रसङ्गे वार्त्तिकमिदमुपस्थापयति । वा शरीति सूत्रं शरि परे वा विसर्गं लोपयति परन्त्वेतत् वार्त्तिकं खर्परके शर्प्रत्याहारे पर एव विसर्गस्य विकल्पेन लोपमनुशास्ति, अतो दुरूक्तेर्नियमनाय वार्त्तिकस्यास्य प्रयत्नः सार्थको मन्यते । अत्र व्याख्यात्रा वार्त्तिकमिदं न व्याख्यातम् । व्याकरणस्य सारल्यमुद्घोषयता 'बुद्धिःस्फुरति' इत्युदाहरणे वार्त्तिकस्यास्य प्रवर्तनं कथं भवतीति शिक्षकेणोपदेश्यस्तथा लक्षणसमन्वयश्च कार्य इत्येव निर्दिष्टमस्ति, तदित्थं- "अयि वत्साः र व्याकरणं कठिनं भवतीति जल्पन्ति अद्यत्वे जनाः, यूयमपि तथा मन्यध्वे न वा ? व्याकरणपठने युष्माकं बुद्धिः स्फुरति न वा ? इति, तत्-प्रसङ्गे 'बुद्धिः स्फुरति' प्रयोगे कियन्ति रूपाणि सम्भवन्तीति छात्राणामाकाङ्क्षां जागरयित्वा लक्षणसमन्वयपुरस्सरं त्रिविधानि रूपाणि बोधयितव्यानीति ।"[२९१] अतोऽत्र पठितानि वार्त्तिकानि रूपसाधने सहयोगिनी सन्तीति निश्चप्रचम् । वार्त्तिकमिदं बालमनोरमाकारस्तु एवं व्याख्याति- "खर् परो यस्मादिति बहुव्रीहिः, शर् विशेष्यम्। खर्परके शरि परे विसर्गस्य लोपविकल्पो वक्तव्य इत्यर्थः । लोपाभावपक्षे वा

४०. वासुदेवदीक्षितः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (प्रथमो भागः),पूर्ववत्, (१९९६) पृ. ३५ ।
४१. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ. ७०५ ।

शरीति भवति ।” [४२] अतः शारदाप्रभापेक्षया बालमनोरमाया व्याख्यानविश्लेषणपद्धतिर्व्युत्पत्तिमूला विषयव्याख्याने च केन्द्रिता चाऽस्तीति स्फुटम् ।

शारदाप्रभायाः प्राथमिके सन्धिप्रकरणे फक्किकेष्टिपरिभाषाकारिका व्याख्याता न दृश्यते । यद्यप्यत्र असिद्धं बहिरङ्गमन्तरङ्गे सदृशाः परिभाषाः, गत्योरित्युक्तेर्नेह (नमस्पुरसोर्गत्योः इति सूत्रे) सदृशानि फक्किकावाक्यानि एतादृशान्येव शङ्कासमाधानपराणि विशेषवाक्यानि प्राप्यन्ते तथापि तानि प्राथमिकच्छात्रेभ्यो न पाठनीयानीति व्याख्यातुर्निर्देशस्तत्र जागर्ति ।

शारदाप्रभाकारेण स्थाननिरूपणक्रमे ‘अकुहविसर्जनीयानां कण्ठः’ प्रभृतिभिर्वाक्यैरकारस्य हकारस्य कवर्गस्य विसर्गस्य च कण्ठस्थानं भवतीति पूर्ववर्तिभिराचार्यैः प्रयुक्तं वाक्यमत्रापि प्रयुज्य सरलतया स्थानानि निरूपितानि, तथैव ‘अथ संज्ञे’ति प्रकरणे ‘कादयो मावसानाः स्पर्शाः’ सदृशैर्वाक्यैः कप्रभृतयो मपर्यन्ता वर्णाः स्पर्शसंज्ञका भवन्तीति व्याख्याताः, तेनैव प्रकारेण रषाभ्यां नो णः समानपदे (पा.सू.८-४-१) इति सूत्रेऽपि-‘समानपदे इत्युक्तेर्नेह-वायुर्नयति’ इत्युक्त्वा तत्र णत्वाभावश्च साधितः, अतो जटिलतास्फोरणे, रूपसिद्धौ समागतानां शङ्कानां समाधाने च विशेषवाक्यान्यपि सहयोगीनि दृश्यन्ते ।

### ४.३.६ अन्याचार्यमतसङ्ग्रहः

शारदाप्रभाकारोऽयं सन्धिप्रकरणे बहुत्रान्येषामाचार्याणां मतानि सङ्गृह्णाति । स्वमतसम्पोषणेऽन्यमतेषु विमतिसंस्थापने तथान्यप्रयोजने च व्याख्याकारोऽयं काशिकाकौमुदीकारयोस्तट्टीकाकाराणां, लघुशब्देन्दुशेखरादीनां प्रणेतुर्नागेशस्य, महाभाष्यकारस्य पतञ्जलेः, वाक्यपदीयकारस्य भर्तृहरेः, अष्टाध्यायीभाष्यकारस्य बह्मदत्तजिज्ञासोस्तथैवान्येषां पूर्वाचार्याणां वचनानि सिद्धान्ताऽश्च प्रत्यक्षाप्रत्यक्ष्यतो गृह्णाति । एतेषु काशिकां तद्व्याख्यां, महाभाष्यं तद्व्याख्यां, सिद्धान्तकौमुदीं तद्व्याख्यां च बहुत्रोपजीव्यरूपेण प्रयुङ्क्ते । सूत्राणामनुवृत्त्यादिनिदर्शने गोपालदत्तशास्त्रिणोऽ-ष्टाध्यायीमप्यनुकुरुते ।

अतः परं सन्धिप्रकरणे सङ्गृहीतानि काशिकासिद्धान्तकौमुदीमहाभाष्याणां समुद्धरणानि कीदृशानि वर्तन्ते ? तेभ्यः प्रकृतव्याख्यात्रा कानि कानि तत्त्वानि गृहीतानीति विचार्यते ।

---

४२. वासुदेवदीक्षितः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (प्रथमो भागः), पूर्ववत्, (इ. १९९६) पृ.१७५ ।

शर्परे विसर्जनीयः (पा.सू.८-३-३५) इति सूत्रं 'कः त्सरु :' इत्यत्र विसर्गे विसर्जनीयस्य स (पा.सू.८-३-३४) इति प्राप्तं सकारादेशम्, घनाघनः क्षोभणः, अद्भिः प्सातमित्याद्युदाहरणेषु कुप्वोः क पौ च इति सूत्रेण क्रमशः प्राप्तं जिह्वामूलीयोपध्मानीयविसर्गादेशं च प्रबाध्य पुनरपि विसर्गादेशं कुरुते, तच्च तदितरपरिसङ्ख्यानार्थमिति बालमनोरमाकारस्य सूचनम् । प्रकृतेः शर्परे विसर्जनीय इति सूत्रे विसर्जनीयस्य स इति पूर्वसूत्राद् विसर्जनीय इति पदं तथा खरवसानयोर्विसर्जनीय इति सूत्रात् खरीति पदञ्चानुवर्त्य 'शर्परे न' इत्येव सूत्रं पठित्वाऽनुवर्तितानि पदानि संयोज्य शर्परे खरि विसर्जनीयस्य विसर्गादेशः स्यादिति सूत्रार्थकरणेनापि सिद्धेरत्र पुनर्विसर्जनीयपाठो व्यर्थ इति शङ्कां निवारयन् काशिकाकारः प्राह- "नेति वक्तव्ये विसर्जनीयस्य विसर्जनीयादेशविधानं विकारनिवृत्यर्थं तेन जिह्वामूलीयोपध्मानीयौ न भवत इति ।" [२९३] यदि प्रकृतसूत्रे विसर्जनीय इति पदं न स्यात्तदा पूर्वोक्तयोरुदाहरणयोर्जिह्वा-मूलीयोपध्मानीयविसर्गौ, कः त्सरुरित्यादौ सकारश्च स्यात्तथा सति विकृतिर्दृश्येत तन्निवारणाय विसर्जनीयपदं सार्थकमिति ज्ञापनार्थमुक्तवाक्यमाह । शारदाप्रभाकारश्च तमेव व्याकुर्वन् "नेति वक्तव्ये विसर्जनीयस्य विसर्जनीयादेशविधानं विकारनिवृत्यर्थमिति" [२९४] आह । तत्र विसर्जनीय इति पाठात् सत्वस्य जिह्वामूलीयोपध्मानीयविसर्गयोश्च प्रप्तिर्नेति प्रसङ्गं सिद्धान्तकौमुदीकारोऽप्याह, तद्यथा- "इह यथायथं सत्वं जिह्वामूलीयश्च न ।"[२९५] सिद्धान्तकौमुद्या व्याख्याता तत्त्वबोधिनीकार इतोऽपि स्पष्टतया व्याख्याति- "यदि तु शर्परे न इत्येवोच्येत तर्हि प्रकृतेः सत्वे निषिद्धेऽपि कुप्वोः क पौ स्याताम्, वासः क्षौमम् अद्भिः प्सातम् इत्यादौ विसर्जनीयवचनात्तु विकारमात्रं बाध्यते इत्याशयेनाह नत्वन्यदिति ।" [२९६] अनेन प्रकारेण प्रकृतसूत्रस्य विसर्जनीय इति पदस्य सार्थक्याय पूर्वव्याख्यातृभिः प्रयुक्तमुपर्युक्तं वाक्यं सरलतया उदाहरणान्तरैश्च शारदाप्रभाकारोऽप्यत्र व्याकुरुते । एतेनास्य काशिकोपजीव्यत्वं पुष्णाति ।

शारदाप्रभायाः सन्धिप्रकरणे सिद्धान्तकौमुद्या अपि कानिचन वाक्यानि गृहीतानि दृश्यन्ते । स्वमतस्यपोषणाय विवृतिकरणाय च प्रस्तुतेभ्यस्तादृशेभ्यो वाक्येभ्य उदाहरणमेकमत्रोपस्थाप्य व्याख्यायते- कुप्वोः कः पौ च (पा.सू.८-३-३७) इति सूत्रं कवर्गे पवर्गे च परे विसर्जनीयस्य स्थाने क्रमेण जिह्वामूलीयोपध्मानीयौ विसर्गौ कुरुते, चकाराद्

---

[४३]. वामनजयादित्यौ *काशिका (द्वितीयो भागः),* पूर्ववत्, (२०२९), पृ. ४४५ ।
४४. हरिप्रसादशर्माचार्यः (व्या.) *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ.७०४ ।
[४५]. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (प्रथमो भागः ), पूर्ववत्, (१९९६) पृ. १७४ ।
[४६]. ज्ञानेन्द्रसरस्वती, (व्या.) *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४) पृ. ४० ।

विसर्गमपि विदधाति । सूत्रमिदं विसर्जनीयस्य सः (पा.सू.८-३-३४) इत्यस्य बाधकत्वेऽपि शर्परे विसर्जनीयः (पा.सू.८-३-३५) इत्यस्य तु न बाधकम्, अत एव वासः क्षौममित्यादौ विसर्गः सिध्यति, अत्र 'येन नाऽप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवती'ति परिभाषावाक्यमेव प्रमाणमिति भट्टोजिदीक्षितः ।"[२९७] शारदाप्रभाकारोऽयं वाक्यमिदं प्रत्यक्षतः समुद्धरतिऽन्यत्रा-प्येतादृशमुद्धरणं यत्र तत्र प्राप्यत एव । अनेन प्रकारेण सिद्धान्तकौमुदीकारेण प्रस्तुते समाधाने सहमतिं प्रदर्शयता शारदाप्रभाकारेणापि तद्गृहीतमिति निश्चीयते । एवमेव पूर्वत्रासिद्धम् (पा.सू.८-२-१), हलोऽनन्तराः संयोगः (पा.सू.१-१-७), नाज्झलौ (पा.सू.१-१-१०), न वेति विभाषा (पा.सू.१-१-४४), मिदचोऽन्त्यात्परः (पा.सू.१-१-४७), उरण् रपरः (पा.सू.१-१-५१) प्रभृतीनां नैकेषां सूत्राणां व्याख्याने स्थानप्रयत्नसंज्ञानिरूपणे च बहुत्र शारदाप्रभाकारेण सिद्धान्तकौमुदी समुद्धृता दृश्यते ।

शरदाप्रभायाः सन्धिप्रकरणे महाभाष्यतोऽपि कति वाक्यानि वचनानि विचाराश्च प्रत्यक्षाप्रत्यक्षतो गृहीताः सन्ति । तपरस्तत्कालस्य (पा.सू.१-१-७०), सूत्रस्थे तपरपदे कीदृशी व्युत्पत्तिः ? तपरपदात् कथं द्विविधोऽर्थो लभ्यते ? इत्यादीनां प्रश्नानां समाधानप्रसङ्गे शरदाप्रभाकारः प्रश्नोत्तरात्मिकां भाष्यशैलीमङ्गीकरोति, यद्यपि महाभाष्ये तादृशवाक्यानि न प्राप्यन्ते तथापि महाभाष्यकारेण पतञ्जलिना बहुत्र प्रयुक्तैषा रीतिः शरदाप्रभाकारेणाप्यनुकृतेति स्पष्टं परिलक्ष्यते । अत्र कानिचन वाक्यान्युदाह्रियन्ते-

> "अत्र तकारपरकः खलु अकारो दीर्घप्लुताकारौ न गृह्णाति, तात्परौ ए ओ वर्णौ च प्लुतौ न गृह्णीतः, यद्येवं स्यात् तर्हि ॠदोरप् (पा.सू.३-३-५७) इति सूत्रेण दीर्घोकारान्तादप्प्रत्ययो न प्राप्नोति, कथम् ? तकारात् परः खलु तत्रोकारः नैषः तकारः, कस्तर्हि ? दकारः । किमर्थो दकारः ? असन्देहार्थो मुखसुखार्थो वा । इह तर्हि दोषः । आद् गुणः इति सूत्रेण आकारादेवाचिपरे गुणः प्राप्नोति न त्वकारात् । कथम् ? तकारपरको खलु तत्राकारः । ननु तत्रापि दकारो न तकारः । नेत्याह-नाऽसौ दकारः कस्तर्हि ? तकार एव । अशब्दस्य पञ्चम्यन्तमेतत् आत् इति रूपम् । तकारस्य जश्त्वेन दकारः श्रूयते ।"[२९८]

एतादृक् वाक्यसमूहो न हि महाभाष्यतो नापि काशिकातो नाप्यन्येभ्यो व्याख्यानेभ्यो गृहीतः, अतः शारदाप्रभाकारस्यैवैष इति निश्चीयते तथाप्येतेषु प्रत्यक्षतो भाष्यशैल्या प्रभावो

४७. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (प्रथमो भागः ), पूर्ववत् (१९९६) पृ. १६९ ।
[४]८. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ. १७ ।

दृग्गोचरीभवति । अन्यान्यपि पूर्वाचार्याणां वाक्यानि, वार्त्तिकादीनि च शारदाप्रभाकारेणात्र गृहीतानि सन्ति । तादृशान्युदाहरणानि, यथा- ई३चाक्रवर्मणस्य (पा.सू.६-१-१३०) इति सूत्रे गुरोरनृतोऽनन्त्यस्य... (पा.सू.८-२-८६) इत्यत्रान्येषु स्थानेषु च स्पष्टरूपेण द्रष्टुं शक्यन्ते । सिद्धान्तकौमुदी, काशिका, महाभाष्येभ्योऽन्यैर्व्याकरणशास्त्रसम्बद्धैस्तदीतरैश्च ग्रन्थैरत्र सूत्राणि, वृत्तिः, कारिकाः, वृत्यर्थः, नीतिपद्यानि वाक्यादीनि च समुद्धृतानि सन्ति । तुल्यास्यप्रयत्नं सर्वणमिति सूत्रे 'अन्याय्योऽनेकशब्दत्व' मिति जैमिनिसूत्रप्रयोगः, स्तोः श्चुना श्चुरिति सूत्रे शत्रुं मित्रं विपत्तिञ्च जय रञ्जय भञ्जय इति, दीपनिर्वाणगन्धञ्च सुहृद्वाक्यमरुन्धतीमिति च यथासङ्ख्योदाहरणनीतिपद्यप्रयोगस्तथा मोऽनुस्वारः (पा.सू.८-३-२३) इति सूत्रे 'उपायाः शिक्ष्यमाणानां बालानामुपलालना' इति हरिकारिकाग्रहणं च शारदाप्रभाकारेण सङ्गृहीतानि ग्रन्थान्तरवचनान्यपि सन्ति । एतैरुदाहरणैर्व्याख्यातुरध्ययनवैपुल्यमस्य काशिकासिद्धान्त-कौमुद्योरुपजीव्यत्वञ्च प्रमाणितं भवति ।

## ४.३.७ प्रकरणसङ्घटनं शैलीशिल्पञ्च

पाणिनीयसूत्राणां व्याख्याने काशिका-सिद्धान्तकौमुदीभ्यां द्विविधे सरण्यावङ्गीकृते, तयोः काशिकाकारेण सूत्रं लक्षणं वा प्रधानीकृत्य तल्लक्षणेषु समग्रं संस्कृतवाङ्मयमप्रत्यक्षतया उदाहरणरूपेणोपस्थापितमतो लक्षणप्रधाना शैलीयम् । लक्षणस्य प्राधान्यमपि भाष्याभिमतमिति प्रकृतवाक्याद् ज्ञायते । अष्टाध्यायीकालतः प्रारब्धां तामेव सरणिमङ्गीकृत्य महाभाष्य-काशिका-भाषावृत्ति-शारदाप्रभासदृशानि सूत्रव्याख्यानानि प्रचलितानि । लक्ष्यैकचक्षुष्का पद्धतिस्तु पूर्वसरणेर्विरुद्धा मन्यते, अत्र व्याख्यातारः सूत्रापेक्षया उदाहरणप्रत्युदाहरणानि मुख्यानि मन्यन्ते । रूपसाधनप्राधान्यम्, तत्राप्यज्झल्वर्णक्रमेण विन्यासः, अज्झलादिष्वप्यकारेकारादिक्रमेण शब्दसाधुत्वसम्पादनं तेष्वपि सुबन्त-तिङन्त-कृदन्त-कारक-समास-तद्धित-स्त्रीप्रत्ययेत्यादिक्रमेण व्याख्यानं (दीक्षितादीनां) लक्ष्यैकचक्षुष्का रीतिर्मन्यते । महाभाष्यकारेण लक्ष्यलक्षणे व्याकरणमिति वार्त्तिकव्याख्यान एषा द्वितीया रीतिरपि स्वीकृतेति महाभाष्यतो ज्ञायते । तत्र प्रक्रियारत्न-प्रक्रियाकौमुदी-रूपावतार-रूपमाला-सिद्धान्तकौमुद्यादिभिर्ग्रन्थै रीतिरियमङ्गीकृता । पूर्वोक्ते द्वे रीती एव व्याकरणशास्त्रे लक्ष्यलक्षणैकचक्षुष्केति नामभ्यामभिहिते । तादृशयोः शैलीशिल्पयोः शारदाप्रभाकारः कुत्रचिद् लक्ष्यं कस्मिाश्चित्तु लक्षणं प्रधानीकृत्य व्याख्यानं विधत्ते । व्याख्याकारोऽयं कुत्र कुत्र च तां पद्धतिं प्रयुक्तवानित्यतः परं विविच्यते ।

शारदाप्रभाकारस्य मुख्यमुद्देश्यं व्याकरणशास्त्रपठनात् पराङ्मुखान् छात्रान् विविधैर्दृष्टान्तैरुत्प्रेरणैश्च समाकृष्य सरलया सरसया च शैल्या पाणिनीयसूत्राणां तत्रत्योदाहरणानाञ्च प्रबोधनम् । तस्मिन् क्रमे शारदाप्रभाकारो द्विविधामेव व्याख्यानपद्धतिमुररीकुरुते । असौ प्रथमतो हल्सन्धौ स्थितानि स्तोः श्चुना श्चुः प्रभृतीनि सरलसूत्राणि तेषामुदाहरणानि च प्रस्तुत्य ततोऽच्सन्धौ स्थितानि इको यणचि प्रभृतीनि सूत्राणि व्याकुरुते, एवं प्रकारेण हल्सन्धावच्सन्धौ च स्थितानि पञ्चचत्वारिंशत् सूत्राणि चत्वारि वार्त्तिकानि च पाठयित्वा तेषु ज्ञातेषु पुनरष्टाध्यायीक्रमेण सकलसूत्रादीन् सम्यगध्यनार्थमुत्प्रेरयति, अतः शारदाप्रभायां सूत्रप्रक्रियाक्रमयोः सङ्गमः प्राप्यते, अर्थात् शारदाप्रभाकारो ग्रन्थमिमं द्विविधायां प्रणाल्यामेवानुबध्नाति । ग्रन्थकारोऽयं बालमनोरमाटीकायुतायां सिद्धान्तकौमुद्यामिवोपरि मूलमात्रमधस्तात्तु व्याख्यानखण्डं प्रबन्धयति। ततो मूलभागेऽष्टाध्यायीक्रमेण सूत्रादीनि समुल्लिखति चेदधस्तादेतस्मादनन्तरमेतत् सूत्रं पाठ्यमिति निर्देशनद्वारा प्राथमिकच्छात्राणां कृते प्रक्रियाक्रमेण सूत्रादीनि निर्धारयति । अतोऽत्रस्थः प्राथमिकक्रमो लघुकौमुदीक्रमसदृशो दृश्यते । यद्यपि कौमुद्याः स्वरूपमपि तत्र सूत्रशो नानुकृतस्तथापि प्रथमं वर्णोपदेशः, ततो स्थानप्रयत्नादिनिर्धारणं ततः संज्ञासन्ध्योर्ज्ञानं तस्मात्सुबन्तं ततस्तिङन्तप्रक्रियायाः समावेशस्तदनन्तरमुत्तरतिङन्तकृदन्तादीनां विन्यासः कौमुदीसदृशो प्रतीयते, परन्तु, सर्वमेतत् प्राथमिकच्छात्रेभ्य एव, एतेषु व्युत्पन्नेषु शारदाप्रभाया मूलमेव क्रमशः पाठ्यमिति व्याख्यातुर्निर्देशनम् । प्रक्रियाक्रममनुवर्तमानाश्छात्राः प्रथमं लघुकौमुदीं पठित्वा यथा सिद्धान्तकौमुद्यां प्रविशन्ति तथैव शारदाप्रभानुवर्तिनोऽपि प्रथमं लघुकौमुदीतुल्यां प्रक्रियाक्रमिकामिमां व्याख्यामधीत्य द्वितीयाध्ययनार्थं रचितायां शारदाप्रभायां प्रविशन्त्विति तस्य निर्देशः । अतो लक्ष्यैकचक्षुष्का लक्षणैकचक्षुष्का चेति द्विविधैव शैली शारदाप्रभायां प्रयुक्ता प्राप्यते । शारदाप्रभाकारो लक्ष्यप्रधानं व्याकरणं समुपदिश्य लक्षणे समाकर्षति । वस्तुतो व्याख्यातुरेष निर्देशः समुचित एव प्रतीयते, यतो हि प्राथमिकाश्छात्राः प्रारम्भे शुष्ककाष्ठतुल्यानि नीरससूत्राण्यधिगन्तुं न प्रभवन्ति, तेषां कृतेरनेकैरुत्प्रेरणैर्दृष्टान्तैश्च संज्ञासन्धिसुबन्तादिषु विषयप्रवेशश्च चञ्चुप्रवेशशैल्या भवति, ततः षण्मासाभ्यन्तर एतेष्वधीतेषु ते पाणिनीयाष्टाध्यायीसूत्रक्रमेण व्याकरणपठनाय प्रभवन्ति, जिज्ञासायुताश्च भविष्यन्ति, तदनन्तरं ते टिढ्ढाणञ्द्वयसज्दघ्नञ्मात्रच्...(पा.सू.४-१-१५), अचतुरविचतुर... (पा.सू.५-४-७) अव्ययं विभक्ति... (पा.सू.२-१-६) प्रभृतिसूत्रेषु समाकृष्टा भवन्ति, पठन्ति च । अतः शारदाप्रभाकारेणाङ्गीकृता द्विविधा सरणिः समुचिता क्रमबद्धा च प्रतीयते ।

व्याख्याता स्वयमप्यस्य व्याकरणग्रन्थस्यापरं नाम 'सूत्रप्रक्रियाक्रमसङ्गमव्याकरणम्' इति मनुते । असौ वार्ताप्रसङ्गे आह- "पुस्तकप्रकाशनकाले मया 'अष्टाध्यायी शारदाप्रभाव्याख्यामहिता' इति शीर्षकचितः, किन्तु तत्र प्राथमिकेभ्यश्छात्रेभ्यः प्रक्रियाक्रमेण तदुत्तरवर्तिभ्यस्तु सूत्रक्रमेण विषया निबन्धीकृताः सन्ति, तथैव द्वितीयाध्ययनेऽपि सर्वत्र सूत्रक्रमो नानुक्रियते तस्मादष्टाध्यायीति नामकरणं समीचीनं न प्रतीतमतः 'सूत्रप्रक्रियाक्रमसङ्गमव्याकरणम्' इति निर्धारणीयमासीदित्यधुनानुभूयते । परन्त्वद्य तदसम्भवात् तद् द्वितीयं नाम भवितुं शक्नोतीति ।"[२९९] व्याख्यात्रा पश्चाद् निर्धारिते द्वितीये नाम्नि लक्ष्यलक्षणयोस्सङ्गमो मिलति । शारदाप्रभायां शुभाशंसाप्रदायक आचार्यपूर्णचन्द्रढुङ्गेलवर्योऽपि अत्र सूत्रप्रक्रियाक्रमयोः सङ्गमं स्वीकुरुते, तदित्थम्- "अष्टाध्यायी शारदाप्रभासहिता इति नामकेऽस्मिन् ग्रन्थे सूत्रक्रमस्य प्रक्रियाक्रमस्य च सङ्गमो वर्तते"[३००] अतः शारदाप्रभायाः शैली न हि प्रक्रियामूला (लक्ष्यप्रधाना) नापि सूत्रक्रममूला (लक्षणप्रधाना) अपितु सूत्रप्रक्रियाक्रमयोस्सङ्गमभूता लक्ष्यगर्भितलक्षणमूला वर्तत इति निश्चेतुं शक्यते ।

## ४.४ सुबन्तप्रकरणसमीक्षा

शारदाप्रभायाः सुबन्ते १५० सूत्राणि तदन्तर्गतानि वार्त्तिकानि च प्राथमिकाध्ययनार्थं निर्धारितानि । आकारदृष्ट्या संरचनादृष्ट्या चैतस्माद् विपुलतरायां लघुकौमुद्यां २५६ सूत्राणि, प्रक्रियाकौमुद्यां २६१ सूत्राणि, सिद्धान्तकौमुद्यां ३०० अधिकानि सूत्राणि तथा प्रसङ्गतः समागतानि वार्त्तिकानि च व्याख्यातानि दृश्यन्ते । अस्याः सुबन्तप्रकरणे स्थितेषु १५० सूत्रेषु १०७ विधिसूत्राणि २५ संज्ञासूत्राणि, सप्त परिभाषासूत्राणि, चत्वार्यधिकारसूत्राणि, चत्वार्येव नियमसूत्राणि, त्रीण्यतिदेशसूत्राणि च वर्तन्ते । शारदाप्रभायाः सुबन्तप्रकरणान्तर्गतेषु सकलसूत्रेषु (प्राथमिकाध्ययनार्थं निर्धारितेष्वन्येषु च) परिगणितेषु सिद्धान्तकौमुदीतुल्यान्येव सूत्राणि, ततोऽप्यधिकानि वार्त्तिकानि, समानाः परिभाषाश्च प्राप्यन्ते । शारदाप्रभाकारेण काशिकातो वार्त्तिकानीमानि समुद्धृतानि वर्तन्ते । काशिकायां सिद्धान्तकौमुदीतोऽप्यधिकानि वार्त्तिकानि सन्ति, तस्मात् द्वितीयायां शारदाप्रभायामपि कौमुदीतोऽप्याधिकानि सन्तीति सुस्पष्टमेव । शारदाप्रभायाः प्राथमिके सुबन्ते प्रथमतो रामशब्दस्य रूपसिद्धिप्रक्रिया

---

[४९]. हरिप्रसादशर्माचार्येण (२०७०) तमे वैक्रमाब्दे प्रदत्तसूचनानुसारेण ।

[५०]. पूर्णचन्द्रढुङ्गेलः (भूमिकालेखकः), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. भू. ।

दर्शिताऽस्ति । ततो दीर्घेकारान्तो गौरीशब्दः,आकारान्तः कन्याशब्दः, इकारान्तो मुनिशब्दः, ऋकारान्तः पितृशब्दः, तत ओकारान्तो गोशब्दश्च साधितः, तन्मध्ये सूत्रेषु समागता अन्येऽपि (यथा-हल्ङ्याभ्यो...इत्यत्र सरित्, कन्या, अहन्) व्याख्याता उदाहृताश्च । शारदाप्रभाकारोऽयं सिद्धान्तकौमुद्यामिव प्रथमतोऽकारस्तत आकारस्तत इकारादिकं स्वरक्रमं, स्वरतो व्यञ्जनक्रमञ्च न पालयति, यथा- हल्ङ्याभ्यो... (पा.सू.६-१-६८) इति सूत्र एकत्रैव सरित्, कन्याऽहन्शब्दानां रूपाणि साधयति अतस्तानि कथं सम्पद्यन्त इति छात्रा विभ्रमन्ते यद्यपि व्याख्यायां तेभ्यो निर्धारितान्येव रूपाणि, अनिर्धारितेषु तु सरलान्येव पाठनीयानीति व्याख्यातुर्निर्देशस्तथापि विषमाणामेकत्रैवोपस्थापनाद् दिग्भ्रमापत्तेः । पुँलिङ्गान्ते ओकारान्तगोशब्दानन्तरमथस्त्रीलिङ्गप्रक्रियेति शीर्षकतः स्त्रीलिङ्गप्रक्रियां प्रारभ्य स्त्रियाः (पा.सू.६-४-७९), वाऽम्शसोः (पा.सू.६-४-८०), ङिति ह्रस्वश्च (पा.सू.१-४-६) इति त्रिभिः सूत्रैस्तत्रत्या प्रक्रिया उल्लिखिता व्याख्याता च दृश्यते, तत्र क्रमशः स्त्री-मति-श्री-भ्रू-शब्दानां रूपाणि च साधितानि सन्ति । तदनन्तर'मथ नपुंसकलिङ्गप्रक्रियाविशेष उपदेश्यः' इति शीर्षकतो नपुंसकलिङ्गान्र्तगताः शब्दाः प्रपञ्चिता वर्तन्ते । अत्र प्रक्रियाकौमुदीसिद्धान्त-कौमुदीकारौ, अतोऽम् (पा.सू.७-१-२४) सूत्रतः प्रकरणमिदमारभेते परं शारदाप्रभाकारस्त्वष्टा-ध्यायीमनुसरन् स्वमोर्नपुंसकात् (पा.सू.७-१-३३) इति सूत्रे दधि-मधु प्रभृतीन् शब्दानुदाहरन् प्रकरणमिदं प्रारभते, ततोऽकारान्तं फलमिकारान्तं वारिशब्दं च साधयति । एवं विधा नपुंसकस्य झलचः (पा.सू.७-१-७२) इति सूत्रान्तमजन्तनपुंसकलिङ्गीयां प्रक्रियां समुल्लिख्य भं पदञ्च परिभाष्य 'अथातो हलन्तशब्दा उपदेश्याः'इति शीर्षकतो हलन्तशब्दानां साधनप्रक्रियां समारभते । अत्र अल्लोपोऽनः (पा.सू.६-४-१३४) इत्यादिभिः सूत्रैः राजादीन्, इन्हन्पूषन्...(पा.सू.६-४-१२) इत्यादिभिर्वृत्रहन् प्रभृतिशब्दान् समाख्याय सर्वादिशब्दान् तदन्तर्गतान् त्यदादीन् च विवृणुते । एतन्मध्ये सर्वादिगणान्तर्गतानि पुास्त्रीनपुंसकबोधकानि रूपाण्येकत्रैव साधितानि दृश्यन्ते, अस्मिन् प्रसङ्गे विशेषतः सर्व-तत्-किमिदमदस् (किम्, इदम्, अदस्)- युष्मदस्मच्छब्दा निरूपिताः सन्ति, ततः सखि-पति-त्रि-चतुर्-षषादीन् शब्दान् समुपदिश्य तेषां रूपाणि च साधयित्वा हलन्तशब्दविवृतिः पूरिता । ततो ऽथाव्ययप्रकरणशिक्षणमिति शीर्षकतो स्वरादिनिपातमव्ययम् (पा.सू.१-२-३७) अव्ययादाप्सुपः (पा.सू.२-४-८२) सूत्रनिष्पन्नानि रूपाणि साधितानि सन्ति । अनयोः सूत्रयोर्माध्यमेन तदन्तर्गतानामव्ययशब्दानां परिगणनं कृत्वा सुबन्तप्रकरणमिदं पूरितमस्ति ।

### ४.४.१ अधिकारानुवृत्त्योर्निदर्शनम्

प्राथमिकाध्ययनाय निर्धारिते शारदाप्रभायाः सुबन्तप्रकरणे प्रत्ययः (पा.सू.३-१-१) परश्च (पा.सू.३-१-२) भस्य (पा.सू.६-४-१२९), इण्कोः (पा.सू.८-३-५७) इति चत्वार्यधिकारसूत्राण्येव प्राप्यन्ते । एतेषु प्रत्ययः परश्चेति सूत्रद्वयं पञ्चमाध्यायपर्यन्तम्, भस्येति षष्ठाध्यायस्य चतुर्थपादान्तं इण्कोरित्यष्टमाध्यायस्य तृतीयपादान्तमधिगच्छन्ति । एतानि सूत्राणि कस्याध्यायस्य कियत् पादान्तमग्रे गच्छन्तीति शारदाप्रभाकारो गोपालशास्त्रिणं (दर्शनकेसरिणं) समुद्धरन्नुल्लिखति । तेन सम्पादितायामष्टाध्याय्यामधिकारत्वेन प्रयुक्तं पदं समग्रं सूत्रं वा स्थूलाक्षरैर्मुद्रितं तदन्ते कियत् दूरं गच्छतीत्यध्यायपादसङ्ख्यानां समुल्लेखः कृतः प्राप्यते, एवं-

| अ.पा.सं. | सूत्रम् | अधिकारसीमा |
|---|---|---|
| ३-१-१ | **प्रत्ययः** | ५-४-१६० |
| ३-१-२ | **परश्च** | ५-४-१६० |
| ६-४-१२९ | **भस्य** | ६-४- १७५ |
| ८-३-५७ | **इण्कोः** | ८-३-११९ |

अतः प्रत्ययः, परश्चेति सूत्रद्वयं पञ्चमाध्यायस्य चतुर्थपादस्य १६० सूत्रपर्यन्तं गच्छतीति ज्ञायते । तथैव इण्कोत्यिष्टमाध्यायस्य तृतीयपादस्य ११९ सूत्रान्तं भस्येति सूत्रं षष्ठाध्यायस्य चतुर्थपादस्य १७५ सूत्रान्तं निरन्तरं गच्छतीति सूचनेनानेन ज्ञायते । एवमन्यत्रापि स्थूलाक्षरादिभिस्तेषां गतिसीमादिकं निर्धारयति । अत्रत्ये प्रत्ययः परश्चेति द्वे सूत्रे प्रकृताध्यायतोऽपराध्यायान्तमनुवर्तेते । अधिकारसूत्राणि गंगाप्रवाहवत् दूरान्तं सततं गच्छन्तीत्यस्य नामैव गंगाप्रवाहवदधिकारः, यथा हिमालयतः समुत्पन्ना गंगा समुद्रान्तं निरन्तरमतति तथैवैतत् सूत्रद्वयमपि पञ्चमाध्यायस्य चतुर्थपादान्तं निरन्तरमनुवर्तत, अत एतादृगधिकारो गङ्गाप्रवाहवान्मन्यते । इण्कोः, भस्येति सूत्रेऽपि प्रकृताध्यायस्य अन्त्यसूत्रान्तमनुगच्छतस्तस्मात् तयोरपि गंगाप्रवाहवदधिकारो मन्तव्यः । सिद्धान्तकौमुद्याः षड्लिङ्गेषु पठितान्यन्यानि ङ्याप्प्रातिपदिकात् (पा.सू.४-१-१), अङ्गस्य (पा.सू.६-४-१), अपदान्तस्य मूर्धन्यः (पा.सू.८-३-५) इत्यादीनि कतिपयाधिकारसूत्राणि शारदाप्रभाकारेण प्राथमिकश्छात्रेभ्यो न निर्धारितानि तस्मात्तेषां क्षेत्रादिकमत्र न पर्यालोच्यते ।

सिंहो यथोच्चशीलामधिष्ठायाग्रे पश्चादपि दूर-दूरान्तं पश्यति तद्वत् कतिपयपाणिनीयसूत्राणि अग्रेऽनुवर्तन्ते चेत् कति तु पश्चादप्यनुकृष्यन्ते । तादृशापकर्षणानुवर्तनयोर्व्यवस्था शास्त्रे सिंहावलोकनाधिकारत्वेनाभिहितो दृश्यते ।

कौमुद्याः षड्लिङ्गे पठितेषु सूत्रेष्वपकर्षितपदयुतं अष्टन आ विभक्तौ (पा.सू.७-२-८४) इत्येकमेव सूत्रं प्राप्यते । तत्रोत्तरवर्तिनो रायो हलि (पा.सू.७-२-८५) इत्यस्मात् हलीत्यपकृष्यते, अत एवाष्टानामिति सिद्ध्यतीति तफ्वबोधिनीकारः सूचयति, एवं- "अत्र रायो हलीत्युत्तरसूत्रात् हलीत्यपकृष्य विभक्तावित्यस्य विशेषणीक्रियते, अनपकर्षणे त्वष्टानामित्यसिद्ध्यापत्तिः ।" [३०१]अतो हलादौ विभक्तौ परतोऽष्टन आत्वविधानेनाष्टानामिति साध्यते । एतादृशमपकर्षणं पाणिनीयसूत्रेषु प्राप्यत इति नागेशस्यैतेन वचनेनापि प्रमाणितो भवति-"विनियोगश्च प्रायेणोत्तरत्रोपस्थितिः, क्वचित् पूर्वत्रापि ।" [३०२] नागेशोऽनुवर्तनं विनियोगशब्दतो व्यवहरते । तादृशविनियोगश्च प्रायोत्तरत्रैव भवतीति सुविदितमेव तथापि स्वल्पतरेषु सूत्रेषु पूर्वत्रापि प्रचलित इति नागेशस्यैतस्माद् वचनतो ज्ञायते ।

सुबन्तप्रकरणान्तर्गतेषु परत्र गमनशीलेषु सूत्रेषु तत्रत्येषु पदेषु चाधिकारसङ्केत इवानुवृत्तिसङ्केतेऽपि स्थूलाक्षरैः स्पष्टीकृतोऽनुवृत्तिर्निर्धारितश्च । तथैवानुवृत्तिगतिरपि निर्धारितः । अत्र पठितानि नादिचि (पा.सू.६-१-१०४), हलन्त्यम् (पा.सू.१-३-३), अतो भिस ऐस् (पा.सू.७-१-९), सम्बोधने च (पा.सू.२-३-४७), स्त्रियाः (पा.सू.६-४-७९), नपुंसकाच्च (पा.सू.७-१-१९), अल्लोपोऽनः (पा.सू.६-४-१३४) प्रभृतीनि सूत्राणि समग्रमेवाग्रे गच्छन्ति तथैव औङ आपः (पा.सू.७-१-१८) इति सूत्रस्थं औङः, ङेराम्नद्याम्नीभ्यः (पा.सू.७-३-११६) सूत्रस्थं ङेराम्, रात्सस्य (पा.सू.८-२-२४) इति सूत्रस्थं सस्य, जश्शसोः शिः (पा.सू.७-१-२०) इति सूत्रस्थं जश्शसोः, भ्यसोऽभ्यम् (पा.सू.७-१-३०) इति सूत्रस्थं भ्यसिति पदानि चोत्तरसूत्रेष्वनुवर्तन्ते । तथानुवर्तितं पदं शारदाप्रभाया मूले स्थूलाक्षरैः सङ्केतितम् । व्याख्यान एतत् सूत्रमथवा पदमिदमग्रेऽनुवर्तत इति क,ख,ग,घादिक्रमेण समुल्लिखितञ्च दृश्यते, एवं- सख्युरसम्बुद्धौ (पा.सू.७-१-९२) सूत्रेऽस्मिनङ्गस्येति सूत्रमनुवर्तते, तच्चात्र पञ्चम्यन्ते विपरिणमय्याङ्गादिति क्रियते,तथैव इतोऽत्सर्वनामस्थाने (पा.सू.७-१-८६) इति सूत्रादत् सर्वनामस्थाने चेति पदद्वयमनुवर्तते- अत्रानुवर्तितं सर्वनामस्थान इत्यपि प्रथमान्ते

---

[५१]. ज्ञानेन्द्रसरस्वती, (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४) पृ. १०४ ।
[५२]. नागेशः, *लघुशब्देन्दुशेखरः*, वाराणसी : चौखम्बा सुरभारतीप्रकाशनम्, (२००६) पृ. ११२ ।

विपरिणम्यते तथैव गोतो णित् (पा.सू.७-१-९०) इति सूत्रात् णिदित्यप्यनुवर्तते । तेषां योगेनैतादृगर्थो निष्पाद्यते -

अङ्गस्य इतोऽत्सर्वनामस्थाने गोतो णित् = सख्युरसम्बुद्धौ

(क) (ख) (ग)

अर्थादत्र विभक्तिविपरिणामस्य स्पष्टसङ्केतः शारदाप्रभाकारेण वृत्तौ विहितः, एवम्- "सखिशब्दान्तादङ्गात् परं सम्बुद्धिभिन्नं सर्वनामस्थानं णिद्वत्स्यादिति ।"[३०३] एतादृशैः पदैरग्रे सम्बन्धबोधे किञ्चित् साहाय्यं मिलतीत्यस्य वैशिष्टयम् । प्रक्रियाग्रन्थेषु तु तादृशसङ्केताभावात् कियत् पूर्वत्र कियच्च परत्रापि सम्बद्धमिति ज्ञातुं काठिन्यमनुभूयते ।

पूर्ववर्तिभिर्निर्धारिते सूत्रक्रमे प्रक्रियाक्रमेऽपि कुत्रचित् जाटिल्यमनुभूय शारदाप्रभाकारेणात्र तस्माद् भिन्नोऽपूर्वश्च सरलक्रमो निर्धारितस्तस्मात् सारल्यानुभवः स्यादित्यपेक्षितः, अत्र 'अतो भिस ऐस्' सूत्रं केन्द्रीकृत्य शारदाप्रभाक्रमिकाणि कानिचन सूत्राणि प्रस्तूयन्ते -

| | |
|---|---|
| हलन्त्यम् | १ । ३ । ३ |
| लशक्वतद्धिते | १ । ३ । ८ |
| तस्माच्छसो नः पुंसि | ६ । १ । १०३ |
| अतो भिस ऐस् | ७ । १ । ९ |
| टाङसिङसामिनात्स्याः | ७ । १ । १२ |
| सुपि च | ७ । ३ । १०२ |
| ङेर्यः | ७ । १ । १३ |

शारदाप्रभाकारः स्वयमपि उपरि स्थिते मूलेऽष्टाध्यायीक्रमेण सूत्रोदाहरणादीनि समुल्लिख्य तद्व्याख्यायां प्राथमिकाध्ययनाय कौमुदीसन्निकटस्थम्, द्वितीयाध्ययनार्थमष्टाध्यायीमूलकं क्रममाश्रयते । अत्रत्ये प्राथमिके क्रमे विभक्तिवचनादिना, अकारादिक्रमेण, संज्ञापरिभाषादिप्रकरणेन च सूत्राणि न विन्यस्तानि । असावेतादृशं क्रमं कथं निर्धारितवान् ? एतेषां पौर्वापर्य्यं कथं स्थापितवान् ? अतो भिस ऐस् इत्यत टाङसिङसामिनात्स्या इति सूत्र उत्प्लवने किमभीष्टं लब्धवानिति न कुत्रापि किमपि च वक्ति अतः शारदाप्रभानिर्दिष्टेऽस्मिन् क्रमे कतिपयेषु स्थानेषु सन्देह उत्पद्यते । अतोऽत्रत्यः

[५३]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ. ५८७ ।

सूत्रक्रमविन्यासो विचारणीयो दृश्यते । कौमुदीकारस्तु अकारान्तरामशब्दतः सुबन्तप्रकरणमारभते । सुबन्तेऽपि प्रथमा-द्वितीया-तृतीयादिविभक्त्यन्तानि तत्राप्येकद्विबहु-वचनान्तानि रूपाणि क्रमशः साध्नोति ।

शारदाप्रभाकारेण मूले अतो भिस ऐस् (पा.सू.७-१-९) इति सूत्रं स्थूलाक्षरैर्निबद्धम्, तदन्ते सप्तदश एकादश चेति सङ्ख्याद्वयमप्युल्लिखितम्, तस्मादत्र स्थूलीकृतेन समग्रसूत्रेणाग्रे एकादशाङ्के विद्यमाने नेदमदसोरकोः (पा.सू.७-१-११) इति सूत्रे सप्तदशाङ्कयुते जसः शी (पा.सू.७-१-१७) सूत्रे च सूत्रमिदं समग्रमेवोद्गच्छतीति ज्ञाप्यते, तथा सति ताभ्यां सूत्राभ्यामेतादृगर्थोऽवबुध्यते -

| सूत्रम् | तदर्थः |
|---|---|
| नेदमदसोरकोः | इदमदस इत्येतयोरककारयोर्भिस ऐस्न भवति । |
| जसः शी | अकारान्तात् सर्वनाम्न उत्तरस्य जसः शीत्ययमादेशो भवति । |

शारदाप्रभायां स्थूलाक्षरितं सूत्रं पदञ्च कथं कियत् सूत्रान्तं गच्छतीति विषयोऽत्र न सुस्पष्टः । सूत्रस्थानि कति पदानि गङ्गाप्रवाहवदुत्तरसूत्रेष्वनुवर्तन्ते चेत् कानिचन तु मण्डूकप्लुत्या अत्यावश्यके सूत्र एवोद्गच्छन्ति एतेषां सङ्केतो व्याख्यानं वा व्याख्यात्रा कुत्रापि न कृतम् । मूले स्थूलाक्षरीकृतैरक्षरैः सङ्केतैर्वा तानि नावबुध्यन्ते । अष्टाध्याय्याः षष्ठाध्यायान्तर्गते चतुर्थपादे तस्यापि सप्तसूत्राङ्के पठितं नोपधायाः (पा.सू.६-४-७) इति सूत्रं शारदाप्रभाकारेण समग्रमेव स्थूलाक्षरितं तस्याग्रे गतिसङ्केतोऽपि अष्टादश इत्युल्लिखितञ्च, तेन सूत्रमिदं षष्ठाध्यायस्य चतुर्थपादस्य अष्टादश सूत्रपर्यन्तमनुवर्तत इति ज्ञातव्यो भवति, परन्त्वेतत् सूत्रस्थं पदद्वयं तत्सूत्रान्तं नानुवर्तत इत्यधस्तनीयाभिः सूत्रवृत्तिभिरवगम्यते, तद्यथा-

| सूत्रम् | सूत्रवृत्तिः |
|---|---|
| नोपधायाः ६।४।७ | नान्तस्योपधाया दीर्घः स्यान्नामि परे । |
| सर्वनामस्थाने...६।४।८ | नान्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सौ सर्वनामस्थाने परे । |
| वा षपूर्वस्य निगमे...६।४।९ | षपूर्वस्याच उपधाया वा दीर्घोऽसम्बुद्धौ सर्वनामस्थाने परे । |
| सान्तमहतसंयो....६।४।१० | सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे । |

| | |
|---|---|
| अप्तृन्तृच्.....६।४।११ | अबादीनामुपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे[३०४] |
| इन्हन्पूषा.....६।४।१२ | इन्हन्पूषन् अर्यमन्नित्यन्तानामङ्गानामुपधायाः शौ परतो दीर्घः । |
| सौ च ६।४।१३ | सावसम्बुद्धौ परत इन्हन्पूषर्यम्णामुपधाया दीर्घः । |
| अत्वसन्तस्य चाधातोः ६।४।१४ | अतु +अस् इत्येवमन्तस्याधातोरूपधायाः सावसम्बुद्धौ दीर्घः। |
| अनुनासिकस्य ... ६।४।१५ | अनुनासिकान्तस्याङ्गस्योपधाया दीर्घः क्वि झलादौ क्ङिति । |
| अज्झनगमां सनि ६। ४। १६ | अजन्तानामङ्गानां हनो गमश्च झलि सनि दीर्घः । |
| तनोतेर्विभाषा ६।४।१७ | तनोतेरङ्गस्य सनि झलादौ विभाषया दीर्घः । |
| क्रमश्च क्त्वि ६।४।१८ | क्रमेरूपधाया दीर्घः, क्त्वा प्रत्यये झलादौ च परतः [३०५] |

अत्र नोपधाया इति सूत्रे अङ्गस्येति सूत्रमधिकृत्य ढ्रलोपे पूर्वस्य दीर्घोऽण इति सूत्रतो दीर्घं नामि (पा.सू.६-४-३) इति सूत्रतो नामीति पदञ्चानुवर्त्य नान्तस्योपधाया दीर्घ इत्यर्थः कृतः । अत्र नः (नान्तस्येत्यर्थबोधकं लुप्तषष्ठीकं पदम्) उपधायाश्चेति पदद्वयम्, तद् द्वयमेव शारदाप्रभाकारेण स्थूलाक्षरीकृत्य क्रमश्च क्त्वि (पा.सू.६-४-१८) सूत्रपर्यन्तमनुवर्तत इति सूचितम् । अत्र सूक्ष्मतया निरूपिते सति सूत्रस्थं 'नः' इति पदं सान्तमहतसंयोगस्य (पा.सू.६-४-११०) पर्यन्तमेवानुवर्तत इति । द्वितीयं 'उपधायाः' इति पदन्तु- अनुनासिकस्य क्विझलो. (पा.सू.६-४-१५) पर्यन्तं सततं गत्वा अज्झनगमां सनि (पा.सू.६-४-१६,तनोर्विभाषा (पा.सू.६-४-१७) इति सूत्रद्वयमुल्लङ्घ्य मण्डूकप्लुत्या क्रमश्च क्त्वि (पा.सू.६-४-१८) सूत्रान्तमनुवर्तत इति स्पष्टं भवति । शारदाप्रभाकारस्तु न मूले नापि व्याख्यायां चैतत् प्रकारकमनुवर्तनं सङ्केतयति । स तु नोपधाया इति सूत्रव्याख्यायां अङ्गस्य, दीर्घः, नामीति पदत्रयं संयोज्य "नकारान्तस्याङ्गस्योपधायाः स्थाने दीर्घः स्यान्नामीति सूत्रार्थमेव कुरुते, ततः पञ्चन्, सप्तन्, अष्टन्, नवदशादिशब्दानामाम्प्रत्ययान्तरूपाणि समुपदिश्य द्वित्रिचतुर्-पञ्चशब्दानां वाक्येषु प्रयोगाभ्यासं कारयति ।

सान्तमहत...(पा.सू.६-४-१०) सूत्रव्याख्यानक्रमे तत्रानुवर्तितमुपधापदं महन् त् सु इति स्थिते नकारात् पूर्वत्र स्थितमकारमेव दीर्घयतीति व्याख्याकारोऽसौ सूत्रात्मकतया

---

[३०४]. ज्ञानेन्द्रसरस्वती, (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४) पृ. क्रमशः- १०४,६८,६८३,८९,९१,७८ ।

[३०५]. वामनजयादित्यौ, *काशिका*, पूर्ववत्, (२०२९) पृ. २५९ ।

सूचयत्येवम्- "अत्रोपधाशब्देन पूर्वो लक्ष्यते, नकारात् पूर्वत्रोपधाया असम्भवात् ।"[३०६] अत्र महानिति रूपसिध्यर्थं सान्तमहत...इति सूत्रे महतो यो नकारस्तस्योपधाया दीर्घः स्यादित्यर्थो करणीयो भवति, अन्यथा महन् त् स् इत्यवस्थायां सकारात्पूर्वीयस्तकारस्तदन्तो महन्त् इत्यङ्गं वर्तते, तस्योपधायान्तु नकारसत्वात् तस्य कथं दीर्घो भवतीति शङ्का जागर्ति, तस्मादेव व्याख्याकारो 'महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादि'त्यर्थं कुरुते, तत्सूचनायोपधायारनुवृत्तिबोधनाय च शारदाप्रभाकारः पूर्ववाक्यं प्रयुङ्क्ते । स एतादृशमनुवृत्तिसङ्केतं अज्झनगमां सनि (पा.सू.६-४-१६) इति सूत्रेऽपि करोति, तदेवं- 'अजन्तानां हन्तेरजादेशगमेश्चाचो दीर्घः स्यात् सनि ।' तथैवोत्तरवतिर्नि तनोतेर्विभाषा (पा.सू.६-४-१७) इति सूत्रमप्युल्लङ्घ्य तदुत्तरवर्तिनि 'क्रमश्च क्त्वि' सूत्रे पुनरूपधापदमुपयुङ्क्ते । एतादृशी मण्डूकप्लुतिरन्यत्रापि स्वाभाविक्येव परमनिर्देशनीये सूत्रेऽनुवृत्तिनिर्देशनं विचारणीयमित्यवधेयम् ।

काशिकाव्याख्याता श्रीनारायणमिश्रवर्यस्तु नोपधाया इति सूत्रस्थमुपधापदं अनुनासिकस्य क्विझलोः क्ङिति (पा.सू.६-४-१५) इति सूत्रान्तमेवानुवर्तत इति व्याख्याति । तदुत्तरवर्तिनि अज्झनगमां सनीति सूत्रे न गच्छतीति तस्याशयः । तत्र स आह-"अत्र उपधेति निवृत्तम्, इतरथा ह्यजन्तानामङ्गानामुपधास्थाने व्यञ्जनस्यैवास्तित्वमिति स्वाभाविकत्वेन तस्य दीर्घत्वं प्रसज्येत इति ।"[३०७] क्रमश्च क्त्वि इति सूत्र उपधाग्रहणन्तु फलितार्थकथनमेवेति तस्य टिप्पणम्, इत्थं- "उपधाग्रहणन्त्विह फलितार्थकथनम्, अचश्च इत्यस्याः परिभाषाया उपस्थितौ क्रमेरच उपधाभूतत्वात् । अनुवृत्तिकल्पने तु पूर्वनिवृत्तस्योपधाग्रहणस्य मण्डूकप्लुतिसमाश्रयणे गौरवमन्यथासिद्धिश्च ।"[३०८] एवं काशिकाव्याख्यात्रा फलितार्थकथनार्थमेवेति कथितमुपधापदं वस्तुतोऽनुनासिकस्य क्विझलो क्ङितीति सूत्रान्तमेव आयातीति काशिकाया निष्कर्षः । अत्र बालमनोरमाकारोऽप्यर्धं सहमतः । अज्झनगमां सनीति सूत्र उपधाग्रहणविषये स आह-"नोपधाया इत्यत उपधाया इत्यनुवृत्तं हनगमोरन्वेति न तु अजन्तेऽसम्भवात् ।"[३०९] एवं बालमनोरमाकारमते प्रकृतसूत्रस्थयोर्हन्गमोरेवान्वितमुपधापदं भाषावृत्तिकारपुरुषोत्तमदेव- मतेऽपि काशिकाव्याख्यातृवदनुनासिकस्य क्विझलो...इति पूर्वसूत्रान्तमेवानुवर्तते ।[३१०] अतोऽनुवृत्तस्योपधापदस्य सीमानिर्धारणे बालमनोरमाकारोऽन्येभ्यो

---

५६. हरिप्रसादशर्माचार्यः (व्या.) *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ.५३२ ।

५७ श्रीनारायणमिश्रः (व्या.), *काशिका* , पूर्ववत्, (२०२९) पृ.२६० ।

५८. पूर्ववत्, पृ. २६१ ।

५९. वासुदेवदीक्षितः *वैयाकरणसिद्धान्तकौमुदी* (तिङन्तभागः), पूर्ववत्, (२००५) पृ. ४५२ ।

६०. पुरुषोत्तमदेवः, *भाषावृत्तिः,* वाराणसी : रत्ना पब्लिकेशन, (१९८९) पृ.३०१ ।

भिन्नः प्रतीयते । अन्यत्र काशिकानुयायित्वेन दृष्टः शारदाप्रभाकारोऽयमत्र तु बालमनोरमामनुकुर्वन् क्रमश्च क्त्व इति सूत्रान्तमेव तदनुवर्तयते ।

शारदाप्रभायाः कतिषु सूत्रेष्वनुवृत्तिरस्पष्टा तथापि प्रक्रियाग्रन्थापेक्षया,अष्टाध्याय्या व्याख्यान्तरापेक्षया तु बहुत्र स्पष्टतरा दृश्यते । सप्तमाध्यायस्य प्रथमपादस्थे त्रयोविंशति क्रमाङ्के निर्धारितं स्वमोर्नपुंसकात् (पा.सू.७-१-२३) इति सूत्रं समग्रमेवाग्रिममेषु अतोऽम् (पा.सू.७-१-२४), अद्ड्डतरादिभ्यः पञ्चभ्यः (पा.सू.७-१-२५), नेतराच्छन्दसि (पा.सू.७-१-२६) इति सूत्रत्रये गच्छतीत्युक्त्वा व्याख्याताऽयं तत्पदं स्थूलाक्षरीकुरुते । उत्तरत्र प्रयुक्ताभिर्वृत्तिभिरस्या अनुवृत्तिप्रकारं ज्ञातुं शक्यमेव ।

| सूत्रम् | सूत्रवृत्तिः |
|---|---|
| स्वमोर्नपुंसकात् (पा.सू.७-१-२३) | सु अम् इत्येतयोर्नपुंसकादुत्तरयोर्लुग् भवति । |
| अतोऽम् (पा.सू.७-१-२४) | अकारान्तान्नपुंसकादुत्तरयोः स्वमोरमादेशो भवति । |
| अद्ड्डतरादिभ्यः...(पा.सू.७-१-२५) | डतरादिभ्यः परयोः स्वमोरद्ड् इत्ययमादेशो भवति । |
| नेतराच्छन्दसि (पा.सू.७-१-२६) | इतरशब्दादुत्तरयोः स्वमोश्छन्दसि विषयेऽद्ड् न ।[३११] |

अत्रत्ये अतोऽम् इति सूत्रे पदद्वयमेवानुकृत्य तत्राकारान्तादमादेश इत्यर्थं संयोज्य स्वमोरमादेशो विहितः । तथैव द्वितीयेऽपि पदद्वयमेवानुवृष्य स्वमोरद्डादेशः कृतः । तृतीयसूत्रस्थे निषेधेऽपि नपुंसकात् स्वमोरिति च पदद्वयमेवानुवर्त्य इतरशब्दादद्डादेशो निषिद्ध इति सर्वेषामनुवृत्तिसङ्केतः स्पष्टः । एतादृश्यनुवृत्तिः सप्तमाध्यायस्य द्वितीयपादस्य ८६ सङ्ख्यकाद् युष्मदस्मदोरनादेश इति सूत्रात् ९८ सङ्ख्यकं प्रत्ययोत्तरपदयोश्चेति सूत्रपर्यन्तं गच्छति । उत्तरसूत्रेषु सर्वेषु युष्मदस्मदोरित्यनुक्रियत इति व्याख्याकारः स्पष्टयति । अतोऽस्या अनुवृत्तिनिर्देशरीति स्पष्टेति निष्कर्षः ।

### ४.४.२ विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम्

शारदाप्रभायाः सुबन्तप्रकरणे विग्रहोदारणप्रत्युदारणैः पाणिनीयसूत्राणि तत्रत्यपदानि च कथं सार्थकीकृतानीत्यतः परं विचार्यते ।

---

[३११]. वामनजयादित्यौ, *काशिका,* पूर्ववत्, (२०२९) पृ. २९९ ।

### ४.४.२.१ सुबन्तीयेषूदाहरणेषु विग्रहसमासौ

सन्धिद्वयप्रकरण इवात्रत्ये सुबन्तेऽपि सरलेन संस्कृतेन कठिने स्थाने नेपालीहिन्दीति भाषयाऽपि सूत्रवार्त्तिकादीनि व्याख्यातानि सन्ति, यद्यपि द्वितीयाध्ययनार्थं निर्धारितेषु व्याख्यानभागेषु किञ्चिद् गाम्भीर्यम्, कतिपयेषु पदेषु विग्रहसमासादिकमपि प्राप्यते, तथापि तत्तु द्वितीयाध्ययनार्थमेव निर्धारितमिति प्राथम्येनाध्ययनीयेषु व्याख्यानेषु विग्रहाभावो बहुत्र दृग्गोचरीभवतीति निश्चितम् । अत्र शारदाप्रभाकारेण द्वितीयाध्ययनाय निर्धारिते सुबन्तीयव्याख्यानखण्डे प्रयुक्तौ विग्रहसमासौ कीदृशौ ? तौ पूर्वप्रकरणतो भिन्नौ समानौ वेत्यतः परं विश्लिष्यते-

प्रत्ययः परश्चेति द्वाभ्यां सूत्राभ्यां प्रारब्धेऽस्मिन् सुबन्तप्रकरणे शारदाप्रभाकारेण लशक्वतद्धिते (पा.सू.१-३-८) इति सूत्रतः पूर्वं कस्मिनपि सूत्रे विग्रहो नैव प्रदर्शितः । अत्र तु- लश्च शश्च कुश्चेति लशकु:, लकारशकारकवर्गा इति विग्रहं कृत्वा समाहारद्वन्द्वः [३१२] कृत एतस्मात् पूर्ववर्त्तिनि स्वौजसमौट् (पा.सू.४-१-२) इत्यत्र सु च औ च जस् च इत्यादिविग्रहद्वारा द्वन्द्वसमासे निर्धारणीयेऽपि, हलन्त्यमितिसूत्रे हलि+अन्त्यमिति विग्रहं प्रदर्शयितुं शक्येऽपि तत्र विग्रहो नोल्लिखितः, तथैव टाङसिङसामिनात्स्याः (पा.सू.७-१-१२) इति सूत्रे विग्रहप्रदर्शनावश्यके सत्यपि न प्रदर्शितः । यद्यपि तन्मध्ये पठितानि एङ्ह्रस्वात् सम्बुद्धेः (पा.सू.६-१-६९), हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् (पा.सू.६-१-६८), ङेराम्नद्याम्नीभ्यः (पा.सू.७-३-११६), यू स्त्र्याख्यौ नदी (पा.सू.१-४-३), अम्बार्थानद्योर्ह्रस्वः (पा.सू.७-३-१०७), ङसिङसोश्च (पा.सू.६-१-११०), इत्यादीनि नैकानि सूत्राणि विग्रहप्रदर्शनार्हाणि दृश्यन्ते । हलन्तपुलिङ्गे पठिते षट्चतुर्भ्यश्च (पा.सू.७-१-५५) इति सूत्रे षट् च चतुर् च तेभ्य इति विग्रहद्वारार्थापनेऽनुभूतेऽपि तं विनैव एवं सूत्रार्थः कृतः- "षट्संज्ञकेभ्यश्चतुर्भ्यश्च परस्यामो नुडागमः स्यादिति ।"[३१३] एवं विग्रहसमासादिप्रदर्शनं विनैव बहुत्र सूत्रेष्वर्थापितेष्वपि नेयँङुवँङ्स्थानावस्त्री (पा.सू.१-१-४) इत्यत्र तु इयङुवङौ तिष्ठतो यत्र ययोरिति वा विग्रहे स्थाधातोरधिकरणे ल्युटि अनुक्तकर्तृषष्ठ्या स्थानशब्देन समासः [३१४] इति । अस्थि च दधि च सक्थि च इत्येतेषामङ्गानां स्थान इत्यर्थापनक्रमे विग्रहसमासाभ्यामस्थिदधिसक्थ्यक्ष्णामनङुदात्त इति विग्रहो ध्वनितो दृश्यते । एतादृशो

---

[६३]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.४५ ।
[६४]. पूर्ववत्, पृ. ५८१ ।
[६५]. पूर्ववत् पृ. ६६ ।

विग्रहसङ्केतः सामान्य एवेति निष्कर्षः । अत्रापि द्वितीयाध्ययने पठनीयेषु सूत्रव्याख्यानेषु विग्रहसमासयोरवस्थितिः प्रथमतोऽधिकतरा प्रतीयते । व्याख्याकारोऽयं द्वितीयावृत्तावेतत् पदं कस्य विशेषणम् ? कुत्र तदन्तविधिः ? अङ्गाधिकारो आयाति न वा ? कस्मिन् पदे कीदृशो विग्रहः ? कश्च समासः ? कस्मिनर्थे कः प्रत्ययः ? इत्यादीनां प्रश्नानामुत्तराणि दातुमुत्सहते । एताः सकला रीतयः पूर्वव्याख्यातारः पूर्वमेव प्रयुक्तवन्तस्तथापि सरलभाषया सुबोध्यया च शैल्या शारदाप्रभाकारस्ता दर्शयतीति तदेवास्य वैशिष्ट्यम् । एतादृशान् विषयान् शारदाप्रभाकारः प्रायेण दृष्टान्तद्वारा सरलया संस्कृतगिरा तथा लोकभाषाद्वारा च बोधयति, तेषु हलोऽनन्तराः संयोगः (पा.सू.१-१-७) इति सूत्रे प्रयुक्तो दृष्टान्तः स्मरणीयो वर्तते । तस्मिन् सूत्रे स्थितस्य 'अनन्तरा' इति पदस्य व्याख्यातारोऽज्भिरव्यवहिता हल इत्यर्थं कुर्वन्ति, सूत्रेऽदृष्टो तादृशोऽर्थः कुतः समानीत इति जिज्ञासायां समुदितायां शारदाप्रभाकार आह- "गोसमुदायो महिषैर्व्यवायेऽथवा महिषसमुदायो गोभिर्व्यवधान एव व्यवधानं मन्यत अतो व्यवधानं विजातीयस्यैवेति नियमः प्रसिद्धः स्थिरश्च, तस्मादेवात्राज्भिरव्यवहिता हल इत्यर्थो निष्पद्यत इति निष्कर्षः ।

## ४.४.२.२ उदाहरणप्रत्युदाहरणप्रयोगः

शारदाप्रभायाः सुबन्तप्रकरणे स्पष्टतया सुबोध्यानि सरलानि मौलिकानि उदाहरणप्रत्युदाहरणानि च प्रयुक्तानि सन्ति । सन्धिप्रकरणे उदाहरणानां प्राशस्त्येषु सत्स्वपि प्रत्युदाहरणानां न्यूनत्वमनुभूयते । शारदाप्रभायां बहुषु सूत्रेषु तत्रोल्लिखितेषु वार्त्तिकेषु च प्रथमतो मौलिकान्युदाहरणानि प्रस्तुतानि तदनन्तरमेव सिद्धान्तकौमुदी-काशिकादीनुदाहृत्य तानि चान्वयव्यतिरेकाभ्यां व्याख्याय सूत्रपदकृत्यं सार्थकीकृतम् । तादृशोदाहरणप्रत्युदाहरण अतो भिस ऐसिति सूत्रे प्राप्यन्ते । तस्य मूले फलैरिति मौलिकमुदाहरणं विन्यस्य अत इति तपरकरणाद् मालाभिरिति प्रयोगे भिस ऐसादेशो न भवतीति वाक्यद्वारा सूत्रस्थमत इति पदस्य कृत्यप्रदर्शनं कृतं दृश्यते, अनेन प्रकारेणोदाहरणप्रत्युदाहरणाभ्यां तपरकरणप्रयोजनकथनेन च सूत्रसार्थकं कृतम् । तद्यथा- एङ्ह्रस्वात् सम्बुद्धेरिति सूत्रमूले- काशिकातोऽध्याहृताभ्यां हे अग्ने हे वायो इति उदाहरणाभ्यां एङ्पदं सार्थकीकृत्य हे श्याम इति मौलिकोदाहरणद्वारा पुनर्ह्रस्वपदमप्यन्वर्थीकृतम् । ततो व्याख्यानखण्डे प्राथमिकरूपेण सूत्रमर्थाप्य द्वितीयावृत्तौ येन विना यदनुपपन्नं तत्तेनाक्षिप्यत इति नियमतो यस्मात् प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्(पा.सू.१-४-१३) सूत्रपठितमङ्गमाक्षिप्य एङ्ह्रस्वाभ्यां विशिष्यते, तस्मादत्र तदन्तविधिरपि विधीयत इति सङ्केतितमभ्युपेयते, तथाहि-"अत्र सूत्रे पठितेन सम्बुद्धिशब्देन अङ्गमित्यध्याह्रियते तच्च एङ्ह्रस्वाभ्यां सम्बध्यते ततस्तदन्तविधौ पूर्वोक्तार्थः

फलतीति ।" [३१५] अनेन प्रकारेण सम्बुध्याक्षिप्तमेङन्तं ह्रस्वान्तं वाऽङ्गमेवात्र गृह्यत इति व्याख्यानाद् हे कतरद् इत्यत्र लोपनिषेधः, हे कुल इत्यत्र लोपसिद्धिश्च भवति । एवञ्च सूत्रार्थस्य सङ्गतिरपि स्पष्टतया प्रतीता भवति । एतादृशैरुदाहरणप्रत्युदाहरणैः सूत्रसार्थकीकृतानि निदर्शनानि सुबन्तप्रकरणेऽन्यत्रापि लभ्यन्ते, तेषु कतिचिदुदाहरणान्यत्र प्रस्तूयन्ते-

| सूत्रम् | उदाहरणम् |
|---|---|
| हल्ङ्याब्भ्यो दीर्घात्...(पा.सू.६-१-६८) | सरित्, कन्या, अहन् । |
| तस्माच्छसो नः पुंसि (पा.सू.६-१-१०३) | रामश्यामविष्णुमित्रान्,बालकान्, पितॄन् । |
| अमि पूर्वः (पा.सू.६-१-१०७) | श्यामम्, मुनिम्, भानुम् । |
| नामि (पा.सू.६-४-३) | बालकानाम्, मुनीनाम्, भानूनाम् । |
| सर्वनामस्थाने... (पा.सू.६-४-८) | पिता, वनानि । |
| सौ च (पा.सू.६-४-१३) | विद्यार्थी । |
| अत्वसन्तस्य... (पा.सू.६-४-१४) | पठितवान्, धीमान्, वेधा । |
| एरनेकाचोऽसंयोग... (पा.सू.६-४-८२) | प्रध्यौ । |
| टाङसिङसामिनात्स्याः (पा.सू.७-१-१२) | देवेन, देवात्, देवस्य, कमलेन । |
| षड्भ्यो लुक् (पा.सू.७-१-२२) | कति । |
| ह्रस्वनद्यापो नुट् (पा.सू.७-१-५४) | बालानाम्, कन्यानाम्, पितॄणाम्, गौरीणाम् । |
| शप्श्यनोर्नित्यम् (पा.सू.७-१-८१) | पठन्ती ब्राह्मणकुले, नृत्यन्ती नटकुले [३१६] |

एतादृशानि सरलानि काशिका-कौमुद्योरुदाहरणतुल्यानि परं भिन्नानि मौलिकोदाहरणान्यत्र बहुत्र प्राप्यन्ते, तथापि काशिकातोऽपि बहून्युदाहरणानि गृहीतानि दृश्यन्ते तेभ्यः कानिचनात्र प्रस्तूयन्ते -

| सूत्रम् | काशिकातः समुद्धृतान्युदाहरणानि |
|---|---|
| हल्ङ्याब्भ्यो... (पा.सू.६-१-६८) | गौरी |
| तस्माच्छसो नः पुंसि (पा.सू.६-१-१०३) | अग्नीन् ,वायून् |
| सर्वनामस्थाने ...(पा.सू.६-४-८) | राजा |

---

६६. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ. ४४५ ।

६७. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्,(२०६०) पृ. क्रमशः ४४५, ४५७, ४५८, ५३१, ५३३, ५३५,५४७,५७१,५७४,५८०,५८५ ।

| | |
|---|---|
| सौ च (पा.सू.६-४-१३) | दण्डी, वृत्रहा, पूषा, अर्यमा |
| अत्वसन्तस्य ...(पा.सू.६-४-१४) | सुयशा |
| एरनेकाचो... (पा.सू.६-४-८२) | विव्यतुः |
| षड्भ्यो लुक् (पा.सू.७-१-२२) | पञ्च, षट् |
| शप्श्यनोर्नित्यम् (पा.सू.७-१-८१) | पचन्ती कुले । |
| आच्छीनद्योर्नुम् (पा.सू.७-१-८०) | तुदन्ती, तुदती वा ब्राह्मणकुले ।[३१७] |

अत्र समागतानि-राजा, वृत्रहा, पचन्ती, तुदन्तीति रूपाणि सिद्धान्तकौमुद्यामपि तेषु सूत्रेषु सन्तीति सिद्धान्तकौमुदीकारेणापि काशिकातो गृहीतानीत्यवधेयम् ।

एतैरेतादृशैरन्यैश्च बहुभिरुदाहरणैः शारदाप्रभेयं काशिकामाश्रित्य ग्रथितेति निश्चेतुं शक्यते । शारदाप्रभायां सिद्धान्तकौमुदीतोऽपि नैकान्युदाहरणानि सङ्गृहीतानि दृश्यन्ते । व्याख्याकारोऽयं ग्रन्थमूले व्याख्यानखण्डेऽपि सिद्धान्तकौमुदीत उदाहरणानि समुद्धरति । तत्रत्ये प्राच्यनव्ययोर्मतभेदे 'अत्र दीक्षिते'त्यादिवाक्यद्वाराऽप्रत्यक्षतस्तत्र समर्थनं क्वचिद् विरोधमपि दर्शयति । उदाहरणेऽपि कतिपयेषु स्थानेषु सिद्धान्तकौमुदीमुद्धरति, यद्यपि कानिचनोदाहरणानि दीक्षितेनापि काशिकादिभ्यः स्वपूर्ववर्तिभ्यो व्याख्यानग्रन्थेभ्यश्च समानीतानि सन्तीति कस्यैतदुदाहरणमिति संशयो जागर्त्येव तथापि सामान्यतः शारदाप्रभाकारेण पूर्वग्रन्थेभ्य आनीतमित्यवधेयम् । अत्र सिद्धान्तकौमुदीतः समुद्धृतानि सुबन्तप्रकरणान्तर्गतानि कानिचनोदाहरणानि प्रस्तूयन्ते-

| सूत्रम् | उदाहरणम् |
|---|---|
| ख्यात्यात्परस्य (पा.सू.६-१-११२) | सख्युः |
| अत्वसन्तस्य चाधातोः (पा.सू.६-४-१४) | श्रीमान् |
| एरनेकाचोऽसंयोगपूर्वस्य (पा.सू.६-४-८२) | प्रध्यौ, प्रध्यः |
| ओः सुपि (पा.सू.६-४-८३) | खलप्वौ, खलप्वः |
| वसोः सम्प्रसारणम् (पा.सू.६-४-१३१) | विदुषः |
| अचः (पा.सू.६-४-१३८) | प्राचः |
| आतो धातोः (पा.सू.६-४-१४०) | विश्वपः |

---

[६८]. वामनजयादित्यौ, *काशिका,* पूर्ववत्, (२०२९) पृ. क्रमशः १४७, १५७, २५८, २५९, २५९, २७४, २९९, ३१२,३११ ।

| | |
|---|---|
| आङि चापः (पा.सू.७-३-१०५) | रमया, रमयोः |

शारदाप्रभाकारो यद्यपि कौमुद्यपेक्षया काशिकामेवाधिकतरं समुद्धरते तथापि उदाहरणग्रहणे सिद्धान्तकौमुदीस्थान्युदाहरणान्यपि बहुत्र प्रयुङ्क्त इति तयोस्तोलनेन ज्ञायते ।

शारदाप्रभायाः सुबन्तप्रकरणमुदाहरणसमुल्लेखने यथा समृद्धं तथा प्रत्युदाहरणे नेति प्रकृतग्रन्थावलोकनेन स्फुटं प्रतीयते । यद्यपि सन्धिप्रकरणापेक्षया सुबन्ते प्रत्युदाहरणानामाधिक्यं दृश्यत एव तथाप्यत्र प्रत्युदाहरणानां नैयून्यमेवेति विभावनीयम् । शारदाप्रभाकारेण कौमुदीतोऽनुकृतानि कानिचन तादृशप्रत्युदाहरणान्यत्र प्रस्तूयन्ते-

| सूत्रम् | प्रत्युदाहरणम् |
|---|---|
| अतो भिस ऐस् (पा.सू.७-१-९) | अत इति तपरकरणान्नेह, मालाभिः |
| सर्वनामस्थाने ...(पा.सू.६-४-८) | सर्वनामस्थान इत्युक्तेर्नेह, यज्वनः । |
| अप्तृन्तृच्...(पा.सू.६-४-११) | असम्बुद्धावित्युक्तेर्नेह, हे राजन् । |
| इन्हन्पूषार्य....(पा.सू.६-४-१२) | शावेवेति नियमान्नेह, विद्यार्थिनौ । |
| अत्वसन्तस्य ..(पा.सू.६-४-१४) | अधातोरित्युक्तेर्नेह- पिण्डं ग्रसते पिण्डग्रः । |
| एरनेकाचो... (पा.सू.६-४-८२) | अनेकाच इत्युक्तेर्नेह-नियौ,नियः । |
| | असंयोगपूर्वस्य इत्युक्तेर्नेह-यवक्रियौ । |
| वाह ऊठ् (पा.सू.६-४-१३२) | भस्येत्यधिकारान्नेह- प्रष्ठवड्भ्याम् । |
| श्वयुवमघोना..(पा.सू.६-४-१३३) | अत इत्यपकृष्यमाणत्वान्नेह- मघवतः । |
| | अतद्धित इत्युक्तेर्नेह-शैवम् । |
| आतो धातोः (पा.सू.६-४-१४०) | धातोरित्युक्तर्नेह- खट्वा । |
| अष्टाभ्य औश् (पा.सू.७-१-२१) | कृताकारनिर्देशान्नेह- अष्ट । |
| षट्चतुर्भ्यश्च (पा.सू.७-१-५५) | बहुवचननिर्देशेनार्थप्राधान्यविवक्षणान्नेह-प्रियषषाम् । |
| युजेरसमासे (पा.सू.७-१-७१) | असमास इत्युक्तेर्नेह-अश्वयुक् । |
| | युजिरितिधातुपाठपठितेकारनिर्देशादिह न- युज्यतेर्युक् । |
| नपुंसकस्य झलचः (पा.सू.७-१-७२) | नपुंसकस्येत्युक्तेर्नेह- विश्वजित् क्षत्रियः। |
| तृतीयादिषु भाषित...(पा.सू.७-१-७४) | तृतीयादिषु इत्युक्तेर्नेह-सुधिनी ब्राह्मणकुले । |
| | भाषितपुंस्कादित्युक्तेर्नेह- जतुने । [३१८] |

[६९]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. क्रमशः- ५७०, ५३३, ५३४, ५३५, ५४७, ५५७, ५५८, ५७४, ५८१, ५८३,५८४ ।

अत्र न केवलं सूत्राणामपि तु वार्त्तिकानामिष्टीनामपि प्रत्युदाहरणानि प्रस्तुत्य वार्त्तिकादीनि सार्थकीकृतानि, तद्यथा- 'इह द्विपर्यन्तानामेवेष्टि इति विज्ञानान्नेह- भवतु भवान् । अर्थाद् द्विशब्दपर्यन्तानामेव सर्वनामता विद्यमानात् भवच्छब्दे न सर्वनामसंज्ञेति तस्याशयः । तथैव 'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इति वाक्येन सर्वादीनि सर्वनामानीति सूत्रमन्वर्थीकृतम् । अतोऽत्रत्यसूत्राणां सार्थकीकरणे तादृशप्रत्युदाहरणानामपि विशिष्टमवदानमस्तीति वक्तुं शक्यते ।

### ४.४.३ शङ्कामुत्थाप्य समाधानम्

सरलतो जटिलक्रमः, स्थूलतः सूक्ष्मक्रमः, मूर्ततोऽमूर्तक्रमः, पूर्णतोऽंशक्रमः, ज्ञाततोऽज्ञातक्रम इत्यादीन् शिक्षाशास्त्रीयनियमान् [३१९] परिपालयन् शारदाप्रभाव्याख्यानमपि सन्धिप्रकरणतः सुबन्तप्रकरणे प्राप्ते विस्तृतमाकारं गृह्णन् उदाहरणबहुलं शङ्कोत्थापनेन तथा समाधानेन च किञ्चिद् जटिलतरं सूत्रस्थपदप्रयोजननिरूपकञ्च सञ्जातं दृश्यते ।

शारदाप्रभाव्याख्यानस्य सन्धिप्रकरणे प्रायेण शङ्का नोत्थापिता, उत्थापितास्वपि सामान्यतो दिङ्निर्दिष्टा एव परमस्मिन् सुबन्तप्रकरणे तदपेक्षया गभीररूपेण शङ्का उपस्थापिता पक्षविपक्षाभ्यां विविक्ताश्च दृश्यन्ते । द्वितीयाध्ययनार्थं निर्धारितेषु सूत्रेषु काशिका-भाषावृत्ति- सिद्धान्तकौमुद्यादिषु समुद्भाव्य प्रपञ्चितानां शङ्कोपशङ्कानां सङ्केतो मूल एव विहितः । व्याख्यानखण्डे तु मूले समुत्थापितानां शङ्कानां व्याख्यान-विश्लेषणोहापोहनादिकं सङ्क्षेपेण कृतम् । व्याख्यात्रा कोमलमतिभ्यश्छात्रेभ्यो बोधभारं न भवेदिति विचार्य तथा कृतं प्रतीयते । तत्र द्वितीयावृत्तौ शिक्षणीयमित्युक्त्वा तत्र कति शङ्काः समुत्थापिता एव ।

शारदाप्रभाव्याख्यायां समुत्थापितानां शङ्कानामाधारग्रन्थौ प्रायः काशिका-सिद्धान्तकौमुद्यौ दृश्येते । तत्रत्यानि लघूनि सरलानि च फक्किकावाक्यानि शारदाप्रभायां किञ्चित् परिवृत्त्यापि प्रस्तुतानि । समुद्धृतेषु वाक्येषु- अत्र काशिका, अत्र दीक्षितः, अत्र केचिदित्यादिभिरुद्धरणसङ्केतैः संस्मृत्यानुसन्धानधर्मः परिपालितः ।

शारदाप्रभाकारोऽसौ सुबन्तप्रकरणान्तर्गतेषु एङ् ह्रस्वात् सम्बुद्धेः (पा.सू.६-१-६९),आतो धातोः (पा.सू.६-४-१४०), गोतो णित् (पा.सू.७-१-९०),ओः सुपि (पा.सू.६-४-८३), वर्षाभ्वश्च (पा.सू.६-४-८४), नेदमदसोरकोः (पा.सू.७-१-११), तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य (

---

[७०]. कुलराजन्यौपाने, *पाठ्यक्रम तथा मूल्याङ्कन,* काठमाडौं : वल्डवाइड पब्लिकेसन, (२०६९) पृ. ८२ ।

पा.सू.७-१-७४), उगिदचां सर्वनामस्थानेऽधातोः (पा.सू.७-१-७०), न संयोगाद् वमन्तात् (पा.सू.६-४-१३४), इन्हन्पूषार्यम्णां सौ (पा.सू.६-४-१२), अत्वसन्तस्य चाधातोः (पा.सू.६-४-१४), नलोपः सुप्स्वरसंज्ञा...(पा.सू.८-२-२), षट्चतुर्भ्यश्च (पा.सू.७-१-५५), साम आकम् (पा.सू.७-१-३३), प्रभृतिषु पञ्चदशाधिकेषु सूत्रेषु शङ्कामुत्थाप्य समाधत्ते । स तत्र ग्रन्थमूल एव 'असंयोगपूर्वस्य इत्युक्तेर्नेह-यवक्रियौ, असम्बुद्धावित्युक्तेर्नेह- हे राजन्' [३२०] एतादृशैः सरलैर्लघुवाक्यैस्ताः प्रस्तुत्यापि कोमलमतिभ्यश्छात्रेभ्यो भारं स्यादिति विचार्य व्याख्यानखण्डे न विवृणोति, अत एतासु दुर्बोध्यासु, व्याख्यानेन विना दुरधिगमासु कतिपयशङ्कासु कौमुदीकाशिकादीनां व्याख्या समाश्रयणीया भवति ।

शारदाप्रभायां शङ्कानामुत्थापनं समाधानञ्च सामान्यरूपेणैव कृतं विद्यते । तत्र काशिका-सिद्धान्तकौमुद्योर्मतभेदः, बालमनोरमा-तत्त्वबोधिन्योर्विवादः, पदमञ्जरी-न्यासयोर्मन्थनम्, महाभाष्य-प्रौढमनोरमा-शेखरादीनां प्रौढानां शङ्कासमाधानादिकोटीनां चर्चा नैव दृग्गोचरी भवतीति सारल्यानुरोधो कारणमिति जानन्त्येव सुधियः ।

अतः परं पूर्वोक्तेषु सूत्रवार्त्तिकादिषु शङ्कोत्थापनेन समाधानञ्च कया रीत्या कृतमित्यत्र विचार्यते ।

## ४.४.३.१ हे कतरत्, हे कुल इत्यादिप्रयोगसाधनविचारः

अत्रत्ये हे कतरदिति रूपे तलोपवारणाय, हे कुल इति रूपे मलोपसाधनाय च एङ् ह्रस्वात्सम्बुद्धेः (पा.सू.६-१-६९) इति सूत्र एङन्तात् ह्रस्वन्ताच्चाङ्गात् परो हल् लुप्यत इत्यर्थो विधीयते, परं तत्सूत्रेऽविद्यमानमङ्गं कुतः समानीतमिति प्रश्ने सिद्धान्तकौमुदीमनुसरन् शारदाप्रभाकारः- "सूत्रे पठितेन सम्बुद्धिशब्देनाङ्गमित्यध्याह्रियते, तच्चैङ्ह्रस्वाभ्यां सम्बध्यते ततस्तदन्तविधौ पूर्वोक्तार्थः फलति "[३२१] इत्युक्त्वा समाधत्ते । अनेन प्रकारेण यस्मात् प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम् (पा.सू.१-४-१३) इति सूत्राद् मण्डूकप्लुत्याऽङ्गपदमनुवर्त्य तच्चैङ्ह्रस्वाभ्यां विशेष्यीकृत्य पुनस्तत्र तदन्तविधिमपि कृत्वा पूर्वोक्ते रूपे साध्येत एतच्च व्याख्यातुः कौशलम् ।

---

[७]१. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. ५३३ ।
[७]२. हरिप्रसादशर्माचार्यः (व्या.),*अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. ४४५ ।

### ४.४.३.२ आतो धातोरित्यस्य योगविभागे विचारः

अष्टाध्याय्यां पठितयोर्हलः श्नः शानज्झौ (पा.सू.३-१-८३), समासेऽनञ्पूर्वे क्त्वो ल्यप् (पा.सू.७-१-३७) इति सूत्रस्थयोः श्नक्त्वोः पदयोर्धातुव्यतिरिक्तत्वेन आतो धातोः (पा.सू.६-४-१४०) इति कथमालोपः ? इति शङ्कां काशिकावाक्यद्वारा निवारयन् शारदाप्रभाकार आह- "आत इति योगविभागः, तेन क्त्वो ल्यप्, हलः श्नः शानच् इत्येवमादिसिद्धं भवति ।" [३२२] अर्थात् पाणिनीयसूत्रयोरन्यथासिद्धिनिवारणाय आतो धातोरिति सूत्रं 'आतः' इत्येकं 'आतो धातोः' इत्यपरञ्चेति योगविभागः क्रियते, ततो विभक्तेन प्रथमसूत्रेण धातुभिन्नाभ्यां क्त्वाश्ना इत्याभ्यामपि आलोपे क्त्वः श्न इति रूपद्वयं सिध्यतः,परं योगविभागस्य बाहुलकात् खट्वा, मालादिषु धातुभिन्नेष्वाकारान्तेष्वालोपो नेति शारदाप्रभाकारस्तत्र सूचयति । सिद्धान्तकौमुदीकारोऽपि योगविभागस्य क्वाचित्कमेवं सङ्केतयति- "आत इति योगविभागादधातोरप्याकारलोपः क्वचित्- क्त्वः श्नः ।" [३२३] अनेन प्रकारेण सूक्ष्मतया पर्यालोचिते सति द्वितीयके व्याख्याने शङ्कानामुत्थापनं समाधानञ्चास्या वैशिष्ट्यं मन्तव्यम् ।

### ४.४.३.३ 'गोतो णित्' इति सूत्रे वार्त्तिकन्यासविमर्शः

गोशब्दात्परस्य सर्वनामस्थानस्य णिद्वद्भावविधानार्थं पाणिनिना गोतो णित् (पा.सू.७-१-९०) इति सूत्रं विरचितम्, परन्तु- ओकारान्तेभ्यः सुद्योप्रभृतिभ्योऽपि(गो व्यतिरिक्तेभ्यः) णिद्वद्भावेन अचो ञ्णिति (पा.सू.७-२-११५) इति सूत्रेण वृद्धिं विधाय सुद्यौरिति साधितम् तत् कथं सम्भवतीति शङ्कायां केचन 'ओतो णिदिति वाच्यम्' इति वार्त्तिकद्वारा कतिपये तु पूर्वसूत्रस्यैव संशोधनद्वारा इष्टसिद्धिं कुर्वन्ति । अत्र काशिकाकारः - "केचिदोतो णिदिति पठन्ति । द्योशब्दस्यापि

---

[७३]. पूर्ववत् पृ. ५५८ ।

[७४]. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४) पृ. ६७ ।

सर्वनामस्थानं विद्यते तदर्थम् "[३२४] इति कथयन्नप्रत्यक्षतः सूत्रसंशोधनं स्वीकुरुते । तत्र सिद्धान्तकौमुद्या बालमनोरमाटीकाकारः स्वकीयमभिमतमेवं प्रकटयति- "सुद्योशब्दस्य सर्वनामस्थाने गोतो णिदित्यप्राप्ते ओतो णिदिति वाच्यम् । अत्र गोत इत्यस्य गकारमपनीय 'ओतो णिदिति वाच्य'मित्यर्थः, न त्विदं वार्त्तिकम्।" [३२५] परं तफ्वबोधिनीव्याख्यायां तु चैतद्वार्त्तिकमित्युक्तं दृश्यते ।"[३२६] शारदाप्रभाकारस्तु वार्त्तिकमेवैतदित्युल्लिखति, तथापि व्याख्यानखण्डे तन्न व्याकुरुते । यत् किमपि स्यात्, सुद्यौरिति रूपसिद्धये सूत्र संशोधनमथवा वार्त्तिकस्य न्यासो वाऽऽवश्यकः, तस्मादत्र शारदाप्रभाकारेणोपस्थापितः सङ्केतः सूत्रव्याख्याने चोपकरिष्यतीति निश्चितम् ।

### ४.४.३.४ षड्चतुर्भ्यश्चेति सूत्रे बहुवचनप्रयोगविचारः

षट्संज्ञकात् (षान्त-नान्तानां सङ्ख्यावाचिनां षट् संज्ञा) शब्दात्तथा चतुर्शब्दाच्च नुड् विधानार्थं पाणिनिना षट्चतुर्भ्यश्च (पा.सू.७-१-५५) इति सूत्रं विरचितम् । अत्र द्विविधाभ्यामेव शब्दाभ्यां नुडागमविधानात् 'षट्चतुर्भ्याञ्च' इत्येव सूत्रितेऽपि सिद्धे बहुवचननिर्देशः किमर्थः ? इति शङ्कां निवारयन् शारदाप्रभाकारः प्राह- "बहुवचननिर्देशेनार्थप्राधान्यविवक्षणान्नेह-प्रियषषाम्, प्रियपञ्चाम्, प्रियचतुरामिति ।"[३२७] अर्थादत्र द्विवचननिर्देशेनैव सिद्धे बहुवचननिर्देशः पूर्वपदविशेषणीभूते कर्मधारय एव नुट् स्यात् पूर्वपदविशेष्यभूते बहुव्रीहौ तु न स्यादिति तस्याशयः । वृत्तिकारोऽप्यत्र 'गौणत्वे तु नुड् नेष्यते' इतीष्टिवार्त्तिकद्वारा प्रियचतुरामित्यादौ नुड्निवारयति, अतोऽत्र षट्संज्ञकेभ्यः षान्तशब्देभ्यो नान्तेभ्यस्तथा चतुर्शब्दाच्च नुट् विधीयते परं

---

७५. वामनजयादित्यौ, *काशिका,* पूर्ववत् (२०२९) पृ. ३१३ ।
७६. वासुदेवदीक्षितः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (प्रथमभागः),पूर्ववत्, (१९९६) पृ. ३२९ ।
७७. ज्ञानेन्द्रसरस्वती (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत् (१९७४) पृ. ८१ ।
७८. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ. ५८१ ।

तत्रार्थप्राधान्यं विवक्ष्यते न तु प्रयोग इति निश्चीयते । प्रसङ्गेऽस्मिन् शारदाप्रभाकारेण पूर्वोक्तेन वाक्येन कृतं बहुवचननिर्देशस्पष्टीकरणं सरलतरं सुबोध्यञ्च प्रतीयते ।

### ४.४.३.५ युष्मदष्मद्भ्यां परे सषुडाकमादेशविधाने विचारः

युष्मदस्मद्शब्दाभ्यां षष्ठ्या बहुवचने आमि युष्मद्+आम्, अस्मद्+आम् इति जाते साम आकम् (पा.सू.७-१-३३) इति सूत्रेण आमः स्थाने आकमि कर्तव्ये तत्र सुटोऽभावेन तत् कथं प्रवर्तेत इत्याशङ्कायां जातायां शारदाप्रभाकारः पूर्वव्याख्यातॄन् समुद्धरन् “भाविसुट्सहितस्य आमः स्थाने आकमादेशो भवतीति” [३२८] व्याख्याति । अत्र सिद्धान्तकौमुदीकारोऽपि ‘भाविनः सुटो निवृत्यर्थं ससुट्क निर्देशः’[३२९]इति फक्किकावाक्यद्वारा आकमादेशानन्तरं प्राप्तस्य सुटो निवृत्यर्थं सुडागमसहिताऽऽकमादेशो निर्दिष्ट इति स्पष्टयति। ससुट्कनिर्देशनाभावे तु स्थानिवद्भावेन सुडागमः प्रसज्येत ।

अत्र काशिकाकार उपर्युक्तां शङ्कामित्थं समाधत्ते- “अथ किमर्थमागतससुट्को गृह्यते ? न फ्यादेशविधानकाले सुड् विद्यते, तस्यैव तु भाविनः सुटो निवृत्यर्थम् । आदेशे कृते हि शेषे लोपे युष्मदस्मदोर्दकारान्तत्वात् सुट् प्राप्नोति स च स्थानिन्यन्तर्भूतत्वान्निवर्तत इति ।” [३३०] विषयेऽस्मिन् काशिकाऽपि समाना अतो भाविनः सुटो निवारणाय ससुट्कनिर्देशः शारदाप्रभाकारस्य तदुल्लेखश्च शङ्कापहारक इति निष्कर्षः ।

---

७९. पूर्ववत्, पृ. ५७७ ।

८०. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४) पृ. ४७१ ।

८१. वामनजयादित्यौ, *काशिका,* पूर्ववत्,(२०२९) पृ. ३०१ ।

## ४.४.३.६ नलोपसुप्स्वर... इति सूत्रपठितस्य कृतीति पदस्य सम्बन्धचर्चा

नलोपसुप्स्वरसंज्ञातुग्विधिषु कृति (पा.सू. ८-२-२) इति सूत्रे पठितो विधिशब्दो द्वन्द्वान्ते श्रूयमाणत्वात् सुप्-स्वर-संज्ञा-तुक्शब्देषु संयुज्यते, परं तदुत्तरत्र पठिते कृति पदे तु तादृशसम्बन्धबोधकं किमपि पदं नास्तीति केन सह युज्यत इति शङ्कां समादधन् शारदाप्रभाकार आह- “कृत्येतत् सम्भवव्यभिचाराभ्यां तुग्विधिनैव सम्बध्यत इति ।”[३३१] परमत्र सम्भवव्यभिचारौ न व्याकृतौ । अत्र बालमनोरमाकारस्त्वाह- “कृतीति तु तुकैव सम्बध्यते, अन्यत्रासम्भवात्.... कृति परतो यस्तुक् तस्मिन् विधेये सतीति यावत् ।” [३३२] अत्र पठितेन तुका ह्रस्वस्य पिति कृति तुक् (पा.सू.६-१-७१) इति सूत्रनिर्दिष्टस्तुक् लक्ष्यते, स च नलोप... इति सूत्रस्थितेषु कृदन्तबोधके कृतीति पद एव योजयितुं योग्यत्वादन्येषु नोपयुज्यते, विषयस्यास्य प्रकाशनार्थमेव व्याख्यात्रात्र सम्भवव्यभिचाराभ्यामिति स्पष्टीकृतम् । वाक्यमिदमपि शारदाप्रभाकारेण प्रक्रियाकौमुद्यास्तत्सूत्रव्याख्यानतो गृहीतं दृश्यते, अत्र प्रकाशव्याख्याता तदेव वाक्यं प्रयुङ्क्ते ।[३३३] अनेन प्रकारेण पूर्वव्याख्यातृभिरुत्थापितानां शङ्कानां सरलरीत्या समाधानमस्या वैशिष्ट्यमिति दृढतया वक्तुं शक्यते ।

## ४.४.३.७ उगिदचामिति सूत्रेऽञ्चतिग्रहणप्रयोजनविमर्शः

उगिदचां सर्वनामस्थानेऽधातोः (पा.सू.७-१-७०) इति सूत्रस्थेनाच्पदेनाञ्चुधातुर्गृह्यते । अञ्चुधातोरप्युगित्वेनैव सिद्धे तस्य पृथग्ग्रहणं किमर्थमिति जिज्ञासायां पूर्वव्याख्यातृनुद्धरन्

---

[८२]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. ६७८ ।

[८३]. वासुदेवदीक्षितः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (प्रथमभागः),पूर्ववत्, (१९९६)पृ. ४२० ।

[८४]. श्रीकृष्णमणिपण्डितः, *प्रक्रियाकौमुदी* (स्त्रीप्रत्ययान्ता), वााराणसी : सं. सं.वि., (१९७७) पृ.३२५ ।

शारदाप्रभाकारः "अत्रोगित्वादेव सिद्धेरञ्चतिग्रहणं धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेवेति नियमार्थम् । अतो धातुभिन्नानामुगितामञ्चतेश्चेत्यर्थः फलति"[३३४] इत्युत्तरयति । तस्यायमाशयः-अत्रोगित्वेनैव सिद्धे 'सिद्धौ सत्यामारभ्यमाणो यो विधिः स नियमाय कल्पते' इति नियमतो धातोश्चेदुगित्कार्यं तर्हि अञ्चतेरेवेति नियमार्थं पठितम्, अतस्तद्व्यतिरिक्तेभ्यः स्रंसु-ध्वंसुप्रभृतिभ्यो नुम् निवार्यते । तेनैव प्रकारेण पूर्वमधातुत्वेऽपि क्विबादिभिर्धातुसंज्ञासु विहितासु सतीसु सूत्रमिदं प्रवर्तत नवेत्यत्र शारदाप्रभाकार आह- "अधातोरिति ग्रहणसामर्थ्येन भूतपूर्वाऽधातोरित्यर्थादिह भवत्येव नुम्- गोमान् ।"[३३५] अर्थादधातोरिति पदोपादानेन पूर्वमधातुत्वेऽपि नुं भवत्येव। द्वितीयके व्याख्यान एवंविधा शङ्कामुत्थाप्य समाहितमित्यस्य वैशिष्टयं मन्तव्यम् ।

शारदाप्रभायामेतादृशानां शङ्कानामुत्थापनं समाधानञ्चान्येष्वपि सूत्रेषु द्रष्टुं शक्यते । तथाहि- अत्वसन्तस्य चाधातोः(पा.सू.६-४-१४) इति सूत्रे- 'हे धीमन्' इत्यत्र धातुत्वाभावेन दीर्घनिवारणप्रसङ्गे, तत्रैव पिण्डग्र इति रूपे दीर्घाभावत्वप्रतिपादने, ओः सुपि (पा.सू.६-४-८३) सूत्रस्थे कटप्रुवौ कटप्रुव इत्यत्र यण्निवारणप्रसङ्गे तथा सकृल्ल्वौ सकृल्ल्व इत्यत्र यण् साधने, न संयोगाद् वमन्तात् (पा.सू.६-४-१३७) सूत्रस्थयोः रक्ष्णतक्ष्णयोरुदाहरणयो-र्नलोपसाधने, नेदमदसोरकोः (पा.सू.७-१-११) इति सूत्रे अकोरिति पदोपादानेन इमकैः, अमुकै रूपयोरनेन ऐसादेशनिषेधाभावज्ञापने, तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य (पा.सू. ७-१-७४) इति सूत्रे तृतीयादिषु पदोपादानेन 'शुचिनी ब्राह्मणकुले' इति प्रयोगे

---

[८५]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ. ५८३ ।
[८६]. हरिप्रसादशर्माचार्यः (व्या.) *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ. ५८३ ।

पुंवद्भावनिषेधविषये तथा भाषितपुंस्कमिति पदप्रयोगात् जतुन इति नित्यक्लीबन्तरूपे पुंवद्भावस्याभावप्रतिपादनविषये तथाऽन्यत्रापि द्वितीयावृत्तौ पाठनाय बहुत्र प्रकृतव्याख्यात्रा स्वकीयं शङ्कासमाधानकौशलं प्रदर्शितमस्ति ।

एतेषु सूत्रेषु रूपादिषु च व्याख्याकारोऽयं सामान्यतया शङ्कामुत्थाप्य प्रायः पूर्वव्याख्यातृभि-रङ्गीकृतशैल्या समाधत्ते, तथापि पूर्वव्याख्यानापेक्षया अत्रत्या भाषा,शङ्कासमाधानशैली च सरलास्ति ।

### ४.४.४ रूपसिद्धिप्रक्रियावबोधः

शारदाप्रभायाः सुबन्तप्रकरणे रूपसिद्धिप्रक्रियायाः सामान्यदिग्दर्शनं प्राप्यते । सिद्धिप्रक्रियायां समागतेषु रूपेषु मध्ये कठिनेऽस्पष्टे, बहुसूत्रप्रयोक्तव्ये, प्रकरणारम्भके, परस्परं मतभेदेन विवादिते चाऽसौ रूपसाधनार्थं विशेषतः प्रयतते । सरले स्थाने त्वीषत् सङ्केतेन, शिक्षकनिर्देशनेन, समानरूपावलोकन-प्रेरणेनाभ्यासनिदर्शनेन चाग्रे गच्छति ।

पाणिनीयाष्टाध्याय्यां विभक्तिवचनक्रमेण सुबन्ततिङन्तादिक्रमेण तत्रापि गणधात्वादिक्रमेण रूपसिध्यर्थं सूत्राणि विन्यस्तानि, अतः प्राथमिकाध्यनार्थं लघुकौमुदीस्वरूपमिव शारदाप्रभाकारोऽपि रूपसिद्धिप्रक्रियावबोधनार्थं कौमुदीसदृशं सरलं प्रयोगपरकञ्च क्रमं विनिर्माय रूपाणि साध्नोति । एतस्मिन् क्रमे शिव-राम-विष्णुमित्र-पितृ-प्रभृतीनां शब्दानां रूपाणि साधयित्वा ओकारान्ते गोशब्दे उद्गच्छति, ततः स्त्रीलिङ्गेऽपि स्त्री-वधू-प्रभृतीनां रूपाणि साधयित्वा नपुंसके फल-दधि-मधु-वारिशब्दान् तथा हलन्तपुंलिङ्गे इदम्-वृत्रहन्-

युष्मदस्मददस्‌शब्दान्‌ साधयति । एतन्मध्ये सर्वादीनां त्यदादीनाञ्च लिङ्गत्रये साधनीयानि रूपाणि प्रयोगश्चैकत्रैव शिक्षयति । अत्र सामान्यतया विभक्तिवचनादीना-मुत्सर्गापवादयोर्विधिनियमयोः संज्ञाविध्योर्बाध्यबाधकयोश्च क्रमविन्याससौन्दर्यं प्रवाहश्च दृश्यते । सुबन्तारम्भ एवासौ तस्माच्छसो नः पुंसि (पा.सू.६-१-१०३) सूत्रतः पठनीयं टाङसिङसामिनात्स्याः (पा.सू.७-१-१२),सुपि च (पा.सू.७-३-१०२) इति सूत्रद्वयमुल्लङ्घ्य अतो भिस ऐस्‌ (पा.सू.७-१-९) इति सूत्रं निर्धारयति । एवमन्यत्रापि सुबन्तमध्ये तिङन्तीयपदनिर्माणप्रक्रियासमुल्लेखनादत्र कुत्रचित्‌ क्रमविन्यासो विच्छिन्नोऽनुभूयते । एतेषु आलोच्यपक्षेषु सत्स्वस्वप्त्रत्यरूपसाधनप्रक्रियायां गृहीता छात्रकेन्द्रिताऽभ्यासमूला प्रायोगिकी पद्धतिः प्राथमिकान्‌ छात्रान्‌ व्याकरणपिपठिषूञ्चाकर्षयत्येव । शारदाप्रभाकारः रूपसिद्धिप्रक्रियानिदर्शने दृष्टान्तोदाहरणानि फक्किका-न्याय-वार्त्तिकादीनि च यत्र तत्र प्रयुङ्क्ते। एतादृशैः सहायकोपकरणैः शुष्कव्याकरणपठनेन परिक्लान्तानां सुकोमलमतीनां छात्राणां मनसि पुनरपि व्याकरणपठनायोत्साहो जागर्ति । रूपसिद्धिक्रमे मध्ये मध्ये प्रदत्तेनाऽभ्यासनिदर्शनेन च पराङ्मुखेभ्यश्छात्रेभ्यो विषयबोधो हस्तामलकवद्‌ भविष्यति ।

शारदाप्रभायाः सुबन्तप्रकरणे सामान्यरूपेणैव रूपसिद्धिप्रक्रियाऽवबोधिता दृश्यते । अत्र सामान्यरूपाणि न साधितानि, तेषां समानरूपावलोकनसङ्केतेन, अतः परमेतत्‌ सूत्रं प्रवर्त्यमिति निर्देशनेन, शिक्षकेन स्मेरमुखेन प्रक्रिया प्रबोधनीयेति निर्देशनेन सिद्धिप्रक्रिया दर्शिता विद्यते । व्याख्यात्रा कृतस्य शिक्षकनिर्देशनस्येकमुदाहरणं नामि ( पा.सू.६-४-३) सूत्रे प्राप्यते, तदत्र प्रस्तूयते- “अथच्छात्रैर्लक्षणसमन्वयं कारयित्वा

रामश्यामविष्णुमित्राणामिति श्यामपाट्यां लिखित्वा अट्कुप्वाङ्नुम्...(पा.सू.८-४-२)इति सूत्रमुद्बोधनीयमिति ।”[३३६] अत्र पूर्वसूत्रतो दीर्घमनुवर्त्य सूत्रमर्थाप्य पूर्वोक्तेषूदाहरणेषु दीर्घविधानार्थञ्च निर्दिश्य अट्कुप्वाङ्नुम्....इति सूत्रप्रवर्तनाय पुनरूपदिष्टमस्ति । एतादृश्यामेव शैल्यां सुबन्तान्तर्गतानि प्रायशो रूपाणि साधितानि दृग्गोचरीभवन्ति । अत्रत्येषु युष्मदस्मद्,राजन्,इदम्,अदस्,अष्टन् प्रभृतिषु शब्देष्वेषां कठिनरूपेषु च विस्तरशः पूर्णतश्च रूपाणि साधितानि सन्ति । तादृशं निदर्शनं- गौरीशङ्कराभ्याम्, शिवाय, फलम्, युष्मान्, अस्मान् युष्माकम्, अस्माकम्, अष्टौ इत्यादौ प्राप्यते । मनुष्याणामङ्गुलीवत् सर्वादिशब्देष्वपि आगमा आयान्ति, ते चाङ्गवद् भवन्ति, मित्रवदागमः, शत्रुवदादेश इति दृष्टान्तद्वारात्र रूपाणि साधनीयानीति तस्य सङ्केतः। सर्वेषां प्रभृतीनि रूपाणि साधनीयानीति तस्य शब्दनिर्माणदिग्दर्शनप्रक्रियायाः सङ्केतः । आमि सर्वनाम्नः सुट् (पा.सू.७-१-५२) इति सूत्रे तक्रं कौण्डिन्यायनायेति न्यायद्वारा, ङेर्यः (पा.सू.७-१-१३) इति सूत्रे सन्निपातपरिभाषाद्वारा, प्रथमयोः पूर्वसवर्णः (पा.सू.६-१-१०२) इति सूत्रे ‘पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्’ इति न्यायद्वारा, चतुरनडुहोरामुदात्तः (पा.सू.७-१-९८) सूत्रे ‘अनडुहः स्त्रियां वेति वक्तव्य’मिति वार्त्तिकद्वारा च तत्रत्यानि रूपाणि साधितानि ।

सुबन्तान्तर्गतेऽव्ययप्रकरणे प्राथमिकाध्ययनार्थं स्वरादिनिपातमव्ययम् (पा.सू.१-१-३६) अव्ययादाप्सुपः (पा.सू.२-४-८२) चेति द्व एव सूत्रे निर्धारिते । अत्रत्येन प्रथमसूत्रेण स्वरादिगणपठितानां निपातनामधेयानां

---

[८७]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ. ५३१ ।

पदानामव्ययसंज्ञा विधीयते, तदनन्तरमाकारान्तेभ्योऽव्ययसंज्ञकेभ्यः शब्देभ्यः परस्यापः सुपश्च लोपो विधीयते, तादृशाव्ययसंज्ञकाः शब्दास्त्रिषु लिङ्गेषु सर्वासु विभक्तिषु च समानाः भवन्तीत्यव्ययस्य पारम्परिकं लक्षणं प्रस्तौति, एवं -

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु

वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥[३३७]

द्वितीयावृत्तौ पठनीयमव्ययप्रकरणन्त्वष्टाध्यायीक्रमानुसारि वर्तते । तत्र स्वरादिनिपातमव्ययम् (पा.सू.१-१-३७) इति सूत्रादारभ्य तद्धितश्चासर्वविभक्तिः (पा.सू.१-१-३८), कृन्मेजन्तः(पा.सू.१-१-३९), क्त्वातोसुन्कसुनः (पा.सू.१-१-४०), अव्ययीभावश्च (पा.सू.१-१-४१) इति सूत्रैरव्ययसंज्ञां कृत्वा रूपाणि साधितानि ।

### ४.४.५ वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम्

शारदाप्रभायाः सुबन्ते वार्त्तिकपरिभाषान्यायफक्किकेष्टचादीनां प्रयोगः सामान्यरूपेण कृतो दृश्यते । अत्रत्ये मूले काशिकातो वार्त्तिकादीनि समानीयोपन्यस्तानि परन्तु प्राथमिकेभ्यश्छात्रेभ्य एतानि न पाठनीयानीत्युक्त्वा वार्त्तिकसहयोगं विनापि रूपसाधनार्थं निर्दिष्टानि । व्याख्यात्रा तथा सङ्केतितेऽपि जिज्ञासवोऽस्यप्रयोगस्थानमेतददिति निश्चेतुं शक्नुवन्त्येव ।

अतः परं वार्त्तिक-फक्किकेष्टचादीनि क्रमशो व्याख्यायन्ते-

#### ४.४.५.१ वार्त्तिकव्याख्यानम्

'सर्वं वाक्यं क्रियायां परिसमाप्यते' इति वचनाद् वार्त्तिकानां वाक्यत्वव्यवहाराच्च वार्त्तिकेषु क्रियापदानां प्रयोगो भवतीति ज्ञायत एव ।

अत्रत्ये मूले कौमुद्यपेक्षयाऽधिकतराणि वार्त्तिकान्युल्लिखितानि, परं तेभ्यो न्यूनानि व्याख्यातानि । तेभ्योऽपि न्यूनतमान्येव प्राथमिकाध्ययनार्थं निर्धारितानि, तानि च काशिकातो

---

[३३७] हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ. ५३१ ।

महाभाष्यतश्च गृहीतानीति निश्चितम् । तेषां व्याख्याने शारदाप्रभाकारेण मौनत्वमाकलितमिति तज्ज्ञानाय कौमुदी-काशिकादीनामाश्रयो ग्रहणीय एव ।

शारदाप्रभायां द्वितीयाध्ययनाय निर्धारितेषु सुबन्तीयेषु चत्वारिंशद् वार्त्तिकेषु कानिचन सिद्धान्तकौमुद्यां न प्राप्यन्ते, तान्यत्र प्रदर्श्यन्ते -

| वार्त्तिकानि | शारदाप्रभायां स्थानसङ्केतः |
|---|---|
| अनिदितां नलोपे लङ्गिकम्प्योरूपतापशरीरविकारयोरु... | अनिदितां हलः .. ६।४।२४ |
| इयँङुवँङ्प्रकरणे तन्वादीनां छन्दसि बहुलमुपसङ... | अचिश्नुधातु......६।४।७७ |
| तिसृभावे संज्ञायाः कन्युपसङ्ख्यानं कर्तव्यम् | त्रिचतुरोः .. ७।२।९९ |
| मातॄणामातच् पुत्रार्थमर्हते | अम्बार्थ...७।३।१०७ |
| तलो ह्रस्वो वा ङिसम्बुध्योरिति वक्तव्यम् | अम्बार्थ...७।३।१०७ |
| अह्नो नलोपप्रतिषेधो वक्तव्यः | नलोपः ... ८।२।७ |
| वा नपुंसकानाम् | न ङि ... ८।२।८ |
| एकादेशस्वरोऽन्तरङ्गसिद्धो वक्तव्यः | नमुने ८।२।३ |
| संयोगान्तलोपो रोँरुत्वे सिद्धो वक्तव्यः | नमुने ८।२।३ |
| प्लुतविकारस्तुँग्विधौ छे सिद्धो वक्तव्यः | नमुने ८।२।३ |
| श्चुत्वं धुँटि सिद्धं वक्तव्यम् | नमुने ८।२।३ |
| अभ्यासजश्त्वचर्त्वे एत्वतुँकोः सिद्धे वक्तव्ये | नमुने ८।२।३ |
| द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम् | नमुने ८।२।३ |
| पदाधिकारश्चेल्लत्वघत्वढत्वनत्वरुफ्वषत्व... | नमुने ८।२।३ |

शारदाप्रभाया उपर्युक्ते सूत्रसङ्केते प्राप्तान्येतानि प्रायो वार्त्तिकानि काशिकायामपि तत् तत् सूत्रेष्वेव वर्तन्ते । परं शारदाप्रभाकारेण प्रयुक्तेऽधस्तनीये द्वे वार्त्तिके काशिकायामपि न प्राप्ते । ते सम्भवतो महाभाष्यतः समुद्धृते, यथा-

| वार्त्तिकानि | शारदाप्रभायां सूत्रसङ्केतः |
|---|---|
| इयङुवङ्भ्यां गुणवृद्धीभवतो विप्रतिषेधेन | अचिश्नुधातु....६।४।७७ |
| उसनसः सम्बुद्धौ वाऽनङ्नलोपो वा वाच्यः | अनङ् सौ ७।१।९२ |

उपर्युक्तयोर्द्वयोर्मध्येऽपि प्रथमवार्त्तिकं काशिकायां विप्रतिषेधसूत्रे सामान्यवाक्यरूपेण निबद्धमस्ति, तथापि तत्र वार्त्तिकसङ्केतो न प्राप्यते, तच्च मुद्राराक्षसवशात्तथाभूतमुत तद्

वार्त्तिकमेव न मानितमिति तु पुनरप्यनुसन्धेयम् । द्वितीयं वार्त्तिकन्तु काशिकाकारेण न प्रयुक्तमत एतद् महाभाष्यतः समानीतं भवेदित्यनुसन्धातुरनुमानम् ।

शारदाप्रभाकारः काशिकातो बहूनि वार्त्तिकानि समुद्धृतवान् तथापि तत् तत् सूत्रस्थानि सर्वाणि नेति काशिकाया अवलोकनेन ज्ञायते । काशिकायां त्रिचतुरोस्त्रियां तिसृचतसृ (पा.सू.७-२-९९) सूत्रे 'चतस्रस्योदात्तनिपातनं कर्तव्यम्', अम्बार्थानद्योर्ह्रस्वः (पा.सू. ७-३-१०७) इत्यत्र 'डलकवतीनां प्रतिषेधो वाच्यः', प्रभृतीनि नैकानि वार्त्तिकानि सन्ति, यानि शारदप्रभाकारोऽत्र नानीतवान् अतः शारदाप्रभाकारो वैशिष्ट्यपूर्णानि वार्त्तिकान्येव काशिकातो गृहीतवानिति वक्तुं शक्यम् । व्याख्यात्रात्रं वैशिष्टचं लब्धमन्येषु च न लब्धमिति विचारणीयम्। अत्र पठितानि सकलवार्त्तिकानि पाणिनीयसूत्रैरत्युक्ते सङ्कोचेनानुक्ते शासनेन, दुरुक्ते च नियमनेन व्याकरणमिदं सफली कुर्वन्तीति युधिष्ठिरमीमांसको लक्षणपद्य एवं व्याहरति

उक्तानुक्तदुरूक्तानां चिन्ता यत्र प्रवर्तते ।

तं ग्रन्थं वार्त्तिकं प्राहुर्वार्तिकज्ञा मनीषिणः ॥

एतेषां त्रिविधनियमानां लक्षणसमन्वयोऽत्र सङ्क्षेपेण विधीयते ।

क) अत्युक्तेः सङ्कोचः

महर्षिपाणिनिः सर्वादीनि सर्वनामानि (पा.सू.१-१-२७) इति सूत्रे सर्वादिगणपठितानां व्यक्तिवाचकसंज्ञानामपि सर्वनामसंज्ञां विहितवान्, ताँश्च संज्ञाः महर्षिकात्यायनः 'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इति वार्त्तिकद्वारा सङ्कोचीकृतवान्, तस्मादत्युक्तौ सङ्कोचकं वार्त्तिकम्, अतो नियमस्यातिव्याप्तौ सङ्कोचो वार्त्तिकधर्मः । एतादृशेषु वार्त्तिकेषु प्रायेण प्रतिषेधो वाच्यः, प्रतिषेधो वक्तव्यः, सदृशानि क्रियापदानि प्रयुक्तानि दृश्यन्ते । तादृशानि कानिचन वार्त्तिकान्युदाहरणायात्र प्रस्तूयन्ते-

(अ) औङः श्यां प्रतिषेधो वाच्यः ।

(आ) एकतरात् प्रतिषेधो वक्तव्यः ।

(इ) उत्तरपदत्वे चापदादिविधौ प्रतिषेधः ।

ख) अनुक्तेः शासकम्

महर्षिः पाणिनि शब्दसाधनक्रमे कतिपयानत्यावश्यकानपि नियमान् नोक्तवान् । प्राच्योदीच्यदक्षिणादिभेदजनितान् परं पाणिनिनाऽनुल्लिखितान् कांश्चन नियमान् तत्साध्यशब्दांश्च महर्षिकात्यायनः- उपसङ्ख्यानम्, वाच्यम्, वक्तव्यमित्यादिभिः पदैः सङ्गृहीतवान् । अतोऽनुक्तेरनुशासनं वार्त्तिकधर्मो मन्यते, अथवा पाणिनिकालतः शतशो वर्षेषु व्यतीतेषु कालान्तरे समुत्पन्नानां समाजप्रचलितानाञ्चं शब्दानां सङ्कलनं तात्कालिको वैयाकरणः कात्यायनो वार्त्तिकद्वारा कृतवान् । तादृशाः शब्दा एवाधुना पाणिनीयनियमतोऽनुक्ताः कात्यायनेन वार्त्तिकद्वारा प्रोक्ताश्च मन्यन्ते । एतादृशवार्त्तिकमध्ये 'विभाषा प्रकरणे तीयस्य ङित्सूपसङ्ख्यान'मित्यप्येकम् । पाणिनिः प्रथमचरमतयाल्पार्ध-कतिपयनेमाश्च (पा.सू.१-१-३३) इति सूत्रे तेषां सर्वनामसंज्ञां विहितवान्, परं कात्यायनस्त्वसर्वनामभ्यां द्वितीयतृतीयाभ्यामपि द्वितीयस्मै-तृतीयस्मै,द्वितीयस्मात्-तृतीयस्मात्, द्वितीयस्मिन्-तृतीयस्मिन् इति रूपाणि लोकप्रचलने दृष्टवान् भवेत्, अतस्तेषां ग्रहणाय पूर्वोक्तं वार्त्तिकं विरचितवान् । कौमुद्यादिषु एतादृशानि बहूनि वार्त्तिकानि सन्ति, तेभ्यः कानिचनात्र प्रस्तूयन्ते-

(क) दृन्करपुनः पूर्वस्य भुवो यण् वक्तव्यः ।

(ख) इर उपसङ्ख्यानम् ।

(ग) श्चुत्वं धुटि सिद्धं वाच्यम् ।

एतादृशानि वार्त्तिकानि वैकल्पिकरूपसाधनजनितां जटिलतां स्फोरयन्ति, अत एतेषामध्ययनमनिवार्यं मन्यते ।

ग) दुरुक्तेर्नियामकम्

पाणिनिना प्रोक्तानि कतिपयसूत्राण्युदाहरणानि च देश-कालादिभेदैरन्यैः कारणैर्वा दुरुक्तानि जातानि । वार्त्तिककारः कात्यायनः स्ववचोभिस्तादृशीं दुरुक्तिमपहृतवान्, अत एतादृशानि वार्त्तिकानि दुरुक्तेर्नियामकानि मन्यन्ते, तथाविधेषु 'ओतो णिदिति वाच्यम्' इत्यप्येकम् । पाणिनिरत्र गोतो णित् ( पा.सू.७-१-९०) इति सूत्रपाठेन गौः,गावौ,गावः इत्यादीन् शब्दानेव उदाहृतवान् । परन्तु कात्यायनः तत्तुल्ययोः सुद्यो-द्योशब्दयोरपि णिद्वद्भावं वीक्ष्य तादृशरूपसाधनाय 'ओतो णित् वक्तव्यम्' वार्त्तिकं कल्पितवान् । अतोऽत्र कात्यायनो वार्त्तिकद्वारा सूत्रस्थं दुरुक्तं गकारं संशोधितवान् अतः दुरुक्तेर्नियामकं वार्त्तिकमिति प्रसिद्धिः, अनेनैव प्रकारेण अव्ययादाप्सुपः (पा.सू.२-४-८२) सूत्रस्थं'आप् ग्रहणं व्यर्थमलिङ्गात्' इति वार्त्तिकमपि तत्सूत्रस्थं दुरुक्तमापिति पदं प्रत्याख्याति । अतोऽत्युक्तेः सङ्कोचकमनुक्तेः शासकं दुरुक्तेर्नियामकञ्च वार्त्तिकमिति पूर्वव्याख्यातृभिः कृता व्याख्या हरिप्रसादेनाप्यत्र पुनरुक्ता इति व्यज्यते ।

## ४.४.५.२ फक्किकाव्याख्यानम्

कठिनं स्थलं फक्कतीति फक्किका, अर्थाद् रूपसिद्धौ सूत्रार्थापने, वार्त्तिकादीनां व्याख्याने च संशयच्छेदिका फक्किकेति पाणिनीयपरम्परायां प्रसिद्धिरेव । परं लोकस्तु पूर्वपक्षसुदृढीकरणाय प्रयुक्तं वाक्यमेव फक्किकेति व्यवहरत इति कोशकाराः आहुः ।" [३३८] पाणिनीयव्याकरणे

---

[८९]. वसन्तकुमारशर्मनेपालः, *नेपालीशब्दसागर*, पूर्ववत्, (२०५७) पृ.९०५ ।

तूत्तरपक्षस्थिरीकरणाय फक्किकायाः प्रयोगः प्राप्यते तस्मादेव संशयच्छेदिका फक्किकेति व्यवहारः । 'फक्किकासरलार्थः' नामकस्य पुस्तस्य रचयिता रामचरित्रत्रिवेदीवर्यः कठिनीभूतं पदवाक्यादिकं फक्किकापदेन व्यवहरते । समासग्रहणं किम् ? ( कृत्तद्धितसूत्रे), ङ्याब्ग्रहणं किम् ? (ङ्याप्प्रातिपादिकसूत्रे), मपर्यन्तस्य किम् ? (प्रथमायाश्च द्विवचने भाषायामिति सूत्रे) एतद्विधानि एतत् सदृशानि कठिनवाक्यादीनि च फक्किकेति नामकरणं कृत्वा तानि सरलीकर्तुमसौ लघुपुस्तकं रचितवान् । भूमिकायामपि विषयसरलीकरणार्थमेव पुस्तकमिदं रचितमिति सूचयति, एवं-"पाणिनीयव्याकरणप्रबोधकेभ्यः सिद्धान्तकौमुद्यादिभ्यः क्लीष्टग्रन्थेभ्यो बालानां न सम्यग् लाभः, अतिविस्तृतत्वाच्च, ... अनेनाल्पप्रयासेन कौमुदीस्थफक्किकानां बोधः स्यादिति मम निश्चयः ।"[३३९] एतस्मात् कथनादपि कौमुद्यादीनां काठिन्यं तदपेक्षया पुस्तकस्यास्य रचनं विषयसरलीकरणार्थमिति प्रतिपद्यते । अतः काठिन्यस्फोरणार्थं फक्किकाविरचितेति निश्चीयते । अत्रत्ये सुबन्ते कृतिरित्युक्तेरिह सिद्ध एव- बृहच्छत्रम् (नलोपः सुप्स्वर...सूत्रे) पूर्वेणैव सिद्धे समासग्रहणं नियमार्थम् (कृत्तद्धित....सूत्रे) इत्यादीनि फक्किकावाक्यानि शतसङ्ख्यातोऽधिकानि वर्तन्ते । एतान्यपि सूत्रार्थस्फोरणाय रूपसिद्धिप्रक्रियावबोधनाय च सहयोगीनि सन्तीति निश्चितम् । शारदाप्रभाकारो बहुत्र विषयावबोधनार्थं सूत्रसरलीकरणार्थञ्च वाक्यान्येतानि प्रयुङ्क्त इति विषयसाधारणीकरणमस्य वैशिष्टयम् ।

### ४.४.५.३ इष्टिप्रयोगस्तद्व्याख्यानञ्च

रूपसाधनजन्यकठिनतादूरीकरणे वार्त्तिकानामिवेष्टीनामपि विशिष्टमवदानं दृश्यते । इष्यतेऽनयेति व्युत्पत्तौ यज् धातोः

---

९०. रामचरित्रत्रिवेदी, *फक्किकासरलार्थः*; वाराणसी : चौखम्बासंस्कृतसिरिज, (१९७६) पृ. भू. ।

'श्रुयजिस्तुभ्यः करणे' (स्त्रियां क्तिन् पा.सू.३-३-९४ इति सूत्रे) इति वार्त्तिकेन करणेऽर्थे क्तिन् प्रत्यये सम्प्रसारणे च कृते इष्टिपदं निष्पद्यते, तस्यार्थः- 'महाभाष्यकृतं विशेषवार्त्तिक'मिति शब्दकौस्तुभे भट्टोजिदीक्षितः समुल्लिखति । महाभाष्यकारस्तु कात्यायनस्य विशेषाणि वार्त्तिकान्येवेष्टिपदेन व्यवहरते, तान्युद्धरन् 'व्याकरणवार्त्तिक' नामकेऽनुसन्धानमूलके पुस्तकेऽनुसन्धाता वेदपतिमिश्रः 'इष्यते' पदप्रयुक्तं कात्यायनस्य वार्त्तिकमिष्टिरिति समुल्लिखति,अतस्तादृशानि वार्त्तिकान्येव भाष्य इष्टिपदेन व्यवहृतानि सन्तीति तस्य विचारः । प्रायशः काशिकायामुपलभ्यमाना तादृश्य इष्टयः सिद्धान्तकौमुद्याः सुबन्तप्रकरणे द्वे प्राप्येते । अत्र परीक्षणतोलनाय च काशिकायामवस्थिताभिरिष्टिभिः सहान्या इष्टयोऽपि प्रस्तूयन्ते ।

| *इष्टिवार्त्तिकम्* | *सूत्रे* | *ग्रन्थस्रोतः* |
|---|---|---|
| द्विपर्यन्तानामेवेष्टिः | त्यदादीनामः | सिद्धान्तकौमुदी |
| गतिकारकेतरपूर्वपदस्य यण् नेष्यते । | एरनेकाचो.... | सिद्धान्तकौमुदी[340] |
| अनर्थकस्यापि निपातस्य प्रातिपदिकसंज्ञेष्यते | अर्थवत्... | काशिका |
| मस्जेरन्त्यात् पूर्वं नुममिच्छन्त्यनुषङ्गसंयोगादिलोपार्थम् | अर्थवत्... | काशिका |
| ख्यादियमादेश इष्यते | चक्षिङ् ख्याञ् | काशिका |
| समस्य सर्वपर्यायस्य सर्वनामसंज्ञेष्यते | सर्वादीनि सर्व.. | काशिका |
| तुरीयशब्दस्यापीष्यते | द्वितीयचतुर्थ... | काशिका[341] |

[341]. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४) पृ. ७३,७६ ।

एतादृशैः पदसाम्यैः कौमुद्यां विद्यमानयोः पूर्वोक्तवार्त्तिकयोरपीष्टत्वं सम्भाव्यम् । अतोऽस्मिन् विषये पुनरनुसन्धानमावश्यकम् । पूर्वोक्तानि वाक्यानीष्टयो भवन्तु वार्त्तिकानि वा तानि रूपसिद्धौ सहायकानीति निश्चितमेव ।

शारदाप्रभायाः सुबन्ते पठिताः- निर्दिश्यमानस्यादेशाः भवन्ति, अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्,सन्निपातलक्षणो विधिरनिमित्तं तद्विघातकस्य सदृशा दशाधिकाः परिभाषाः, सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतां तक्रं कौडिन्यायनाय सदृशा न्यायाश्चात्र प्रयुक्ता दृश्यन्ते । शारदाप्रभाकारः पूर्वोक्ताः परिभाषा मूल एव प्रयुङ्क्ते चेद् न्यायाँस्तु व्याख्यानखण्डे समुल्लिखति । एते सर्वे रूपसाधने सहायका मन्यन्ते ।

### ४.४.६ अन्याचार्यमतसङ्ग्रहः

शारदाप्रभायाः सुबन्ते स्वप्राग्वर्तिनां बहूनां सूत्रव्याख्यातॄणां मतानि सादरं गृहीतानि । स्वाभीष्टवचनसाधनाय, व्याख्यानाय च तादृशानि वचनानि प्रत्यक्षतोऽप्रत्यक्षतश्च समुद्धृतानि सन्ति। तादृशेषु पूर्वव्याख्यातृषु काशिका-सिद्धान्तकौमुदीकारौ विशेषस्थानं भजतः, तथैव गोपालशास्त्रिदर्शनकेशरी-प्रक्रियाकौमुदीकारादीनामपि वचनानि सामान्यतः समुद्धृतानि सन्ति ।

शारदाप्रभाकारोऽयं सुबन्तीये प्रकरणे आतो धातोरिति सूत्रे काशिकामुद्धरते । सिद्धान्तकौमुद्यामविद्यमानानि दशाधिकानि वार्त्तिकानि काशिकातः समुद्धृत्य तैः स्वाभीष्टानि रूपाणि साधयति । एतेभ्योऽन्येषु स्थानेष्वपि कुत्रचित्/केचित् इत्यादिपदप्रयोगद्वारा तथा केषुचित् स्थानेषु विनापि नामग्रहणेनाप्रत्यक्षतः काशिकां तत्रत्यव्याख्यानञ्च गृह्णाति ।

---

[१२]. वेदपतिमिश्रः, *व्याकरणवार्त्तिकम्,* वाराणसी : पृथिवीप्रकाशन, (१९७०) पृ. १५९-१६४ ।

शारदाप्रभायां सिद्धान्तकौमुदीतोऽपि बहूनि व्याख्यानमूलकानि उदाहरणानि, प्रत्युदाहरणानि, सूत्रवृत्तिः, फक्किकादीनि च प्रत्यक्षाप्रत्यक्षतो गृहीतानि दृश्यन्ते । शारदाप्रभाकारोऽयं बहुषु स्थानेषु 'अत्र दीक्षितः' इति सङ्केतद्वारा तानि समुल्लिखितानि चेत् कतिपयेषु स्थानेषु तु विनापि सङ्केतं सिद्धान्तकौमुद्या वृत्तिमनुकुरुते । शारदाप्रभेयमुदाहरण-प्रत्युदाहरणग्रहणे काशिकासन्निधौ सत्यपि सूत्रार्थापने भाषाशैलीग्रहणे तु सिद्धान्तकौमुद्या एव निकटतरा प्रतीयते । विशेषतः शारदाप्रभाकारोऽयं त्वमावेकवचने (पा.सू.७-२-९७) इति सूत्रे समस्यमाने द्वयेकत्वा ...इति कारिकायाम्, त्वामौ द्वितीयायाः (पा.सू.८-१-२३) इति सूत्रस्थे श्रीशस्त्वावतु मापीह...इति श्लोके, वर्षाभ्वश्च (पा.सू.६-४-८४) सूत्रस्थे दृन्करपुन... इति वार्त्तिकस्थकरशब्दस्य दीर्घपाठे, इजादेः सनुमः (पा.सू.८-४-३२) इति सूत्रे नुमोऽनुस्वारोपलक्षणत्वव्याख्यान ङ्याप्प्रातिपदिकात्...(पा.सू.४-१-१) सूत्रे ङ्याब्ग्रहण- प्रयोजनोप पादने च प्रत्यक्षतः सिद्धान्तकौमुदीमुद्धरति । तथैव उगिदचां सर्वनामस्थानेऽधातोः (पा.सू.७-१-७०) इति सूत्रेऽञ्चतिग्रहणनिरूपणे तथान्यत्र च बहुषु स्थलेष्वप्रत्यक्षरूपेण सिद्धान्तकौमुदीमुद्धरति । विशेषरूपेण तु रूपसाधनार्थं कौमुद्या भाषाशैलीं व्याख्यानपद्धतीश्च गृह्णाति । क्वचित् शङ्कायामपि कौमुदीस्थानि फक्किकावाक्यानि समुद्धरति । तथाहि सर्वनामस्थाने इत्युक्तेर्नेह- यज्वनः, असम्बुद्धावित्युक्तेर्नेह- हे राजन् । अतः शारदाप्रभाकारोऽसौ काशिकातः सूत्राणि वार्त्तिकानि च गृह्णाति चेत् सिद्धान्तकौमुद्याः तूदाहरणप्रत्युदाहरण-फक्किका-सूत्रवृत्ति-भाषाशैली-शङ्कासमाधानानि च समुद्धरतीति निश्चीयते ।

### ४.४.७ प्रकरणसङ्घटनं शैलीशिल्पञ्च

महाभाष्यकारः प्रथमान्हिके 'लक्ष्यलक्षणे व्याकरणम्' अर्थात् सूत्रोदाहरणयोः सङ्गममेव व्याकरणं भवतीति स्पष्टयति । भाष्यकारस्यैतेन कथनेन व्याकरणे न सूत्राणां नापि प्रक्रियाणां प्राधान्यं भवतीति ज्ञायते । तथाप्युत्तरवर्तिनो व्याख्यातारः केचन प्रक्रियां कतिपये तु सूत्रमेव लक्ष्यं कृत्वा पाणिनीयसूत्राणि विवृण्वन्ति, एतत् सर्वं व्याख्यानपद्धतिभेद एव । एताभ्यां द्विविधपद्धतिभ्यां पाणिनीयव्याकरणव्याख्याने पद्धतिद्वयं विकसितम्, यां सूत्रक्रमिकां प्रक्रियाक्रमिकां चेति समालोचका व्याहरन्ति । तयोः पद्धत्योर्लक्ष्यैकचक्षुष्का प्रक्रियासन्निकटवर्तिनी वर्तते चेद् लक्षणैकचक्षुष्का तु सूत्रक्रमानुसारिणी दृश्यते ।

शारदाप्रभायाः सुबन्ते द्वयोः पद्धत्योः सङ्गमः प्राप्यते । बालमनोरमादिटीकायुतायाः कौमुद्याः स्वरूपमनुकृत्य रचितेऽस्मिन् व्याख्यान उपर्यष्टाध्यायीक्रमेण सूत्राणि तदनु उदाहरणप्रत्युदाहरणानि वार्त्तिक-फक्किका-विशेषवाक्यादीनि च समुल्लिखितानि सन्ति चेत् तदधस्तात् स्थिते व्याख्यानखण्डे तु प्रारम्भिके विभाजने ५३६ सूत्रेषु प्रायः प्रक्रियाक्रमसन्निकटः सूत्रक्रमो निर्धरितः । शारदाप्रभायाः सुबन्तखण्डः प्राथमिको द्वितीयकश्चेति द्विधा निबद्धः । अत्रत्ये प्राथमिके खण्डे सिद्धान्तकौमुदीप्रतिसंस्कृताभ्यां भिन्नेन क्रमेण शब्दसाधनरीतिः,शिक्षणपद्धतिश्च समुल्लिखिता । अत्र व्याख्यात्रा हरिप्रसादेन भाषाव्याकरणे सहैव पाठनीय इति ब्लुमफिल्डमहोदयस्य पाश्चात्या शैली गृहीतेति वक्तुं शक्यमतः प्रकृतव्याख्यानमाधुनिकेन शैलीशिल्पप्रयोगेण रचितमिति निष्कर्षः ।

## ४.५ अध्यायनिष्कर्षः

शारदाप्रभाकारेण प्रक्रियाक्रमेण प्रस्तुते प्रकृतव्याख्याने तस्यापि प्राथमिके प्रकरणेऽज्झलादीनां, गुणवृद्धिसंयोगादीनाञ्च संज्ञानां निरूपणं प्राप्यते । ततो लघुकौमुदीक्रमेण वरदराजेन निर्धारितरीत्या स्थानप्रयत्नान् निर्धार्य प्राचामाचार्याणां विभाजनं समुचितमासीदिति पुनः परिपोषितं वर्तते । ततः आधुनिकैर्भाषाविद्भिः कृताभ्यां स्थानप्रयत्नविभाजनाभ्यां सह पाणिनीयविभाजनस्य तुलनां कृत्वाऽऽधुनिकापेक्षया प्राचीनैः कृतं विभाजनं स्थूलतरमासीदिति निर्णीतमस्ति । ततः शारदाप्रभायां निर्धारितेष्वज्झलादिषु सन्धिषु सुबन्तीयासु रूपसाधनप्रक्रियासु च पूर्वाध्यायेषु निर्धारितानि सप्त व्याख्यानतत्त्वानि घटन्ते न वेति परीक्षितानि सन्ति ।

शारदाप्रभायाः संज्ञासन्धिप्रकरणयोः पूर्वत्रासिद्धमित्येकमेवाधिकारसूत्रं निर्धारितमस्ति चेत् सुबन्ते तु ‘प्रत्ययः’, ‘परश्च’, ‘इण्कोः’, ‘भस्ये’ति चत्वार्यधिकारसूत्राणि दर्शितानि सन्ति । एतेषु पूर्वत्रासिद्धमित्यष्टाध्याय्या अन्तावधि गङ्गाप्रवाहवद् निरन्तरं गच्छति चेत् सुबन्ते पठितं प्रत्ययः, परश्चेति सूत्रद्वयं तु पञ्चमाध्यायान्तर्गतस्य चतुर्थपादस्य १६० सूत्रान्तमेव गङ्गाप्रवाहवद् निरन्तरमधिगच्छति तथैव इण्कोरित्यष्टमाध्यायस्य तृतीयपादस्य ११९ सूत्रान्तं तथा भस्येति षष्ठाध्यायस्य चतुर्थपादस्य १७५ सूत्रान्तं निरन्तरमनुगच्छतीति सूचितमस्ति । अतोऽत्राधिकारनिरूपणं पूर्वव्याख्यानापेक्षया सुबोध्यं सरलञ्चास्तीति निष्कर्षः ।

व्याख्याकारोऽयमनुवृत्त्यानि सूत्राणि स्थूलाक्षरीकरणेन, तस्याग्रगतिनिर्धारणेन च सूचयति, तथैव प्रकृते पूर्वेभ्यः केभ्यः सूत्रेभ्यः किं पदमनुवर्त्यत इत्यपि कखगादिवर्णैः सङ्केतयति, प्रकृतव्याख्यानस्येयमपूर्वोपलब्धिः । शारदाप्रभायाः

संज्ञासन्धिसुबन्तेषु गङ्गाप्रवाहवदनुवृत्तपद- युतानि पञ्चाशदधिकानि सूत्राणि वर्तन्ते । अत्र मण्डूकप्लुतेः 'नोपधायाः' इत्येकं तथा सिंहावलोकनानुवृत्तेरपि 'अष्टन आ विभक्तौ' इत्येकं सूत्रं मिलति । एतदनुसन्धानं व्याकरणबुबोधयिषुभ्यो लाभदायकम् ।

शारदाप्रभाव्याख्येयं प्राथमिकश्छात्रकेन्द्रिता, अतो प्रायः सूत्रेषु विग्रहसमासौ न दर्शितौ । ढ्लोपे पूर्वस्य दीर्घोऽणः,नेयङुवङ्स्थानावस्त्री,अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः प्रभृतिषु केषुचित् सूत्रेष्वेव प्रदर्शितो विग्रहोऽपि द्वितीयेऽध्ययन एव पाठनीय इति व्याख्यातुः स्पष्टो निर्देशः ।

शारदाप्रभाकारोऽयं बहून्युदाहरणप्रत्युदाहरणानि काशिकातः समानयति चेत् तेभ्योऽल्पानि तु कौमुद्या गृह्णाति, अत्यल्पसङ्ख्यायामपि नैपालककलासंस्कृतिजीवन- पद्धतिबोधका- न्युदाहरणप्रत्युदाहरणानि प्रयुज्य स्थाने स्थाने मौलिकत्वप्रदर्शनायापि प्रयतते ।

व्याख्येयं सरलाज्जटिलयात्रेति शिक्षाशास्त्रीयं नियममनुपालयन्ती संज्ञासन्धिप्रकरणयोः स्थिताः सामान्याः शङ्का एवोत्थापयति । अत्रत्येषु अतो रोरप्लुतादप्लुते, विसर्जनीयस्य सः, तपरस्तत्कालस्य प्रभृतिषु सूत्रेषु नैकासु शङ्कासु विद्यमानास्वपि ताः सामान्यरूपेणैव समाधत्ते । सुबन्तेऽपि शताधिकासु शङ्कासु सतीष्वपि एङ्ह्रस्वात् सम्बुद्धे, आतो धातोः, उगिदचां सर्वनामस्थानेऽधातोः, षट्चतुर्भ्यश्च, साम आकम् प्रभृतिषु दशाधिकेषु विशेषस्थानेष्वेव ताः समुद्भाव्य निरसति । अतः शारदाप्रभायाः प्रमुखमुद्देश्यं शङ्कासमाधानं नेति निश्चीयते ।

प्रकृतव्याख्याया मुख्यमुद्देश्यं पाणिनीयपरम्परानुसारेण सरलरीत्या रूपसाधनमतो व्याकरणविविक्षून् प्राथमिकान्

छात्रान् दैशिकभाषामिश्रिते संस्कृते सरलविधिना चासौ करोति। तत्रासौ सफलः प्रतीयते ।

शारदाप्रभायाः सुबन्ते कौमुद्यामविद्यमानानि १५ काशिकावार्त्तिकानि, 'इष्यते' इति पदयुतानि सप्तेष्टयस्तथा काशिकाकौमुद्योरेवाविद्यमाने द्वे वार्त्तिके च प्राप्यन्ते । तेन व्याख्यानस्यास्य काशिकानुवर्तित्वं प्रमाणीकृतम् ।

व्याख्येयं स्वपूर्ववर्तिनौ वृत्तिकारौ वामनजयादित्यौ नामस्मरणेन तदुद्धरणेन च स्मारयति । अत्र काशिकाकौमुद्योर्व्याख्यातॄणां न्यासपदमञ्जरीबालमनोरमातत्त्वबोधिनीकाराणां नामस्मरणेन विशेषकथनानि समुद्धृतानि । प्रकृतग्रन्थस्य द्वितीयकं सूत्रक्रमिकं स्वरूपन्तु दर्शनकेशरिमहोदयस्याष्टाध्याय्याः प्रभावितमस्ति ।

शरदाप्रभायाः सन्धिप्रकरणीया सुबन्तीया च संस्कृतभाषा नेपालीहिन्दीमिश्रिता प्राथमिकछात्रबोधानुकूला सरला, सुबोध्या च वर्तते । विषयव्याख्यानशैली त्वागमननिगमनविधिमिश्रिता, शिक्षकनिर्देशनप्रधाना चास्ति । प्रकृतव्याख्यानस्य प्राथमिकं स्वरूपं लक्ष्यप्रधानमस्ति चेद् द्वितीयकन्तु लक्षणप्रधानं विद्यते, अतोऽत्र लक्ष्यलक्षणप्रधानशैल्योः सामञ्जस्यं प्राप्यत इति निष्कर्षः ।

# पञ्चमोऽध्यायः

# शारदाप्रभायास्तिङन्त-कृदन्त-कारकप्रकरणसमीक्षा

## ५.१ विषयपरिचयः

प्रस्तुते पञ्चमाध्याये शारदाप्रभाकारेण सूत्रप्रक्रियाक्रमं सङ्गमय्य व्याख्यातानां तिङन्तप्रकरणस्थानां णिच्प्रकरणतो नामधात्वन्तानामुत्तरतिङन्तीयानां पूर्वकृदन्त-कृत्योत्तरकृदन्तेषु कारकेषु च पठितानां साधुशब्दानां तत्रत्यानां सूत्र वार्त्तिकफक्किकादीनां कारकनियमानाञ्च समीक्षणं विधीयते ।

प्रायो लघुकौमुद्याः संरचनायां प्रकरणविभागवति प्रकृते व्याख्याने प्राथमिकेभ्यश्छात्रेभ्यस्तिङन्तोत्तरतिङन्तकृदन्तकारकप्रकरणान्तर्गतानां विषयाणां सामान्येन दिग्दर्शनाय, परिचयप्रदानाय च तदनुसारेण सूत्रवार्त्तिकरूपसिद्धिप्रक्रियाः प्रस्तुताः सन्ति । अतोऽत्र लघुकौमुदीतोऽपि न्यूनसङ्ख्यकानि सूत्राणि वार्त्तिकानि च निर्धारितानि सन्ति । अस्यास्तिङन्ते १७१ सूत्राणि द्वे वार्त्तिक उत्तरतिङन्ते (णिजन्ततो नामधातुपर्यन्ते ) १८ सूत्राण्येकं वार्त्तिकं कृत्यसहितयोः पूर्वोत्तरकृदन्तयोः ५१ सूत्राणि तथा कारके ९ सूत्राणि च प्राथमिकच्छात्रेभ्यो निर्धारितानि दृश्यन्ते । द्वितीयके विभाजने त्वष्टाध्याय्यन्तर्गतानि सूत्रवार्त्तिकादीनि व्याख्यातानि सन्ति । अष्टाध्याय्या अन्यव्याख्यानग्रन्थेषु कति सूत्राणि सन्तीति ज्ञानायात्र लघुकौमुद्याः, सिद्धान्तकौमुद्याः शारदाप्रभायाश्च एतत्प्रकरणान्तर्गताः सकलसूत्रसङ्ख्या अधस्तनस्थितायां तालिकायां प्रस्तूयन्ते -

तालिकासङ्ख्या : १२ तिङन्तकृदन्तकारकप्रकरणस्थसूत्रसङ्ख्यानां तुलना

| ग्रन्थनाम | दशगणीय-सूत्राणि | उत्तरतिङन्तीय-सूत्राणि | कृदन्तीय-सूत्राणि | कारकीय-सूत्राणि |
|---|---|---|---|---|
| लघुसिद्धान्तकौमुदी | ३२६ | ३३ | १२३ | १६ |
| सिद्धान्तकौमुदी | ५२२ | १४८ | ६८३ | ११६ |
| प्राथमिकी शारदाप्रभा | १७१ | १८ | ५१ | ९ |

शारदाप्रभाकारोऽत्र छात्रयोग्यतां लक्ष्यीकृत्य द्विधा प्रकरणविभाजनं करोतीति तु पूर्वमेवोक्तम् । शारदाप्रभां पिपठिषुः प्राथमिकश्छात्रः प्रायो लघुकौमुदीसंरचनायां तस्मादपि

न्यूनसङ्ख्यकानि सूत्राणि तदनुसारेणैव रूपसिद्धिप्रक्रियामपि पठति चेद् द्वितीयकस्त्व-ष्टाध्यायीक्रमेण समग्राणि सूत्राणि, वार्त्तिकपरिभाषादीनि चाधीते । अत्र प्राथमिकच्छात्रकेन्द्रितः शारदाप्रभाकारो लघुकौमुदीसरणिमङ्गीकुरुते चेद् द्वितीयकस्तु काशिकापद्धति-मवलम्बते । अत्र द्विविधयोरेव विभागयोरध्ययनेऽपि मूलतः प्राथमिकशारदाप्रभायामनुषङ्गतो द्वितीयकेऽपि केन्द्रितो भूत्वा निर्धारितप्रकरणसमीक्षणं विधीयते ।

शारदाप्रभाकारस्य लडादिविन्यासक्रमः कौमुद्यपेक्षया भिन्नः । कौमुदीकारः टित्सु ङित्सु चाकारादिवर्णक्रमेण लट्, लिट्, लुट्, लृट्, लेट्, लोट् इति । ङित्सु- लङ्, लिङ्, लुङ्, लृङ् चेति निर्धारयति चेत् शारदाप्रभाकारस्तु तान् परिमार्ज्य प्रथमतः सार्वधातुकलकारान् (लट्, लोट्, लङ्, विधिलिङ्) समुल्लिख्य तदनन्तरमेवार्धधातुकान् लकारान् (लिट्, लुट्, लृट्, आशीर्लिङ्, लुङ्, लृङ्) चेति विन्यसति । पूर्वव्याख्यातृभिर्निर्धारिते क्रमे परिमार्जनकारण-मुपस्थापयन्नसौ प्राह- “गणभेदाद् विकरणभेदाच्च धातूनां सार्वधातुकलकारान्तर्गतेषु रूपेष्वपि स्पष्टभेदो दृश्यते, अतः प्रथमतस्तेषां पठनपाठनमावश्यकम् ।”[३४२] सार्वधातुक इवार्धधातुके क्रमपरिवर्तनकारणं तेन न प्रस्तुतं तथापि प्रथमतो भिन्नरूपाणि, तदनन्तरमेव समानानि पाठनीयानीति नियममनुसरता व्याख्यात्रा तथाकृतं प्रतीयते । सार्वधातुकरूपसाधनापेक्षयाऽस्यार्धधातुकानां सरलमिति हेतोरत्र अत्र सरलतो जटिलक्रमो व्यतिक्रान्तोऽनुभूयते ।

कौमुद्यामुत्तरतिङन्तप्रकरणं णिच्प्रकरणत आरभ्य लकारार्थे समाप्तम्, परं शारदाप्रभायान्तु णिच्प्रकरणत समारभ्य णिच्-सन्-यङ्-यङ्लुक्-नामधातवश्चेति पञ्चसु प्रकरणेष्वेव पूरितम् । शारदाप्रभाकारोऽयमुभयपदिनां धातूनां द्विविधान्येव रूपाण्येकत्रैव समुल्लिखन् साधयँश्च तयोर्भिन्नत्वमप्येकत्रैव दर्शयतति । तेनैव प्रकारेण लः कर्मणि च भावे चाकर्मकेभ्यः (पा.सू.३-४-६९) इति सूत्रे कर्तृकर्मभावान् परिभाष्य लटो व्याख्यान एव भावकर्मणोः (पा.सू.१-३-१३), सार्वधातुके यक् (पा.सू.३-१-६७) इति सूत्राभ्यां भावकर्मवाच्ययोरूदाहरणान्यपि प्रस्तुत्य कर्तृकर्मभाववाच्यानां व्यवस्थां तेषां भेदाँश्च तत्रैव शिक्षयति । तत्रैव कर्तृवाच्ये कर्मणः, कर्मवाच्ये च कर्तुरनुक्तत्वात् तदर्थापनाय अनभिहिते (पा.सू.२-३-१), कर्मणि द्वितीया (पा.सू.२-३-२), कर्तृकरणयोस्तृतीया (पा.सू.२-३-१८) इति सूत्राण्यपि प्रस्तुत्य तेषामर्थादिकमपि स्पष्टयति ।

---

[१]. हरिप्रसादशर्माचार्यः (व्या.) *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. १११ ।

शारदाप्रभायां दशगणीयधातूनां समुल्लेखस्तेषां रूपसिद्धिप्रक्रियाक्रमनिर्देशश्च लघुकौमुद्यपेक्षया सङ्क्षिप्ततया सरलतया च कृतः । लघुकौमुद्यां प्रायो दशाधिकसूत्रेषु धातुषु च विशदीकृता जुहोत्यादि-दिवादिप्रभृतयो गणा अत्र तस्मादपि न्यूनसङ्ख्यकसूत्रादिषु सङकोचीकृताः सन्ति । उत्तरतिङन्तशिक्षणरीतिरपि प्रायो द्वि-त्रि-सूत्रेष्वेव सङ्कोचीभूता वर्तते, अत एवोत्तरतिङन्ते निर्धारितेषु पञ्चप्रकरणेषु पठितानां सूत्राणां योगोऽष्टादश वर्तते ।

शारदाप्रभायां पूर्वकृदन्तप्रकरणानन्तरं कृत्यप्रकरणं प्रस्तुतमस्ति । प्रथमतः पूर्वकृदन्तीयानि सरलानि कर्तृवाचकानि च रूपाणि साधयित्वा तदनन्तरमेव भावकर्मणोरूपदेशः समुचित इति मत्वा सरलतो जटिलयात्रेति विधिमनुपालयन् भावकर्मार्थकप्रत्ययान्तानि कृत्यप्रकरणान्तर्गतानि रूपाण्यत्र साधितानि । अत्रत्योत्तरकृदन्त-प्रकरणमपि दशसु सूत्रेष्वेव परिसीमितमस्ति, तच्च भावे ल्युट्प्रत्ययविधायकं ल्युट् च (पा.सू.३-३-११५) इति सूत्रतः समारभ्य कृन्मेजन्तः (पा.सू. १-१-३८) सूत्रे समापितमस्ति । व्याख्याकारोऽयमत्रत्येषु तिङन्तोत्तरतिङन्तकृदन्तप्रकरणेषु बहुत्र विधिसूत्राणि समुपन्यसति । प्राथमिकाध्ययनार्थमत्र निर्धारितेषु २४० सूत्रेषु २०३ सूत्राणि प्रवृत्तिदृष्ट्या निषेधदृष्ट्या च कार्यविधायकान्येव सन्ति । ततो द्वितीयक्रमे संज्ञासूत्राणि समायान्ति । अन्यानि च कियत्प्रकारकाणि सूत्राणि तत्र कति सङ्ख्यायां सन्तीति ज्ञानार्थमधस्तनस्थितायां तालिकायां तेषामुल्लेखो विधीयते -

तालिकासङ्ख्या १३ तिङन्तकृदन्तकारकस्थसूत्रक्रमप्रकाराः

| सूत्रप्रकाराः | तिङन्ते | उत्तरतिङन्ते | कृदन्ते | कारके | सू.योगः |
|---|---|---|---|---|---|
| विधिसूत्राणि | १४५ | १५ | ४३ | ५ | २०३ |
| संज्ञासूत्राणि | १४ | २ | ७ | ४ | २३ |
| नियमसूत्राणि | ४ | १ | × | × | ५ |
| अतिदेशसूत्राणि | ५ | × | × | × | ५ |
| परिभाषासूत्राणि | १ | × | १ | × | २ |
| अधिकारसूत्राणि | २ | × | × | × | २ |
| प्रकरणसूत्रयोगः | १७१ | १८ | ५१ | × | २४० |

अतः परं शारदाप्रभायास्तिङन्तोत्तरतिङन्तकृदन्तप्रकरणान्तर्गतान् विषयान्-अधिकारानुवृत्त्योर्निर्दर्शनम्, विग्रहादिभिरूदाहरणादिभिश्च सूत्रार्थापनम्, शङ्कामुद्भाव्य

समाधानम्, रूपसिद्धिप्रक्रियावबोधः, वार्त्तिकपरिभाषादिभिर्जटिलतास्फोरणम्, अन्याचार्यमतसङ्ग्रहः, प्रकरणसङ्घटनं शैलीशिल्पञ्चेति शब्दशास्त्रीयैर्व्याख्यानतत्त्वैः समीक्ष्याध्यायान्ते निष्कर्षः प्रस्तूयते ।

## ५.२ तिङन्तसमीक्षणम्

प्रस्तुते तिङन्तसमीक्षणे शारदाप्रभान्तर्गताया दशगणीयप्रक्रियायाः, णिच्-सन्-यङ्-यङ्लुक्-नामधात्वन्तानां पदानां च शब्दसाधनसम्बद्धां प्रक्रियां समीक्ष्यते ।

### ५.२.१ अधिकारानुवृत्त्योर्निदर्शनम्

अधिकारसूत्रस्थमधिक्रियमाणं पदं विधिसूत्रेण सहैकवाक्यतया वाक्यभेदेन वाऽन्वितो भवति । अतो हो ढः (पा.सू.८-२-३१) सूत्रे हस्य ढो भवति, इदञ्च शास्त्रं पूर्वत्रासिद्धमिति विज्ञायते, तस्मात् कारणादेकत्रोपात्तस्याधिकारस्योत्तरदेशे वाक्यभेदेनान्वय इति तज्ज्ञाः । एतल्लक्षणन्तु- स्वदेशे लक्ष्योपयोगिवाक्यार्थबोधाजनकत्वे सति विधिशास्त्रैकवाक्यतया बोधजनकत्वमिति[३४३] वर्तते । पाणिनेः सूत्रसङ्क्षेपीकरणस्यैतादृशीं शैलीं सर्वे परवर्तिनो वैयाकरणा गवेषकाश्च प्रशंसन्ति । अनया पद्धत्या पाणिनिना बहुत्र सूत्राणां सङ्क्षेपः कृतोऽर्थगतिर्निर्धारिता च । तादृशानामधिकारसूत्राणां प्रयोगसीमानिर्धारणञ्चोत्तरवर्तिभिर्व्याख्यातृभिरावश्यकतानुसारेण कृतं तत्र प्रकृतव्याख्यात्रा परिशीलितञ्च ।

शारदाप्रभायास्तिङन्ते लस्य (पा.सू.३-४-७७) अनभिहिते (पा.सू.२-३-१) इति द्वेऽधिकारसूत्रे वर्तेते । तयोर्मध्ये प्रथमसूत्रं तृतीयाध्यायस्य चतुर्थपादस्य छन्दस्युभयथा (पा.सू.३-४-१७७) इत्यन्तं निरन्तरमनुवर्तते, परं शारदाप्रभाकारेण सूत्रमिदमधिकारसङ्केताय न स्थूलाक्षरीकृतं नापि पादान्तमनुवर्तत इति सङ्केतितञ्च । अत्र गोपालशास्त्रिदर्शनकेशरिवर्यस्तु स्थूलाक्षरेण, सूत्रान्तेऽङ्कसङ्केतं समुल्लिख्य च सूत्रमिदं पादान्तमनुवर्तत इति सूचयति । द्वितीयसूत्रं 'अनभिहिते' इति तु तस्यैवाध्यायस्य तस्यैव पादस्य चतुर्थी चाशिष्य...(पा.सू.२-३-७३) इत्यन्तमनुवर्तत इति शारदाप्रभायां निर्दिष्टाङ्केन स्थूलाक्षरेण च ज्ञायते ।

---

२. नित्यानन्दपर्वतीयः (व्या.), *लघुशब्देन्दुशेखरः*, वाराणसी : चौखम्बासंस्कृतप्रतिष्ठानम्, (२०६४)पृ.४ ।

लघुकौमुदीकारस्त्वत्र आर्धधातुके (पा.सू.२-४-३५) इत्येकमेवाधिकारसूत्रं प्रयुङ्क्ते, तदपि शारदाप्रभाकारनिर्दिष्टसूत्रतो भिन्नं वर्तते । अदादौ प्रस्तुतं तत् सूत्रं अजेर्व्यघञपोः (पा.सू.२-४-५७) इति सूत्रान्तमनुगच्छति । शारदाप्रभाकारस्तु सूत्रमिदं द्वितीयाध्ययनार्थमेव निर्धारयति । सिद्धान्तकौमुद्या भ्वादि-चुरादिखण्डे तु लस्य (पा.सू.३-४-७७), एकाचो द्वे प्रथमस्य (पा.सू.६-१-१), अजादेर्द्वितीयस्य (पा.सू.६-१-२) इति त्रीण्यधिकारसूत्राणि समुल्लिखितानि सन्ति ।

शारदाप्रभायास्तिङन्ते निर्धारितं 'अनभिहिते' इत्यधिकारसूत्रं सिद्धान्तकौमुदीकारस्तु कारकप्रकरण उक्तानुक्तत्वपर्यालोचन एव समुल्लिखति । तिङन्ते प्रकृतसूत्रनिर्धारणकारणमुल्लिखन् शारदाप्रभाकारः कतृकर्मभावबोधकतिङन्तीयक्रिया निरूपणप्रसङ्ग उक्तानुक्तत्वमपि व्याख्येयं भवतीति ज्ञापयन् सूत्रमिदं तिङन्ते निर्धार्य व्याख्याति। तादृशानभिहितपदव्याख्यानार्थमत्रैवानभिहिताधिकार आवश्यक इति तस्य स्पष्टीकरणम्, प्रकृतसूत्रार्थबोधस्तिङन्ते यद्यपि कठिनतरस्तथापि प्रासङ्गिकत्वात् तत्समुचितः प्रतीयते ।

शारदाप्रभाकारोऽयमग्रेऽनुवृर्त्यं सूत्रं पदं वा स्थूलाक्षरैः सङ्केतयित्वा सूत्रान्ते निर्दिष्टैरङ्कैस्तेषामनुवर्तनसीमां च निर्धार्य स्पष्टयति । तादृशानुवर्तनीयेषु पदेषु कानिचन समीपम्, कानिचन प्रकृतपादान्तम्, कति त्वपराध्यायान्तमपि गच्छन्ति । तिङन्तप्रकरणारम्भे पठितं भूवादयो धातवः (पा.सू.१-३-१) इति सूत्रस्थं धातव इति पदं तत्पादस्यैव लुटि च क्लृपः (पा.सू.१-३-९३) इति सूत्रपर्यन्तं गच्छति चेत् प्रकृतपादस्यैव वर्तमाने लट् (पा.सू.३-२-१२३) इति सूत्रस्थं 'वर्तमानः' इति पदं तु उणादयो बहुलम् (पा.सू.३-३-१) इत्यन्तं क्रमशोऽनुवर्तते । तथैव शेषात्कर्तरि परस्मैपदम् (पा.सू.१-३-७८) इति समग्रं सूत्रं लुटि च क्लृपः (पा.सू.१-३-९३) इति सूत्रपर्यन्तं निरन्तरं गच्छतीति शारदाप्रभाया अङ्कसङ्केताद् ज्ञायते । शारदाप्रभाकारस्त्वाभ्यासिकान् छात्रान् सरलतयाऽनुवृत्तिक्रमबोधनाय सूत्रस्थमनुवर्त्यं पदं सूत्रं वा कखादिभिः स्पष्टयति -

| (क) | (ख) | |
|---|---|---|
| अङ्गस्य | मिदेर्गुणः | सार्वधातुकार्धधातुकयोः |

अत्रत्ये सार्वधातुकार्धधातुकयोः (पा.सू.७-३-८४) इति सूत्रे अङ्गस्य (पा.सू.६-४-१) इति सूत्रात् षष्ठ्यन्तमङ्गपदं मिदेर्गुणः (पा.सू.७-३-८२) इत्यस्मात् प्रथमान्तं

गुणपदञ्चानुवर्तते, अतस्तयोः सङ्केतो व्याख्यात्रा उपरि दर्शितरीत्या कृतस्तदन्ते सूत्रवृत्त्यार्थः स्पष्टीकृतश्च । तथैवात्र इको गुणवृद्धी (पा.सू.१-१-३) सूत्रादिक इति षष्ठ्यन्तं पदमप्यावर्तत इति सङ्केतितश्च । अतः सार्वधातुकार्धधातुकयोः सूत्रतः 'इगन्ताङ्गस्य स्थाने गुणो भवति सार्वधातुकार्धधातुकयोः परयोः' इत्यर्थो निष्पादितः । अस्य सङ्केतो बालमनोरमाकारेणैवं कृतः- "इको गुणवृद्धीति परिभाषया इक इति समुपस्थितेनाङ्गस्येत्यधिकृतं विशेष्यते, तत्र तदन्तविधिः, मिदेर्गुण इत्यस्माद् गुण इत्यनुवर्तते, तस्मादेव सार्वधातुकार्धधातुकयोः परयोरिगन्ताङ्गस्य गुणः स्यादित्यर्थः सम्पद्यते ।"[३४४] वृत्तिकारेण कृत एतादृगर्थोऽनुवृत्यैव सम्भवः, अनुवृत्तिद्वारैव सूत्रार्थः स्पष्टीभूतश्च, अतोऽनुवृत्तिद्वारा सूत्रार्थो निष्पद्यत इति निश्चेतुं शक्यते । अन्यत्रापि कतिपयेषु सूत्रेषु पूर्वत्र पठितैर्बहुभिः सूत्रैरनुवृत्तिसीमा, तासां सङ्केतश्चैवं कृतः प्राप्यते -

तालिकासङ्ख्या : १४ शारदाप्रभाया अनुवृत्तिसङ्केतदिग्दर्शनम्

| अनुवृत्ति १ | अनुवृत्ति २ | अनुवृत्ति ३ | सूत्रे आगच्छति |
|---|---|---|---|
| तुरुस्तु...**सार्वधातुके** | अस्तिसिचोऽ**पृक्तेः** | **अङ्गार्ग्यगालवयोः** | अदः सर्वेषाम् |
| **एकाचो द्वे प्रथमस्य** | **अजादेर्द्वितीयस्य** | | लिटि धातो... |
| **एकाचो द्वे प्रथमस्य** | **अजादेर्द्वितीयस्य** | | श्लौ |
| **इको गुणवद्धी** | **न**धातुलोप आर्ध.... | | क्ङिति च |
| **धातोरेकाचो** ....यङ् | **सार्वधातुके** यक् | **कर्तरि** शप् | स्वादिभ्यः श्नुः |
| **झो**ऽन्तः | **अदभ्यस्तात्** | | आत्मनेपदेष्वनतः |

परम्परितविभागानुसारेण मूलतोऽधिकारोऽनुवृत्तिर्वा सिंहावलोकनमिव, मण्डूकप्लुतिरिव, गङ्गाप्रवाह इव चेति त्रिधा विधीयते । अतः परं शारदाप्रभायाः तिङन्तखण्डे पूर्वोक्तानामधिकाराणां कुत्र कुत्र प्रयोगो वर्तत इति निरूपयते ।

### ५.२.१.१ सिंहावलोकनानुवृत्तिः

शारदाप्रभायास्तिङन्तान्तर्गते भ्वादावपकर्षितं पदं अचस्तास्वत्थल्यनिटो नित्यम् (पा.सू.७-२-६१) इति सूत्रे दृश्यते, तत्रोत्तरवर्तिन उपदेशेऽत्वतः (पा.सू. ७-२-६२) इति सूत्रादुपदेश इति पदमपकृष्यते, तस्य सङ्केतः शारदाप्रभाकारः कुल्या दृष्टान्तद्वारा कुरुते, तद्यथा- "यथा प्राय उपरितनात् क्षेत्रादधस्तने क्षेत्रे जलमायाति, क्वचित्तु अधस्तनात्

३.वासुदेवदीक्षितः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः),दिल्ली : मोतीलालब., (२००५) पृ. १६ ।

क्षेत्रादुपरिस्तने क्षेत्रेऽपि विशेषयत्नेन गतं दृश्यते, तथैवानुवृत्तिरपि प्राय उपरितनात् सूत्रादधस्तने सूत्रे भवति परन्तु प्रकृतसूत्र अचस्तास्वत्थल्यनिटो नित्यम् (पा.सू.७-२-६१) सूत्रे) उपदेशेऽत्वतः (पा.सू.७-२-६२) इति सूत्रादुपदेश इति पदमपकृष्यते ।"[३४५] व्याख्यातुरेषः सिंहावलोकनानुवृत्तिदृष्टान्तः सरलभाषायां निबद्धत्वात् प्राथमिकैश्छात्रैरपि सुबोध्यः, वैषयिकगाम्भीर्यप्रतिपादनक्षमश्च वर्तते । यद्यपि प्रक्रियाशिक्षणे प्राथमिकेभ्यश्छात्रेभ्यः सूत्राणामपकर्षणशिक्षणं भारावहं भवितुं शक्नोति तथापि शारदाप्रभाया उद्देश्यं प्रक्रियाक्रमतः सूत्रक्रम उत्क्रमणमत सर्वं स्वाभाविकं प्रतीयते । अचस्तास्वत्थल्यनिटो नित्यम् (पा.सू.७-२-६१) इति सूत्र उत्तरसूत्रादुपदेशपदापकर्षणविषयं शारदाप्रभाकार-तफ्वबोधिनी-बालमनोरमाकाराः समुल्लिखन्ति । तत्र बालमनोरमाकारः प्राह-"उपदेशेऽत्वतः (पा.सू. ७-२-६२) इति सूत्रादुपदेश इत्यपकृष्यत इति ऋतो भारद्वाजस्य (पा.सू.७-२-६३) सूत्रे महाभाष्ये स्थितमत एव उपदेशे अजन्ताद्धातोरित्यन्वयः ।[३४६] वस्तुतोऽपकर्षणस्य प्रथमसङ्केतो महाभाष्यकारेण कृत इत्यपि बालमनोरमाकारस्यैतस्माद् वचनाज्ज्ञायते । तऽवबोधिनीकारो ज्ञानेन्द्रसरस्वतीवर्यस्तु महाभाष्यस्योल्लेखनं विनैवापकर्षणं सङ्केतयति, तद्यथा- "उत्तरसूत्रादुपदेश इत्यपकृष्यते, तच्चाजन्तस्य विशेषणमित्याह उपदेशेऽजन्त... इत्यादिः ।"[३४७] सिद्धान्तकौमुद्यां दीक्षित एतादृशमपकर्षणं संयोज्यैवं सूत्रार्थं कुरुते- "उपदेशेऽजन्तो यो धातुस्तासौ नित्यानिट् ततः परस्य थल इण्नेति ।"[३४८] अनेन प्रकारेण बहुभिर्व्याख्यातृभिः कृतोऽपकर्षणसङ्केतः काशिकायां तु नोपलभ्यते । काशिकाकारस्तत्रापकर्षणसङ्केतं विनैव सूत्रमिदमनेन प्रकारेणार्थापयति- "तासौ यो नित्यानिटो धातवोऽजन्तास्तेभ्यस्तासाविव थलीडागमो न भवतीति ।"[३४९] एतेन अचस्तास्वदिति सूत्र उपदेशपदापकर्षणे व्याख्यातृषु मतवैभिन्यं वर्तत इति दृष्टिपथमायाति । तत्र शारदाप्रभाकारस्तु सिद्धान्तकौमुदीपक्षं गृह्णातीत्यपि ज्ञायते ।

तिङन्तान्तर्गतेष्वन्येषु सूत्रेषु सिंहावलोकनानुवृत्तिः प्रकृतानुसन्धात्रा न प्राप्ता ।

---

४. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. ।

५. वासुदेवदीक्षितः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः) पूर्ववत्, (२००५) पृ.११४ ।

६. ज्ञानेन्द्रसरस्वती (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः) पूर्ववत्, (२००५)पृ.११४ ।

७. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः) पूर्ववत्, (२००५) पृ.११४ ।

८. वामनजयादित्यौ, काशिका (द्वितीयो भागः), वाराणसी : चौ.सं.सि., (२०२९) पृ. ३३३ ।

### ५.२.१.२ मण्डूकप्लुतानुवृत्तिः

शारदाप्रभायास्तिङन्ते पठितेषु सूत्रेषु मण्डूकप्लुतानुवृत्तिसङ्केतः स्पष्टतया नोपलभ्यते । शारदाप्रभाकारोऽसौ बालमनोरमा-तत्त्वबोधिनी-काशिकादीनि व्याख्यानानि गोपालदत्तशास्त्रिणञ्चाश्रित्यानुवृत्तिमुल्लिखति, परमेतेष्वेकेनापि व्याख्यात्रा तिङन्तान्तर्गतेषु सूत्रेषु मण्डूकप्लुतानुवृत्तिसङ्केतो न कृतः, अतः शारदाप्रभाकारोऽपि तत्र मण्डूकप्लुतानुवृत्तेर्निदर्शनं न करोति, तथापि सिद्धान्तकौमुद्याः सूत्रवृत्तिं शारदाप्रभाया मूलेऽवस्थितं सूत्रक्रमञ्चानुसृत्य क्वचिद् मण्डूकप्लुतानुवृत्तिर्वर्तत इति ज्ञायते, अत्रैतद् मृग्यते ।

भ्वादौ पठिते गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु (पा.सू. २-४-७७) इति सूत्रे लुकोऽनुवृत्तिरावश्यकी । तत्र च ण्यक्षत्रियार्षञितो यूनि लुगणिञोः (पा.सू. २-४-५८) इत्यस्मात् तदानीतमस्ति । अनयोः सूत्रयोर्मध्ये पठितेन जुहोत्यादिभ्यः श्लुः (पा.सू.२-४-७५) इति सूत्रेण तद् बाध्यते तथापि तदुत्तरवर्तिनि गातिस्था...(पा.सू.२-४-७७) इत्यत्र पुनर्गच्छतीत्येतद् मण्डूकप्लुतानुवृत्तेरूदाहरणं भवितुं शक्नोति । एतादृशमनुवर्तनं बालमनोरमाकारो व्यवहितानुवृत्तिरिति व्यवहरति । अत्र बालमनोरमाकारः प्राह- "ण्यक्षत्रियार्ष... इत्यस्माद् व्यवहितादपि लुगित्यनुवर्तते, जुहोत्यादिभ्यः श्लु इत्यव्यवहितमपि श्लुग्रहणं नानुवर्तते व्याख्यानादिति ।" [३५०] गातिस्थेति सूत्रे व्यवहितोऽपि लुगनुवर्तते परमव्यवहितोऽपि श्लु नानुवर्तत इत्यत्र तत्त्वबोधिनीकारोऽपि सहमतः । अत्र व्यवहितोऽपि लुगनुवर्तते परमव्यवहितोऽपि श्लुपदन्तु नानुवर्तत इति कथने किं मानमिति संशये द्वावेव टीकाकारौ व्याख्यानमाश्रयेते । प्रसङ्गेऽस्मिन् शारदाप्रभाकारो व्यवहितोऽपि लुगनुवर्तते, श्लुविकरणस्त्वव्यवहितोऽपि नानुवर्तत इति चर्चामकृत्वैव ण्यक्षत्रियार्ष...इति सूत्राद् लुगनुवर्तत इति सङ्केतयति । स ततोऽनुवृत्तं पदं संयोज्य सूत्रमिदमेवमर्थापयति- "गाधातोः स्थाधातोर्घुसंज्ञकधातोः, पा (पिबतिरूपवान्) धातोर्भूधातोश्च परस्य सिचो लुक् स्यात् परस्मैपदेषु ।" [३५१] अत्र लुक्प्रयोगात् पदमिदं व्यवहितमप्यागतमिति निश्चीयते । बालमनोरमाकारेण तदुल्लेखेऽकृतेऽपि व्यवहितागमनमपि तत्समानं मत्वात्र तदुदाहरणत्वेन समुल्लिख्यते । तथैव अत उपधायाः (पा.सू.७-२-११६) इति सूत्रस्थमुपधापदमपि तद्धितेष्वचामादेः (पा.सू.७-२-११७), आतो युक् चिण्कृतोः (पा.सू.७-३-३३) प्रभृतीनि सूत्राणि समुत्प्लुत्य नोदात्तोपदेशस्य मान्तस्यानाचमेः (पा.सू.७-३-३४) जनिवध्योश्च (पा.सू.७-३-३५) इति सूत्रयोरेव समायाति, अतस्तत्रत्योत्प्लवनमपि मण्डूकप्लुतिवदेवेति निश्चीयते । अनुवृत्तं पदमिदं संयोज्य हरिप्रसादो नोदात्तोपदेश... सूत्रमेवमर्थापयति- "उपधाया वृद्धिर्न स्यात् चिणि

---

९. वासुदेवदीक्षितः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः), पूर्ववत्, (२००५) पृ. १६ ।
१०. हरिप्रसादशर्माचार्यः (व्या.) *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ.१३८ ।

ञिति णिति कृति च ।"[३५२] द्वितीयं जनिवध्योश्च सूत्रमप्येवं व्याकुरुते- "जनिवध्योरूपधाया वृद्धिर्न स्यात् चिणि ञिति णिति कृति च ।" [३५३] प्रकृतप्रसङ्ग अन्यव्याख्यातृवत् शारदाप्रभाकारोऽपि मण्डूकप्लुतेरुल्लेखमकृत्वैव पूर्वस्मात् सूत्रादावश्यकपदमेवानीय सूत्रमर्थापयतीति पूर्वोक्त्या सूत्रवृत्या स्पष्टीभवति, तथापि नोदात्तोपदेशस्य...जनिवध्योश्चेति सूत्रद्वय अत उपधाया इत्यस्माद् मण्डूकप्लुतानुवृत्तिरागच्छतीति निश्चेतुं शक्यते ।

### ५.२.१.३ गङ्गाप्रवाहवदनुवृत्तिः

अनुवृत्तेस्तृतीयप्रकारो गङ्गाप्रवाहवदिति । सा चाधिकारवदेकत्रोपात्तं सत् सततमुपरितनेषु सूत्रेषु गच्छति । शारदाप्रभायास्तिङन्तप्रकरणेऽपि गङ्गाप्रवाहवत् सततमनुवृत्तानि पदानि सूत्राणि च यत्र तत्र दरीदृश्यन्ते । तादृशेभ्य उदाहरणेभ्य कानिचनात्र प्रस्तूयन्ते ।

भ्वादौ पठितादादेच उपदेशेऽशिति (पा.सू.६-१-४५) सूत्रादादेच इति पदमुत्तरवर्तिषु नित्यं स्मयतेः (पा.सू.६-१-५७) इत्यन्तेषु त्रयोदशसूत्रेष्वविच्छेदेनानुवर्तते । आदेच... सूत्रस्यैव उपदेशपदं णो नः (पा.सू.६-१-६५) पर्यन्तं गच्छतीति गङ्गाप्रवाहवदनुवृत्तेरूदाहरणमिदमपि । तेनैव प्रकारेणादादौ पठितं असिद्धवदत्राभात् (पा.सू. ६-४-२२) इति समग्रमेव सूत्रं पादान्ते पठिते ऋत्व्य-वास्त्व्य....(पा.सू.६-४-१७५) इति सूत्रपर्यन्तं निरन्तरमततीति गङ्गाप्रवाहवदनुवृत्तेरपरमुदाहरणम् । शारदाप्रभाकारोऽपि असिद्धवदत्राभात् (पा.सू. ६-४-२२) इति समग्रं सूत्रं स्थूलाक्षरैः सङ्केतयन् षष्ठाध्यायस्य चतुर्थपादान्तं सूत्रमिदमनुवर्तत इति सूचयति तथैव तत्सूत्रस्थमाभादिति पदं भाधिकारमभिव्याप्य गच्छतीत्यर्थापयति च, पुनश्च तत्रैवापादपरिसमाप्ते भाधिकारमनुगच्छतीति सूचयति ।[३५४] एतेन प्रकृतं असिद्धवदत्राभादिति समग्रमेव सूत्रमापादमनुवर्तत इति निश्चीयते ।

अतः परं गङ्गाप्रवाहवदनुवर्तितानि तिङन्तप्रकरणान्तर्गतानि कानिचन सूत्राणि समुल्लिख्य तत्रत्य पदानि/सूत्राणि कियद् दूरान्तमनुवर्तन्त इति सूच्यते-

| *अनुवर्त्यानि सूत्राणि/पदानि* | *अनुवृत्तिसीमा* |
|---|---|
| **आर्धधातुके** (पा.सू. ६-४-४६) | न ल्यपि (पा.सू. ६-४-६९) |

११. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४) पृ. ५३९ ।
१२. पूर्ववत्, ४६७।
१३. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ. ५३७।

| | |
|---|---|
| **एकाचो द्वे प्रथमस्य** (पा.सू.६-१-१) | चङि (पा.सू. ६-१-११) |
| **अजादेर्द्वितीयस्य** (पा.सू.६-१-२) | चङि (पा.सू. ६-१-११) |
| इदितो **नुम्** धातोः (पा.सू.७-१-५८) | दृक्स्ववस्वतवसां छन्दसि (पा.सू. ६-१-८३) |
| रुदादिभ्यः**सार्वधातुके** (पा.सू.७-२-७६) | आतो ङितः (पा.सू. ७-२-८१) |
| **आर्धधातुकस्येड् वलादेः** (पा.सू.७-२-३५) | किरश्च पञ्चभ्यः (पा.सू. ७-२-७५) |
| | ईडजनोर्ध्वे च (७-२-७८) |
| असंयोगात् **लिट् कित्** (पा.सू.१-२-५) | इन्धिभवतिभ्यां च (पा.सू. १-२-६) |
| | रलो व्युपधाद्धलादेः संश्च (पा.सू.१-२-२६) |

अतः पूर्वोक्तद्विविधानुवृत्यपेक्षया गङ्गाप्रवाहतुल्या सततं प्रवहनशीलानुवृत्तिः प्रकृतखण्डे बहुत्र दृश्यते, यद्यपि केषाञ्चन सूत्राणां पदानाञ्चानुवर्तनं दूरान्तं भवति चेत् केषाञ्चित्तु उत्तरसूत्रपर्यन्तमेव, तथाप्यग्रे पठितेषु सूत्रेषु पूर्वसूत्राणां तत्रत्यपदानां वा निरन्तरमनुवर्तनमस्तीति ज्ञायते । तथैवैकस्यैव सूत्रस्यापि नैकानि पदानि भिन्नभिन्नसूत्रपर्यन्तमनुगच्छन्तीति उपरि स्थित उदाहरण आर्धधातुकस्येड् इति पदं किरश्च पञ्चभ्य इति सूत्रान्तं तत्सूत्रस्यैव वलादेरिति तु 'ईडजनोर्ध्वे' (पा.सू.७-२-७८) इति सूत्रान्तं गच्छतीत्येतेन सूचनेन ज्ञायते ।

### ५.२.१.४ चकारादाकाङ्क्षावशाच्चानुवृत्तिः

कतिपयेषूत्तरसूत्रेषु विद्यमानाच्चकारादाकाङ्क्षकपदाच्च पूर्वसूत्रं तत्रत्यं पदं वाऽऽनीयते । अष्टाध्याय्यास्तिङन्तप्रकरणान्तर्गतेषु कतिपयसूत्रेषु तादृशानुवृत्तिर्दृश्यते, अतः परमेतेषामुल्लेखनं व्याख्यानञ्च विधीयते ।

#### क) चकारादनुवृत्तिः

भ्वादौ पठिते ग्क्ङिति च (पा.सू.१-१-५) इति सूत्रे विद्यमानाच्चकारात् पूर्ववर्तिन इको गुणवृद्धी (पा.सू.१-१-३) सूत्राद् गुणवृद्धीति पदद्वयनुवर्तेते, अत एव गिति किति ङिति च इग्लक्षणे गुणवृद्धी न भवत इत्यर्थो लभ्यते । तथैव म्रियतेर्लुङ्लिङोश्च (पा.सू.१-३-६१) इति सूत्रे चकारपाठात् तत्पूर्ववर्तिनः शदेः शितः (पा.सू.१-३-६०) इत्यस्मात् शित इत्यनुकृष्यते, अतो लुङ्लिङोः शितश्च कारणभूतान्मृङ्धातोस्तङ् स्यादित्यर्थो निष्पद्यते । तथैव मीनातिमिनोतिदीङां ल्यपि च (पा.सू.६-१-५०) इति सूत्रस्थेन चकारेण तत्पूर्ववर्तिन आदेच उपदेशेऽशिति (पा.सू. ६-१-४५) सूत्रादातेच (आत्,एच्) अशितीति पदत्रयमपकृष्यते । तेनैच्

निमित्तेऽशिति प्रत्यये परे मीनातिप्रभृतीनामेत आत्वं विधीयते । तस्योल्लेखो बालमनोरमाकार एवं करोति- “चकारादेच अशिति परनिमित्तं समुच्चीयते, अत एच् निमित्तेऽशिति प्रत्यये च परे इति सूत्रार्थः फलति ।”[३५५] सूत्रेऽस्मिन् शारदाप्रभाकारश्चकारादेजनुवर्तत इति सूचयित्वा उपदेश एव आत्वविधानादिवर्णान्तलक्षणप्रत्ययो न भवतीति काशिकावाक्यमप्युद्धरति ।[३५६] एतेभ्योऽन्यत्रापि बहुषु सूत्रेषु चकारात् पूर्वसूत्रस्थं पदं सूत्रं वानुवृत्तमुपलभ्यते, तेभ्यो कानिचनोदाहरणान्यत्र समुल्लिख्यन्ते :-

तालिकासङ्ख्या : १५ चकारादनुवृत्तिसङ्केतदिग्दर्शनम्

| अनुवृर्त्त्यं सूत्रम् / पदम् | चकारयुक्तं सूत्रम् |
|---|---|
| **इद्** दरिद्रस्य (पा.सू. ६-४-११४),**ई** हल्यघोः (पा.सू. ६-४-११६) | आ च हौ (पा.सू. ६-४-११७) |
| एकाचो बशो भष् ... **स्ध्वोः** (पा.सू. ८-२-३७) | दधस्तस्थोश्च (पा.सू. ८-२-३८) |
| **लिङ्सिचावात्मनेपदेषु** (पा.सू. १-२-११) | उश्च (पा.सू. १-२-१२) |
| अत् स्मृदृत्वर... (पा.सू. ७-४-९५) | ई च गणः (पा.सू. ७-४-९७) |
| **लोपश्चास्यन्यतरस्यां** म्वोः (पा.सू.९-४-१०७) **नित्यं करोतेः** (पा.सू. ६-४-१०८) | ये च (पा.सू. ९-४-१०९) |
| **वचिस्वपियजादीनां किति** (पा.सू. ६-१-१५) | ग्रहिज्यावयि......(पा.सू. ६-१-१६) |

एतैरूदाहरणैस्तिङन्ते परसूत्रस्थचकारतः पूर्वसूत्रं तत्रत्यं पदं च वाऽनुवर्तत इति वक्तुं शक्यते । शारदाप्रभाकारोऽनुवर्त्तनीयानां पदानामुल्लेखं स्थूलाक्षरेण कुरुते ।

## ख) आकाङ्क्षावशादनुवृत्तिः

कतिपयेषूत्तरसूत्रेषु स्थितमाकाङ्क्षकं पदं पूर्वसूत्रस्थमनुवर्त्यं पदं समग्रं सूत्रं वाऽनुवर्तयति, अतोऽनुवर्तनं न केवलं पदत एवापितु आकाङ्क्षावशादपि सम्भवतीति ज्ञायते । भ्वादौ पठिते वान्यस्य संयोगादेः (पा.सू. ६-४-६८) इति सूत्रे चकारादिकमनुवर्त्यं न वर्तते तथापि तत्र एर्लिङि (पा.सू. ६-४-६७) इति समग्रमेव सूत्रमनुवर्तते । तत्र पूर्वसूत्रस्यानुवर्तने द्वयोः सूत्रयोरेत्वविधायकत्वसमानकार्यं तथा पूर्वापरत्वमेव कारणं दृश्यते । गुणोर्तिसंयोगाद्योः (पा.सू. ७-४-२९) इति सूत्रेऽपि नास्त्यनुवर्तकं किमपि पदं तथाप्याकाङ्क्षावशाद् रीङृतः (पा.सू.७-४-२७) इत्यस्मादृतः, अकृत्सार्वधातुकयोः दीर्घः (पा.सू.७-४-२५) इत्यतः

---

१४. वासुदेवदीक्षितः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः),पूर्ववत्, (२००५) पृ.३२५ ।
१५. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. ४४१ ।

सार्वधातुकम्, रिङ्शयग्लिङ्क्षु पा.सू.७-४-२८) इत्यस्मात् पूर्वत आनीतो यक्, लिङ् चेति पदद्वयम्, तथैव अयङ् यि क्ङिति (पा.सू.७-४-२२) इत्यतो यीति सप्तम्यन्तं पदमनुवर्तते, एतादृशान्यानीतानि पदानि संयोज्य शारदाप्रभाकारो गुणोर्तिसंयोगाद्योरिति सूत्रं एवमर्थापयति- "अर्तिसंयोगाद्यो ऋदन्ताङ्गस्य गुणो यकि यि आर्धधातुके लिङि च परे ।"[३५७] एतादृशान्यन्यान्यपि बहूनि आकाङ्क्षावशादनुवृत्तानि पदानि तिङन्तप्रकरणे प्राप्यन्त अतोऽनुवृत्तिरियमाकाङ्क्षावशादपि भवतीति निश्चीयते ।

## ५.२.२ विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम्

अत्रत्येन विग्रहादिशब्देन विग्रहसमासौ, उदाहरणादिशब्देन चोदाहरणप्रत्युदाहरणानि गृह्यन्ते ।

शारदाप्रभायास्तिङन्तखण्डे निर्धारितेषु १७१ सूत्रेषु पञ्चाशदधिकानि सूत्राणि पदानि च विग्रहसमासयुतानि सन्ति परं व्याख्याकारोऽयं तेषु दशाधिकान्येव विग्रहयति । तत्रापि सरलातिसरलतया विग्रहसमासप्रदर्शनीये द्वन्द्वसमासनिर्मिते पदे पूर्वव्याख्यातॄनुद्धरन् विग्रहं प्रदर्शयति । अत्र तादृशेभ्य उदाहरणेभ्यः कानिचन उपस्थाप्य विविच्यन्ते-

भ्वादौ पठित अनुदात्तङित आत्मनेपदम् (पा.सू. १-३-१२) इति सूत्रस्थे अनुदात्तङित इति पदे प्रकृतव्याख्यात्रा पूर्वव्याख्यातॄनुद्धृत्य- किमिदमनुदात्तङित इति जिज्ञासामुद्भाव्य अनुदात्तश्च ङश्च अनुदात्तङौ, तावितौ यस्य स अनुदात्तङित्, तस्मादिति विगृह्य अनुदात्तेतः ङकारेतश्चेति सूत्रार्थः कृतो दृश्यते ।[३५८] इत्थं विग्रहं कृत्वा द्वन्द्वगर्भे बहुव्रीहौ सत्यपि व्याख्यात्रा समासो न निर्दिष्टः । भ्वादावेव पठिते क्क्ङिति च (पा.सू. १-१-५) सूत्रेऽपि ग् क् ङ् वर्णानां द्वन्द्वसमासे तथा इत् पदेन सह च समासे तथा तत्र निमित्तेऽर्थे सप्तमी वर्तत इत्युक्त्वा गकारस्य चर्त्वेन ककारो भवतीत्यपि सूचितं वर्तते ।[३५९] अनेन विग्रहसङ्केतेन विग्रहज्ञानाय जिज्ञासव उत्प्रेरिता भवन्तीति निश्चितम् । यद्यप्यत्र पूर्णतो विग्रहसमासौ न प्रदर्शितौ तथाप्यध्येता तं दृष्ट्वा विग्रहकरणे उत्प्रेरितो भवति । तत्र बालमनोरमाकारस्तु एवं विगृह्णाति- "ग् क् ङ् एषां समाहारद्वन्द्वः, कात् पूर्वं गकारस्य चर्त्वेन निर्देशात् ककारः । ग्

---

[१६]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०), पृ. ६४८ ।

[१७]. पूर्ववत्, पृ. ४६ ।

[१८]. पूर्ववत्,पृ.१ ।

क् ङ् च इत् यस्येति विग्रहः, द्वन्द्वान्ते श्रूयमाणमित्पदं प्रत्येकमन्वेति ।"[३६०] अतः शारदाप्रभाव्याख्यानमिदं बालकेन्द्रितमस्तीति वक्तुं शक्यम् । तेनैव प्रकारेण सन्वल्लघूनि चङ्परेऽनग्लोपे (पा.सू. ७-४-९३) इति सूत्रस्थे चङ्परे इति पदेऽपि बहुव्रीहिरिति निर्देशनपूर्वकं तत्र चङपरो यस्मादिति विग्रहं प्रदर्श्य समासो दर्शितः । तथैव आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य (पा.सू. १-३-६३) इति सूत्रस्थे आम्प्रत्ययवत् इति पदे आम्प्रत्ययस्येव आम्प्रत्ययवदिति विग्रहो निर्दिष्टः । तेनैव प्रकारेण अकृत्सार्वधातुकयोर्दीर्घः (पा.सू. ७-४-२५) इति सूत्रस्थे अकृदिति पदेऽपि न कृत् अकृदिति विग्रहो सङ्केतितस्तथापि नञ्समासो नोल्लिखितः । अनेन प्रकारेण शारदाप्रभाकारोऽयमावश्यकेषु स्थानेषु दीक्षितजयादित्यादीनुद्धरन् विग्रहसमासौ प्रदर्शयितुमिच्छतीति ज्ञायते । प्रकृतव्याख्याने विग्रहसमासयोर्न्यूनत्वेऽपि व्याख्याकारस्तु समासविग्रहप्रदर्शनेनैव सूत्रार्थः शिक्षणीय इत्युक्त्वा शिक्षकान् निरन्तरमुत्प्रेरयति । अधस्तनेषु सूत्रेषु तत्रत्येषु पदेषु च विग्रहसमासयोरावश्यकत्वेऽपि शारदाप्रभाकारोऽयं विग्रहं न प्रदर्शयति। विगृह्यमाणेषु पदेष्वन्ये तु कथं विगृह्णन्तीत्यधः प्रस्तूयते-

तालिकासङ्ख्या : १६ तिङन्ते चकारादनुवृत्तिनिदर्शनम्

| *सूत्रम्* | *विग्रहसमासौ* |
|---|---|
| पुगन्तलघूपधस्य च (पा.सू. ७-३-८६) | पुक् अन्तो यस्य तत् पुगि अन्तो वा पुगन्तम् । लघ्वी चासावुपधा लघूपधम्, पुगन्तश्च लघूपधश्चेत्यनयोः समाहारद्वन्द्वः, तस्य ।[३६१] |
| क्क्ङिति च (पा.सू. १-१-५) | ग् क् ङ् एषां समाहारद्वन्द्वः, ग् क् ङ् च इत् यस्येति विग्रहः, द्वन्द्वान्ते श्रूयमाणं इत्पदं प्रत्येकमन्वेति ।[३६२] |
| सत्यापपाशरूपवीणातुल...(पा.सू. ३-२-२५) | सत्याप-पाश-रूप-वीणा-तुल-श्लोक-सेना-लोमन्-त्वच्-वर्मन्-वर्ण-चूर्ण-चुरादिश्चेषां तानि इति द्वन्द्वः, तेभ्यः (पञ्चमी) ।[३६३] |
| तासस्त्योर्लोपः (पा.सू. ७-४-५०) | तास् चास्ति चेति इतरेतरयोगद्वन्द्वः, तयोः |
| अस्तिसिचोऽपृक्तेः (पा.सू.७-३-९६) | सिच् च अस् चेति समाहारद्वन्द्वः,अस्तीत्यव्ययेन कर्मधारयः ।[३६४] |

---

[१९]. वासुदेवदीक्षितः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः) पूर्ववत्, (२००५) पृ. ४५ ।
[२०]. पूर्ववत्,पृ.८९ ।
२१ . वासुदेवदीक्षितः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः) पूर्ववत्, (२००५) पृ. ११२ ।
[२२]. पूर्ववत्,पृ.१३६ ।
[२३]. पूर्ववत्,पृ.३० ।

| | |
|---|---|
| वदव्रजहलन्तस्याचः (पा.सू. ७-२-३) | वदश्च व्रजश्च हलन्तश्च एषां समाहारद्वन्द्वात् षष्ठी । |
| कृसृभृवृस्तुद्रुस्रुश्रुवो (पा.सू. ७-२-१३) | कृ सृ भृ वृ स्तु द्रु स्रु श्रु इत्यष्टानां समाहारद्वन्द्वात् पञ्चमी । [३६५] |
| णिश्रिद्रुस्रुभ्यः कर्तरि. (पा.सू.३-१-४८) | णि श्रि द्रु स्रु एतेषामितरेतरयोगद्वन्द्वः, तेभ्यः । [३६६] |

एतेषां सूत्राणामर्थापनं विग्रहसमासाभ्यां विना कठिनं तथापि शारदाप्रभाकारः प्राथमिकेभ्यश्छात्रेभ्यो विषयबोधः समासविग्रहाभ्यां कठिनेन भवेदिति विचार्य सूत्राणि व्याख्यातीति ज्ञायते ।

## ५.२.२.१ उदाहरणैः प्रत्युदाहरणैश्च सूत्रार्थापनम्

महर्षिणा पाणिनिना सूत्रप्रणयनकाले यान्युदाहरणप्रत्युदाहरणानि परिकल्पितानि तान्यर्वाचीनैः कतिचित् परिवर्धितानि कति च नवीनस्थापनेनापाकृतानि च । तादृशपरिवर्द्धकेषु नवीनोदाहरणदातृष्वन्यतमो हरिप्रसाशर्मापि । शर्माऽयं शारदाप्रभायास्तिङन्ते प्रथमतायथासम्भवं नवीनं नेपालसम्बद्धं सरलमुदाहरणं पुरस्कृत्य तदनन्तरमेव सिद्धान्तकौमुदीकाशिकादिभ्य उदाहरणान्तराण्यानयति । तथाविधान्युदाहरणानि प्रायः काशिकासिद्धान्तकौमुदीभ्यां गृहीतानि दृश्यन्ते । काशिकाकारो विधिसूत्रस्थानां समग्राणामेव पदानामुदाहरणानि प्रत्युदाहरणानि च व्याख्याने समुल्लिखति परं सिद्धान्तकौमुदीकारस्तु सूत्रे स्थितानि मुख्यपदानि तथा प्रकरणसम्बद्धान्युदाहरणान्येव समुपस्कुरुते । शारदाप्रभाकारस्तु बहुशः काशिकातोऽल्पशश्च कौमुद्या उदाहरणान्यानयति । तदृशमुदाहरणमेकं पुगन्तलघूपधस्य च (पा.सू.७-३-८६) सूत्रे प्राप्यते । काशिकाशारदाप्रभाकारौ तत्र पुगन्तस्य लघूपधस्य च क्रमशः- ह्लेपयति, सेधति, शोचति, वर्तते, मोदते, प्रभृतीनि नैकान्युदाहरणानि, अधिकव्यवाये न इत्युक्त्वा भिनत्तीति प्रत्युदाहरणमपि समुल्लिखतश्चेत् दीक्षितस्तु भवितेत्यत्र गुणप्रसक्तिमेवोल्लिखति, अतः काशिकाप्रभावितायां शारदाप्रभायामुदाहरणाधिक्यं दृग्गोचरीभवति । एतेनोदाहरणग्रहणेन प्रकृतव्याख्यानस्य काशिकानुवर्तित्वमपि सुस्पष्टं भवति। काशिकायां विधिसूत्रस्थानां सकलपदानामुदाहरणानि कथं प्रस्तुतानीति ज्ञानायत्र- सेऽसिचि कृतचृतछृदतृदनृतः (पा.सू. ७-२-५७) इति सूत्रमुदाह्रियते । अत्र दीक्षितो नृतेरेवोदाहरणं प्रस्तुत्य सूत्रान्तरं समुद्गच्छति परं काशिकाकारस्तु कृतेः कर्तिष्यति, चृतेः चर्तिष्यति,छृदेः

---

[२४]. पूर्ववत्,पृ.४५ ।
२५. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः) पूर्ववत्, (२००५) पृ.४८ ।

छर्दिष्यति, तृदेः तर्दिष्यति, नृतेर्नर्तिष्यतीति रूपाणि सविकल्पं समुल्लिख्य असिचि इत्युक्तेर्नेह- अकर्तीत् अनर्तीत् इत्यादीनि प्रत्युदाहरणान्यपि दर्शयति ।[३६७] शारदाप्रभाकारोऽप्यत्र तदेवोद्धृत्य स्वकीयं व्याख्यानं पूरयति । तत्र शारदाप्रभाया वैशिष्ट्यन्तु सूत्रार्थापने, रूपसिद्धौ, प्रत्युदाहरणोपस्थापने च छात्राः काठिन्यं नाऽनुभवेयुरिति विचार्य प्रथमतः सरलसंस्कृतभाषया तदनन्तरं नेपालीहिन्दीति भाषाद्वयेन विषयव्याख्यानं वर्तते । शारदाप्रभायास्तिङन्तखण्डान्तर्गतेषु कतिपयेषु सूत्रेषु मौलिकान्युदाहरणानि प्राप्यन्ते, यथा- 'अजहत् प्रासादं त्रिभुवनः प्रजातन्त्रकृतेः' [३६८] इति । तच्चानद्यतने लङ् (पा.सू. ३-२-१११) सूत्रे दृश्यते ।

उदाहरणेषु नूत्नत्वं मौलिकत्वञ्च स्यादिति विचार्य व्याख्याकारोऽयं पूर्ववर्तिभिर्व्याख्यातृभिरप्रयुक्तेभ्यो धातुभ्य उदाहरणानि ददाति,यथा-

| *सूत्रम्* | *उदाहरणानि* |
|---|---|
| अनुदात्तङित आत्मनेपदम् (पा.सू.१-३-१२) | एधते । |
| स्वरितञितकर्त्रभिप्राये... (पा.सू.१-३-७२) | वपति, वपते । |
| आयादय आर्धधातुके वा (पा.सू.३-१-३१) | कामयाञ्चक्रे,चकमे,ऋतीयाञ्चक्रे । |
| इजादेश्च गुरुमतोऽनृच्छः (पा.सू.३-१-३६) | ईहाञ्चक्रे, ऊहाञ्चक्रे । |
| च्लेः सिच् (पा.सू.३-१-४४) | अस्प्राक्षीत्, अस्पृक्षत् । |
| इणः षीध्वं लुङ्लिटां... (पा.सू. ८-३-७८) | कृषिढ्वम्, अकृढ्वम् । |
| अजादेर्द्वितीयस्य (पा. सू. ६-१-२) | उन्दिदिषति,अड्डिषति, अर्चिचिषति |
| चङि (पा. सू. ६-१-११) | अचूचुरत् । |
| अतो हलादेर्लघोः (पा. सू. ७-२-७) | अपाठीत्, अपठीत् । |
| ऋतो भारद्वाजस्य (पा. सू. ७-२-६३) | निनयिथ, जुहविथ । |

यद्यप्यत्र स्थितान्येतान्युदाहरणानि पूर्णतो न मौलिकानि, यतो हि सूत्रान्तरे प्रकरणान्तरे वार्त्तिकान्तरे वाऽपि तानि काशिकाकौमुद्यादिषु समुपलभ्यन्ते तथाप्येतानि पूर्वग्रन्थस्थेषु तेष्वेव सूत्रेषु न प्राप्यन्त इति हेतोस्तानि नवीनानीति समुल्लिखितानि । एतादृशैरूदाहरणैरसौ मौलिकत्वप्रदर्शनं चेष्टत इति ज्ञायते । शारदाप्रभायामेतद्विधेषु नवीनोदाहरणेषु

२६. वामनजयादित्यौ, *काशिकावृत्तिः* (पञ्चमो भागः), वाराणसी : तारा पब्लिकेसन, (१९६७) पृ.७३५ ।
२७. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. १८७ ।

समुपलब्धेष्वपि बहूनि काशिकासमानान्येव दृश्यन्ते । अतः परं काशिकातो यथावदुद्धृतानि कानिचनोदाहरणानि प्रस्तूयन्ते ।

| *सूत्रम्* | *समुद्धृतान्युदाहरणानि* |
|---|---|
| स्वरितञितः कर्त्रभिप्राये... (पा.सू. १-३-७२) | पचति/पचते, श्रयति/श्रयते |
| रिङ्शयग्लिङ्क्षु (पा.सू.७-४-२८) | आद्रियते, क्रियते, क्रियात् |
| इट् सनि (पा.सू.७-२-४१) | विवरिषते, बुवुर्षति, तितरिषति |
| ऋतश्च संयोगादेः (पा.सू.७-२-४३) | स्मृषीष्ट, स्मरिषीष्ट |
| ऋद्धनोः स्ये (पा.सू.७-२-७०) | करिष्यति, हरिष्यति |
| श्लौ (पा.सू.६-१-१०) | जुहोति |
| लिट्यभ्यासस्योभयेषाम् (पा.सू.६-१-१७) | उवाच, सुस्वाप, इयाज |
| आदेच उपदेशेऽशिति (पा.सू.६-१-४५) | ग्लाता |
| णो नः (पा.सू.६-१-६५) | नमति |
| अत उत्सार्वधातुके (पा.सू.६-४-११०) | कुरुतः |

काशिकातः समानीतान्येतान्युदाहरणानि शारदाप्रभाकारः स्वग्रन्थे यथावदुदाहरति, अतोऽसावुदाहरणान्तरेष्वप्राप्तेषु पूर्वग्रन्थोदाहरणं यथावदुल्लिखतीति ज्ञायते । एतादृशैरन्यैरपि बहुभिः समानोदाहरणैरूदाहरणग्रहणसन्दर्भेऽपि शारदाप्रभायाः काशिकोपजीव्यत्वं प्रमाणितं भवति ।

अत्रोदाहरणदानाय बहुषु विकल्पेषु सत्स्वपि प्रकृतव्याख्यात्रा सिद्धान्तकौमुदीतोऽपि नैकान्युदाहरणानि गृहीतानि दृश्यन्ते । तादृशोदाहरणान्यत्र कति ? केषु केषु च सूत्रेष्वानीतानि सन्तीति ज्ञानाय प्रतिनिधित्वेन कानिचनाधस्तात् प्रस्तूयन्ते ।

| सूत्रम् | उदाहरणानि |
|---|---|
| टित आत्मनेपदानां टेरे (पा.सू.३-४-७९) | एधते |
| परस्मैपदानां णलतुसुस्थल... (पा.सू.३-४-८२) | बभूव |
| लङः शाकटायनस्यैव (पा.सू.३-४-१११) | अयुः, अयान् |

| | |
|---|---|
| अनुदात्तोपदेश वनति... (पा.सू.६-४-३७) | हतः |
| एर्लिङि (पा.सू.६-४-६७) | धेयात् |
| वान्यस्य संयोगादेः (पा.सू.६-४-६८) | ग्लेयात्,ग्लायात् |
| ई हल्यघोः (पा.सू.६-४-११३) | मिमीते |
| अदभ्यस्तात् (पा.सू.७-१-४) | जक्षति |
| आत्मनेपदेष्वनतः (पा.सू.७-१-५) | ऐधिषत |
| लोटो लङ्वत् (पा.सू.३-४-८५) | भवताम्, भवतम्, भवत |

एतैरेतत्समानैरन्यैरपि बहुभिरूदाहरणैः शारदाप्रभायां सिद्धान्तकौमुद्याः प्रभावोऽपि वर्तत इति निश्चितम् ।

### ५.२.२.२ प्रत्युदाहरणप्रयोगः

प्रतिगतमुदाहरणं प्रत्युदाहरणम् । विरूद्धोदाहरणे प्रकृतसूत्रप्रवृत्तिस्थलमिति तस्यार्थः । काशिकाकौमुद्योर्जटिलान् विषयान् सरलीकरणाय छात्रेभ्यो व्याकरणशिक्षणाय च विनिर्मितेऽस्मिन् व्याख्याने सूत्रसार्थक्यायोदाहरणानामिव प्रत्युदाहरणानामपि प्रयोगो बहुत्र दृश्यते । प्रायेण काशिकामनुसृत्य क्वचित् कौमुदीमाश्रित्य स्वल्पेषु स्थानेषु मौलिकप्रत्युदाहरणमपि संयोज्य कृतोऽयं प्रत्युदाहरणविन्यासः सूत्रार्थापने सूत्रस्थसंशयदूरीकरणे चोपकारको मन्यते । काशिकाव्याख्यानादत्र कति कीदृशानि च प्रत्युदाहरणानि गृहीतानीति ज्ञानाय तत्रत्यवाक्यानि यथावदुध्रियन्ते ।

| *सूत्रम्* | *प्रत्युदाहरणम्* |
|---|---|
| अजेर्व्यघञपोः (पा.सू.२-४-५६) | अघञपोरित्युक्तेर्नेह समासः । |
| कास्प्रत्ययादाममन्त्रे... (पा.सू.३-१-३५) | अमन्त्रेरित्युक्तेर्नेह -कृष्णो नोनाव । |
| तनुकरणे तक्षः (पा.सू.३-१-७६) | तनुकरण इत्युक्तेर्नेह -वाग्भिः सन्तक्षति । |
| आदेच उपदेशेऽशिति (पा.सू.६-१-४५) | उपदेश इत्युक्तेर्नेह -चेता, जेता । |
| सृजिदृशोर्झल्यमकिति (पा.सू.६-१-५७) | अकिति इत्युक्तेर्नेह - सृष्टः, दृष्टः । |
| जनसनखनां सञ्झलोः (पा.सू.६-४-४२) | झलादौ सनि इत्युक्तेर्नेह - जिजनिषते । |
| दीङो युडचि क्ङिति (पा.सू.६-४-६३) | क्ङिति इत्युक्तेर्नेह -उपदानम् । |

| | |
|---|---|
| इणः षीध्वं लुङ्.... (पा | इण्कोरिति वर्तमाने पुनरिड्ग्रहणं कवर्गनिवृत्यर्थं अपक्षीध्वम्, अङ्गादित्युक्तेर्नेह- एधिषीध्वम् । |

उपरि स्थितान्येतानि विरुद्धोदाहरणानि तत्र निर्दिष्टानां सूत्राणां प्रत्युदाहरणानि । काशिकातः शारदाप्रभायामानीतान्येतानि प्रत्युदाहरणान्यत्रापि यत्र तत्र सन्तीति प्रत्युदाहरणदानेऽप्यस्य व्याख्यानस्य काशिकोपजीव्यत्वं प्रमाणितं भवति ।

विध्यादिषु सूत्रेषु वर्तमानान्युदाहरणान्यन्वयमुखेन सूत्रसार्थक्यं कुर्वन्ति चेत् प्रत्युदाहरणानि तु व्यतिरेकमुखेन सूत्रं तत्रत्यं पदमन्वर्थीकुर्वन्ति, अतः सरलतया स्पष्टतया च सूत्रार्थावबोधनेऽन्वयव्यतिरेकाभ्यां समुपस्थित उदाहरणप्रत्युदाहरण एव कारणे तथापि शारदाप्रभाकारोऽयं यथा सूत्रस्थसकलपदव्याख्यायकैरूदाहरणैः सूत्रसार्थक्याय प्रयतते न तथा प्रत्युदाहरणद्वारा सूत्रमन्वर्थयितुमुत्सहत इति प्रकृतग्रन्थावलोकनेन ज्ञायते । काशिकाकारः सूत्रस्थानां सकलपदानां सार्थक्याय सर्वेषां प्रत्युदाहरणानि समुल्लिखति, यथा- "एचः किम् ? कर्ता हर्ता, उपदेशे इति किम् ? चेता, स्तोता, अशिति किम् ? ग्लायति" [३६९] इति । परं शारदाप्रभाकारस्तेभ्य उपदेश इत्युक्तेर्नेह- चेता स्तोता इत्येव समुल्लिखति, अतो ग्रन्थोऽयं प्रत्युदाहरणदान औदासिन्यं प्रकटयतीति निश्चीयते । अन्यत्रापि एकस्मिनेव सूत्रे बहुषु प्रत्युदाहरणेषु प्रयोक्तव्येषु तेभ्य एकमेव समुल्लेखं करोतीति- इणः षीध्वं लुङ्लिटां धोऽङ्गात् (पा.सू.८-३-७८), अतो लोपः (पा.सू.६-४-४८), कास्प्रत्ययादाममन्त्रे.. (पा.सू.३-१-३५) इत्यादिषु सूत्रेषु स्थितानां प्रत्युदाहरणानामवलोकनेन ज्ञायते । अत्र प्रयुक्तेषु प्रत्युदाहरणेषु बहूनि काशिकातोऽल्पानि तु कौमुदीतः समानीतानि दृश्यन्त इति प्रत्युदाहरणग्रहणेऽपि काशिकाकौमुद्यौ शारदाप्रभाया उपजीव्याविव्युपरि स्थितैर्वाक्यैर्निर्णीयते ।

### ५.२.३ शङ्कामुद्भाव्य समाधानम्

तिङन्तोत्तरतिङन्तप्रकरणान्तर्गतेषु सूत्रेषु, वृत्तिषु, रूपसाधनादिषु चानेकाः शङ्काः प्राप्यन्ते । शारदाप्रभाकारोऽयं ताभ्यः सरलां,सुबोध्यां, प्राथमिकच्छात्रस्तरानुकूलां शङ्कामेव समुपस्थाप्य चर्चति । सिद्धान्तकौमुद्यां काशिकायां तद्व्याख्यानग्रन्थेषु च व्याकृतास्तिङन्तोत्तरतिङन्तप्रकरणसम्बद्धाः तादृशाः काश्चन व्युत्पत्तिमूलिकाः शङ्काः प्रतिनिधिरूपेणात्रोपस्थाप्य चर्च्यन्ते -

#### ५.२.३.१ अस्तिसिचोऽपृक्ते इत्यत्रास्पदग्रहणविचारः

---

२८.वामनजयादित्यौ, *काशिका* (द्वितीयो भागः), वाराणसी : चौ.सं.सि., (२०२९) पृ. १४२ ।

अस्तिसिचोऽपृक्ते (पा.सू.७-३-९६) इति सूत्रस्थेऽस्पदे अस भुवि धातुर्गृह्यत उत विभक्तिप्रतिरूपकमव्ययमेवेति विषये वैयाकरणनिकाये त्रिविधानि मतानि प्राप्यन्ते, तान्यत्र क्रमशः प्रस्तूयन्ते -

क) प्राचीनाः

काशिकाकारादयः प्राचीना 'अस्तिसिचः' इत्यत्र अस्तिश्च सिच्चेत्यनयोः समाहारः, अस्तिसिच् तस्मात् अस्तिसिच इति समाहारद्वन्द्वमाश्रित्यास्तेरङ्गात् सिजन्ताच्च परस्यापृक्तस्य सार्वधातुकस्येडागमः स्यादित्यर्थमाहुः ।[३७०] तथाकृते असः स्थाने अस्तेर्भूः ( पा.सू.२-४-५२) इत्यनेन विहितस्य भूरादेशस्य स्थानिवद्भावेनास्त्वं मत्वाऽभूदित्यादावपीट् प्रसज्येत, अतस्तन्निवारणाय तत्पक्षीयाः 'आहीभुवोरिट् प्रतिषेधः' इति वार्त्तिकमाश्रयन्ते ।

ख) भट्टोजिदीक्षितः

भट्टोजिदीक्षितस्तु कात्यायनीयवार्त्तिकपाठे अभूत्, अगात्, अपात् इत्यादिषु रूपेषु गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु (पा.सू.२-४-७७) इति सूत्रेण प्रत्ययलक्षणेन स्थानिवद्भावेन वा लुप्तसिजमानीय पुनरपि वैकल्पिकेट् प्रसज्येत इत्याशङ्क्य धातुत्वस्वीकारं खण्डयन् विभक्तिरूपकमव्ययमूररीकुरुते । स पुनः- सिच् च अस् च सिच इति विग्रहं कृत्वा सौत्रत्वात् समाहारद्वन्द्वमाश्रित्य सौत्रत्वादेव भसंज्ञया कुत्वजश्त्वे नेत्याह । पुनश्चास्ति (विद्यमानं) च तत् सिच् अस्तिसिच इति कर्मधारयः । अनेन प्रकारेण अस्तिसिचस् शब्दः सम्पद्यते तस्मात् पञ्चम्यामस्तिसिच इति । तत्र सौत्रत्वात् पञ्चम्या लुक्, अतो विद्यमानात् सिचोऽस्तेश्च परस्यापृक्तस्य हल ईट् स्यादिति सूत्रार्थो निष्पद्यत[३७१] इति प्राह । तद्व्याख्यातारौ वासुदेवदीक्षित- ज्ञानेन्द्रसरस्वत्यावपि तथाकृतेऽभूदित्यादौ सिचोऽविद्यमानत्वान्नदोष इत्युक्तवन्तौ ।

ग) नागेशमाधवौ

नागेशोऽस्तिसिचोऽपृक्ते सूत्रे 'द्विसकारकोऽयं निर्देशः' इति महाभाष्यवचनमाश्रयन्, तदेव प्रमाणं स्वीकुर्वन्, सिजोऽनन्तरं सकारं प्रश्लिष्य, देहलीदीपकन्यायेनोभौ संयोजयन् च सकारान्तादस्तेः सिचश्च परस्यापृक्तस्य हल ईट् स्यादिति सूत्रार्थं कुरुते, एवं सति सिचि

---

[३]९. वामनजयादित्यौ, पूर्ववत्,पृ.३६७ ।

[३७१]. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः) पूर्ववत्, (२००५) पृ. ४८ ।

लुप्तेऽभूदित्यादौ गातिस्था ... इत्यस्याऽप्राप्त्या न दोष[३७२] इति तस्याभिमतम् । नागेशेन समर्थितं महाभाष्यस्थमेतदभिमतमष्टाध्यायीव्याख्याता माधवाचार्योऽप्यूररीकुरुते ।

अत्रत्यो धातुपक्षीयोऽर्थः काशिकाकारेणेद्भावितस्तदनुवर्तिभिः प्राच्यमतानुयायिभिः समर्थितो व्याख्यातश्च दृश्यते । शारदाप्रभाकारोऽप्यन्यत्र प्रायशः काशिकामनुसरति परन्त्वत्र तु काशिकाकौमुद्योरेव मतं प्रस्तुत्यापि स्वकीयमभिमतमप्रकाश्यैव तूष्णीं स्थित्वा तटस्थत्वमभिव्यनक्ति । उपर्युक्तस्य मतभेदस्य शास्त्रार्थत्वात्तदुपयुक्तश्च ।

### ५.२.३.२ वदिव्रजिग्रहणविचारः

वदव्रजहलन्तस्याचः (पा.सू.७-२-३) इति सूत्रे हलन्तपदेनैव वदव्रजयोरपि ग्रहणसम्भवात् पुनरनयोर्धात्वोर्ग्रहणस्य किं प्रयोजनम् ? इत्याशङ्कायां शारदाप्रभाकार आह- "अत्र सूत्रे हलन्तत्वादेव सिद्धे पृथग् वदिव्रजिग्रहणं 'अतो हलादेर्लघोः' (पा.सू.७-२-७) इति विकल्पबाधनार्थमिति ।"[३७३] यदि महर्षिपाणिनिर्वदव्रजयोः पृथग्ग्रहणं विनैव हलन्तेनैव वृद्धिं कृतवान् स्यात् तदानेन सूत्रेण कृताया वृद्धेरिडादौ सिचि परे नेटि (पा.सू ७-२-४) इति निषिध्येत, ततस्तस्यापवादभूतोऽतो हलादे... सूत्रं पुनर्विकल्पेन वृद्धिं प्राप्नुयात्, फलतोऽव्राजीत् अव्रजीदिति रूपद्वयं सम्भवेदतो विकल्पबाधनायैव पाणिनिना वदव्रज...सूत्रे तयोः पृथग्ग्रहणं कृतम् । हलन्तलक्षणेनैव सिद्धत्वाद् व्यर्थीभूताभ्यां वदव्रजाभ्यां नेटि सूत्रेण प्राप्तनिषेधो वार्यते। विषयमिमं बालमनोरमाकार एवमाह- "वदव्रजहलन्तस्याच सूत्रे हलन्तत्वादेव सिद्धे वदव्रजग्रहणन्तु 'अवादीत् अव्राजीत्' इत्यत्र अतो हलादेर्लघोरिति वृद्धिविकल्पबाधनार्थमिति।"[३७४] एतद् वाक्यमेव किञ्चित् सरलीकृत्य शारदाप्रभाकारोऽत्र प्रस्तौति । एतेन सरलीकरणमस्य वैशिष्ट्यमिति निश्चीयते ।

### ५.२.३.३ कास्प्रत्ययादाममन्त्रे लिटि' इत्यत्र आमो मकारस्य सार्थक्यचिन्तनम्

कास्प्रत्ययादाममन्त्रे लिटि (पा.सू. ३-१-३५) इति सूत्रे विद्यमानस्य आमो मकारस्य हलन्त्यमिति इत्संज्ञायां तस्य लोप इति लोपः कथन्न भवतीत्याशङ्कां काशिकाकार एवं समाधत्ते-

---

[३]१. भीमसेनशास्त्री (व्या.), *लघुसिद्धान्तकौमुदी* (द्वितीयो भागः), दिल्ली : लेखकः, (१९९१) पृ. ९४-९७ ।
३२. हरिप्रसादशर्माचार्यः (व्या.) *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.५८९ ।
[३]३. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः) (२००५) पूर्ववत्, पृ. ८९ ।

आमोऽमित्वमदन्तत्वादगुणत्वं विदेस्तथा ।
आस्कासोराम् विधानाच्च पररूपं कतन्तवत् ॥ [३७५]

कास्प्रत्ययादिति सूत्रे प्रयुक्तोऽयमां न हलन्तोऽपि तु सानुनासिकोऽकारान्तः । विदेरदन्तत्वमिवास्याप्यदन्तत्वं निपातनतः सिद्धम्, एवं कृते सति आम+अमन्त्रे इति पदच्छेदेऽकः सवर्णे दीर्घः कथन्नेत्यपि न शङ्क्यम्, सर्वत्रलोहितादिकतन्तेभ्य इति सूत्रस्थं कतन्तपदं यथा शकन्ध्वाद्याकृतिगणत्वात् पररूपेन सिद्धं तथैवेदमपि सिद्धचतीति काशिकाकारस्याशयः । अत्र पदमञ्जरीकारः 'आस्कासोराम् विधानान्मस्य नेत्व'मिति वार्त्तिकं खण्डयन्नाह-"अत्र केचित् आस्कासोराम् विधानाच्चेति पठन्ति तदयुक्तम् न हि तत् सूत्रे चकास आम् विधानमस्तीति ।" [३७६] अत्र महाभाष्यकार उपर्युक्तं निषेधवार्त्तिकमुल्लिखन् आम+अमन्त्रे इति पदच्छेदेन पररूपं कृत्वा वार्त्तिककारैः कृतं समाधानं खण्डयन् शङ्कां समाधत्ते, तमेवानुकुर्वन्तौ न्यासपदमञ्जरीकारावपि तत् समर्थनपूर्वकं व्याख्यातः । वरदराजस्तु लघुकौमुद्यां वार्त्तिकपक्षमेवोल्लिखति । अत्र शारदाप्रभाकारो मूले काशिकापद्यमुदाहरन्नपि व्याख्यान आमो मकारस्येत्वाभाव इति महाभाष्यपक्षं तथा द्वितीपक्षत्वेन च वार्त्तिकपक्षं समुल्लिख्य विशेषतो महाभाष्यपक्षीयं मतं व्याचक्षाणस्तमेव समर्थयते च । अतोऽत्र महाभाष्यमतमेव प्रामाणिकमिति निश्चयः ।

### ५.२.३.४ 'श्लिष आलिङ्गने' इत्यस्य योगविभागविचारः

आलिङ्गनवाचकात् श्लिषधातोः परस्य च्लेः क्सविधानार्थं महामुनिपाणिनिना श्लिष आलिङ्गने (पा.सू.३-४-४६) इति सूत्रं विरचितम् । अत्र दीक्षितशारदाप्रभाकारावुक्तसूत्रस्थं पदद्वयं विभज्य सूत्रद्वयं कुरुतश्चेत् काशिकाभाषावृत्तिकारौ तु योगविभागं विनैव सूत्रमर्थापयतः । न्यासपदमञ्जरीकारौ जिनेन्द्रबुद्धिहरदत्तावपि सूत्रमिदं विभज्य प्रथमस्य विधित्वं द्वितीयस्य तु नियामकत्वमुररीकुरुतः । काशिकाकारोऽपि सूत्रमिदं नियामकं मत्वा नियमार्थमेतदिति समुल्लिखति । परन्त्वत्र जयादित्यस्य नियमप्रकारः कौमुद्यपेक्षया भिन्नः, स श्लिष्धातोर्लुङि शल इगुपधादनिटः क्सः (पा.सू. ३-१-४५) इत्यनेन प्राप्तं क्सादेशं प्रबाध्य पुषादिद्युताद्यलृदितः परस्मैपदेषु (पा.सू. ३-१-५५) सूत्रेण प्राप्ताङ्बाधनार्थं सूत्रस्यास्य नियमार्थत्वमिति स्पष्टयति । अत्र कौमुदीशारदाप्रभाकारौ तु तत्सूत्रस्थं पदद्वयं विभज्य श्लिष

---

३४. वामनजयादित्यौ, *काशिकावृत्तिः* (द्वितीयो भागः), वाराणसी : प्राच्यभारतीप्रकाशनम्, (१९६५) पृ.४१५ ।
[३]५.हरदत्तः (व्या.), *काशिकावृत्तिः* (द्वितीयो भागः), पूर्ववत्, (१९६५) पृ.४१६ ।

इति प्रथमसूत्रस्य 'अस्मात् परस्यानिटः च्लेः क्सः स्या'दिति विध्यर्थत्वं द्वितीयस्य आलिङ्गने इत्यस्य तु 'श्लिषः क्सः भवति चेदालिङ्गन एवार्थे स्यात् नान्यत्रे'ति नियमार्थत्वं स्वीकुरुतः । तथैव योगविभागसामर्थ्यात् शल इगुपधादनिटः क्सः इत्यस्याप्ययं नियामक[३७७] इति व्यवस्थापयतश्च । अत्र शारदाप्रभाकारोऽपि किमर्थमत्र योगविभाग इति जिज्ञासामुद्भाव्य "आलिङ्गने एवेति नियमार्थः, योगविभागसामर्थ्याच्च शल इगुपधादनिटः क्सः (पा.सू.३-१-४५) इत्यस्याप्ययं नियमः, तेन कर्मण्यातां प्रत्ययेऽनालिङ्गनेऽर्थे च्लेः क्सादेशो न, अपि तु सिजेव भवती"[३७८] ति समुल्लिखति । व्याख्यातुरनेन समुल्लेखनेनाऽसौ द्विविधमेव नियमत्वमत्र समुद्धरत इति प्रतीयते, तथापि मूले सूत्रद्वयं कृत्वा स्थापनादस्य दृष्टिस्तु योगविभागपक्ष एव वर्तते इति निश्चीयते ।

### ५.२.३.५ बोभवीति/बोभोति इत्यत्र गुणनिषेधविमर्शः

भूरित्यस्मात् पौनःपुन्यार्थे धातोरेकाचो...(पा.सू.३-१-२२) इति यङि तस्य लोपे द्वित्वगुणादिकार्ये लटि वैकल्पिकेनेडागमे बोभवीति/बोभोतीति रूपद्वयं सिद्धयति । तत्र सार्वधातुकार्धधातुकयोः... (पा.सू.७-३-८४) इति विहितस्य गुणस्य न भूसुधियोः (पा.सू.६-४-८५) इति निषेधः कथन्न प्रवर्तत इत्याशङ्कायां सूत्रव्याख्यातारो न भूसुधियोरिति सूत्रं यङ्लुकि न प्रवर्तत इति समाधानं दर्शयन्ति, यथा- अष्टाध्याय्या दाधर्ति-दर्धर्ति-दर्धर्षि-बोभूतु....(पा.सू.७-४-६५) इत्यादिसूत्रस्थे बोभूतुपदे छन्दसि गुणाभावो निपातितो दृश्यते, अनेन प्रकारेण वैदिके यङ्लुकि गुणाभावनिपातनात् तदितरे लौकिक उदाहरणे गुणः सिद्धयति, अन्यथा वैदिक उदाहरणेऽपि न भूसुधियोरिति सूत्रेणैव गुणनिषेधे सिद्धे तदर्थमेव पुनः दाधर्ति...इति विहितो निषेधो व्यर्थः स्यादिति तेषां तर्कः । शारदाप्रभाकारः प्रसङ्गमिममेवमाह- "बोभूतुरित्यत्र भूसुवोरेव गुणनिषेधे सिद्धे गुणाभावनिपातनं नियमार्थम् । यङ्लुकि छन्दस्येवायं भूसुवोर्गुणनिषेधो नान्यत्र । एतेन लोकेऽपि यङ्लुगस्तीति विज्ञायते ।"[३७९] काशिकाकारोऽप्यत्र सहमतः । स दाधर्ति... इत्यादिसूत्रे बोभूतुरिति रूपसाधनक्रमे आह- "न भूसुधियोरित्यनेनैव निषेधे सिद्धे ज्ञापनार्थं निपातनमेतत्, ज्ञापयति चान्यत्र यङ्लुगन्तस्य गुणप्रतिषेधो न भवतीति बोभोति ।"[३८०] भुवो लौकिके यङ्लुगन्ते निर्बाधतया गुणः स्यादिति ज्ञापनार्थं द्वितीयसूत्रस्य निषेधः प्रवर्तत इति तस्याशयः । तस्माद् वैदिके यङ्लुकि

---

[३]६. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः) पूर्ववत्, (२००५) पृ. ३३३ ।
[३]७. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. १५२ ।
[३]८. पूर्ववत्,पृ.६३३ ।
[३]९. वामनजयादित्यौ, *काशिका* (द्वितीयो भागः), वाराणसी : चौ.सं.सि., (२०२९) पृ. ३८३ ।

गुणनिषेधाद् वैदिकभिन्नोऽपरोऽर्थाद् लौकिको यङ्लुगस्तीत्यपि ज्ञायते । एताः सकलाः शङ्काः शारदाप्रभाकारोऽत्र सरलतया प्रस्तौतीति शारदाप्रभाकारस्यैतद् वैशिष्ट्यम् ।

## ५.२.३.६ सत्याप-पाशादीनां प्रयोगविचारः

ननु सत्यापपाशादीनां द्वादशप्रातिपदिकानां नामधातुप्रकरणे पाठसम्भवेऽपि ण्यर्थं प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इति वार्त्तिकेन (कुत्रचित्तु गणसूत्रेण इत्यपि समुल्लिखितम्) णिच्प्रत्ययेनैव सिद्धे सत्याप-पाशरूपवीणा...(पा.सू.३-१-२५) इत्यादिसूत्रं व्यर्थमित्याशङ्कामुत्थाप्य तां समादधन् शारदाप्रभाकार आह- "सत्यापपाशादिचूर्णान्तेभ्यः 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इत्यनेनैव सिद्धे प्रपञ्चार्थमिह द्वादशानां ग्रहणम् ।"[३८१] अर्थात् पूर्वोक्तेन वार्त्तिकेनैव सिद्धे व्याख्यानार्थमेवैतेषां ग्रहणमिति । अत्र काशिकाव्याख्याता पदमञ्जरीकारस्तु सत्यस्यापुग् विधानार्थं तथान्येषां तु प्रपञ्चार्थमत्र प्रातिपदिकग्रहणमिति स्पष्टयति, तदेवं- "प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धे सूत्रेऽत्र द्वादशप्रातिपदिकानां ग्रहणं सत्यस्यापुग्विधानार्थं तथान्येषां प्रपञ्चार्थमिति ।"[३८२] अत्र न्यासकौमुदीकारावपि एवमेव मन्वाते। अन्ये केचित्तु सत्यादिसापेक्षशब्दैरेव णिच् प्रत्ययविधानार्थमत्र विशेषविधानं कृतमिति तर्कयन्ति ।[३८३] अत्र सत्याप इत्यापुगन्तनिर्देशदापुगागमः स्वतः सिद्ध इति तर्कयन् न्यासकार आह- "सत्यशब्दस्य तु सत्याप इत्यत्र निपातनादेव आपुगागमो वेदितव्यः ।"[३८४] अन्यैरर्थवेदादिशब्दैरप्यापुगागमस्तु विधीयते परन्तु 'अर्थवेदसत्यानामापुग् वक्तव्यः' इति वार्त्तिकेनैव सम्भवात्तेषां कृते सूत्रमिदं नावश्यकमिति न्यासकारस्याशयो दृश्यते, यद्यपि तद्वार्त्तिके सत्यशब्दोऽप्यस्ति तथापि सूत्र एव सत्यापपदग्रहणाद् वार्त्तिकापेक्षया सूत्रस्य वलवत्वाच्च सत्यापशब्दे निपातनतः शेषे त्वर्थवेदसत्यानामिति वार्त्तिकत आपुग् विधेय इति काशिकाकारः तत्सूत्रे निर्दिशति ।[३८५] कौमुद्यान्त्वर्थवेदादीनामापुग् व्यवस्था न प्राप्यते । प्रसङ्गेऽस्मिन् काशिकाकारस्तु पूर्वोक्तं प्रातिपदिकाद्धात्वर्थे... इति वार्त्तिकं विनैवेष्टानि रूपाणि साधयति, अतः प्रकृतं वार्त्तिकं कौमुदीपक्षीयमिति निश्चितम् । महाभाष्ये समुत्थापितं वार्त्तिकमिदं काशिकाकारेणानुत्थापितेऽपि तद्व्याख्यातारौ न्यासपदमञ्जरीकारौ तमनुवर्तमानौ कौमुदीशारदाप्रभाकारौ स्वीकृत्य व्याकुरुत इति निश्चीयते । अतः कौमुदीकारः तमनुवर्तमानः

---

[४]०. हरिप्रसादशर्माचार्यः (व्या.),*अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.१४८ ।
[४]१. हरदत्तः (व्या.), *काशिकावृत्तिः* (द्वितीयो भागः), पूर्ववत्, (१९६५), पृ.४१६ ।
[४]२. भीमसेनशास्त्री (व्या.), *लघुसिद्धान्तकौमुदी,* पूर्ववत् (१९७१) पृ. ५९८ ।
[४]३. जिनेन्द्रबुद्धिः (व्या.), *काशिकावृत्तिः* (द्वितीयो भागः), पूर्ववत्, (१९६५) पृ.३८६ ।
[४]४. वामनजयादित्यौ, *काशिकावृत्तिः* (तृतीयो भागः), पूर्ववत्, (१९६६) पृ.३८६ ।

शारदाप्रभाकारश्चात्र समुल्लिख्य व्याख्यातीति ज्ञायते । एतेनात्र शारदाप्रभाकारः कौमुदीपक्षं गृह्णातीत्यवबुध्यते ।

## ५.२.३.७ कर्तृस्वातन्त्र्यविचारः

अष्टाध्याय्याः स्वतन्त्रः कर्ता (पा.सू.१-४-५४) प्रभृतिषु कतिषु सूत्रेषु महर्षिणा पाणिनिना स्वतन्त्रादीनि पारिभाषिकानि पदानि प्रयुक्तानि, तेषु स्वतन्त्र इत्यस्य कोऽर्थः ? इति जिज्ञासायां शारदाप्रभाकारः सरलैरूदाहरणैः परिभाषया चैवं परिचाययति- "बालकः स्वपितीति वाक्ये शयनक्रियायां बालः स्वतन्त्रः, अतोऽसौ कर्ता । छात्रः कलमेन लिखतीति वाक्येऽपि लेखनक्रियायां छात्रः स्वतन्त्र अतोऽत्र छात्रः कर्ता, कलमस्तु लेखनक्रियायां छात्राधीन इति करणम् । तथैव भृत्यो भारं वहतीति वाक्येऽपि भारवहने भृत्यः स्वतन्त्रः, अतः स कर्ता । यदि कश्चन स्वाम्यधीनो भृत्यः कथं स्वतन्त्रः स्यादिति शङ्केत तर्हि वहधातोरर्थः प्रापणं तन्न भृत्याय नियोजयतीत्युत्तरं भवति । अतः प्रापणक्रियाव्यापारे भृत्यः स्वतन्त्रः । अनेन प्रकारेण क्रियायां पराधीनता रहितः स्वतन्त्रः, स च कर्तृसंज्ञको भवती[३८६] ति बोध्यम् । स्वः आत्मीयं तन्त्रं सिद्धान्तो यस्य स इति बहुव्रीहौ स्वतन्त्रशब्दो निष्पद्यते । आत्मीयसिद्धान्तवान् जन इति तस्य शाब्दिकोऽर्थः । भृत्यो भारं वहतीत्यादावनुमानेन पराधीनतायाः प्रतीतावपि धात्वर्थमात्रविचारे तस्य स्वतन्त्रता प्रतीयते, अत एव शारदाप्रभाकारः पराधीनतारहितत्वं स्वातन्त्र्यमिति लक्षयतीत्यवगम्यते, एतस्मात् कारणादेव क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्तेति सर्वसम्मतम् ।

अत्र काशिकाकारः स्वातन्त्र्यं परिभाषमाण आह- "स्वतन्त्र इति प्रधानभूत उच्यते ।"[३८७] तं विवृण्वन् पदमञ्जरीकारो ब्रूते- "स्व आत्मा तन्त्रं प्रधानमस्य स स्वतन्त्र इति ।"[३८८] स्वतन्त्रशब्दस्यैतत्प्रकारके विग्रहे लक्षणे च न्यासकारोऽपि सहमतः, तदेवम्- "अस्त्ययं स्वतन्त्रशब्दो बहुव्रीहिः, स्वः तन्त्रं यस्य स स्वतन्त्रः, अस्ति च समासप्रतिरूपको रूढिशब्दः प्रधानार्थवृत्तिः, यथा- स्वतन्त्रोऽयमिह देवदत्त इति प्रधानभूत इति गम्यते ।"[३८९] स्वतन्त्रस्यैतस्मिन् लक्षणे भाषावृत्तिकौमुदीकारावपि सहमतौ । भाषावृत्तिकारः क्रियासिद्धावगुणः स्वतन्त्र इति स्वातन्त्र्यं पूर्ववल्लक्षयति । भट्टोजिदीक्षितस्तु स्वतन्त्रः कर्ता इति सूत्रे स्वातन्त्र्यं

---

[४५]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. ७४ ।
[४६]. वामनजयादित्यौ, *काशिकावृत्तिः* (प्रथमो भागः), वाराणसी : सुधीप्रकाशनम्, (१९८३) पृ.५८३ ।
[४७]. हरदत्तः (व्या.), *काशिकावृत्तिः* (प्रथमो भागः), पूर्ववत्, (१९६५) पृ.४१६ ।
[३८९] जिनेन्द्रबुद्धिः (व्या.), *काशिकावृत्तिः,* पूर्ववत्, (१९८३) पृ.४१६ ।

किमित्यलक्ष्ययित्वैव- क्रियासिद्धौ स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यादित्येवार्थापयति । अत्र बालमनोरमाकारस्तु क्रियाजनने स्वातन्त्र्यं प्राधान्यमिति पारम्परिकीं परिभाषां प्रस्तौति । काशिकाकारस्य तद्व्याख्यातॄणाञ्च प्रकृतं स्वातन्त्र्यलक्षणं यद्यपि शास्त्रीयं तथापि सामान्यछात्रदुर्बोध्यमस्ति, अत एतानि सकलानि लक्षणानि निर्मथ्य शारदाप्रभाकारः 'पराधीनतारहितः' इति सरलां सुबोध्याञ्च परिभाषामुपस्कुरुते । अत्र व्याख्यातुरर्थकरणं नापूर्वं किन्तु सरलीकरणमात्रमिति सुधीभिर्विभावनीयम् ।

## ५.२.४ रूपसिद्धिप्रक्रियावबोधः

शारदाप्रभाव्याख्याया पूर्वतिङन्त उत्तरतिङन्ते च कस्माद्धातोः कस्मिनर्थे काले वा को लकारः ? कः प्रत्ययः ? विकरणादिकञ्च किमिति जिज्ञासामुद्भाव्य क्रियापदसिद्धिर्विहिता वर्तते । यद्यपि महर्षिपाणिनिना प्रसङ्गक्रमेण प्रस्तुतानि सूत्राणि कौमुदीक्रमे परिवृत्य व्याख्याकारोऽयं बहुत्र तिङन्तोत्तरतिङन्तप्रकरणं निर्माति, तथापि कतिपयेषु स्थानेष्वष्टाध्यायीक्रमोऽपि दृग्गोचरी भवति । सूत्राणामुदाहरणसंस्थापनेऽप्यसौ प्रायः काशिकामनुसरति । काशिकाकारः सूत्रक्रमानुसारेण द्वितीयाध्यायस्य चतुर्थपादे तत्पुरुषसमासं निर्धार्य तत्रैव आर्धधातुके (पा.सू.२-४-३५) इत्यधिकृत्य भ्वाद्यदादिप्रकरणान्तर्गतानि कानिचन सूत्राण्युदाहरणादीन्यपि समुल्लिखति, तान्यनुकृत्य शारदाप्रभाकारोऽपि भ्वादावेव- अनभिहिते (पा.सू.२-३-१) इति सूत्रद्वाराऽनभिहिताधिकारमधिकृत्य कानिचन कारकीयसूत्राणि व्याख्याति । अत्रत्ये व्याख्याने क्वचित् सूत्रक्रमो विच्छिन्नो दृश्यते । कतिपये स्थाने भूप्रसङ्गे प्रकरणान्तरीयाणां धातूनां रूपसिद्धिप्रक्रियाप्रबोधनमत्रत्ये क्रमविच्छिन्नत्वे लिङ्गम् । सामान्यतोऽस्याः प्रकरणविन्यासः कौमुदीसदृशो दृश्यते । तथैव प्रकरणविभाजनमपि तिङन्तमुत्तरतिङन्तं कृदन्तमित्यादि वर्तते, रूपसिद्धिस्तु बहुत्र कर्तृकर्मभाववाच्यानामेकत्रैव विहिता दृश्यते । व्याख्याताऽसौ भूधातोः कर्तरि भावे च रूपसाधनक्रम एव सार्वधातुके यक् ( पा.सू.३-१-६७), भावकर्मणोः (पा.सू.१-३-१३) इत्यनयोः सूत्रयोरपि समुल्लेखनेन- पठति,भवति, भूयते, पठति, पठ्यते इत्यादीनि रूपाण्येकत्रैव साधयति । अस्य रूपसाधनक्रमो विकरणप्रत्ययतो भिन्नेषु रूपेषु दृष्टेषु स्थानेषु (सार्वधातुकलकारेषु) प्रथमस्तदनन्तर-मार्धधातुकेषु लकारेषु स्वरवर्णक्रमव्यतिक्रमेण- लट्, लोट्, लङ्, वि.लिङ्, लृट्, लुट्, लृङ्, लुङ्, लिट्, आ.लिङ् एवंविधो वर्तते । अत्रापि भिन्नानि प्रथमं साधयित्वा ततः समानानि निष्पादितानि । शारदाप्रभायाः प्राथमिकविन्यासः सामान्यतः कौमुदीतुल्यो वर्तते तथाप्यत्रत्यः क्रमः पूर्णतः कौमुदीसमानोऽपि न दृश्यते । अतोऽत्रत्यक्रमः कौमुद्याः समोऽसमो वेति

ज्ञानायाधस्तात् शारदाप्रभाकारेण प्राथमिके विन्यासे प्रस्तुतक्रमानुसारेण कानिचन सूत्राणि तेषामुदाहरणानि च प्रस्तूयन्ते-

| *शारदाप्रभायाः क्रमः* | *उदाहरणानि* |
|---|---|
| अतो दीर्घो यञि (पा.सू.७-३-१०१) | भवामि, पठामि |
| भावकर्मणोः (पा.सू.१-३-१३) | भूयते, पठ्यते |
| सार्वधातुकमपित् (पा.सू.१-२-४) | तुदति, पठ्यते |
| आतो ङितः (पा.सू.७-२-८१) | पचेते, पठ्येते |
| थासः से (पा.सू.३-४-८०) | एधसे, पठ्यसे |
| अनभिहिते (पा.सू.२-३-१) | ग्रामं गच्छति |
| अधिशीङ्स्थासां कर्म (पा.सू.१-४-४६) | खट्वामधिशेते |
| कर्तृकरणयोस्तृतीया (पा.सू.२-३-१८) | रामेण बाणेन हतो बाली |
| लोट् च (पा.सू.३-३-१६२) | पठतु, कटं करोतु |

अनेन प्रकारेण दीक्षितादिभिर्निर्धारितं लकारक्रमं व्यतिक्रम्य भिन्नधातुभिर्विनिर्मितानि कर्तृकर्मभाववाचकानि रूपाण्येकत्रैव समुल्लिख्य सङ्केतशैल्या प्रक्रियाशिक्षणाद् लघुकौमुदी पठनपरेभ्यः प्रौढच्छात्रेभ्य एव व्याख्यानमिदं युज्यत इति प्रतीयते । सिद्धान्तकौमुदीकारो दीक्षितस्तु भ्वादौ प्रथमतस्टित् ततः ङिद् लकारान् निर्धार्य तदन्तर्गतानि रूपाणि साधयित्वात्मनेपदीय एधधातौ प्रविशति ।

नेपाली हिन्दीभाषाद्वयमपि यदाकदा प्रयुञ्जतः प्रकृतव्याख्याकारस्योद्देश्यं प्रक्रियासरलीकरणमेव । अतो व्याख्याकारोऽयं सुबोध्यायां भाषायां भौवादिकानि रूपाणि साधयति । असौ तिङन्तीयात् पठ्धातोर्वर्तमानकालिकं रूपमेवं साधयति-“अत्र वर्तमानकालः प्रतीयते, तेन पठ्धातोः परतो लट् प्रत्ययो जात इति छात्रान् बोधयित्वा शिक्षकः पठ्+लट्-ल् इत्यशेषयेत् ।”[३९०] व्याख्याकारोऽसौ वर्तमाने लट् (पा.सू ३-२-१२३) इत्यत्र ल् इत्यस्यार्थं व्याख्याय रूपसिद्धेरेतावन्तं सङ्केतञ्च कृत्वा तिप्तस्झि...इत्यादिसूत्रेण सकलप्रत्ययप्राप्तिं दर्शयित्वा पठेरुभयपदीयत्वेन तस्य परस्मैपदपक्षे प्रथमपुरुषस्यैकवचने तिप्प्रत्ययञ्च विधाय कर्तरि शप् (पा.सू. ३-१-६८) इति सूत्रेण शप्प्रत्यये सति पूर्वोक्तं रूपं सिद्ध्यतीत्येवं सङ्केतयति- “अथ पठ् शप् ति इति श्यामपाट्यां लिखित्वा सति सम्भवेऽनुबन्धफालनप्रक्रियामपिच्छात्रैः साधयेत् । अथ पठ् अ ति इति पुनर्लिखित्वा

---

[४९]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.१८९ ।

छात्रैर्वर्णसम्मेलनं कारयेत् पठतीति ।" [३९१] शारदाप्रभाकारो बालमनोरमाटीकायामिव समग्रं रूपं विस्तृततया न साध्नोति तथापि सामान्यसङ्केतं विदधाति, एतादृशो रूपसाधननिर्देश उत्तरतिङन्तान्तर्गते हेतुमति च (पा.सू. ३-१-२६) इति सूत्रस्थे हासयतीत्युदाहरण अपि दृश्यते, स तत्राह- "अत्र हस्धातोः पठ्धातोश्च प्रेरणायां हेतुमति च इति णिच् प्रत्ययं विधायानुबन्धं च फालयित्वा हस् इ, पठ् इ इति श्यामपाट्यां लिखित्वा अत उपधायाः (पा.सू.७-२-११६) इति सूत्रमुद्बोध्य हासि, पाठि इति श्यामपाट्यां लिखित्वा ससन्दर्भं सनाद्यन्ता धातवः ( पा.सू.३-१-३२) इति सूत्रमुद्बोधयेत् । शेषप्रक्रिया तु चोरि इत्यादाविवेत्युपदिशेद् हासयति पाठयतीति ।"[३९२] रूपसिद्धिप्रक्रियाया एतादृक् सामान्यसङ्केतः शिक्षकनिर्देशश्च बहुषु रूपेषु कृतो दृश्यते, अतोऽत्रत्यं व्यख्यानं प्रक्रियाप्रधानमिति वक्तुं शक्यम् । एतावद्भिः सङ्केतैर्लघुकौमुदीं सुपठित्वापीमां प्रक्रियां सामान्यतयैवाधिच्छन्ति परन्तु कौमुदीमपठितारः प्रविविक्षवस्तु दिग्भ्रान्ता एव भवन्तीति तेषां कृते दुरवगमं व्याख्यानमिति निश्चितप्रायमेव । शारदाप्रभाकारोऽयं एकस्मिनेव व्याख्याने प्रारम्भिकान् प्रौढाँश्च छात्रान् पाठयितुमीहते, अत एवासौ द्विविधामेव सरणिमङ्गीकुरुते, एतन्मध्ये प्राथमिकच्छात्रकेन्द्रितं व्याख्यानमपि कतिपये स्थाने छात्रस्तरापेक्षया प्रौढमनुभूयते चेत् क्वचित्तु प्रौढमपि सामान्यायते । अत एकस्मिनेव व्याख्याने द्विविधसरण्योरङ्गीकरणमस्य महौत्कण्ठ्यं सा च सीमा मन्तव्या ।

### ५.२.५ वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम्

शारदाप्रभायास्तिङन्त उत्तरतिङन्ते च सिद्धान्तकौमुद्यपेक्षयाऽधिकानि वार्त्तिकानि प्रयुक्तानि दृश्यन्ते । सिद्धान्तकौमुदीकारो महाभाष्ये सिद्धान्तभाष्यत्वेन समागतेषु वार्त्तिकेषु मुख्यान्येव चिनोति चेत् काशिकाकारस्तु वैकल्पिकत्वेन मतान्तरसमुपस्थापकत्वेन च प्रस्तुतान्यपि सम्प्रयुङ्क्ते । प्रायः काशिकावार्त्तिकानि प्रयुञ्जानः शारदाप्रभाकारोऽपि व्याख्यानमिदं काशिकानुगामित्वं वार्त्तिकबहुलञ्च कारयति । अत्र शारदाप्रभायास्तिङन्तखण्डे कौमुद्यामविद्यमानानि कति वार्त्तिकानि काशिकातोऽनुकृतानि सन्तीति ज्ञानायाधस्तात् क्रमशः समुल्लिख्यन्ते-

| *वार्त्तिकानि* | *शारदाप्रभायां स्थानसङ्केतः* |
|---|---|
| श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्वं वा | इन्धिभवतिभ्यां च (पा.सू. १-२-६) |

[३९०]. पूर्ववत्,पृ. १५६ ।
[३९१]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. १४८ ।

| | |
|---|---|
| घस्लृभावेऽप्युपसङ्ख्यानम् | लुँङ्सनोर्घस्लृ (पा.सू.२-४-३७) |
| असनयोश्च, बहुलं संज्ञाछन्दसोरिति वक्तव्यम् | चक्षिङः ख्याञ् (पा.सू. २-४-५४) |
| गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम् | गातिस्थाघुपाभूभ्यः.. (पा.सू.२-४-७७) |
| छन्दसि परेच्छायामिति वक्तव्यम् | सुप आत्मनः क्यच् (पा.सू.३-१-८) |
| यकारपरस्य रेफस्य न प्रतिषेधः | नन्द्राः संयोगादयः (६-१-३) |
| द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम् | लिटि धातोरनभ्यासस्य (६-१-८) |
| सुब्धातोरयमपि नेष्यते | णो नः (६-१-६३) |
| क्विप् प्रत्यये तु तस्यापि भवतीति वक्तव्यम् | शास इदङ्हलोः (पा.सू. ५-४-३४) |
| क्वौ च शास इत्वं भवतीति वक्तव्यम् | शास इदङ्हलोः (पा.सू. ५-४-३४ |
| उतश्च प्रत्ययाच्छन्दो वा वचनम् | उतश्च प्रत्ययाद्..(पा.सू.६-४-१०६) |
| श्रन्थिग्रन्थिदम्भीनामेत्वाभ्यासलोपौ वक्तव्यौ | अत एक हल्मध्ये... (पा.सू.६-४-१२०) |

सिद्धान्तकौमुद्यामविद्यमानानीतोऽप्यधिकानि वार्त्तिकानि शारदाप्रभायां प्राप्यन्ते । तान्यभीष्टानि रूपाणि साधयन्ति परमेतैर्विनापि दीक्षितेन सिद्धान्तकौमुद्यां तानि रूपाणि साधितानि सन्ति, अतो वार्त्तिकैर्विना तानि कथं निष्पादितानीति जिज्ञासा वर्द्धत एव । तादृशशङ्कानिवारणार्थमिह वार्त्तिकं विना कौमुदीकारेण साधितानि रूपाणि कानि तेषां सिद्धिप्रक्रिया च केत्यतः परं विचार्यते ।

## ५.२.५.१ गापोर्ग्रहणे इण्पिबत्योर्ग्रहणमित्यस्य वार्त्तिकत्वे विचारः

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु (पा.सू.२-४-७७) इति सूत्रेण गा-स्था-घुसंज्ञक-पा-भूधातुभ्यः परस्य सिचो लुग् विधीयते । तत्र गा इत्यनेन गा स्तुतौ (जुहो.परस्मै.) गाङ् गतौ (भ्वा. आ.) गै शब्दे (भ्वा.परस्मै.) इणः स्थाने आदिष्टेषु गादेशेषु च कतमो गृह्यत इति सन्देह एव तत्रैव पा इत्यनेन पा पाने (भ्वा.परस्मै) पा रक्षणे (अदा. परस्मै.) इत्यनयोर्मध्ये कस्य ग्रहणं भवतीति जिज्ञासायां महाभाष्यवचनमनुकर्वन्तोऽष्टाध्यायी व्याख्यातारः । काशिका-बालमनोरमाकाराश्च 'गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम्' इति महाभाष्यवार्त्तिकद्वारा गा इत्यनेन इणादेशस्य गा इत्यस्य पा ग्रहणेन पा पाने इत्यस्यैव च ग्रहणं भवतीति समाधानं दर्शयन्ति । तस्योल्लेखमष्टाध्यायीव्याख्याता ईश्वरचन्द्रः स्वकीये व्याख्याने कुरुते [३९३] तद्विचारान् शारदाप्रभाकारोऽप्यक्षरशोऽनुकरोति च । तत्र कौमुदीकारस्तु वार्त्तिकोल्लेखनं

५२. ईश्वरचन्द्रः (व्या.), *अष्टाध्यायी* (प्रथमो भागः), दिल्ली : चौखम्बासंस्कृतप्रतिष्ठानम्, (२००४) पृ. २४५ ।

विनैव 'गापाविहेणादेशपिबती गृह्येते' [३९४] इति फक्किकावाक्यद्वारा शङ्कामिमां समाधत्ते । अत्र कौमुदीकारेण वार्त्तिकमिदं फक्किकावाक्यवद्व्यवहृतेऽपि प्राचीनवैयाकरणैस्तदनुयायीभिः शारदाप्रभाकारेण च वार्त्तिकमुररीकृत्य कृतं समाधानमेवं स्पष्टतरं प्रामाणिकञ्च मन्यते ।

### ५.२.५.२ 'नन्द्राः संयोगादयः' इत्यस्य नियमने वार्त्तिकप्रयोगः

द्वित्वनिषेधप्रकरणे नन्द्राः संयोगादयः (पा.सू. ६-१-३) इत्यस्य नियमतोऽचः पराः द्वितीयस्यैकाचो नकारदकाररेफा निषिध्यन्ते, अतः उन्दिदिषति, अड्डिडिषति, अर्चिचिषति इत्यादौ द्वितीयस्यैकाचो द्वित्वं सिध्यति । अत्र कौमुदीकारो भट्टोजिदीक्षितस्तु निषेधप्रसङ्गोद्भावनं विनैवार्थाद् वार्त्तिकस्योल्लेखनं विनैवोर्णूञ् आच्छादने धातो रूपाणि साध्नोति अतोऽत्र कौमुदीकारो बाध्यबाधकभावोल्लेखनं न कुरुत इति निश्चीयते । अत्र शारदाप्रभाकारः काशिकामनुकुर्वन् कौमुद्यामविद्यमानानि चत्वारि वार्त्तिकानि प्रयुज्य पूर्वोक्तानि रूपाणि साधयति । यद्यप्येकस्यैव वार्त्तिकस्योल्लेखने काशिकाशारदाप्रभाकारयोः क्वचित् शब्दभेदोऽपि दृश्यते तथाप्यर्थसाम्येन शब्दभेदैरपि न हानिरिति निष्कर्षः ।

### ५.२.५.३ काशिका-शारदाप्रभास्थयोर्वार्तिकयोस्तुलना

शारदाप्रभाकारः काशिकायां स्थितानि वार्त्तिकानि कथमुद्धरते ? तयोश्च कीदृशं शाब्दिकं पार्थक्यमिति ज्ञानायात्र निदर्शनरूपेण तुलनार्थं प्रस्तूयन्ते ।

यकारपरस्य रेफस्य प्रतिषेधो न भवतीति वक्तव्यम्, उदा.- अरार्यते / काशिका ।

यकारपररेफस्य न प्रतिषेधः उदा.- अरार्यते /शारदाप्रभा. ।

ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यम्, उदा. ईर्ष्यियिषति, इर्ष्यिषिषति / काशिका ।
ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यम्, उदा.- ईर्ष्यियिषति, इर्ष्यिषिषति/ शारदाप्रभा ।

कण्ड्वादीनां तृतीयस्यैकाचो द्वे भवत इति वक्तव्यम्, उदा.-कण्डूयियिषति, असूयियिषति/काशिका ।

कण्वादीनां तृतीयस्यैकाच इति वक्तव्यम्,उदा. कण्डूयियिषति,असूयियिषति/शारदाप्रभा ।

यथेष्टं नामधातुषु इति वक्तव्यम्, उदा.पुपुत्रीयिषति, पुतित्रियिषति/ काशिका ।

यथेष्टं नामधातुषु, उदा. पुपुत्रीयिषति,पुतित्रियिषति / शारदाप्रभा । [३९५]

---

[५३]. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः) पूर्ववत्, (२००५) पृ. ४८ ।
[५४]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. ३४५ ।

एतैस्तोलनैर्वार्तिकान्येतानि नन्द्राः संयोगादयः इत्यस्य गूढार्थम्, तस्य प्रयोगक्षेत्रम्, बाध्यबाधकस्थानञ्च च सूचयन्तीति ज्ञायते, तथैव स्वविरचिते ग्रन्थे मौलिकताप्रदर्शनायासौ कतिषु स्थानेषु काशिकावार्त्तिकानि सङ्क्षेपीकृत्य प्रयुङ्क्त इत्यपि ज्ञायते । तेनैव प्रकारेण प्रकृतग्रन्थस्य व्याख्यानसरणिरपि काशिकानुयायिनी वर्तत इत्यप्यवबुध्यते, तथाप्यत्रोत्सर्गापवादसमुल्लेखनं समालोचनात्मकं वैशिष्ट्यपूर्णञ्च कार्यम्, यच्च न प्राथम्येन व्याख्यानविषयमिति प्रतीयते ।

अत्र समुल्लिखिते काशिकाकौमुदीशारदाप्रभेति ग्रन्थत्रये सिद्धान्तकौमुदी प्रक्रियाव्याख्याने विशेषेण ध्यानमाधत्ते । असौ प्रासङ्गिक स्थान एव शङ्कामुद्भाव्य तासां समाधानं करोति । अतस्तत्र सकलानि वार्त्तिकानि नोल्लिखितानीति कथयितुं शक्यते । सिद्धान्तकौमुदीतोऽपि सरलीकृतायां शारदाप्रभायान्तु पूर्वोक्तेभ्योऽधिकानि चत्वारि वार्त्तिकानि कथं प्रयुक्तानीति, तेषां प्रयोगविषये विचारणीयम् ।

शारदाप्रभायास्तिङन्तखण्डे परिभाषान्याययोः प्रयोगः प्रकरणान्तरापेक्षया न्यूनतर एव । काशिकातत्त्वबोधिन्यौ गातिस्थेति सूत्रे 'लुग्विकरणालुग्विकरणयोर्लुग्विकरणस्यैव ग्रहण'मिति परिभाषां प्रयुञ्जाते, परं शारदाप्रभाकारस्तां न प्रयुङ्क्ते । नन्द्राः संयोगादय इति सूत्रे कौमुदीकारेण प्रयुक्तां 'पूर्वत्रासिद्धीयमद्विर्वचने' इति परिभाषामपि शारदाप्रभाकारो नोल्लिखति । अनेन प्रकारेण सिद्धान्तकौमुद्यास्तिङन्त उत्तरतिङन्ते च प्रयुक्तासु दशाधिकासु परिभाषासु शारदाप्रभाकारो न्यूनतरा एवोद्धरते । काशिकासरणिमङ्गीकृतायां शारदाप्रभायां परिभाषान्याययोर्न्यूनः प्रयोगः स्वाभाविकः प्रतीयते । यतो हि न्यासपदमञ्जर्यपेक्षया सिद्धान्तकौमुद्यपेक्षया च काशिकाकारो न्यूनसङ्ख्यकाः परिभाषाः न्यायाञ्च प्रयुङ्क्ते, तदपेक्षया दीक्षितस्तु महाभाष्यादिभ्यस्ताः समानीय आवश्यकेषु स्थानेषूपयुङ्क्ते, तयोरपेक्षया शारदाप्रभाकारः सिद्धान्तकौमदीं बालमनोरमां तत्त्वबोधिनीं चाश्रित्य प्रक्रियाव्याख्याने ध्यानं धत्ते तस्मादत्र परिभाषाणां न्यूनत्वं प्राथमिकच्छात्रस्तरानुकूलार्थमिति सुधीभिर्विभावनीयम् ।

### ५.२.६ अन्याचार्यमतसङ्ग्रहः

शारदाप्रभायास्तिङन्त उत्तरतिङन्ते च काशिकासिद्धान्तकौमुद्योः, काशिकाव्याख्यात्रोः जिनेन्द्रबुद्धिहरदत्तयोः, सिद्धान्तकौमुदीव्याख्यात्रोर्वासुदेवदीक्षितज्ञानेन्द्र-सरस्वतीवर्ययोश्च मतानि प्रायेण प्रत्यक्षतया तथा क्वचिदप्रत्यक्षतयापि समुद्धृतानि दृश्यन्ते । शारदाप्रभाकारोऽसावत्र काशिकाकौमुद्योर्मतभेदेषु प्रत्यक्षतः कस्मिनपि पक्षे स्वकीयाभिमतं नैव प्रकटयति । तत्रत्ये मतान्तरे प्रायो द्वयोस्समुल्लेखनपुरस्सरमग्रे गच्छति तथापि तत्र प्रच्छन्नाग्रहस्तु

काशिकानिर्दिष्टप्रक्रियां प्रत्येव दृश्यत इति सिद्धान्तकौमुद्यामविद्यमानानां वार्त्तिकानां प्रयोगात्, काशिकायामनुल्लिखितानामत्राप्रयोगात्, रूपसाधनप्रक्रियासु, सूत्रव्याख्यानेषु चोभयोर्मतभेदे प्रच्छन्नतयापि काशिकापक्षमेवाश्रयतीति ज्ञायते । शारदाप्रभायां काशिकायाः समुद्धरणे 'अत्र काशिके'ति समुल्लेखः प्राप्यते चेत् सिद्धान्तकौमुद्याः समुद्धरणे त्व'त्र दीक्षितः' इति समुल्लिखितो दृश्यते । शारदाप्रभाया आधाररूपेण समुपस्थितौ द्वावपि ग्रन्थौ शब्दसाधुत्वनिरूपणसमर्पितौ प्रक्रियाधीनावतः प्रकृतग्रन्थनिर्माणे स्वाभाविकेन समुद्धरणीयाविति तयोरुद्धरणं स्वाभाविकं मन्तव्यम् ।

शारदाप्रभाकारस्तिङन्त उत्तरतिङन्ते च बहून् पूर्वव्याख्यातॄन् समुद्धरते, तेभ्योऽत्र केचन प्रस्तूयन्ते -

| *उद्धरणस्थानम् / सूत्रम्* | *उद्धरणप्रसङ्गः* | *पूर्वव्याख्याता* |
|---|---|---|
| विज इट् (पा.सू.१-२-२) | इटः ङित्करणप्रसङ्गे | महाभाष्यकारः |
| इन्धिभवति... (पा.सू.१-२-६) | लिटः कित्वविधाने | हरदत्तः |
| शिक्षेर्जिज्ञासायाम् (वार्त्तिकम्) | अस्य नियमविधित्वसन्देहे | कैयटः |
| हरतेर्गतताच्छील्ये (वार्त्तिकम्) | ताच्छील्यार्थनिरूपणे | नागेशः |
| प्रोपाभ्यां... (पा.सू.१-३-४२) | सवर्णदीर्घाभावसन्देहे | वार्त्तिककारः |
| लिट् च (पा..सू.३-४-११५) | लिट् च इत्यस्यार्थापने | जयादित्य/दीक्षितः |
| मीनाति...(पा.सू.६-४-४९) | उपदेशे एवात्वविधाने | जयादित्यः |
| नित्यं स्मयते (पा.सू.६-१-५६) | स्मयतेरर्थापने | जयादित्य/दीक्षितः |
| च्छ्वोः शूडनु...(पा.सू.६-४-१९) | यङ्लुग्निषेधे | दीक्षितः |
| आर्धधातुके (पा.सू.६-४-४६) | आर्धधातुके सप्तमी निर्धारणे | जिनेन्द्रबुद्धिः |

उपर्युल्लिखितान्युदाहरणानि तु प्रतिनिधिभूतान्येव, सूक्ष्मतयाऽन्वेक्षिते पूर्ववर्तिनां प्रसिद्धानां व्याख्यातॄणां समुद्धरणसङ्केतो यत्र तत्रैव दृश्यते । शारदाप्रभाव्याख्यानस्यैतदपि वैशिष्ट्यं यत्- प्राच्यनव्ययोर्विवादे यथासम्भवं तेषां सर्वेषां मतानि गृहीतानि । च्छ्वोः शूडनुनासिके च (पा.सू.६-४-१९) सूत्रेऽसौ यकारवकारान्तानामूठ्भाविनां यङ्लुग् नास्तीति विषयव्याख्याने महाभाष्यकार-कैयट-दीक्षित-माधवान् समुद्धरते, एवम्- "अत्र दीक्षितो यकारवकारान्तानामूठ्भाविनां यङ्लुग्नास्तीति च्छ्वोरिति सूत्रे भाष्ये ध्वनितं कैयटेन च स्पष्टीकृतम् । इदं च्छ्वोरिति यत्रोठ् तद्विषयं, ज्वरत्वरेत्यूठ्भाविनो स्रिविमव्योस्तु

यङ्लुगस्त्येवेति न्याय्यं माधवादिसम्मतञ्च ।" [३९६] भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां पूर्वव्याख्यातॄन् समुद्धृत्य व्याख्यातोऽयं विषयोऽत्र शारदाप्रभाकारेण यथावदुपन्यस्य यकारवकारान्तेष्वपि स्रिविमव्योस्तु यङ्लुग्भवतीति ज्ञापितं तत्र माधवादीनां सम्मतिरुल्लिखिता च, तथैव अतो येयः (पा.सू.७-२-८०) सूत्रेऽपि यास् इत्यस्य इयादेशप्रसङ्गे शारदाप्रभाकारेण दीक्षितप्राच्यवैयाकरणयोर्विचार एवं प्रस्तुतो दृश्यते-"परत्वाद् नित्यत्वाच्च अतो येय इति प्राञ्च इति प्राचामुक्तिमुद्धरन् यद्यप्यन्तरङ्गत्वात् पररूपं न्याय्यं तथापि यास् इत्यस्य इय् इति व्याख्येयम्, एवञ्च सलोपस्यापवाद इय् इति ।" [३९७] एतेन समुद्धरणेनान्यैरपि बहुभिरुल्लेखैश्च शारदाप्रभाकारोऽयं विषयविश्लेषणाय, स्वमतपोषणाय, व्याख्यातृषु दृष्टमतमतान्तरोल्लेखनाय च पूर्वाचार्यमतं सादरं गृह्णातीति वक्तुं शक्यते ।

## ५.२.७ प्रकरणसङ्घटनं शैलीशिल्पञ्च

शारदाप्रभायामभिव्यक्ता भाषा स्तरीया,सामान्या देशभाषामिश्रिता वाऽस्ति ? अस्या व्याख्यानशैली च लक्ष्यप्रधाना, लक्षणप्रधाना अन्यदीया वा विद्यते ? अस्यास्तिङन्तीयं स्वरूपञ्च कीदृशमिति ज्ञानाय प्रथमतोऽस्यास्तिङन्तीयमुत्तरतिङन्तीञ्च स्वरूपमध्ययनीयं भवति, अतोऽत्र प्रथमतोऽस्याः स्वरूपं समुल्लिख्य तदनन्तरमत्रत्या भाषा,व्याख्यानशैली च निरूपयते ।

शारदाप्रभेयं मूलतो द्विविधयोः स्वरूपयोर्विभक्ता दृश्यते । तयोर्मध्येऽस्याः प्राथमिकं (सूत्रक्रमानुसारि) स्वरूपं प्रायो लघुकौमुदीतुल्यं वर्तते चेद् द्वितीयन्तु पूर्णतः सूत्रक्रमिकमस्ति । अनया रीत्या तिङन्तमुत्तरतिङन्तमपि स्पष्टतो द्विविधयोः स्वरूपयोः, द्विविधायाञ्च भाषाशैल्यां विभाजितं दृश्यते । अस्या दशगणात्मकं तिङन्तीयं स्वरूपं प्रायो लघुकौमुद्याः संरचनया सह मिलति । कौमुदीमिव प्रकृतव्याख्यानमपि भ्वादिगणत आरभ्य अदादिजुहोत्यादिषु दशसु गणेषु तत्तद्गणीयानां धातूनां तेषां दशलकाराणामावश्यकरूपाणि च साधयित्वा पूर्णतां याति, परन्त्वत्रत्यो लकारक्रमस्तु कौमदीतो भिन्नो दृश्यते । कौमुदीकारो भूधातोर्लड्लिटादीनां टित्लकाराणां रूपाणि साधयित्वा तदनन्तरं लङ्लिङादीनां ङित्लकारान्तर्गतानां रूपाणां साधनाय प्रक्रियामुपदिशति चेत् शारदाप्रभाकारस्तु शप्-लुक्-श्लु-श्यन्प्रभृतिभिर्विकरणैर्भिन्न-भिन्नरूपसञ्जातानां दशगणीयानामेव धातूनां लट्-लोट्-लङ्-वि.लिङ्-लकारेषु निष्पन्नानां

---

[५५]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.५३६ ।
[५६]. पूर्ववत्, पृ. ६०८ ।

रूपाणां साधनं विधाय तत आर्धधातुकान्तर्गतानि रूपाण्यपि लृट्-लुट्-लृङ्-लुङ्-लिट्-आ.लिङ्क्रमेण साधयति । स भ्वादिप्रकरणमपि भूवादयो धातवः (पा.सू.१-३-१) सूत्रतः समारभ्य लटस्तिप्-तसादिषु प्रत्ययेषु रूपसाधनप्रक्रियां समुपदिश्य तत्रैव भावकर्मणोरिति सूत्रद्वारा भावकर्मवाच्ययोः साधनीयानि रूपाण्यपि समुपदिशति, अत्रैवाभिहितानभिहितत्वं संस्कृते वाक्यनिर्माणाभ्यासमपि शिक्षयति । अतः शारदाप्रभायाः व्याख्यानं मूलतो रूपशिक्षणेंऽशतो वाक्यप्रयोगशिक्षणेऽपि केन्द्रितं दृश्यते । व्याख्याकारोऽयं लटि भूधातो रूपं साधयित्वा तत्रैवात्मनेपदीयानामेधादीनामपि रूपशिक्षणदिग्दर्शनं कुरुते ततो अदिप्रभृतिभ्यः शपः (पा.सू.२-४-७२) इत्यादिभिः पञ्चसूत्रैरदाद्यन्तर्गतानां धातूनां सामान्यतो लट्लकारीयप्रक्रियां सूचयति, तदनन्तरं जुहोत्यादिभ्यः श्लुः (पा.सू.२-४-७५) प्रभृतिभि-र्दशसूत्रैर्जुहोत्यादिगणान्तर्गतं लट्लकारीयं रूपं साधयति । तदनन्तरं प्रकरणप्राप्तानां दिवादिस्वादिप्रभृतीनां गणस्थानां रूपाणां निदर्शनं सङ्क्षेपेण सामान्यरूपेणैव कुरुते । दिवादिप्रभृतिषु गणेषु शारदाप्रभाकारोऽयं सङ्केतमात्रेण स्वल्पेषु सूत्रेष्वेव लट्लकारस्य प्रक्रियामुपदिशति, अनेन प्रकारेण भ्वादिभिन्नेषु तिङन्तीयेषु गणेषु कृतं प्रक्रियाव्याख्यानं परिचयात्मकमेवास्तीत्यनुभूयते । अनेन प्रकारेण चुराद्यन्तानि सूत्राणि समुपदिश्यासौ लृट् शेषे च (पा.सू. ३-३-१३ अनद्यतने लुट् (पा.सू. ३-३-१५) लिङ् निमित्ते लृङ् क्रियातिपत्तौ (पा.सू. ३-३-१३) लुङ् (पा.सू. ३-२-११०) परोक्षे लिट् (पा.सू. ३-३-११०) आशिषि लिङ्लोटौ (पा.सू. ३-३-१५) इतयादिभिः सूत्रैरार्धधातुकान् लकारान् क्रमशः समुपदिशति । अत्र शारदाप्रभाकारस्य लकारक्रमो लट्, लोट्, लङ्, विधिलिङ्, लृट्, लुट्, लृङ्, लुङ्, लिट्, आशिर्लिङिति वर्तते ।

उत्तरतिङन्तप्रकरणमपि शारदाप्रभाकारेण णिजन्त-सन्-यङ्-यङ्लुक्-नामधातुरिति पञ्चसु प्रकरणेष्वष्टादशसूत्रेषु च पूरितं दृश्यते । तदुत्तरवर्तिन्यात्मनेपद-परस्मैपद-भावकर्म-लकारार्थप्रभृतीनि प्रकरणानि प्राथमिके विभाजने न विन्यस्तानि । भावकर्मप्रकरणस्थानि सूत्राणि तत्रत्यानि रूपाणि तु भ्वादावेव साधितानीति पूर्वमेवोक्तम् ।

शारदाप्रभायास्तिङन्तीयं द्वितीयकं स्वरूपं महर्षिपाणिनिना येन क्रमेण सूत्राणि प्रणीतानि तेनैव क्रमेण निर्धार्य व्याख्यातानि सन्ति । शारदाप्रभाव्याख्यात्रा मूलेऽष्टाध्यायीक्रमेण सूत्रोदाहरणफक्किकावार्त्तिकादीनि विन्यस्याधस्तात्तेनैव क्रमेण व्याख्यातानि च, अतो द्वितीयके व्याख्याने भ्वाद्यदादिरिति दशगणात्मकं स्वरूपं परस्मैपदात्मनेपदव्यवस्था, लट्, लिट् इत्यादिलकारक्रमः, सार्वधातुकार्धधातुकमूलकः क्रमश्च स्पष्टतया तत्र न दृग्गोचरी भवति । तत्र तु कर्तरि शप् (पा.सू.३-१-६८), स्वादिभ्य श्नुः (पा.सू.३-१-७३), तुदादिभ्यः शः

(पा.सू.३-१-७७), रुधादिभ्यः श्नम् (पा.सू. ३-१-७८), तनादिकृञ्भ्यः उः (पा.सू. ३-१-७९) क्र्यादिभ्यः श्ना (पा.सू.३-१-८१) इति विकरणक्रमो दृश्यते । तत्रापि अदिप्रभृतिभ्यः शपः (पा.सू.२-४-७२) जुहोत्यादिभ्यः श्लु (पा.सू.२-४-७५) इति सूत्रद्वयं तु द्वितीयाध्यायान्तर्गते चतुर्थपाद एव समाख्यातः । महर्षिपाणिनिनिर्धारिते विकरणक्रमेऽपि लुक्-श्लुविधायकयोः सूत्रयोः व्यत्ययेन निर्धारणादत्र शारदाप्रभाकारस्य प्रकरणक्रमो विचारणीयः प्रतीयते ।

शारदाप्रभाया मूलपाठतोऽधस्तनस्थिते व्याख्यानखण्डेऽसौ सूत्रक्रमेणैव प्रक्रियाव्याख्यानं कुरुते, शङ्कां समाधत्ते, प्रसङ्गतोऽनुवादादिकं शिक्षयति, व्याख्यानान्त एतस्मात् सूत्रादनन्तरमेतत् पाठ्यमिति प्राथमिकं क्रमञ्च निर्दिशति, अतोऽत्र सूत्रक्रमिकः पाठः, तदनुसारि व्याख्यानं, कौमुद्यनुकुलो विन्यासः प्राप्यते । अनेन प्रकारेणैकत्रैव क्रमद्वयं सन्निवेश्य तत्रैव वाच्य-कारक-सकर्मकाकर्मक-धात्वर्थ-लकारार्थानां तच्छिक्षणरीतीनाञ्च समुपदेशनात्तत्रैव सूत्र-वार्त्तिक-फक्किकादिसम्बद्धानामनेकासां शङ्कानामुपस्थापनात्तदुपरि दीक्षित-नागेश-काशिकाकाराणां तद्व्याख्यातॄणाञ्च मतव्याख्यानादत्र प्राथमिकाश्छात्रा अत्र कियदध्येयमिति दिग्भ्रान्ता भवितुं शक्नुवन्ति ।

वस्तुतः शारदाप्रभायाः शैली मधुकरवृत्त्यात्मिका वर्तते । मधुकरो यथाऽनेकेभ्यः पुष्पेभ्यो रसमानीय रसागारं निर्माति तथैव शारदाप्रभाकारोऽपि काशिका-सिद्धान्तकौमुदी-भाषावृत्ति-महाभाष्यादिभ्यो ग्रन्थेभ्यस्तट्टीकाभ्यश्च विषयान् सङ्कलय्य तान् सरलातिसरलभाषायां प्रयोगप्रधानायां शैल्यां प्रस्तौति, अतो विषयस्य सरलीकरणं व्याकरणपठने प्रयोगात्मकशैल्या वरणञ्चास्य व्याख्यानस्य वैशिष्ट्यं प्रतीयते ।

शारदाप्रभाया व्याख्यानशैली न लक्षणप्रधाना नापि लक्ष्यप्रधानाऽस्ति । व्याख्याकारोऽयं प्रथमतो लक्ष्यप्रधानया शैल्या तिङन्तोत्तरतिङन्तप्रकरणं विवृणुते चेत् द्वितीये क्रमे तु सूत्रक्रमेण तत्रत्यां प्रक्रियां समुपदिशति । व्याख्यातासौ तिङन्तप्रकरणान्तर्गतेषु अस्तिसिचोऽपृक्ते (पा.सू. ७-३-९६) कास्प्रत्ययादाममन्त्रेऽलिटि, (पा.सू.३-१-३५) श्लिष आलिङ्गने (पा.सू.३-१-४६), सत्यापपाश... प्रभृतिषु सूत्रेषु प्राच्यनव्ययोर्मतभेदे मतद्वयमेव समुपस्थाप्य लक्ष्यलक्षणवादिनौ सङ्गमयते, अतो व्याख्यानमिदं न हि लक्षणप्रधानं नापि लक्ष्यप्रधानमपि तु द्वयोस्सङ्गमनकारकमस्तीति निगदितुमुचितं भवति, एतस्मात् कारणादत्र प्रयुक्ता शैल्यपि लक्ष्यलक्षणयोस्सङ्गमनमूला वर्तत इति निर्वक्तुं शक्यते ।

## ५.३ कृदन्तकारकयोस्समीक्षा

पूर्वकृदन्त-कृत्योत्तरकृदन्त-कारकप्रकरणात्मके प्रकृतखण्डे सूत्रव्याख्यान-वार्त्तिकप्रयोग-रूपसाधन-शङ्कासमाधानानि निरूपितानि सन्ति । अतः परमेतेषां परिचय-विश्लेषणसमीक्षणानि प्रस्तूयन्ते-

व्याकरणं नाम शब्दमाहात्म्यं तच्च शब्दसाधुत्वज्ञापकम् । अतः शास्त्रमिदं शब्दानां सिद्धिप्रक्रियामुपदिशति । एवञ्च शब्दसंस्कारत्वञ्चात्र शब्देषु धातुषु च सुप्तिङोर्योगेन विधीयते तच्च पदमित्युच्यते- सुप्तिङन्तं पदम् (पा.सू.१-४-१४) इत्यनुशासनात् । व्याकरणसंस्कारेण च सार्थकीकृताः कृत्तद्धिसमासान्ता वाग्व्यवहारे पदमभिधीयन्ते । तादृशपदव्युत्पादनं व्याकरणशास्त्रस्य मुख्यं लक्ष्यम् । धनवनमणिनूपुरादयो लेखकपाठककर्त्रादयो राष्ट्रियदाशरथादयोऽधिराज्यराजपुरुषादयश्च तेषामुदाहरणानि । तत्रापि मूलप्रकृतयो धातवः प्रातिपदिकानि च । प्रातिदिकेभ्यः स्वादयो भवन्ति । धातुभ्यश्च द्विधा प्रत्यया भवन्ति तिङः कृतश्च । तिङ्क्रियापदानि साध्यावस्थाबोधकानि सन्ति । सिद्धावस्थापन्नानि तु घञादिकृता । भवति, पठति, भावयति, भूयत इत्यादीनि तिङा निष्पन्नानि तिङन्तप्रकरण उत्तरतिङन्तप्रकरणे च व्युत्पादितानि । कृत्प्रत्ययनिष्पन्नानि तु प्रकृतप्रकरणेन बोध्यन्ते । कृतश्च कृत्यनाम्ना पूर्वकृदुत्तकृन्नाम्ना चाभिधीयन्ते । कृत्याश्च कारकस्य क्रियायाश्च बोधका भवन्ति । कृतश्च कारकमात्रबोधकाः, उत्तरकृतश्च प्रायेण शुद्धस्य धात्वर्थस्य (भावस्य) बोधका भवन्ति । अत्र पार्थक्यादेव प्रक्रियाकौमुदीसिद्धान्त-कौमुदीकारादिभिरलग्नानि प्रकरणानि प्रकृतानि । शारदाप्रभाकारोऽपि तत्त्वं स्वीकुर्वन् व्याख्याति तत्प्रकरणमिति विभावनीयम् ।

शारदाप्रभाकारोऽयं 'अथ कृदन्तशिक्षणरीतिः' इत्यतः प्रारम्भिकं छात्रकेन्द्रितञ्च पूर्वकृदन्तप्रकरणमारभ्य ३५ सूत्रैस्तत्रत्याः प्रकियाः प्रतिपादयति । तदनन्तरं कृत्यप्रकरणस्थैः पञ्चभिः सूत्रैः कृत्यप्रकरणान्तर्गतां प्रकियां सूचयित्वा ल्युट् च (पा.सू.३-१-११५) प्रभृतिभिः सूत्रैरुत्तरकृदन्तशिक्षणरीतिं प्रातिपदिकार्थलिङ्ग...(पा.सू.२-३-४६) प्रभृतिभिर्नवभिश्च कारकप्रकियां व्याख्याति । शारदाप्रभायाः कृदन्तकारकात्मकं प्राथमिकं स्वरूपं ५१ सूत्रव्याख्याने रूपसाधनप्रक्रियासङ्केते शङ्कोत्थापनेन पङ्क्तिलापने तत्तत्प्रकरणस्थानां पदानां वाक्यप्रयोगनिदर्शनेऽनुवादादिषु च केन्द्रितं दृश्यते ।

अतः परमधिकारानुवृत्त्योर्निदर्शनम्, विग्रहादिभिरूदाहरणादिभिश्च सूत्रार्थापनम्, शङ्कामुद्भाव्य समाधानम्, रूपसिद्धिप्रक्रियावबोधः, वार्त्तिकपरिभाषादिभिर्जटिलतास्फोरणम्,

अन्याचार्यमतसङ्ग्रहः, प्रकरणसङ्घटनं शैलीशिल्पञ्चेति सप्तभिः शब्दशास्त्रीयव्याख्यान-तघ्वैरत्रत्याः प्रक्रियाः क्रमशो विव्रियन्ते ।

### ५.३.१ अधिकारानुवृत्त्योर्निदर्शनम्

प्राथमिकच्छात्रकेन्द्रितायाः शारदाप्रभायाः पूर्वकृदन्तकृत्योत्तरकृदन्तप्रकरणेषु व्याख्यात्रैक मप्यधिकारसूत्रं नोपन्यस्तम् । सिद्धान्तकौमुदीकारस्त्वत्र धातोः (पा.सू.३-४-११७), कृत्याः (३-१-९५), भूते (३-२-८४) चेति त्रीण्यधिकारसूत्राणि निर्धारयति । शारदाप्रभाकारोऽसौ कारकप्रकरणेऽप्यधिकारसूत्रं न समुल्लिखति । कौमुदीकारस्तु कारकप्रकरणेऽपि कारके (पा.सू.१-४-२३) अनभिहिते (पा.सू.२-३-१) कर्मप्रवचनीयाः (१-४-८३) चेति त्रीण्यधिकारसूत्राणि समुपन्यसति, यद्यपि सूत्रक्रमिके द्वितीयके व्याख्याने तु शारदाप्रभाकारोऽप्यष्टाध्यायीक्रमेण समागतान्यधिकारसूत्राणि यथावत् समुल्लिख्य व्याख्याति ।

महर्षिः पाणिनिरष्टाध्याय्यन्तर्गते तृतीयाध्याये प्रायः कृदन्तोपयोगीनि सूत्राणि प्रयुङ्क्ते । मुनिरसौ तदध्यायान्तर्गते प्रथमपादे धातोः (पा.सू.३-१-९१), कृत्याः (पा.सू.३-१-९५) चेत्यधिकारसूत्रद्वयं प्रयुङ्क्ते । तथैव तृतीयाध्यायस्यैव द्वितीयपादे भूते (पा.सू.३-२-८४) इत्येकमधिकारसूत्रं सम्प्रयुङ्क्ते । प्राथमिकस्वरूपकेन्द्रितायाः शारदाप्रभायाः प्रकृतखण्डेऽ-धिकारसूत्राणामभावादनुवृत्त्योः स्वरूपम्, गतिः, सीमादिकञ्चात्र कृदन्तकारक प्रकरणान्तर्गतैरूदाहरणैर्निरूपयते ।

### ५.३.१.१ आकाङ्क्षितं पदं पदसमूह एव वोत्तरसूत्र आवर्तत इति प्रदर्शनम्

आकाङ्क्षितं पदं पदसमूह एव वोत्तरसूत्रे आवर्तते[३९८] इति नियमादेव कृदतिङ् (पा.सू.३-१-९३) इति सूत्रस्थं कृदिति पदमुत्तरवर्तिषु चतुर्थपादस्य क्तोऽधिकरणे च ध्रौव्यगति...(पा.सू.३-४-७६) इति सूत्रान्तेषु निरन्तरमनुवर्तते परमाकाङ्क्षाभावात्तस्यैव सूत्रस्यातिङिति पदमुत्तरत्र नानुवर्तत इति ज्ञायते । तथैवोत्तरकृदन्ते पठितं अकर्तरि च कारके संज्ञायाम् (पा.सू.३-३-१९) इति समग्रमेव सूत्रं तस्यैव पादस्य आक्रोशे नञ्यनिः (पा.सू.३-३-११२) इति सूत्रान्तं गच्छतीति आकाङ्क्षावशादेव तत्सम्भवः, अस्मादेव कारणाद् नञि उपपदेऽनि स्यादाक्रोशेऽकर्तरि च कारके संज्ञायामित्यर्थो निष्पद्यते । एतैरूदाहरणैरनुवृत्तिरियमाकाङ्क्षावशादेव भवतीति निश्चीयते ।

---

[३९८] गोपालशास्त्री (सम्पा.), *अष्टाध्यायी,* (तृ.सं.) चौ.सु.भा.प्र. : वाराणसी, (१९८७) पृ. भू.१७।

### ५.३.१.२ असमानविभक्त्यन्तमेवानुवर्तत इत्यवबोधः

उत्तरत्रानुवर्तनीयं पूर्वसूत्रस्थं पदं पदसमूहो वा संयोजनीयेनोत्तरपदेन सहासमानविभक्त्यन्तमावश्यकमिति द्वितीयो नियमः[३९९] अत एव हरतेरनुद्यमनेऽच् (पा.सू.३-२-९) इति सूत्रस्थं हरतेरिति पञ्चम्यन्तमजिति प्रथमान्तं चोत्तरवर्तिनो 'वयसि च' (पा.सू.३-२-१०) इति सूत्रेऽनुवर्तेते, अस्मादेव कारणाद् वयसि गम्यमाने हरतेः कर्मण्युपपदेऽच्प्रत्ययो भवतीत्यर्थाप्यते [४००] परं समानविभक्त्यन्त आकाङ्क्षाभावात् पूर्वसूत्रस्थमनुद्यमन इति सप्तम्यन्तमुत्तरत्र नानुक्रियते । तथैव मनः (पा.सू.३-२-८२) इति सूत्रस्थं पञ्चम्यन्तं पदमुत्तरवर्तिनि ...आत्ममाने खश् च' (पा.सू.३-२-८३) इति सूत्र आवर्तते । असमानविभक्त्यन्तानुवर्तनं कारकेऽपि दृश्यते । तत्र 'अपादाने पञ्चमी' (पा.सू.२-३-२८) इति सूत्रस्थं प्रथमान्तं पञ्चमीति पदमुत्तरवर्तिनि सप्तम्यन्ते अन्यारादितर-र्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते (पा.सू.२-३-१९) इत्यत्रानुवर्तते परं तत्सूत्रस्यैवापादान इति सप्तम्यन्तु नानुवर्तते, एतेनासमानविभक्त्यन्तं पदमेवानुवर्तत इति निश्चीयते ।

### ५.३.१.३ समानविभक्त्यन्तावपि विशेषणविधेयावनुवर्तेत इति ज्ञापनम्

अनुवर्त्यानुवर्तमानयोर्विशेष्यविशेषणयोर्मध्य उत्तर एके सति समानविभक्त्यन्तं पदमप्यनुवर्तत [४०१] इत्यनुवृत्तेस्तृतीयनियमः, अत एव भावे (पा.सू.३-३-१८) इति सूत्रस्थं सप्तम्यन्तं विशेषणमुत्तरवर्तिषु समानविभक्त्यन्तेषु अकर्तरि च कारके संज्ञायाम् (पा.सू.३-३-१९) प्रभृतिषु ९३ सूत्रेषु निरन्तरं गच्छतीति समानविभक्त्यन्तं विशेषणमपि विशेष्येण सहान्वेतुं गच्छतीति ज्ञायते । तथैव ह्वः सम्प्रसारणं च (पा.सू.३-३-७२) इति सूत्रस्थं षष्ठयन्तं ह्व इति विशेष्यपदमुत्तरवर्तिनि भावेऽनुपसर्गस्य (पा.सू.३-३-७५) इति सूत्रस्थेनानुपसर्गस्येति समानविभक्त्यन्तंविशेषणेन सहान्वेति, अत एव "अनुपसर्गस्य ह्वयतेः सम्प्रसारणं स्यादित्यर्थो लभ्यते ।"[४०२] तेनैव प्रकारेण लटः शतृशानचावप्रथमासमानाधिकरणे (पा.सू.३-२-१२४) इति सूत्रस्थं 'शतृशानचौ' इति द्विवचनान्तं विधेयपदमुत्तरत्र स्थितेन तौ सत् (पा.सू.३-२-१२७) इति सूत्रत्येन 'तौ' इति उद्देश्येन सहान्वेति, एतेन समानविभक्त्यन्तमपि विधेयपदमुत्तरत्र स्थितेनोद्देश्येन सहान्वेतुं गच्छतीति ज्ञायते ।

---

[५८]. गोपालशास्त्री (सम्पा.), *अष्टाध्यायी,* पूर्ववत्, (१९८७) पृ. भू.१७ ।
[५९]. वामनजयादित्यौ, *काशिकावृत्तिः* (तृतीयो भागः), पूर्ववत्, (१९६६) पृ.५५० ।
[६०]. गोपालशास्त्री (सम्पा.), *अष्टाध्यायी,* पूर्ववत्, (१९८७) पृ. भू.१७ ।
[६१]. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (कृदन्तखण्डः) पूर्ववत्, (१९८७), पृ.३२९ ।

## ५.३.१.४ परिभाषासूत्रद्वारा पदोपस्थितिः

महर्षिणा पाणिनिना कानिचन नियमसूत्राणि विशेषणीकृत्य तानि च विधिसूत्रैः सहान्विष्यापि व्याख्यातानि । तत्र पूर्वसूत्राणामानयने **च, अपि** सदृशानि पदान्यपि न प्रयुक्तानि, अत एतादृशमागमनं पाणिनीयव्याकरणे उपस्थितिपदेन व्यवह्रियते । तदाह दीक्षित अचश्च (पा.सू. १-१-३) इति सूत्रे- "ह्रस्वदीर्घप्लुतशब्दैर्यत्राज् विधीयते तत्राच इति षष्ठचन्तं पदमुपतिष्ठत इति ।" [४०३] एवं विधा ह्रस्वादिपदैर्विशेषनियमैर्वा परिभाषादेशस्था अज्भ्रस्व-दीर्घ-प्लुतशब्दा विधिप्रदेश आनीयन्ते । परिभाषादेशस्थं इको गुणवृद्धी (पा.सू.१-१-३) इति सूत्रस्थानिकमिक इति षष्ठयन्तं पदं गुणशब्दोच्चारणेन गुणविधायके, वृद्धिशब्दोच्चारणेन च वृद्धिविधायके सूत्र उद्गच्छतीति नियमस्य सारः । तथैव 'अचश्च' (पा.सू. १-२-१८) इति सूत्रस्थमच इति षष्ठयन्तं पदं ह्रस्वदीर्घप्लुतशब्दोच्चारणेन ह्रस्वादिविधायकेषु सूत्रेषु गच्छति । एतादृशी उपस्थितिरनुवृत्तिनिकटवर्तिन्यस्तीत्यनुवृत्तिप्रसङ्गे तस्याश्चर्चापि सान्दर्भिकी । कृदन्तकारकप्रकरणान्तर्गतेषु सूत्रेष्वेतादृशी उपस्थितिः कुत्र कुत्रास्तीत्यत्र विचार्यते ।

### क) 'इकः' इति षष्ठचन्तपदोपस्थितिनिदर्शनम्

गुणविधायकैः सूत्रैर्गुणं वृद्धिविधायकैश्च वृद्धिं समुच्चार्य गुणवृद्धचोर्विहितयोस्तत्र सूत्रयोः षष्ठचन्तीकृतञ्चेक्पदमुपतिष्ठत इति इको गुणवृद्धी (पा.सू.१-१-३) इति सूत्रं नियमयति । तथा सति आद् गुणः (पा.सू.६-१-८७) इति सूत्रेऽपि गुणशब्दोच्चारणेन गुणविधानादिक उपस्थितिरापद्यते परन्तु तत्रोद्देश्यस्य साक्षाद् निर्देशेन तत्रेक्पदं नानीयते परं सार्वधातुकार्धधातुकयोः (पा.सू.७-३-८४) इत्यत्र तु तदभावादिक्पदमानीयत इति तस्य समाधानम् ।

---

[६२]. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा) पूर्ववत्, (१९७४), पृ. ११ ।

सप्तमाध्यायस्य तृतीयपादे पठिते सार्वधातुकार्धधातुकयोः (पा.सू.७-३-८४) इति सूत्रे इकोऽनुवर्तकं नास्ति किमपि पदम्, तथाप्यत्र इको गुणवृद्धी (पा.सू.१-१-३) इत्यस्माद् गुणमानीय गुणशब्दोच्चारणेन गुणो विहित अतोऽत्र इक इति षष्ठचन्तं पदमुपतिष्ठत, ततः सूत्रार्थश्चेदृक् भवति- "अनयोः परयोरिगन्ताङ्गस्य गुणः स्यात्"[४०४] अतो गुणशब्दोच्चारणेन गुणविधानमपि इक इत्यस्योपस्थितौ कारणं मन्यते, तस्याप्यप्रत्यक्षत्वेनानुवृत्तितुल्यत्वा-दुपस्थितिरप्यनुवृत्तिसदृशी ।

ख) 'अचः' इति षष्ठचन्तपदोपस्थितिनिदर्शनम्

ह्रस्वदीर्घप्लुतविधायकैर्विधिसूत्रैः तत्तच्छब्दोच्चारणेन ह्रस्वादिषु विहितेषु 'अचश्च' (पा.सू.१-२-२८) इति सूत्रादच इति षष्ठचन्तं पदमायाति, एतेषामुदहरणं कृदन्ते कारके चानुपलब्धमतो यथाप्राप्तमुल्लिख्यते- सप्तमाध्यायस्य चतुर्थपादे पठितेन ह्रस्वः (पा.सू.७-४-५९) इति सूत्रेण ह्रस्वशब्दोच्चारणेन ह्रस्वो विहितोऽस्ति, अतस्तत्र 'अचश्च' इत्यस्माद्ध्रस्व आगच्छति, तथैव 'अकृत्सार्वधातुकयोदीर्घः' (७-४-२५) इति सूत्रेण दीर्घशब्दोच्चारणेन दीर्घो विहितोऽस्ति तत्रापि नियामकसूत्राद् दीर्घ आगच्छति, तेनैव प्रकारेण वाक्यस्य टेः प्लुत उदात्तः (पा.सू.८-२-८२) इत्यनेन प्लुतशब्दोच्चारणेन प्लुतः कृतो वर्तत, अतस्तत्रापि 'अचश्च' इत्यस्मात् प्लुत आयाति, एतेषु विधानेषु ह्रस्वदीर्घप्लुतशब्दोच्चारणान्येव कारणानि, तानि च प्रत्यक्षतो नानुवर्तितानि तथापि परिभाषादेशाद् विधिदेशे तेषामनुवर्तनदर्शनादनुवृत्तिसदृशानीति मत्वात्रानुवर्तनसदृशत्वेन चर्चितम्

ग) विशेष्यविशेषणयोस्तदन्तविधिनिदर्शनम्

यत्र समानविभक्तिकयोर्विशेष्यविशेषणयोरभेदसम्बन्धेनान्वयस्तत्र येन विधिस्तदन्तस्य (१-१-२७) इति सूत्रेण तदन्तविधिर्निर्दिश्यत इति प्रक्रियाव्याख्याता भट्टोजिदीक्षित एवं ज्ञापयति- "विशेषणं तदन्तस्य संज्ञा स्यात् स्वस्य च रूपस्येति"[४०५] अत एव ओरावश्यके (पा.सू.३-१-२५) अच उपसर्गात्तः (पा.सू.७-४-४७) अचो यत् (पा.सू.३-१-९७) पोरदुपधात् (पा.सू.३-१-९८) ॠदोरप् (पा.सू.३-३-५७) एरच् (पा.सू.३-३-५६) प्रभृतिषु सूत्रेष्वस्यानुवृत्तिमूलकसम्बन्धो दृग्गोचरीभवति, तादृशतदन्तविधिर्न केवलं विशेषणस्यैवाऽपि तु

---

[६३]. पूर्ववत्,पृ. ३९३ ।
[६४].भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा) पूर्ववत्, (१९७४) पृ. १० ।

स्वस्य रूपस्यापि भवतीति नियमनात् एरच् इति सूत्रेणेवर्णान्तेभ्यः चिजिप्रभृतिभ्यो धातुभ्यः स्वरूपबोधकादिधातोश्चाच्प्रत्ययो विधीयते । तथैव 'ओरावश्यके' इति सूत्रस्थे ओरिति विशेषणेऽन्यत्रापि तदन्तपदाऽऽनयनाद् विधिसूत्रस्थे विशेषणे तदन्तविधित्वरूपसम्बन्धोऽस्तीति निश्चीयते । स च सम्बन्धो यद्यपि कौमुद्यां संज्ञात्वेन व्यवहृतस्तथापि विधिसूत्रे परिभाषाणामुपस्थितिरिवात्रापि संज्ञाया विधावुस्थितिदर्शनादनुवृत्तितुल्यत्वेन सम्बन्धपदेनाभिधीयत इति निष्कर्षः ।

### ५.३.१.५ शारदाप्रभायाः कृदन्तकारकयोरनुवृत्तिसूचनम्

शारदाप्रभायाः कृदन्तकारकखण्डयोरनुवृत्तेः स्पष्टसङ्केतो मिलति । कौमुद्याः संरचनमंशतः परिवृष्य पूर्वकृदन्तप्रकरणतः प्रारब्धेऽस्मिन् खण्डे प्राथमिकाध्ययनाय निर्धारितेषु सूत्रेषु क्वचित् क्रमभङ्गस्य विद्यमानत्वेऽपि द्वितीयाध्ययनाय निर्धारितेष्टाध्यायीक्रमिकेषु सूत्रेषु तदुदाहरणादिषु तु स्पष्टतयाऽनुवृत्तिः सूचिता विद्यते । अष्टाध्याय्यन्तर्गतस्य तृतीयाध्यायस्य प्रथमपादस्योत्तरार्द्धे निबद्धेऽस्मिन् कृदन्तखण्डे कृदतिङ् (पा.सू.३-१-९३) वाऽसरूपोऽस्त्रियाम् (पा.सू.३-१-९५) प्रभृतीनि सूत्राणि सन्ति । तेषु व्याख्यात्राऽग्रेऽनुवृष्यं पदं समग्रं सूत्रं वा स्थूलाक्षरीकृत्याऽनुवृत्तिः सूचिता, तथैव सूत्रान्ते विन्यस्तैरङ्कैः सूत्रमिदं पदमिदं वैतावत् सूत्रान्तं गच्छतीत्यपि संसूचितम् । बालमनोरमाकारादिभिरिव शारदाप्रभाकारेणाप्यत्र व्याख्येयखण्डस्योपरि मूलपाठं विन्यस्य तदधस्तादुपरि स्थिता विषया विवृताः सन्ति । प्रकृतव्याख्यात्रा तत्रानुवृत्तिसङ्केत एवं कृतः -

| | | | |
|---|---|---|---|
| (क) | (ख) | (ग) | (घ) |
| प्रत्ययः | परश्च | धातोः | ण्वुल्तृचौ[४०६] |

अत्रत्ये ण्वुल्तृचौ (पा.सू.३-१-२) इति सूत्रे प्रत्ययः (पा.सू.३-१-१), परश्च (पा.सू.३-१-२), धातोः (पा.सू.३-१-९) एतेभ्यः सूत्रेभ्योऽनुवृत्तिरागच्छतीति व्याख्याकारोऽयं सूचयति । अत्र कर्तरि कृत् (पा.सू.३-४-६७) इति सूत्रमपकृष्यते तथैव कृदतिङ् (पा.सू.३-१-९३) इति सूत्रमप्यावर्तते, एतानि सर्वाणि सम्मेल्य धातोः परे कर्त्रर्थकौ ण्वुल्तृच्प्रत्ययौ भवत इत्यर्थो निष्पद्यते । प्रकृतव्याख्यात्रा यद्यप्यत्र कर्तरि कृत् (पा.सू.३-४-६७) कृदतिङ् (पा.सू.३-१-९३)

---

[४०६] हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. १६९ ।

इत्यनयोरुल्लेखो न कृतः सम्भवतो विस्तरभयात् पूर्वोक्तं सूत्रद्वयं नोपन्यस्तं तथापि कृदतिङ् इति सूत्रेऽनुवृत्तिसीमां निर्धारयता 'ण्वुल्तृचौ' इति सूत्रमप्यन्तर्गर्भितमत तदप्यत्रानीयत इति निश्चितम् । शारदाप्रभाकारेण त्यक्तं द्वितीयं कृदतिङ् इति सूत्रन्तु कौमुदीकारेण दीक्षितेन ण्वुल्तृचौ इति सूत्रव्याख्यानक्रमेऽत्र कर्तरि कृदित्यपकृष्यत इति स्पष्टतया समुल्लिखितमतोऽत्र तदपकृष्यत इति निश्चितम्, अतः कतिषु सूत्रेष्वनुवृत्तिष्वविद्यमानास्वपि शारदाप्रभाकारोऽयं बहुत्रानुवृत्तिसङ्केतं स्पष्टतया कुरुत इति ज्ञायते । एतस्मादन्यत्र कर्मण्यण् (पा.सू.३-२-१), आतोऽनुपसर्गे कः (पा.सू.३-२-३), क्विप् च (पा.सू.३-२-७६), निष्ठा (पा.सू.३-२-१०२), तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् (पा.सू.३-३-११०) प्रभृतिषु बहुषु सूत्रेषु शारदाप्रभाकरेण कखादिवर्णैः सङ्केतीकृत्य केभ्यः केभ्यः पूर्वसूत्रेभ्योऽनुवृत्तिरागच्छतीति सूचिता वर्तते । अतोऽस्यानुवृत्तिप्रदर्शनशैली न केवलमुत्तरोत्तरगमनसङ्केतमुखी, अपि त्वत्र कुतः ? कानि पदान्यायान्तीत्यपि निदर्शनमुखी विद्यत इत प्रचलिताष्टाध्यायीपाठतो भिन्ना शैली शारदाप्रभाया इति वक्तुं शक्यते ।

### ५.३.२ विग्रहादिभिरूदाहरणादिभिश्च सूत्रार्थापनम्

प्रस्तुतशीर्षके शारदाप्रभाकारेण कृदन्तीयेषु, कारकान्तर्गतेषु सूत्रेषु उदाहरणादिषु च विग्रहसमासौ कथं दर्शितौ ? सूत्रस्थपदसार्थकीकरणायोदाहरणानि प्रत्युदाहरणानि च कथं दर्शितानि ? तानि च पूर्वव्याख्यातृभ्यः समानीतानि उत मौलिकान्येव वर्तन्त इत्यादिविषयेषु केन्द्रीभूय कृदन्तीयाः कारकीयाश्च विषयाश्चर्च्यन्ते ।

#### ५.३.२.१ कृदन्तकारकयोर्विग्रहसमासप्रयोगः

शारदाप्रभाकारोऽयं प्रायो विग्रहसमासावदर्शयित्वैवाष्टाध्यायीसूत्राण्यर्थापयति । व्याकरणप्रविविक्षून् लक्ष्यीकृत्य तेन प्रकृतव्याख्यानग्रन्थप्रणयनात् तथाकृतं प्रतीयते । तथाप्यस्पष्टस्थलेषु सरलीकरणाय, कठिनपदस्फोरणाय, विग्रहद्वारैवार्थापनसम्भवे चार्थापनाय प्रकृतव्याख्यात्रा क्वचिद् विग्रहसमासौ दर्शितौ । अत्र प्रथमतः कृदन्तान्तर्गतेषूदाहरणेषु प्रकृतव्याख्यात्रा कथं विग्रहः कृत इति ज्ञापनाय कानिचन विगृहीतोदाहरणानि प्रस्तूयन्ते-

| *सूत्रम्* | *विग्रहः* |
|---|---|
| अकर्तरि च कारके... (पा.सू.३-३-१९) | आहरन्ति रसमस्मादिति आहारः । |

| | |
|---|---|
| इङश्च (पा.सू.३-३-२१) | उपेत्यस्मादधीत इति उपाध्यायः। |
| यज्ञे समि स्तुवः (पा.सू.३-३-३१) | समेत्य स्तुवन्ति यस्मिन् स देशः संस्तावः। |
| छन्दोनाम्नि च (पा.सू.३-३-३४) | विस्तीर्यन्तेऽस्माभिर्यस्मिनिति विष्टारः। |
| घञर्थे कः विधानम् (वार्त्तिकम्) | प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः सानुः। |
| राजसूयसूर्यः... (पा.सू.३-१-११४) | सरति आकाशे यः स इति सूर्योऽथवा सुवति कर्मणि लोकं प्रवर्तयतीति सूर्यः। |
| अमावस्यदन्य...(पा.सू.३-१-१२२) | अमा सह वसतोऽस्यां सूर्यचन्द्रमसाविति अमावस्या/ अमावास्या। |
| असूर्यललाटयोः..(पा.सू.३-२-३६) | सूर्यं न पश्यन्तीत्यसूर्यम्पश्या राजदाराः। |

यद्यप्येभिरूदाहरणैः कठिनेषूदाहरणेषु सूत्रस्थेषु पदादिषु च व्याख्याकारोऽयं विग्रहद्वारैवार्थं स्पष्टयतीति ज्ञायते, तथापि बालमनोरमा-तत्त्वबोधिन्यादिषु व्याख्यानेष्विव कठिनपदस्फोरणे सर्वत्र न विग्रहयतीत्यपि बुध्यते तथा सत्यपि विग्रहं विनैवार्थापितेष्वपि सूत्रतो निष्पन्नार्थस्तु सरलतया प्रस्तुतो दृश्यते। एतिस्तुशास्वृदृजुषः क्यप् (पा.सू.३-१-१०९) इति सूत्रे-एति च स्तु च शास् च वृ च दृ च जुष् चेति विग्रहं कृत्वा द्वन्द्वसमासः करणीयो भवति परं शारदाप्रभाकारस्तु विग्रहादिकमदर्शयित्वैव इण्-स्तु-शास्-वृ-दृ-जुष्धातुभ्यः क्यप् प्रत्ययो भवतीत्यर्थं कुरुते। अत्रत्ये सूत्रार्थापने विग्रहाभावेऽपि विग्रहनिष्पनार्थस्तु सूत्रवृत्तौ प्रस्तुतोऽस्त्येव, अतो व्याख्याकारोऽयं प्राथमिकच्छात्रेषु केन्द्रीभूय सूत्रादिकं व्याकुरुत इति निष्कर्षः।

कृदन्तीयेषु सूत्रेषु तादृशपदेषु च प्रकृतव्याख्यात्रा न्यूनतरेषु स्थानेषु विग्रहसमासयोः प्रदर्शितयोरपि उपसर्या काल्या प्रजने (पा.सू.३-१-१०४) इति सूत्रे-कालः प्राप्तोऽस्या इति विग्रहद्वारा तत् सूत्रस्थं काल्यापदम्, लटः शतृशानचावप्रथमासमानाधिकरणे (पा.सू.३-२-१२४) इत्यत्र समानमधिकरणं यस्य तत् समानाधिकरणमप्रथमान्तं समानाधिकरणं यस्य तस्मिन्निति विग्रहद्वारा 'अप्रथमासमानाधिकरण'मिति पदं तथैव 'श्रुयजीषिस्तुभ्यः करणे' (स्त्रियां क्तिन्

पा.सू.३-३-९४ इति सूत्रस्थे) इति वार्त्तिके श्रूयतेऽनयेति श्रुतिरिति विग्रहद्वारा तत्पदञ्चार्थापितं दृश्यते । प्रकृतव्याख्यात्रा- संज्ञायां समज-निषद-निपत-मन-विद-षुङ्-शीङ्-भृञिणः (पा.सू.३-३-९९) इति सूत्रे तु सूत्रस्थानां प्रत्येकपदानामुदाहरणानि विग्रहद्वारैव दर्शितानि सन्ति अतः पूर्वप्रकरणेषु न्यूनसूत्रेष्वेव विग्रहेषु विद्यमानेष्वप्यत्र तु विग्रहाधिक्यं दृश्यते ।

शारदाप्रभाकारेण प्राथमिकाध्ययनाय निर्धारितेषु कारकीयसूत्रेषु, वार्त्तिकेषु, तत्रत्यरूपेषु च कृदन्तापेक्षया विग्रहस्याल्पत्वं प्राप्यते । अत्र स्थितेषु प्रथमादिविभक्तिविधायकेषु सूत्रेषु मध्ये प्रातिपदिकार्थः...(पा.सू.२-३-४६) इत्यत्र विग्रहस्यावश्यकत्वेऽपि प्रकृतव्याख्यात्रा स न प्रदर्शितः । तथैव कर्तृकरणयोस्तृतीया (पा.सू.२-३-१८) इति सूत्रेऽपि विग्रहो न कृतः, बालमनोरमाकारस्तु प्रातिपदिकार्थसूत्रे नियतोपस्थितिकः प्रातिपदिकार्थ इति लक्षयन् नियता उपस्थितिर्यस्य स इति विगृह्णन् च यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स प्रातिपदिकार्थ इति स्पष्टीकरोति । तथैव प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्चेति विग्रहद्वारा तेषामर्थादिकमपि स्पष्टयति ।[४०७] पदमञ्जरीकारोऽप्यत्र विग्रहप्रदर्शनं न कुरुते तथापि स अन्वयव्यतिरेकाभ्यां यस्य योऽर्थः प्रतीतो यमर्थं प्रातिपदिकं न व्यभिचरति, येन विना प्रातिपदिकस्याप्रयोगः स सर्वः प्रातिपदिकार्थः[४०८] इति व्याख्याति । पदमञ्जर्यादीनां व्याख्यानं विशिष्टमतोऽत्रत्यः पारिभाषिकप्रयोगोऽपि स्वाभाविकः । शारदाप्रभाकारेणापि प्रातिपदिकार्थलिङ्ग...सदृशेषु विग्रहद्वारैवार्थापनीयेषु सूत्रेषु तु विग्रहः करणीयः । अत्रत्यानि बहूनि सूत्राणि विग्रहैर्विनाऽर्थापितेष्वपि स्वामीश्वराधिपतिः (पा.सू.२-३-३९), करणे च स्तोकाल्प...(पा.सू.२-३-३३), पृथग्विनानाना...(पा.सू.२-३-३२), कालाध्वनोरत्यन्तसंयोगे (पा.सू.२-३-५) प्रभृतिषु सूत्रेषु विग्रहेण व्यङ्ग्यमर्थं प्रस्तुत्य सूत्रमर्थापितं दृश्यते । एतेषु सूत्रेषु प्रदर्शितैर्विग्रहैः सूत्रार्थः स्फुट इति न्यूनतरेषु स्थानेषु विग्रहप्रदशनस्य धर्म इति निष्कर्षः ।

### ५.३.२.२ कृदन्तकारकयोरुदाहरणप्रयोगः

शारदाप्रभायाः कृदन्तकारकात्मको भागः सूत्रस्थानां पदानां पदकृत्यप्रदान उदाहरणदाने च सबलः प्रतीयते । प्रकरणेऽस्मिन् कौमुदीकारो दीक्षितो निदर्शनार्थं स्वल्पान्येवोदाहरणानि प्रस्तौति परं शारदाप्रभाकारस्तु काशिकासरणिमनुकुर्वन् प्रायो विधिसूत्रे

---

[६६]. वासुदेवदीक्षितः(व्या.), *वैयाकरणसिद्धान्तकौमुदी* (प्रथमो भागः),वाराणसी : चौ.सु.भा.प्र., (१९९६)पृ.६७८ ।
[६७]. हरदत्तः (व्या.), *काशिकावृत्तिः* (द्वितीयो भागः), पूर्ववत्, (१९६५), पृ. २०१ ।

स्थितानां पदानामुदाहरणानि ददाति । कृदन्तीये न भाभूपूकमिगमिप्यायीवेपाम् (पा.सू.८-४-३४) इति सूत्रे कौमुदीकारः प्रभानीयम्, प्रभवनीयम्, प्रभापनीयमित्येवोदाहरणानि पुरस्कुरुते परं शारदाप्रभाकारस्तु सूत्रस्थानां प्रत्येकपदानामुदाहरणानि- प्रभानीयम्, प्रभवनीयम्, प्रपवनीयम्, प्रकमनीयम्, प्रगमनीयम्, प्राप्यायनीयम्, प्रवेपनीयमिति दर्शयति । तेनैव प्रकारेण दिवाविभानिशा...(पा.सू.३-२-२१) इति सूत्रे पाणिनिना दिवादयः सप्तविंशतिसङ्ख्यकाः परिगणितेष्वपि कौमुदीकारेण तु तत्र द्वादशानामेवोदाहरणानि समुल्लिखितानि । अत्र शारदाप्रभाकारस्तु सप्तविंशतिसङ्ख्यकान् दिवादीनुदाहरति । कारकप्रकरणस्थे पृथग्विनानाना...(पा.सू.२-३-३२) इति सूत्रेऽपि कौमुदीकारः पृथगित्यस्य पृथग्रामेण रामाद् रामं वेत्युदाहरणं प्रस्तूय एवं विना नाना [४०९] इत्येवोल्लिखति परं शारदाप्रभाकारस्तु त्रयाणामेवोदाहरणानि समुल्लिख्य स्वव्याख्याने उदाहरणाधिक्यं दर्शयति । तथैव कारकप्रकरणान्तर्गते 'अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च' इति वार्त्तिकव्याख्यानेऽपि शारदाप्रभाकारेणाधिकान्युदाहरणानि प्रस्तुतानीत्ययं बहुभिरूदाहरणैः पाणिनीयं सूत्रं विवृणुत इति वक्तुं शक्यम् ।

शारदाप्रभायाः कृदन्तकारकखण्डयोर्नैकानि मौलिकोदाहरणानि प्राप्यन्ते, तानि च प्रायो नेपालदेशसम्बद्धानि सन्ति, तेषां निदर्शनायात्र कानिचन प्रस्तूयन्ते-

| *मौलिकोदाहरणम्* | *तत्स्रोतसङ्केतः* |
|---|---|
| देवभाषायां व्यवहरमाणः | ताच्छील्यवयोवचन...(पा.सू.३-२-१२९) |
| हिण्डमानः पठति | लटः शतृशानचाव... (पा.सू.३-२-१२४) |
| ऋते जगदम्बाकृपाम् | अभितः परितः ...(वार्त्तिकम्) |
| मनसा शल्यानकूटं गच्छति | गत्यर्थकर्मणि ...(पा.सू.२-३-१२) |
| छात्रेण कलमेन लिखितोऽनुवादः | कर्तृकरणयोः ...(पा.सू.२-३-१८) |
| छात्रेभ्यो वृत्तिं ददाति | चतुर्थी सम्प्रदाने ...(पा.सू.२-३-१३) |

[४०९]. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सुबन्तः) पूर्ववत्, (१९८७), पृ. ७७१ ।

जगदम्बायै नमः नमः स्वस्ति ...(पा.सू.२-३-१६)

कुतो भवान् ? प्रतिष्ठानपुरात् ? गम्यमानापि क्रिया... (वार्त्तिकम्)

गोमुख्याः पूर्वस्यां दिशि दुर्गाहीरेश्वर-पञ्चायतनमन्दिरं विराजते

अन्यारादितरर्ते (पा.सू.२-३-२९)॥

हिमालयात् सप्तगण्डक्यः सप्तकौशिक्यश्च प्रभवन्ति भुवः प्रभवः (पा.सू.१-४-३१)

मध्यदेशीयेभ्यः पर्वतदेशीयाः स्वस्थतराः पञ्चमी विभक्तेः (पा.सू.२-३-४२)
प्रतिष्ठानपुरात् काष्ठमण्डपं दूरे

रुरुक्षेत्रं समीपे सप्तम्यधिकरणे (पा.सू.२-३-३६)

राष्ट्रोन्नत्यामिच्छाऽस्ति आधारोऽधिकरणम् (पा.सू.१-४-४५)

एतेभ्योऽन्यान्यपि बहूनि मौलिकोदाहरणानि प्रत्युदाहरणानि च प्रकृतप्रकरणे प्राप्यन्ते, अतो मौलिकोदाहरणप्रयोगेऽपि प्रकरणमिदं समृद्धमस्तीति निश्चितम् ।

### ५.३.३ शङ्कामुद्भाव्य समाधानम्

शारदाप्रभायाः कृदन्तकारकखण्डयोः प्रसङ्गतः समागताः शङ्काः समुद्भाव्य समाहिता दृश्यन्ते । विशेषतः काशिकाकारेण तद्व्याख्यातृभिर्हरदत्तजिनेन्द्रबुद्ध्यादिभिः, कौमुदीकारेण दीक्षितेन तद्व्याख्यातृभिर्ज्ञानेन्द्रसरस्वत्यादिभिश्चोत्थापिताः समाहिताश्च शङ्का अत्रापि स्वशैल्यामुत्थाप्य समाहिताः सन्ति । यद्यपि केषुचित् स्थानेषु पूर्ववर्तिभिः समुत्थापिताः शङ्का अपि सम्भवतो विस्तरभयादथवा प्रविविक्षुभारभयाद् नोत्थापिताः प्रतीयन्ते ।

प्रस्तुतग्रन्थान्तर्गते प्रकृतप्रकरणे शारदाप्रभाकारेण समुत्थापितासु शङ्कासु तत्समाधानेषु च केन्द्रीभूय विषयविश्लेषणं विधीयते ।

### ५.३.३.१ 'असूर्यम्पश्या' इत्यत्र सूर्यशब्देन सह नञ्समासान्वयसमर्थनम्

सूर्यं न पश्यन्तीति *असूर्यम्पश्या* इति समस्तपदे नञो दृश्धातुना सह सम्बन्धेऽपेक्षितेऽपि प्रस्तुतप्रसङ्गे तु सूर्यशब्देन सह तदभावात्, तत्कथं सम्भव इति शङ्कायां समुदितायां शारदाप्रभाकार आह "नञो दृशिना सह सम्बन्धेऽपेक्षितेऽपि अत एव ज्ञापकात् सूर्यशब्देन सामर्थ्याभावेऽपि समासः ।"[४१०] वस्तुतो नञ्समासस्य सम्बन्धो दृश्धातुना सहैवावश्यकस्तथापि सूत्रकारेण 'असूर्यललाटयोः दृशितपोः' (पा.सू.३-२-३६) इति सूत्रं प्रणयता ज्ञापनेन असूर्यम्पश्या राजदारा इति प्रयोगेऽसमर्थसमासः प्रदर्शितः । सूर्यशब्देन तस्यान्वयो जात इति व्याख्यातुराशयः । अत्र नञः सूर्यशब्देन सह कुतोऽसामर्थ्यमिति जिज्ञासायां बालमनोरमाकारः प्राह- "सूर्यं न पश्यन्तीत्यर्थं नञो दृशिनाऽन्वितत्वेन सूर्यशब्देनान्वयाभावादित्यर्थः"[४११] अतः सूत्रविधानसामर्थ्यादसमर्थसमासोऽपि विधीयते । अत्र न्यासकारोऽपि समासश्चायमसामर्थ्येऽपि भवतीति गमकत्वादस्मादेव वचनाद्वेति कथयन्नसामर्थ्येऽपि समाससम्भव इति सङ्केतयति [४१२] अतोऽसामर्थ्येऽपि गमकत्वात् सूत्रप्रणयनाद्वा नञ्समासोऽयमिति निष्कर्षः ।

### ५.३.३.२ 'युवोरनाकौ' इति सूत्रे यण्ग्रहणे मतभेदविमर्शः

युवोरनाकौ (पा.सू.७-१-१) इति सूत्रे युवु इत्यत्र यकारवकारौ सानुनासिकौ गृह्येत उत निरनुनासिकावपीति शङ्कायां शारदाप्रभाकारः प्राह-"युँ वुँ इत्यनुनासिकौ गृह्येत इति ।"[४१३] यद्यत्र निरनुनासिको गृह्येत तदा ऊर्णाया युस् (पा.सू.५-२-१०३) इति विहितस्य युसो भुजिमृङ्भ्यां युक्त्युकौ (उ.सू. ३-२१) इति कृतयोर्युक्त्युक्प्रत्यययोश्चानादेशापत्तेः[४१४] अत एवात्र सानुनासिको यण् गृह्यते । यणि निरनुनासिकसानुनासिकभेदस्तु प्रतिज्ञानुनासिकक्याः पाणिनीया इत्यनुसारेण व्यवहारतो वा ज्ञायते ।

---

६९. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.१७८ ।
७०.वासुदेवदीक्षितः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (कृदन्तखण्डः) पूर्ववत्, (१९८७) पृ. ५८ ।
७१. हरदत्तः (व्या.), *काशिकावृत्तिः* (द्वितीयो भागः), पूर्ववत्, (१९६५), पृ. ५६६ ।
७२. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.५६७ ।
७३. वामनजयादित्यौ, *काशिकावृत्तिः* (पञ्चमो भागः), वाराणसी : तरापब्लिकेसन, (१९६७) पृ. ५२५ ।

प्रकृतसूत्रस्थं युवोरिति पदं समाहारद्वन्द्वेन षष्ठ्यैकवचनं साधुरुत इतरेतरद्वन्द्वेन षष्ठीद्विवचनमित्यपरसन्देहोऽपि जायते । अस्मिन् विषये पक्षद्वयमेव समुद्भाव्य समालोच्य च व्याख्यातृभिः स्वमतं प्रस्तुतम्, अत्रोभौ पक्षावेव समुचिताविति विषये व्याख्यातॄणां तर्कप्रमाणादीनि प्राप्यन्ते । अत्र पक्षद्वयमेव चर्च्यते ।

## क) युवोरिति षष्ठचेकवचनस्य साधुत्वसमर्थनम्

भानुगुरुशब्दादीनां षष्ठचैकवचने यथा- भानोः गुरोरिति रूपं भवति तथैव युवोरित्यत्रापि युँश्च वुँश्च इति विग्रहेण समाहारद्वन्द्वेन षष्ठचैकवचने 'युवोः' भवतीति व्याख्यातॄणामाशयः । यद्यपि तस्मिन् पक्षे स नपुंसकम् (पा.सू.२-४-१७) इति नपुंसकवद्भावेन 'वृद्धचौत्वगुणवृद्धितृज्वद्भावेभ्यो नुम् पूर्वविप्रतिषेधेन' इति वार्त्तिकनियमेन घेर्ङिति (पा.सू.७-३-१११) इत्यस्य गुणं प्रबाध्य इकोऽचि विभक्तौ (पा.सू.७-१-७३) इति नुमागमेन युवुन इत्यापद्यते, तथापि 'आगमशास्त्रमनित्यम्' इति परिभाषाबलेनागमशास्त्रस्य सार्वत्रिकाभावेनात्रापि नुमोऽभावे न दोष इति व्याख्यातॄणामाशयः । अत्र काशिकाकृत् तद्व्याख्यातारौ न्यासपदमञ्जरीकारौ सिद्धान्तकौमुदीशारदाप्रभाकाराश्च सहमताः । अत्र शारदाप्रभाकार आह- "आद्ये (षष्ठचैकवचनं साधुरिति पक्षे) आगमशास्त्रस्यानित्यत्वान्नुमोऽभाव इति अथवा समाहारद्वन्द्वेऽपि लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति नियमात् पुँलिङ्गनिर्देशः ।" [४१५] एभिर्विश्लेषणैः युवोरित्यत्र षष्ठचैकवचनं साधुरिति निश्चीयते ।

## ख) युवोरित्यत्र षष्ठीद्विवचनस्य साधुत्वविचारः

युँश्च वुँश्च तयोरिति विग्रहेणेतरेतरयोगद्वन्द्वसमासेन षष्ठीद्विवचनमपि मन्तुं शक्यत इति द्वितीयपक्षीयाणां व्याख्यतॄणां मतम् । यद्यपि तस्मिन् पक्षे युवू+ओस् इत्यवस्थायां यणादेशेन युव्वोरिति वकाराधिक्यमापद्यते तथापि छान्दसविधिना वलोपेन पुनरपि युवोरिति कृत्वा तत्समाधानसम्भवात्, अर्थात् छन्दोवत् सूत्राणि भवन्तीति न्यायात् तां 'यथेष्कर्तारमध्वरम्' इत्यत्र निसो नकारलोपवदत्रापि वलोपो द्रष्टव्यः [४१६] इति व्याख्यातुराशयः । शारदाप्रभाकारो द्वितीयपक्षेऽपि सहमतस्तद्विषये स आह- "द्वितीयपक्षे (द्विवचनपक्षे) सौत्रत्वाद्

---

७४. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. ५६७ ।
७५. हरदत्तः (व्या.), *काशिकावृत्तिः* (पञ्चमो भागः), पूर्ववत्, (१९६७), पृ. ५२७ ।

वकारलोपः ।"[४१७] छन्दसि बाहुलकेन निपातनविधिना वा वर्णलोपं विधातुं शक्यत्वात् तेनैव विधिना 'इष्कर्तारमध्वरम्' इति प्रयोगे च निसो नकारलोपवच्चात्रापि वलोपो मन्तव्य इति द्विवचनपक्षीयाणामाचार्याणामाशयः । काशिकायां तद्व्याख्यानेषु शारदाप्रभायाञ्च वलोपपक्षोऽपि स्वीकृत अतः सोऽपि साधुरिति निष्कर्षः ।

### ५.३.३.३ 'चजोः कु घिण्यतोः' इति सूत्रे याथासङ्ख्यविधिविचारः

चजोः कु घिण्यतोः (पा.सू.७-३-५२) इति सूत्रे चजोरिति कार्यिणोः घिण्यतोरिति निमित्तयोश्च यथासङ्ख्यात्तत्र यथासङ्ख्यमनुदेशः समानम् (पा.सू.१-३-१०) इति घिति परे कुत्वेन चकारः, णिति परे च जकारः कथन्न भवतीति शङ्कायां पूर्वव्याख्यतॄनुद्धरन् शारदाप्रभाकार एवं समाधत्ते "इह स्थानिनिमित्तयोर्यथासङ्ख्यं न, तेन रक्तं रागात् (पा.सू.४-२-१) इति निर्देशात्"[४१८] अर्थात् तत्सूत्रस्थे रागपदे यथासङ्ख्यनियमं विनैव कुत्वविधानात् तन्न प्रवर्तत इति ज्ञायते । तथाहि- तेन रक्तं रागात् इति सूत्रस्थं रागपदं रञ्जेर्घञ्प्रत्ययेन जकारस्य चजोः कुरिति कुत्वेन च निष्पन्नम्, यथासङ्ख्ये सति तु जकारस्य णिति पर एव कुत्वं प्रसज्येत । सूत्रकारेण पाणिनिना घिति परेऽपि जकारस्य कुत्वं विहितमतोऽत्र यथासङ्ख्यं न प्रवर्तत अपि तु स्थानेऽन्तरन्तमः (पा.सू.१-१-५०) इति नियमेन चकारस्य ककारो जकारस्य गकारश्च विधीयत इति निष्कर्षः ।

### ५.३.३.४ दो दद्घोरिति सूत्रेण विधीयमानादेशविचारः

दो दद्घोः (पा.सू.७-४-४६) इति सूत्रे आदेशबोधकं पदं दत्-दद्-दध्-दथ्सु किं समुचितमित्याशङ्कायां व्याख्यातृभिः तान्त-दान्त-धान्त-थान्तश्चेति चत्वारो विकल्पाः प्रस्तुताः सन्ति । अत्र तान् सर्वान् व्याख्याय कतमो ज्याय इत्यपि इति निर्धार्यते, तथाहि-

#### क) तान्ते दीर्घप्राप्तिरूपदोषपरिहारः

दो दद् घोरिति सूत्रे तान्त 'दत्' इत्युपदिश्य तकारस्य जश्त्वेन दकारं विधाय ददिति कृतेऽपि प्रकृतसूत्रेण विधीयमान आदेशस्तु दत् एव भवति, अतोऽनेन दत् आदेशे विदत्+तम् इत्यवस्थायां उपसर्गात् परस्य दकारस्य दस्ति (पा.सू.६-३-१२४) इति सूत्रेण दीर्घः प्रसज्यते,

---

७६. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. ५६७ ।
७७. पूर्ववत्, पृ. ५६७ ।

तमेव दोषं काशिकाकार एवमाह- तान्ते दीर्घत्वाख्यो दोष इति । वस्तुतो दस्ति इति सूत्रे तकारादावुत्तरपदे उपसर्गस्येक दीर्घ इत्यर्थकरणात् पूर्वोक्तो दोषो वार्यत इति पूर्वव्याख्यातृभिः कथितं वचनं सरलतयोपस्थापयन् शारदाप्रभाकारः प्राह-"वस्तुतस्तु तकारान्तादेशेऽपि दीर्घविधायकसूत्रे तकारादावुत्तरपद इत्यर्थकरणान्न दोष इति"[४१९] अतस्तान्तेऽपि न दोष इति निष्कर्षः ।

ख) दान्ते निष्ठानत्वप्राप्तिदोषपरिहारः

प्रकृतसूत्रे दान्तनिर्देशेऽनेन विधीयमान आदेशोऽपि दद् भवितुमर्हति । एवञ्च दा इत्यस्य स्थाने दद् आदेशे विदद्+तम् इत्यवस्थायां रदाभ्यां निष्ठातो नः पूर्वस्य च दः ( पा.सू.८-२-४२) इति निष्ठातकारस्य नकारः प्रसज्यत इति शङ्कां काशिकाशारदाप्रभाकारौ सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषाद्वारा निवारयतः । कष्टाय क्रमणे इति निर्देशेन अनित्याया अपि परिभाषाया इष्टस्थले प्रवृत्तिस्वीकारादेव प्रकृते निष्ठानत्वं वार्यत अतो दान्तपाठेऽपि न दोष इति निष्कर्षः ।

ग) धान्ते धत्वप्राप्तिदोषपरिहारः

प्रकृतसूत्रं दोः दध् घोरिति कृत्वा धकारस्य जश्त्वेन दकारं विधाय पूर्ववत् सूत्रं विन्यस्यते चेद् दाधातोः क्तप्रत्यये प्रकृतसूत्रेण दध् आदेशे च दध्+त इत्यवस्थायां झषस्तथोर्धोऽधः (पा.सू.८-२-४०) इति तकारस्य धकारं प्रसज्यत इति चेत्तदपि समादधन्तः काशिकाशारदाप्रभाकारा आहुः- अत्रापि सन्निपातविरोधाद् धत्वं निवार्यत इति [४२०] अतो धान्तेऽपि न दोष इति निष्कर्षस्तेषाम् ।

घ) थान्तेऽदोषविमर्शः

दो दथ् घोरिति सूत्रं पठित्वा थकारस्य जश्त्वेन दकारं कृत्वा प्रकृतसूत्रेण दथ् आदिश्यते चेद् न कश्चिद्दोषस्तस्मात् प्रकृतसूत्रे कृतजश्त्वः थान्तो वेदितव्य इति काशिकाशारदाप्रभाकारादीनामाशयः । अत्र तान्ते दस्ति इति सूत्रे नकारादावुत्तरपद इति

---

[७८]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. ६५० ।
[७९]. पूर्ववत्,पृ.६५७ ।

न्यासाद् दान्ते धान्ते च सन्निपातविरोधान्न दोषस्तस्मात् चतुर्विधोऽपि न्यासो ज्याय इति व्याख्यातॄणामभिमतं तदेव निष्कर्षश्च ।

### ५.३.३.५ 'नासिकास्तनयोर्ध्माधेटोः' इति सूत्रे स्तनशब्दस्य पश्चप्रयोगविचारः

नासिकास्तनयोर्ध्माधेटोः (पा.सू.३-२-२९) इत्यत्र विहितयोः नासिकास्तनयोर्द्वयोः स्थानिनोर्मध्ये स्तनस्याल्पाच्तरत्वेन अल्पाच्तरम् (पा.सू.२-२-३४) इति सूत्रनियमेन नासिकाशब्दतः पूर्वप्रयोग आवश्यकेऽपि सूत्रकारेण कथं पश्चात् प्रयोगः कृत इति शङ्कां समादधन् शारदाप्रभाकार आह- "अल्पाच्तरस्य स्तनशब्दस्य पूर्वनिपाते कर्तव्ये परनिपातसामर्थ्यादिदं ज्ञायते ।" [४२१] अर्थादत्र स्थान्यादेशयोः समानयोरपि यथासङ्ख्यं नादिश्यते यतो हि महर्षिपाणिनिना प्रकृतसूत्रस्थस्तनशब्दस्याल्पाच्तरत्वेऽपि पूर्वप्रयोगो न कृतः। अनेन प्रकारेण पूर्वप्रयोगाभावादल्पाच्तरपूर्वप्रयोगत्वं यथासङ्ख्यत्वञ्च न सार्वत्रिकमिति निष्कर्षः ।

### ५.३.३.६ प्रातिपदिकार्थसूत्रघटकप्रातिपदिकार्थत्वविचारः

पदं पदं प्रतिपदं प्रतिपदे भवं प्रातिपदिकं प्रातिपदिकस्यार्थः प्रातिपदिकार्थ इति व्युत्पत्या निष्पन्नेन प्रातिपदिकार्थशब्देन-

एकं द्विकं त्रिकं चाऽथ चतुष्कं पञ्चकं तथा ।

नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः' [४२२]

इति जाति-व्यक्ति-लिङ्ग-सङ्ख्या-कारकाणि पञ्च प्रातिपदिकानीति गृह्यतेऽथवैकं जातिर्लाघवेन तस्यैवौचित्यादिति कौण्डभट्टविचारो [४२३] अथवा 'प्रवृत्तिनिमित्तं जातिः तदाश्रयश्च प्रातिपदिकार्थः' इति नागेशलक्षणमुत 'स्वार्थद्रव्यलिङ्गसङ्ख्यैव प्रातिपदिकार्थ इति कैयटमतमेव स्वीकरणीयमित्यासु नैकासु शङ्कासु समुदितासु प्रकृतसूत्रे नियतोपस्थितिकः प्रातिपदिकार्थ इति परिष्कारेण प्रातिपदिकार्थशब्देन प्रातिपदिकगम्यलिङ्गसङ्ख्यादिरहितसामान्यार्थ एव गृह्यत

---

८०. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ. १७७ ।
८१. भट्टोजिदीक्षितः (कारिकाकारः), *वैयाकरणभूषणसारः,* पूर्ववत्, (१९८५), पृ. २९७ ।
८२. कौण्डभट्टः, *वैयाकरणभूषणसारः,* पूर्ववत्, (१९८५) पृ. २९७ ।

इति भट्टोजिदीक्षितमतं वर्तते ।[४२४] यतो हि दीक्षितः प्रातिपदिकार्थसूत्रे लिङ्गसङ्ख्यादिकं पृथगुपन्यस्य प्रातिपदिकार्थशब्देन शब्दगम्यमर्थमेवाह-अत्र शब्दगम्यार्थस्यैव ग्रहणाद् गोशब्दोच्चारणेन सास्नलाङ्गूलादिमत् पशुस्वरूपमेव गृह्यते, अस्मात् कारणाद् गोशब्दात् प्रातिपदिकार्थमात्रे (सास्नलाङ्गूलादिमत्वे पशुस्वरूपबोधे) एव प्रथमा विधीयते । शारदाप्रभाकारोऽपि विषयमिममेवं प्रस्तौति-"प्रातिपदिकार्थमात्रे प्रथमाविभक्तिर्भवति अर्थात् प्रथमा विभक्तिः प्रातिपदिकार्थमात्रं बोधयति[४२५] यद्यपि लिङ्गसङ्ख्यापरिमाणेषु कर्तरि कर्मणि जात्यादिषु च प्रथमा विधीयते तथापि तैरवबोधितोऽर्थस्तु द्वितीयः, अर्थात् प्रातिपदिकार्थबोधोत्तरबोध्य एव, अस्मात् कारणात् प्रातिपदिकार्थबोधोत्तरं लिङ्ग-सङ्ख्या-कारकादिषु बोधितेष्वपि न हानिरिति निष्कर्षः ।

कृदन्तकारकात्मके प्रस्तुतप्रकरणे एताभ्य अन्या अपि अनेकाः शङ्काः प्राप्यन्ते, तासु ईद्यति (पा.सू.६-४-६५) इति सूत्रे दीर्घेकारपाठप्रयोजनोपस्थायित्री, आने मुक् (पा.सू.७-२-८२) इति सूत्रेण विहितस्य मुकः सार्वत्रिकाभावबोधिका, विदेः शतुर्वसुः (७-१-३६) इत्यत्र शतुः स्थानिवत्वेनैव वसावप्युगित्वे सिद्धे किमर्थं तस्योगित्करणमिति विषयिणी, सूददीपदीक्षश्च (पा.सू.३-२-१५३) इति सूत्रेण सूदेर्युज्निषेधाद् मधुसूदन इति कथं सिद्ध्यतीति विषयसम्बद्धा, अत्रैव नमिकम्पि...(पा.सू.३-२-१६७) इत्यनेन रप्रत्ययेन बाधेन सिद्धे सूददीपदीक्षश्च इति सूत्रेण पुनर्दीपेः प्रतिषेधविधानसम्बद्धा, अकथितञ्च (पा.सू.१-४-५१) इति सूत्रसम्बद्धे सुधां क्षीरनिधिं मथ्नातीत्युदाहरणे कस्याकथितत्वमिति विषयसम्बद्धा, साधकतमं करणम् (पा.सू.१-४-४२) इति सूत्रे साधकपदविग्रहे कर्तृकरणार्थयोर्मध्ये कोऽभिप्रेत इत्यभिप्रायमूला, अपादाने पञ्चमी (पा.सू.२-३-२८) इति सूत्रोदाहरणे वृक्षात् पत्रं पततीत्यस्य निषेधवाक्येऽपायत्वं कथमायातीति विषयसम्बद्धा, आधारोऽधिकरणम् (पा.सू.१-४-४५) इति सूत्रे कर्तृकर्मनिष्ठक्रियाधारयोः क्रियया सह कथं प्रत्यक्षान्वय इति विषयसम्बद्धा चेति अनेकाः शङ्का अत्रोत्थापिता दृश्यन्ते, तासां समाधानमपि शारदाप्रभाकारेण सूत्रात्मकतया कृतमस्ति, तथाप्यत्र विस्तारभयादित्येव ।

अत्र व्याख्याकारोऽयं कतिषु सूत्रेषु शङ्कोत्थापनम्, तदुपरि पूर्वव्याख्यातॄणां मतसमुल्लेखनं तत्र स्वकीयविचारप्रकटनञ्च कुरुते चेत् कतिपयेषु स्थानेषु तु सूत्रात्मकतया

---

८३. रङ्गनाथशर्मा (व्या.), *वैयाकरणसिद्धान्तकौमुदी,* (कारकखण्डः),वाराणसी : भा.प्र.वि.प्र., (१९९७), पृ.३ ।
८४. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.१२० ।

सङ्केतमात्रं विधत्ते । उपरितनेन विवेचनेन ज्ञायते यत् सामान्यशङ्कोत्थापनेन समाधानं शारदाप्रभाया अभिमतमिति ।

### ५.३.४ रूपसिद्धिप्रक्रियावबोधः

शारदाप्रभायाः कृदन्तकारकखण्डयो रूपसिद्धिप्रक्रियायाः सामान्यसङ्केतः प्राप्यते । प्रकृतव्याख्याता व्याख्यानग्रन्थमिमं द्विधा विभज्य विषयान् प्रस्तौति, तयोर्मध्ये मूले सूत्रमुदाहरणमुदाहरणप्रत्युदाहरणयोर्विग्रहः, सूत्रवार्त्तिकादिसम्बद्धाः शङ्काः, तासु मत-मतान्तराणि च समुल्लिखति चेद् व्याख्यानखण्डे तु मूलस्थं सूत्रवार्त्तिकादिकं व्याख्याय रूपसाधनसङ्केतमात्रं करोति । अनयैव प्रक्रियया कृदन्तेऽपि विधिसूत्रस्थानां पदानां प्रायो रूपाणि दर्शयित्वा सङ्केतेन तानि साधयति । व्याख्यातासौ प्रकरणारम्भे विस्तरशो रूपं साधयति, तत्क्रमे मूल एव विग्रहं कृत्वा व्याख्याने तत्र कः प्रत्ययो भवतीति सङ्केतयति । एतादृशमुदाहरणं सुपिस्थः (पा.सू.३-२-४) इति सूत्रे प्राप्यते । अत्र 'द्विपः' इति रूपसिद्धये सुपीति योगविभागं कृत्वा उक्तं रूपं साधयति, तत्क्रमे मूल एव द्वाभ्यां (मुखशूण्डाभ्यां) पिबतीति विग्रहं कृत्वा व्याख्याने सुबन्ते उपपदे आदन्ताद्धातोः कः प्रत्ययो भवतीति अर्थापयति, अस्मादेव कारणादादन्तात् पाधातोः कप्रत्ययेन स्वादिकार्येण च द्विप इति रूपं सिद्ध्यति । अनेन प्रकारेण धातुप्रत्यययोः सङ्केतमात्रं विधत्ते । प्रत्ययविधानानुबन्धलोप-प्रातिपदिकसंज्ञादिकन्तु न समुल्लिखति, अतोऽत्र रूपसिद्धे ईषत्सङ्केत एव मिलतीति वक्तुं समुचितं भवति, तथापि विशेषे, प्रकरणारम्भके रूपेऽथवा कठिने प्रयोगे तु हरिप्रसादोऽपि विस्तृततया रूपसाधनं करोति । तादृशनिदर्शनं 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' (पा.सू.३-३-१०) इति सूत्रस्थे 'पठितुं याति' इति रूपे प्राप्यते । तत्र शारदाप्रभाकार आह- "अत्र भविष्यत्कालिकक्रिया पठनक्रिया वर्तते तद्बोधकश्च पठ्धातुः पठननिमित्ता क्रिया च गमनक्रियाऽस्ति, तद्वाचकं पदं प्रकृते यातीति वर्तते, तच्चोपपदमस्तीति बोधनाय श्यामपाट्यां 'श्यामः पठितुं याति' इति वाक्यं लिखेत् ततश्छात्रैरेव पठ्धातोस्तुमुन्प्रत्ययं

साधयित्वाऽनुबन्धफालनमार्धधातुकनिमित्तं इडागमञ्च कृत्वा पठितुमिति श्यामपाट्यां दर्शयित्वाऽत्राव्ययत्वात् सुपो लुग् भवतीति वदन्नव्ययसंज्ञया सुब्लुकं कारयेत् ।"[४२६] एतन्निदर्शनमस्या रूपसाधनप्रवृत्तिं पुष्णातीति निष्कर्षः ।

कृदन्तखण्डे कानिचन रूपाणि निपातनद्वारापि साधितानि सन्ति । किमिदं निपातनमित्यत्र हैमवद् वृत्तिकार एकत्राह –

अकृतस्य क्रिया चैव प्राप्तेर्बाधनमेव च ।

अधिकार्थविवक्षा च त्रयमेतन्निपातनम् ॥

अर्थादविहितेऽप्राप्ते वा स्थाने विधानम्, प्राप्तौ बाधनम्, अर्थस्याधिकविवक्षा चेति त्रीणि कार्याणि निपातनेन भवन्तीति प्रकृतलक्षणस्यार्थः ।

निपातनप्रक्रियायां केषुचित् सूत्रेष्वेवैतानि रूपाणि निपातनतः सिद्ध्यन्तीति घोषितानि सन्ति, यथा-अवद्यपण्यवर्याः गहर्यपणितव्यानिरोधेषु (पा.सू.३-१-१०१) इति सूत्रे गर्हायामवद्यम्, पणितव्ये पण्यम् अनिरोधे च वर्यमिति रूपं निपातितं भवतीति सिद्धान्तकौमुदीकार एवमाह-"अत्र वदेर्नञ्युपपदे वदः सुपि क्यप् च (पा.सू.३-१-१०६) इति यत्क्यपोः प्राप्तयोर्यदेव, सोऽपि गर्हायामेवेत्युभयार्थं निपातनम् ।"[४२७] क्यपि सति तु सम्प्रसारणतोऽनुद्यं गुरुनाम इति स्यात् । तथैव पणव्यवहारे स्तुतावित्यस्मादपि प्राप्तं ण्यतमुपधावृद्धिं च प्रबाध्य प्रकृतसूत्रेण निपातनतो यत् प्रत्ययं कृत्वा पण्यमिति साध्यते । तेनैव प्रकारेणानिरोधे क्यपोऽपवादत्वेन यत्प्रत्ययं निपात्य वर्या इति रूपसाधनं क्रियते, अन्यथा वृत्त्या स्यात् अतः प्राप्तेर्बाधनमपि निपातनधर्म इति सिद्ध्यति ।

---

८५. हरिप्रसादशर्माचार्यः (व्या.) *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.१९८ ।
८६. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (कृदन्तखण्डः) पूर्ववत्, (१९८७), पृ. १२ ।

अप्राप्ते स्थाने विधानमपि निपातनं मन्यते, अत एव राजसूयसूर्यमृषोद्यरूच्यकुप्यकृष्टपच्याव्यथ्याः (पा.सू.३-१-११४) इति सूत्रे पठिताः सप्त क्यबन्ताः निपात्यन्त इति व्यवस्था ।[४२८] अत्रत्ये राजसूयपदे राजा सूयते अभिषूयतेऽत्र यज्ञविशेषे इत्यधिकरणव्युत्पत्या निपातनतः क्यप्, अकृत्सार्वधातुकयोर्दीर्घः (पा.सू.७-४-२५) इति सूत्रेण दीर्घश्च साध्यते । अकृदिति सूत्रस्य कृत्येऽप्रवृत्तावपि निपातनत एव तत् प्रवर्तत एतदेवाधिकार्थविवक्षा । अनेन प्रकारेण कृदन्ते कृत्ये च निपातनतो रूपसाधनं विहितमिति तदपि रूपसाधनाङ्गं मन्यते ।

कारकप्रकरणन्तु रूपसाधने न केन्द्रितमपि तु कस्मिन्नर्थे किं कारकम्, का विभक्तिर्वा विधेयेति निर्धारणेऽभिलक्षितमतः प्रकृतव्याख्याकारोऽपि कर्मण्यर्थे द्वितीया, साधनं हेत्वादौ च तृतीया, दानकर्मणि उद्देश्यादिषु च चतुर्थी, अपाये प्रभवाद्यर्थे पञ्चमी,आधारे निमित्तादौ च सप्तमीविधानार्थं कारकव्यवस्थां प्रकल्पयति, तत्र पूर्वव्याख्यातृभिः प्रस्तुतैरूदाहरणैः सह नवीनं नैपालकमप्युदाहरणमुपस्थाप्य कारकार्थं स्पष्टयति । तथैव परम्पराप्रचलितानामधिशीङ्-स्थासादीनां योगे द्वितीया, सहयोगेऽप्रधानेऽन्यत्र च तृतीया, क्रुधद्रुहेर्ष्यासूयार्थादीनां योगे चतुर्थी, अन्यारादितरर्तेप्रभृतीनां प्रयोगे पञ्चमी, तथैव स्वामीश्वराधिपतिदायादादीनां प्रयोगे सप्तमी विभक्तिं यथाशास्त्रं निर्धारयति । अतोऽत्रत्यं रूपसाधनं सामान्यसङ्केतमूलकमेव दृश्यते । शारदाप्रभाकारोऽयं कारकीयप्रक्रियानिदर्शनक्रमे तत्रत्यान् विशेषशब्दानपि प्रसङ्गतो लक्षयति, तदेवं-

| *पारिभाषिकशब्दाः* | *तेषामर्थाश्च* |
|---|---|
| उत्पातः | प्राणिनां शुभाशुभयोः सूचको भूतविकारः । |

---

८७. भट्टोजिदीक्षितः,*वैयाकरणसिद्धान्तकौमुदी* (कृदन्तखण्डः) पूर्ववत्, (१९८७), पृ. १९ ।

| | |
|---|---|
| हेतुः | अनाश्रितव्यापारो हेतुः,यथा-द्रव्यादिविषयो हेतुः कारकं नियतक्रियम् । |
| साधनम् | आश्रितव्यापारं करणम् । |
| रूचिः | अभिलाषाश्रयभिन्नकर्तृकोऽभिलाषो रुचिः । |
| करणम् | येन साधनेन कार्यं साध्यते तत् करणम् । |
| कर्म | कर्तृवृत्तिक्रियया सम्बद्धमिष्टतमं वस्तु कर्म । |
| स्वतन्त्रः | क्रियायां पराधीनतारहितः । |

कारके न्यूनेषु रूपेषु सधितेष्वपि हे राम/श्याम, रोगस्य चौरस्य रुजा, कृष्णः, श्रीः, ज्ञानम् प्रभृतीनि रूपाणि तु विस्तृततयैव साधितानि दृश्यन्ते । यद्यप्यत्रत्या रूपसाधनप्रक्रिया सामान्यैव तथापि रूपसाधनसहयोगिनी सङ्केतमूला चेति निश्चितम्, अतः शारदाप्रभायाः कारके रूपसाधनसङ्केमात्रं प्राप्यत इति निष्कर्षः ।

## ५.३.५ वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम्

शारदाप्रभाव्याख्यायाः कृदन्तकारकखण्डयोर्वार्तिकप्रयोगस्य प्राचुर्यं दृश्यते । सिद्धान्तकौमुद्यां प्रयुक्तानि प्रायो वार्त्तिकान्यत्रापि सन्ति, कतिपये सूत्रे तु तत्राविद्यामानानि वार्त्तिकान्यपि लभ्यन्ते । कौमुदीकारः कृदन्तीये अन्येभ्योऽपि दृश्यते (पा.सू.३-२-१७८) इति सूत्रे क्विब्वचि...प्रभृतीनि चत्वारि वार्त्तिकानि समुल्लिखति परं शारदाप्रभाकारस्तु 'दृभये इत्यस्य ह्रस्वश्च द्वे च' इत्यधिकं वार्त्तिकमपि प्रयुज्य ददृदिति रूपं साध्नोति । यद्यप्यत्र कौमुदीमूले 'दृ भये अस्य ह्रस्वश्च द्वे च' इति सङ्केतितस्तथापि स तत्र वार्त्तिकत्वेन

नोपन्यस्तः । बालमनोरमाकारेण तद्वार्त्तिकत्वेन स्वीकृतेऽपि भट्टोजिदीक्षितेन तु वार्त्तिकत्वं नैव स्वीकृतमिति सिद्धान्तकौमुद्या मूलस्यालोडनेन ज्ञायते ।[४२९] दृ भये धातोः क्विप्प्रत्ययेन सर्वापहारलोपे विहितेऽप्यनेन द्वित्वह्रस्वयोरविहितयोर्ददृदिति रूपं न सम्पद्यते अतः शारदाप्रभाकारः कौमुद्यामप्रयुक्तानि वार्त्तिकानि काशिकात आनीयापि रूपं साधयतीत्यस्य वैशिष्टयम् । तथैव अधिकरणे शेतेः (पा.सू.३-२-१५) इति सूत्रे शारदाप्रभाकारेण प्रयुक्तं 'दिग्धसहपूर्वाच्च' इति वार्त्तिकं कौमुदीकारो न प्रयुङ्क्त । दिग्धसह शेत इति विग्रहपूर्वकाद् दिग्धसह+शीङित्यस्मात् प्रकृतवार्त्तिकेनाच्प्रत्यये कृते 'दिग्धसहशयः' इति रूपं निष्पद्यते परं कौमुदीकारस्तु रूपमिदं न साधयति, अतः शारदाप्रभाकारोऽयं कौमुदीतोऽधिकानि वार्त्तिकानि प्रयुज्याधिकानि रूपाणि साधयतीति निश्चितम् । तथैव शारदाप्रभाया अलङ्कृञ्... (पा.सू.३-२-१३६) इति सूत्रे पठितं 'अलङ्कृञो मण्डनार्थाद् युच् पूर्वविप्रतिषेधेन इष्णुच् वक्तव्यः' इति, 'आदृगमहन...(पा.सू.३-२-१७१) इत्यत्रोपन्यस्तं 'उत्सर्गाश्छन्दसि सदादिभ्यो दर्शनम्' इति 'सहिवहिचलिपतिभ्यो यङन्तेभ्यो किकिनौ वक्तव्यौ' इति च, तेनैव प्रकारेण पदरुजविश...(पा.सू.३-३-१६) इत्यत्र पठितं 'स्पृश उपताप इति वक्तव्यम्' इति तथाऽन्यान्यपि कौमुदीकारेण पठितानि दशाधिकवार्त्तिकानि शब्दसाधुत्वसम्पादनानुरोधेन शारदाप्रभाकारोऽयं द्वितीयके सूत्रक्रमिके व्याख्याने विवृणुते ।

कौमुदीतः काशिकातश्च शारदाप्रभायामानीतानि कति वार्त्तिकानि शब्दपरिवर्तनेन विन्यस्तानि चेत् कति तु यथावदुपस्थापितानि । पाघ्राध्माधेट्दृशः श इत्यत्र पठितं 'जिघ्रतेः संज्ञायां प्रतिषेधो वक्तव्यः' इति वार्त्तिकमप्येकम् । दीक्षितः तद्वार्त्तिकं किञ्चित् पदान्तरीकृत्य-'घ्रः संज्ञायां न' इति करोति । परं शरदाप्रभाकारस्तु काशिकावदत्रापि प्रयुङ्क्ते । एतादृशान्युदाहरणानि कृदन्तप्रकरणे यत्र तत्र दरीदृश्यन्ते ।

---

[८८] भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (कृदन्तखण्डः) पूर्ववत्, (१९८७), पृ. १३५ ।

कारकप्रकरणे तु कौमुदीतो त्रीण्यधिकवार्त्तिकानि प्रयुक्तानि, तान्यत्र प्रस्तूयन्ते –

| *वार्त्तिकम्* | *शारदाप्रभायां स्रोतसङ्केतः* |
|---|---|
| हविषः प्रस्थितस्य प्रतिषेधो वक्तव्यः | प्रेष्यब्रुवोर्हविषोः (पा.सू.२-३-६१) |
| अव्ययप्रतिषेधे तोसुन्कुसुनोरप्रतिषेधः | न लोकाव्यय ...(पा.सू.२-३-६९) |
| उभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेधो वक्तव्यः | कृत्यानां कर्तरि वा (पा.सू.२-३-७१) |

कौमुद्यामेतान्यपठितान्यतो हविषः प्रस्थितस्येति वार्त्तिकेन कर्मणि षष्ठीनिषेधेन निष्पन्नं 'इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य:' इति रूपं तथा कृद्योगे कर्तरि कर्मणि च प्राप्तायाः षष्ठीविभक्तेः 'न लोकाव्ययनिष्ठा...' इत्यनेनाव्ययोगे कृतो निषेधः पूर्वोक्तयोः तोसुन्कसुन्प्रत्यययोर्योगे नेति ज्ञापनेन साधितं- पुरा सूर्यस्योदेतो राधेयः, पूरा क्रूरस्य विसृपो विरप्सिन् इति रूपद्वयं एवमेव हि- कर्तृकर्मणोर्द्वयोरेव षष्ठीप्राप्तयोरुभयप्राप्तौ कृत्ये षष्ठ्या प्रतिषेधविधानेन साधितं- नेतव्या ग्राममजा देवदत्तेनेति रूपाणि कौमुद्यां न सिद्ध्यन्ति । एतेषां साधनं शारदाप्रभाकारस्तु काशिकावार्त्तिकद्वारा कुरुते, अतोऽसौ वार्त्तिकद्वारा जटिलतास्फोरणे प्रयत्नशीलः प्रतीयते ।

कारके वार्त्तिकविन्यासे क्वचित् शारदाप्रभाकौमुदीकारौ परस्परं विभजेते 'गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका' इति वाक्यं कौमुदीकारो वार्त्तिकत्वेन प्रयुङ्क्ते परं शारदाप्रभाकारस्तु सामान्यवाक्यरूपेणैवोल्लिखति । तथैव 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति वाक्यं कौमुदीकारः परिभाषात्वेन समुल्लिखति चेत् शारदाप्रभाकारस्तु वार्त्तिकसमानं सङ्केतं प्रदाय वार्त्तिकीकरोति । तेनैव प्रकारेण 'केचिदविशेषेण विभाषामिच्छन्ति' इति वाक्यं कौमुदीकारो वाक्यरूपेणैव विन्यसति चेत्

शारदाप्रभाकारस्तु वार्त्तिकमिव कोष्ठकसङ्केतेन वार्त्तिकभ्रममुत्पादयति ।[४३०] एतेषु परस्परविरोधेष्वस्पष्टेषु च सत्स्वपि शारदाप्रभाकारोऽयमधिकवार्त्तिकप्रयोगेण रूपसाधनगताया जटिलतायाः स्फोरणे प्रयत्नशीलः प्रतीयते ।

शारदाप्रभाकारोऽयं हरतेरनुद्यमनेऽच् (पा.सू.३-२-९ इति सूत्रे 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषां समुल्लिख्यास्या अनित्यत्वं सूचयति । तत्रत्ये 'अच्प्रकरणे शक्तिलाङ्गलाङ्कुशतोमरयष्टिघटीधनुष्षु ग्रहेरूपसङ्ख्यानम्' इति वार्त्तिके पुँस्त्वबोधकघटशब्दोच्चारणेनैव लिङ्गविशिष्टपरिभाषया 'घटी' इत्यस्यापि ग्रहणसिद्धौ पुनस्तत्र स्त्रीत्वबोधकघटीशब्दग्रहणं लिङ्गविशिष्टपरिभाषाया अनित्यत्वसूचनमित्यसौ स्पष्टीकरोति ।[४३१] तथैव कुम्भकार इति रूपसाधनक्रमे प्रकृतव्याख्यात्रा सिंहावलोकनन्यायोऽपि प्रयुक्तो दृश्यते । तत्र कुम्भ+अस्+कृ+अण् इत्यवस्थायां अण्प्रत्ययानन्तरं कार इति साधयित्वा कृद्योगे कर्मणि षष्ठी प्रसज्यत इति विषयं सिंहावलोकनन्यायेनोद्बुध्य शिक्षयेदिति व्याख्यातुराशयो दृश्यते । तथैव 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इत्यादयः परिभाषाः, 'अनुपसर्गे इत्युक्तेर्नेह गोसन्दायः' प्रभृतीनि शताधिकानि विशेषवाक्यानि, 'सर्वापहारलोपः' सदृशानि प्रक्रियानिर्देशकवाक्यानि च शारदाप्रभाकारोऽसौ यत्र तत्र प्रयुङ्क्ते । अनेन प्रकारेण व्याख्याकारोऽयं आवश्यकाः परिभाषाः, न्यायान्, विशेषवाक्यानि च प्रयुज्य कृदन्तीयशब्दसाधनं करोतीति निष्कर्षः ।

## ५.३.६ अन्याचार्यमतसङ्ग्रहः

शारदाप्रभाव्याख्यायां बहूनां प्राक्कालिकानामष्टाध्यायीव्याख्यातॄणां मतं सादरं गृहीतं दृश्यते । शारदाप्रभाकारेण समुद्धृतेषु पूर्वाचार्येषु मूलतः काशिकाकारः, तद्व्याख्यातारौ

---

८९. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.१२४ ।
८९. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.१७४ ।

न्यासपदमञ्जरीकारौ, सिद्धान्तकौमुदीकारः, तद्व्याख्यातारौ बालमनोरमा-तत्त्वबोधिनीकारौ चात्र प्रमुखा वर्तन्ते । शैलीशिल्पग्रहणे गोपालशास्त्रिदर्शनकेशरिवर्योऽप्यनेनात्र समुद्धृतो दृश्यते ।

शारदाप्रभायाः कृदन्ते कारके च काशिकायाः, तद्व्याख्याभूतयोर्न्यासपदमञ्जर्योश्च प्रयोगो यत्र तत्र दरीदृश्यते । व्याख्याताऽसावष्टाध्यायीस्वरूपनिर्माणे प्रायः काशिकामनुकुरुते । मूलखण्डे सूत्रविन्यासः, तदनूदाहरणप्रत्युदाहरणानि, सत्यावश्यके तत्रैव विशेषवाक्यान्यपि, आवश्यकेषु सत्सु तेष्वेव स्थानेषु वार्त्तिकपरिभाषाफक्किकादीनां समुल्लेखोऽपि काशिकाशैलीं स्मारयति । तथैव प्रकृतसूत्रे कस्मात् पूर्वसूत्रात् किमावर्तत इति दिग्दर्शनमपि काशिकापद्धतिं सङ्केतयति । शारदाप्रभाकारोऽयं तदेवात्राप्यनुकुरुते, अतोऽत्र काशिकायाः प्रत्यक्षप्रभावो द्रष्टुं शक्यते । सिद्धान्तकौमुदीकारस्तु सूत्रोल्लेखनानन्तरं प्रथमतो वृत्तिमुल्लिखति, ततः पश्चादेव उदाहरणप्रत्युदाहरणानि प्रस्तौति । प्रकृतव्याख्यायाः काशिकानुयायित्वेन प्रमाणीकरणेऽपरमपि सबलं प्रमाणं वर्तते- कौमुद्यामविद्यमानानां परं काशिकायां प्रयुक्तानां वार्त्तिकानामत्र सङ्ग्रहः । कौमुद्यामविद्यमानानि दशाधिकानि काशिकावार्त्तिकानि शारदाप्रभायाः कृदन्तकारकयोः सन्तीति पूर्वमुल्लिखितमेव । तथैव काशिकास्थवार्त्तिकानां यथावदुल्लेखोऽप्यस्य काशिकानुयायित्व-प्रमापनेऽपरं प्रमाणम् । कौमुदीकारो महाभाष्यतः समागतानि वार्त्तिकानि यथावश्यकं शब्दान्तरीकृत्य, परिष्कृत्य, सङ्क्षिप्य वा प्रयुङ्क्ते । अत्र कौमुदीकारो महाभाष्येभ्यः ८७६ वार्त्तिकानि समुद्धरति चेत् काशिकाकारस्तु सहस्रसङ्ख्याधिकानि समुद्धृत्योपयुङ्क्ते, एतयोर्मध्ये स्थितः शारदाप्रभाकारः कौमुद्यामविद्यमानानि सप्तत्यधिकानि वार्त्तिकान्यत्र समुल्लिखतीत्यस्य काशिनुवर्त्तित्वं प्रमाणितं भवति । यद्यपि प्रक्रियाकरणे, सूत्रार्थापने, फक्किकालापने च महाभाष्यमेव परमं प्रमाणमुररीक्रियते, तत्र प्रकृतव्याख्यातुरपि न कापि विप्रतिपत्तिस्तथाप्यनेन शारदाप्रभायाः कृदन्तकारकात्मके मूलखण्डे व्याख्यानेऽपि काशिकावाक्यानि प्रत्यक्षतो गृहीतानीति तस्याः प्रत्यक्षत्वं प्रमाणितमत एव प्रत्यक्षप्रमाणमाधृत्यास्य व्याख्यानस्य

काशिकानुगतत्वमित्यभिहितम् । व्याख्याकारोऽयं आसुयुवपिरपि...(पा.सू.३-१-१२६) इति सूत्रेऽनुक्तसमुच्चयार्थश्चकार अतो दभि-दाभ्यमित्यस्य सिद्धिरिति काशिकावचनं मूलखण्ड एव समुद्धरते । तथैव सुपि स्थः (पा.सू.३-२-४) इति सूत्रे सुपीति योगविभागस्य प्रयोजनोपपादनसन्दर्भे काशिकावाक्यं समुद्धरते । तेनैव प्रकारेण ब्रह्मभ्रूणवृत्रेषु क्विप् (पा.सू.३-८-८७) इत्यत्र ब्रह्मभ्रूणादिभ्यः क्विब्विधाने, सोमे सूञः (पा.सू.३-२-९०) इति सूत्रे चतुर्विधनियमप्रतिपादने, सुकर्मपापमन्त्रेषु कृञः (पा.सू.३-२-८९) इत्यत्र त्रिविधनियमसमुल्लेखने च काशिका समुद्धृता वर्तते चेत् कर्मणि च येन...(पा.सू.३-३-११६) इत्यत्र 'पयः पानं सुखम्' इत्यस्य सिद्धिक्रमे, अगारैकदेशे प्रघणः प्रघाणश्च (पा.सू.३-३-७९) इति सूत्रे प्रघणप्रघाणयोः सिद्धौ पदमञ्जरीव्याख्यानं तथैव मदोऽनुपसर्गे (पा.सू.३-३-६७) इत्यत्र मद मादयोर्मध्ये को ज्याय इति निर्धारणेऽन्यत्र च न्यासः समुद्धृतो वर्तते अतोऽत्र काशिकायाः प्रत्यक्षप्रभावो वर्तत इति निष्कर्षः ।

शारदाप्रभायां सिद्धान्तकौमुद्याः प्रभावोऽपि परिलक्ष्यते । कृदन्तीयव्याख्यानपद्धत्यां काशिकायाः स्वरूपं दृश्यते चेत् कारके तु सिद्धान्तकौमुदीस्वरूपं दृग्गोचरीभवति । शारदाप्रभायाः कृदन्तप्रकरणे काशिकाप्रतिरूपकाणि वार्त्तिकानि प्राप्यन्ते चेत् कारके तु कौमुदीतुल्यानि विद्यन्ते । यद्यपि प्रकरणविन्यासः कौमुदीतुल्यो नास्ति तथाप्यप्रत्यक्षतया कौमुदीस्वरूपमपि परिलक्ष्यत एव । शारदाप्रभाकारोऽसौ प्राथमिकच्छात्रकेन्द्रिते कारके नव सूत्राण्येव निर्धारयति । द्वितीयके क्रमे तु कारके (पा.सू.१-४-२३) इत्यतः कारकमधिकृत्य ध्रुवमपायेऽपादानम् (पा.सू.१-४-२४) इत्यपादानसंज्ञाप्रसङ्गतः कारकप्रकरणमारभ्य सम्प्रदान-करणाधिकरण-कर्म-कर्तृसंज्ञा विधाय द्वितीया-चतुर्थी-तृतीया-पञ्चमी-सप्तम्यादीर्विभक्ती-र्विधाय च कारकं विवृणोति । अत्र कौमुदीक्रमो न दृश्यते तथाप्यत्रत्येषु कतिपयेषूदाहरणेषु वार्त्तिकपरिभाषादिषु च कौमुदीप्रतिबिम्बः परिलक्ष्यते ।

शारदाप्रभायाः कृदन्तकारकयोः कौमुद्याः कानिचन वाक्यान्यपि प्राप्यन्ते । गदमद... (पा.सू.३-१-१००) इति सूत्रे नियम्यमित्यस्य साधुत्वासाधुत्वविवादे, भृञोऽसंज्ञायाम् (पा.सू.३-१-११२) इत्यत्र भृञः संज्ञायां कथन्न क्यबिति शङ्कायां, मूर्तौ घनः (पा.सू.३-३-७७) इत्यत्र हन्धातोरप्प्रत्ययेन प्रकृते घनादेशेन च घनशब्दनिर्माणेऽन्यत्रापि च मूलखण्डे व्याख्यायामपि सिद्धान्तकौमुदीवाक्यानि यथावत् समुद्धृतानि सन्ति, अतः सिद्धान्तकौमुद्यप्यस्याधारग्रन्थ इति निश्चीयते । एतेभ्योऽन्येषां शेखर-तत्त्वबोधिनीकाराणां सूत्र एव समुपन्यस्तानामन्येषा-माचार्याणां च मतानि शारदाप्रभाकारेण बहुत्र समानीतानि दृश्यन्ते । व्याख्यातासौ पूर्वाचार्येभ्यो गृहीतं मतं सरलीकृत्य, सङ्क्षिप्य च स्वकीये व्याख्यान उपयुङ्क्ते, अतः पूर्वाचार्येभ्यो गृहीतं व्याख्यानं देश-स्थान-समय-छात्रादिसापेक्षीकरणं सरलीकरण-माधुनिकीकरणं परिष्करणञ्चास्य वैशिष्ट्यं मन्यते ।

### ५.३.७ प्रकरणसङ्घटनं शैलीशिल्पञ्च

शारदाप्रभायाः कृदन्तकारकप्रकरणान्तर्गता व्याख्यानपद्धतिः प्राच्याधुनिकसर-णिमनुसरतीति स्पष्टमेव । अस्याः प्राथमिकच्छात्रानुकूलो विन्यासः ५१ सूत्रेषु परिसीमितः, पूर्वकृदन्तकृत्योत्तरकृदन्तकारकेषु विस्तरितश्च । व्याख्याकारोऽयं स्वकीयग्रन्थस्य मूलभागतोऽधस्तादवस्थिते व्याख्यानखण्ड एतस्मात् सूत्रादेतत् पाठ्यमिति सङ्केतेन कौमुद्याः सन्निकटकं सूत्रक्रमं प्रकरणञ्च विनिर्मायाष्टाध्यायीं सरलीकुरुते । द्वितीयेऽध्ययने तु पूर्वोक्तं क्रमं परित्यज्याष्टाध्यायीपद्धत्या क्रमशः पाठनेऽभिप्रेरयति, अतः शारदाप्रभाव्याख्यायां सूत्रप्रक्रियाक्रमयोः सङ्गमः प्राप्यते ।

शारदाप्रभाया व्याख्यानपद्धतिरपि काशिकासिद्धान्तकौमुद्योर्मध्यतोऽग्रे गच्छति । अस्या मूलभागस्थः सूत्रक्रमः तदन्तेऽवस्थितमनुवृत्तिगतिसीमासूचकाङ्कं सूत्रम्, स्थूलाक्षरीकृत्य विहितं सम्बद्धपदस्य सूत्रस्य वाऽग्रेगमनसूचनम्, वार्त्तिकप्रयोगशैली, वार्त्तिकानामनुवर्तनम्,

सूत्रवृत्तेरप्रयोगः, विधिसूत्रस्थानां प्रत्येकं पदानामुदाहरणप्रत्युदाहरणोपस्थापनं चास्याः काशिकानुवर्तित्वं प्रमाणीकुरूते चेत् प्राथमिकच्छात्रकेन्द्रितो विन्यासः, सूत्रे सरलोदाहरणोपन्यासः, समयसापेक्षाधुनिकशैलीशिल्पप्रयोगः, नवीनोदाहरणदानम्, उपरि मूलभागमुपन्यस्याधस्ताद् व्याख्यानखण्डविन्यसनम्, मूल एवान्याचार्यमतसमुल्लेखनम्, सूत्रेषु स्थूलाक्षरीकरणम्, मूल एव शब्दविग्रह इत्यादीनि नैकानि वैशिष्टचानि कौमुद्या अनुवर्तित्वं प्रमाणीकुर्वन्ति, यद्यपि द्वयोस्तुलनायां काशिकाया ग्रहणमधिकतरं तथापि न्यूनेषु स्थानेषु सत्स्वपि कौमुद्यप्यस्या आधारग्रन्थ इति निश्चप्रचमेव ।

## ५.४ अध्यायनिष्कर्षः

शारदाप्रभाकारोऽयं प्रकरणविभाजने प्रायशो लघुकौमुदीतुल्यं प्रक्रियाक्रममाश्रयति, अतोऽयं सुबन्तानन्तरं तिङन्तोत्तरतिङन्तकृदन्तकारकप्रकरणानि विन्यसति, अतः प्रस्तुतेऽध्ययनेऽपि प्रक्रियाग्रन्थक्रमेणैवाध्यायक्रमं निर्धार्य शब्दशास्त्रीयव्याख्यानतफ्वदृष्टचा तत्रत्या विषया विविक्ताः सन्ति ।

शारदाप्रभाव्याख्येयमत्र प्राथमिकाध्ययनार्थं पठनीयानि कानिचन सूत्राणि निर्धारयति । तत्र तिङन्ते-१७१ सूत्राण्युत्तरतिङन्ते (णिच्-सन्-यङ्लुक्-नामधातावेव)-१८ तथा प्रकरणत्रयात्मके कृदन्ते-५१ सूत्राणि कृत्वा २४० सूत्रेषु प्रकृतखण्डं पूरयति । अत्र २०३ विधिसूत्राणि, २३ संज्ञासूत्राणि, ५ नियमसूत्राणि, ५ अतिदेशसूत्राणि, २ परिभाषासूत्रे तथा २ अधिकारसूत्रे च सन्ति । द्वितीयेऽध्ययने पठनीये प्रकृतखण्डे त्वसावष्टाध्यायीक्रमेण सकलसूत्राणि निर्धारितानि सन्ति ।

शारदाप्रभायास्तिङन्ते, कृदन्ते तथा कारके लस्य, अनभिहिते चेति द्वेऽधिकारसूत्र एव प्रस्तुते, एतयोर्मध्ये प्रथमं छन्दस्युभयथा (पा.सू.३-४-१७) इत्यन्तं तथा द्वितीयन्तु चतुर्थो

चाशिष्य...(पा.सू.२-३-७३) इत्यन्तं निरन्तरमतति । तथैवात्र सिंहावलोकनानुवृत्तेः- 'अचस्तास्वत् थल्यनिटो नित्यम्' इत्येकमुदाहरणसूत्रं वर्तते । प्रकृतसूत्रे तदुत्तरत्रस्थितात् उपदेशेऽत्वत इत्यस्मादुपदेशपदमपकृष्यते । तेनैव प्रकारेण मण्डूकप्लुतेरूदाहरणं गातिस्थाघुपाभूभ्यः... इति सूत्रं वर्तते । अत्र ण्यक्षत्रियार्ष...इत्यतो लुगिति मण्डूकप्लुत्याऽऽगच्छति । गङ्गाप्रवाहवदनुवृत्तेरूदाहरणानि त्वत्र शताधिकानि सन्ति । पूर्वप्रकरण इवात्रापि व्याख्याताऽयं सूत्रस्थमनुवृत्यं पदं स्थूलाक्षरीकरणेन, तस्याग्रगतिसीमानिर्धारणेन च सङ्केतयति । उत्तरतिङन्तेऽधिकारसूत्राणामभावेऽप्यनुवृत्तिनिर्देशस्तु पूर्वप्रकरणवत् स्पष्ट एव । व्याख्याकारोऽयं न केवलमुत्तरत्रानुवर्तकं सूत्रमेव सूचयत्यपि तु प्रकृते पूर्वेभ्यः केभ्यः केभ्यः सूत्रेभ्यः कानि पदान्यागच्छन्तीति कखगादिभिः स्पष्टयति ।

शारदाप्रभाव्याख्येयं सन्धिसुबन्तप्रकरणापेक्षया तिङन्तेऽधिकतरेषु स्थानेषु विग्रहसमासौ प्रदर्शयति । सारल्येनार्थबोधनार्थं प्राथमिकेभ्यश्छात्रेभ्यो विग्रहस्य बाधकत्वेऽपि द्वितीयाध्ययनार्थं तु तदावश्यकमित्युक्त्वासौ अनुदात्तङित आत्मनेपदम्, ग्क्ङिति च, सन्वल्लघूनि चङ्परेऽनग्लोपे, आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य, अकर्तरि च कारके संज्ञायाम्, असूर्यललाटयोर्दृशितपोः प्रभृतिषु पञ्चदशाधिकेषु सूत्रेषु सामान्यतो विग्रहसमासौ दर्शयति ।

शारदाप्रभेयं कृदन्ते कारके च पूर्वप्रकरणापेक्षया बहूनि मौलिकोदाहरण प्रत्युदाहरणानि प्रयुङ्क्ते । एतानि ग्रन्थस्यास्य मौलिकत्वप्रबर्द्धने सहयोगं कुर्वन्ति ।

शङ्कानामुत्थापनं समाधानञ्च शारदाप्रभाकर्तुर्न प्राथमिकं क्षेत्रं तथाप्यसौ तिङन्ते कृदन्ते च द्वितीयाध्ययनार्थमित्युक्त्वा सूत्रवार्त्तिकरूपसाधनादिषु समागताः शङ्काः समुत्थाप्य प्रायः काशिकारीत्या (कतिपये स्थाने तु कौमुदीरीत्यापि) समाधत्ते, तेषु अस्तिसिचोऽपृक्तेः, वदव्रजहलन्तस्याचः, कास्प्रत्ययादाममन्त्रे लिटि, श्लिष आलिङ्गने, युवोरनाकौ, चजोः कुः घिण्यतोः, दो दद् घोः प्रभृतीनि मुख्यानि सन्ति ।

शारदाप्रभाकारोऽयं तिङन्ते लट्, लोट्, लङ्, वि.लिङ्, लृट्, लुट्, लृङ्, लुङ्, लिट्, आ.लिङ्क्रमेण लकारान् निर्धारयति । एतेषां लकाराणामपि भिन्नविकरणस्थानि रूपाण्येकत्रानीय पाठयितुमिच्छति, क्रमोऽयं सरलानुरोधीति तस्याशयः ।

शारदाप्रभाकारोऽयं तिङन्ते रूपसाधनदिङ्निर्देशेन सह कर्तृकर्मभाववाच्यान्तर्गताः क्रियाः, तासां वाक्यप्रयोगाभ्यासादीँश्चैकत्रैव शिक्षयति । तथासति प्रयोगाभ्यासेन रूपज्ञानसमकालमेव कर्तृकर्मभाववाच्यानां ज्ञानमपि भवतीति तस्य निष्कर्षः ।

शारदाप्रभायास्तिङन्तकृदन्तकारकेषु सिद्धान्तकौमुद्यामविद्यमानैः पञ्चदशाधिकैर्वार्तिकैः नूत्नानि रूपाणि साधितानि सन्ति, अतः कौमुदीतोऽधिकरूपसाधनमप्यस्या व्याख्याया वैशिष्टचम् ।

शारदाप्रभायाः प्रकृतखण्डे कात्यायन-पतञ्जलि-कैयट-वामन-जयादित्य-नागेश-दीक्षितप्रभृतीनां पूर्वव्याख्यातॄणां मतानि सनामग्रहणमुल्लिखितानि ।

शारदाप्रभायास्तिङन्तीयं प्राथमिकं स्वरूपं लघुकौमुदीतोऽपि किञ्चिद् भिन्नतरं वर्तते, यतो हि दीक्षितेन टित्सु ङित्सु चाकारादिक्रमेण निर्धारितान् लकारानसौ सार्वधातुकार्धधातुकक्रमेण परिष्कुरुते ।

शारदाप्रभाया अत्रत्या भाषा अन्यप्रकरण इव सरला, सुबोध्या, देशभाषामिश्रिता, निर्देशनमूला चास्ति । अत्रत्या शैल्यपि प्राथमिके लक्ष्यप्रधाना, द्वितीयके तु लक्षणमूला वर्तते । अतोऽत्र लक्ष्यलक्षणप्रधानयोः शैल्योः सामञ्जस्यं प्राप्यते ।

षष्ठोऽध्यायः

# शारदाप्रभाव्याख्यायास्तद्धित-समास-प्रकरणसमीक्षा

## ६.१ विषयपरिचयः

अष्टाध्याय्याः प्रमुखं लक्ष्यं पदसाधुत्व-प्रक्रियाप्रतिपादनम् । प्रक्रिया च शब्दानां वाक्यानां पदानां वा, तेषां शब्दशास्यत्वात् । प्रक्रियया सह वैदिकस्वरनिर्धारणमपि व्याकरणेन विधीयते । एवञ्च स्वरसम्पादनं प्रकृतिप्रत्ययमाध्यमेन पदसंस्करणञ्च व्याकरणस्य प्रतिपाद्यम् । पदज्ञानेन विना अर्थावबोधो न भवति । अर्थज्ञानेन विना कृतमध्ययनं निष्फलं शास्त्रनिन्दितञ्च जायतेऽर्थबोधासम्भवात् । शब्दः स्वरतो वर्णतश्च शुद्धोऽशुद्धश्च । अशुद्धशब्दो वज्रवद् घातको भवति, अतः संस्कृतवाङ्मयेऽशुद्धशब्दस्य निन्दा शुद्धशब्दस्य च प्रशंसा प्राप्यते। दुष्टशब्दः स्वरतो वर्णतो वेति महाभाष्यादनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचिदित्यादिभिर्वचोभिरसाधोर्निन्दा सर्वत्र प्राप्यते ।

व्याकरणे यद्यपि समेषां शब्दानां पदानां वा मूलं धातुरित्यपि पक्षोऽस्ति, तथापि पाणिनिना प्रक्रियासन्दर्भे पदानां मूलं धातुः प्रातिपदिकानाञ्चाधातुरिति व्यवस्थापितम् । धातुभ्यस्तिङो भवन्ति । धातोः साध्यावस्थापन्नत्वं क्रियेति व्यपदिश्यते । क्रियां विना वाक्यानि मूकानि भवन्ति, अतो विधेयबोधार्थकानि वाक्यान्येतान्यावश्यकानि, अत एवैतेषां प्रक्रिया व्याकरणेन विचार्यते प्रतिपाद्यते च । वाक्यानि च कर्तृकर्मादिकारकबोधकानि, विशेष्यविशेषणादिख्यापकानि नामबोधकानि च, अतो व्युत्पत्तिपक्षे प्रकृतिप्रत्ययसमासादिभिः प्रातिपदिकानि प्रक्रियन्ते । तत्र क्रमे धातुभ्यः कृतो भवन्ति, सुबन्ताच्च तद्धिता विधीयन्ते । तद्धितान्तेभ्योऽपि सुपः समायान्ति । ततश्च सुप्तिङन्तं पदमिति पदत्वे तेषु प्रयोगार्हता आयाति । सुष्ठु प्रयोगश्च कामधुग् भवति, सुष्ठुप्रयोगश्च प्रक्रियातत्वस्य सुष्ठु ज्ञान एव भवतीति तदर्थं तिङन्तकृदन्ततद्धितान्तप्रकरणानि निर्धारितानि । महर्षिणा पाणिनिना तद्धिताः (पा.सू.४-१-७६) इति सूत्रतः प्रारब्धे तद्धितप्रकरणे शारदाप्रभाव्याख्यात्रा प्राथमिकच्छात्राणां कृते कौमुदीतुल्यायां शैल्यां द्वितीयकानां कृते तु सूत्रक्रमिकायां सरण्यां विभज्य प्राथमिके ५४ सूत्रैस्तदनुरूपवार्त्तिकादिभिर्द्वितीयके च १०२२ सूत्रैः प्रसङ्गतः समागतैर्वार्तिकपरिभाषा फक्किकेष्ट्यादिभिश्च व्याख्यातं दृश्यते । सिद्धान्तकौमुद्यामन्य-प्रकरणान्तर्गतानि सूत्राण्यपि समाविश्य १३७१ सूत्रैः प्रासङ्गिकवार्त्तिकादिभिः, लघुकौमुद्यां तु २५० सूत्रैस्तदन्तर्गत-

वार्त्तिकादिभिश्च व्यख्यातोऽयं तद्धितः प्रकृते प्राथमिकस्वरूपेऽत्यल्पाकारकः, केवलप्रकरणपरिचयात्मकश्च प्रतीयते । शारदाप्रभाकारोऽप्यष्टाध्यायीक्रमेण विरचिते द्वितीयके व्याख्याने तु पाणिन्यष्टकानुसारेण पठितैः सूत्रैः प्रसङ्गतः समागतैर्वार्तिकादिभिश्च प्रकरणमिदं विवृणोति ।

शारदाप्रभायाः प्रक्रियामूलकः प्रकरणविन्यासः पूर्णतो न लघुकौमुदीतुल्यो नापि सिद्धान्तकौमुदीसदृशो दृश्यते । लघुकौमुदीकारो वरदराजस्तिङन्तोत्तरतिङन्तानन्तरं कृदन्त-कारक-समास-तद्धित-स्त्रीप्रत्ययस्थप्रक्रिया उल्लिख्य प्रक्रियाव्याख्यानं समाप्नोति चेत् सिद्धान्तकौमुदीकारो दीक्षितस्तु सुबन्तस्त्रीप्रत्यय-कारक-समास-तद्धित-तिङन्तोत्तरतिङन्त-कृदन्तप्रकरणानि क्रमशो व्याख्याय पूर्णं करोति । अत्र प्रक्रियाक्रममवलम्ब्यापि शारदाप्रभाकारः सुबन्त - तिङन्तोत्तरतिङन्त - पूर्वकृदन्त - स्त्रीप्रत्ययोत्तरकृदन्त - कारक - तद्धित - समास इति प्रकरणक्रमेण प्रक्रियां विवृणुते, अतोऽस्य प्रकरणविन्यासक्रमः पूर्वप्रक्रिया-ग्रन्थापेक्षया किञ्चिद् भिन्नो दृश्यते । कस्मादनन्तरं किं प्रकरणं निर्धारणीयमितिविषये पूर्ववर्तिनो व्याख्यातारः स्ववाचो युक्तिभिः प्रमाणैश्च स्वश्रेष्ठत्वं प्रमाणीकुर्वन्ति । अत्र शारदाप्रभाकारस्तु सरलं पठित्वा कठिनं प्रकरणमारभ्यमिति शिक्षाशास्त्रीयमतमवलम्बमानः तद्धितानन्तरं समास इति क्रमेण प्रकरणानि विभजते ।

शारदाप्रभान्तर्गते समासे तस्यापि प्राथमिके स्वरूपे ३८ सूत्राणि प्रासङ्गिकानि वार्त्तिकानि च निर्धारितानि सन्ति । तत्राव्ययीभावे- १५, कर्मधारयद्विगुसहिते तत्पुरूषे १२, बहुव्रीहौ-९, द्वन्द्वे-२ सूत्राणि समुल्लिखितानि सन्ति, एभिः सूत्रैर्वार्तिकपरिभाषेष्ट्यादिभिश्च शारदाप्रभायाः प्रक्रिया पूर्णतामेति । प्राथमिकेभ्यश्छात्रेभ्यो बोधभारः स्यादिति विचार्य समासान्तप्रकरणमत्र न निर्धारितम् । प्रकृतव्याख्याकारेणापि द्वितीयाध्ययनाय सूत्रक्रमेण व्याख्यातेष्वव्ययीभाव-तत्पुरूष -बहुव्रीहि-द्वन्द्वसमासेषु तु पाणिनिमुनिनात्र प्राक्कडारात् समासः (पा.सू.२-१-३) इत्यारभ्यः कडारा कर्मधारये (पा.सू.२-३-३८) इत्यत्र समापितानि १०८ सूत्राणि तदीया प्रक्रिया च समुल्लिखिता दृश्यते । सिद्धान्तकौमुदीकारो दीक्षितोऽव्ययीभाव-तत्पुरूष -बहुव्रीहि-द्वन्द्वसमासान्तर्गतां प्रक्रियामेव ३८४ सूत्रैर्व्याकुरूते चेद् लघुकौमदीकारो वरदराजस्तु ८४ सूत्रैः प्रासङ्गिकवार्त्तिकादिभिश्च विवृणुते, अनया तुलनया शारदाप्रभायाः प्राथमिकं समासस्वरूपं लघुकौमुदीतोऽपि स्वल्पाकारकमस्तीति निश्चीयते ।

अतः परं शारदाप्रभान्तर्गतयोस्तद्धितसमासप्रकरणयोः परिचयः, शब्दशास्त्रीयव्याख्यान-तत्त्वदृष्ट्या तत्समीक्षणम्, परस्परतोलनञ्च विधीयते ।

## ६.२ तद्धितप्रकरणसमीक्षा

अष्टाध्याय्यां तद्धिताः (पा.सू.४-१-७६) इति सूत्रतः तद्धितप्रकरणमारब्धमस्ति, अतः शारदाप्रभाकारोऽपि तत्सूत्रादेव प्रकरणमिदमारभ्य समर्थानां प्रथमाद् वा (पा.सू.४-१-८२) इति सूत्रेणास्य व्यापकत्वं मुख्यत्वञ्च प्रकाशयति । अत्र जिज्ञासा समुदेति- तद्धितपदस्य कोऽर्थः ? तद्धिते कीदृशं सामर्थ्यमपेक्ष्यते ? अस्योत्तरे व्याख्यातार आहुः- तद्धितपदेऽन्वर्थत्वमनुभूयते-तद्धितशब्देन तद्धितप्रकरणेषु विहिताः प्रत्यया उच्यन्ते सुबन्तात्तद्धितोत्पत्तिरिति स्पष्टमेव । तासां प्रकृतीनां गर्गादिशब्दानां (शब्दार्थप्रत्ययसम्बन्धद्वारा) हिताः/अर्थसम्बन्धाभिधायका अत एव तासां प्रकृतीनां हितकारका इति तद्धिताः । अत एव पुत्रशब्दात् पुत्रत्वम्, पुत्रता, पौत्रः । विद्वच्छब्दाच्च विद्वत्ता, विद्वत्वम्, वैदुष्यमित्यादीनां निष्पादनं भवति । अतः पदानां पाठकानाञ्च हितकारित्वाद् महन्महत्त्वं तद्धितस्य । अत्रापेक्षितं सामर्थ्यञ्च परिनिष्ठितत्वम्, समर्थः पटुः शक्त इत्यादयस्तस्य पर्यायाः । शक्तत्वञ्च कार्योत्पादनयोग्यत्वम् । शब्दस्य कार्यञ्चार्थप्रतिपादनमेव । तच्छक्तत्वञ्च कृतेष्वेव सन्धिकार्येषु सम्भवति, तथा च कृतसन्धिकार्यत्वमेव सामर्थ्यमिह गृह्यत इति बालमनोरमायां व्याख्यातम् ।[४३२] तत्त्वबोधिन्यां तु सामर्थ्यस्य व्याख्याने निष्कर्षत्वेन 'सुबन्तात् तद्धितोत्पत्ति'रिति सकलसम्मतः सिद्धान्तो निस्सरतीति प्रतिपादितमभ्युपेयते ।[४३३]

कम्बलमुपगोरपत्यं देवदत्तस्य (अत्रोपगोः कम्बलं, देवदत्तस्यापत्यमावश्यकम्) इत्यसामर्थ्ये तद्धितोत्पत्तिर्न स्यादिति बोधनायात्र सामर्थ्यमधिक्रियते । अत्रोपगुशब्दस्यापत्यशब्दस्य च सामीप्येऽपि नापत्यप्रत्ययोऽसामर्थ्यादिति । तद्धितप्रकरणे समर्थसूत्रात् प्रथमादित्यधिकारादत्रत्येन प्रथमादिति पदेन आतद्धितं प्रथमोऽधिक्रियत इति ज्ञायते । प्रथमादिति तस्यापत्यमित्यादौ तस्येति प्रथमशब्दपरामृष्टशब्दादित्यर्थः । पुनश्चात्रत्या प्रथमा न केवलं प्रथमाया अपि तु द्वितीया-तृतीया-चतुर्थी-पञ्चमी- षष्ठी-सप्तमीविभक्तीनामप्युपलक्षिकेत्यधस्तन स्थितानि सूत्राणि सङ्केतयन्ति ।

| सूत्रम् | उदाहरणम् | विभक्तिः/प्रत्ययः |
|---|---|---|
| साऽस्यदेवता (पा.सू २-४-२४) | ऐन्द्रं हविः | प्रथमा/अण् |

---

[१]. वासुदेवदीक्षितः (व्या.) *सिद्धान्तकौमुदी* (समासतद्धितखण्डः), दिल्ली : मोतीलालब., (२०१२), पृ.२७४ ।
[२]. ज्ञानेन्द्रसरस्वती (व्या.) *सिद्धान्तकौमुदी* (समासतद्धितखण्डः), पूर्ववत्, (२०१२), पृ. २७४ ।

| | | |
|---|---|---|
| तदधीते तद्वेद (पा.सू.४-२-५९) | वैयाकरण:,चान्द्रः | द्वितीया/अण् |
| तेन प्रोक्तम् (पा.सू.४-३-१०१) | पाणिनीयम् | तृतीया/छ |
| तस्मै हितम् (पा.सू.५-१-१) | वत्सीयो गोधुक् | चतुर्थी/छ |
| तत आगतः (पा.सू.४-३-७४) | स्रौघ्नः | पञ्चमी/अण् |
| तस्यापत्यम् (पा.सू.४-१-९२) | औपगवः | षष्ठी/अण् |
| तत्र भवः (पा.सू.४-३-५३) | माथुरः, शालीयः | सप्तमी/अण्,छ |

एतेभ्योऽन्येषु- तद्वहति रथयुगप्रासङ्गम् (पा.सू.४-४-७६), तेन दीव्यति खनति जयति जितम् (पा.सू.४-४-२), तदस्मै दीयते (पा.सू.४-४-६६), तत्र नियुक्तः (पा.सू.४-४-६६), तत्र साधुः (पा.सू.४-४-९८) प्रभृतिषु षष्ठ्यन्तादन्यविभक्त्यन्ताच्च प्रत्ययविधायकेषु सूत्रेषु विद्यमानेष्वपि तेषु षष्ठ्या एव प्राधान्यात् तस्यापत्यमिति सूत्रे दीक्षितः षष्ठ्यन्तादिति निर्दिशति । अत एव उपगोरपत्यमिति षष्ठ्यन्तं विगृह्यते, तथापि समर्थसूत्रे वेति पदसङ्केतेन तद्धितप्रत्ययाभावे उपग्वपत्यमित्यपि साधु ।

तद्धितप्रकरणारम्भे तद्धिताधिकारकं तद्धिताः (पा.सू.४-१-७६) सूत्रं वर्तते । तत्र बहुवचननिर्दिष्टो दृश्यते, परं तद्धितप्रत्ययोऽयमपत्याधिकारीयः, शैषिकः, पाञ्चमिकः, द्विरुक्तीयो वाऽन्यदीयोऽपि स्यात् तेषां सर्वेषां ग्रहणमेकवचननिर्देशेनैव सम्भवतीति किमर्थं बहुवचनमित्याशङ्कायां समुदितायां कतिपये व्याख्यातारस्तेभ्यः प्रयोगेभ्यो गणेभ्यः पाठकेभ्यो वा हितास्तद्धिता इति विगृह्य तद्धितान्तर्गतान् नैकान् प्रत्ययान् गणाँश्च समुल्लिखन्ति । अत्र काशिकाकारस्तु 'अनुक्ततद्धितग्रहणार्थं बहुवचननिर्दिष्ट'मित्याह । तद्धित इति प्राचामाचार्याणां संज्ञां महर्षिपाणिनिः स्वाष्टाध्याय्यां तद्धिता इति सूत्रे सादरं गृहीतवान्, अत्र वार्त्तिककारोऽपि सहमत इत्युल्लिखन्नेकस्मिन् वार्त्तिके काशिकाकार आह- "बहुवचनमनुक्ततद्धितपरिग्रहार्थं पृथिव्या ञाञौ (का.वा. १५४०) अग्रादिपश्चाड्डिमच् (का.वा.१९४५) इत्यादिषु च लब्धं भवति ।"[४३४] अर्थादधिकारसूत्रेषु बहुवचननिर्देशात् सूत्रकारेणानुक्ताः परं वार्त्तिकद्वारा परिगृहीता डिमच्- ञञादयो नैके प्रत्ययाः परिगृह्यन्त इति । प्रस्तुतविषये न्यासकारोऽपि सहमतो दृश्यते । प्रकृते तद्धितप्रकरणे प्रत्ययः (पा.सू.३-१-१) इत्यस्याप्यधिकारः समायाति, तत्रैकवचनात्तेन सहान्वयाय किमर्थं बहुवचनं निर्दिश्यत इति जिज्ञासायां काशिकाव्याख्याता न्यासकारस्तु लौकिकवैदिकेत्युभयविधशब्दग्रहणायात्र बहुवचनान्ततद्धिताधिकारः पठ्यत इति निर्दिशति, एवं- "तेभ्यो हितास्तद्धिताः, तदित्यनेन लौकिका वैदिकाश्च शब्दाः प्रत्यवमृश्यन्ते" अत अनुक्तसङ्ग्रहार्थो बहुवचननिर्देश इत्यवसीयते ।

---

[३]. वामनजयादित्यौ,*काशिकावृत्तिः* (तृतीयो भागः), वाराणसी : तारापब्लिकेसन, (१९६६) पृ.३८१ ।

प्रस्तुते तद्धितप्रकरणे एतादृशानां सूत्रवार्त्तिकपरिभाषादीनामध्ययन-विश्लेषण-व्याख्यान-तुलनादिकं विधीयते । अपत्याधिकारात् प्रारब्धं प्रकरणमिदं द्विरुक्ते पूर्णतामेति, अत्राण्-छ-ढक्-ख-ष्यञ्-मयडादयः शतशः प्रत्यया विधीयन्ते । तद्धितस्येदं वैशिष्ट्यं यत् ञित्-णित्-कित्प्रत्ययेषु प्रथमस्याचो वृद्धिर्भवति, तथा च- औपगवः, स्रौघ्नः प्रभृतीनि रूपाणि सिद्धचन्ति, तथैवानुशतिकादिद्वारादिगणपठितानामिहलोकद्वारप्रभृतीनां शब्दानामुभयपद-वृद्धिविधानेन ऐहलौकिकम्, दौवारिकम् प्रभृतीनि रूपाण्यप्यत्रैव व्युत्पाद्यन्ते ।

अत्र पूर्वाध्यायेषु प्रयुक्तैरधिकारानुवृत्त्योर्निदर्शनम्, विग्रहादिभिरूदाहरणादिभिश्च सूत्रार्थापनम्, शङ्कामुद्भाव्य समाधानम्, रूपसिद्धिप्रक्रियावबोधः, वार्त्तिकपरिभाषादिभि र्जटिलतायाः स्फोरणम्, अन्याचार्यमतसङ्ग्रहः,प्रकरणसङ्घटनं शैलीशिल्पञ्चेति सप्तभिर्व्याख्यानतत्त्वैरत्रत्यप्राथमिकद्वितीयस्वरूपयोरूपलब्धां व्याख्यानप्रक्रियां समीक्ष्या-न्यव्याख्यानैः सह तुलनादिकमपि विधीयते ।

## ६.२.१ अधिकारानुवृत्त्योर्निदर्शनम्

सिद्धान्तकौमद्या बहून्यधिकारसूत्राणि प्रकृते तद्धितप्रकरणे दृश्यन्ते परं प्राथमिके विन्यासे शारदाप्रभाकारस्तु तद्धिताः (पा.सू.४-१-७६), समर्थानां प्रथमाद् वा (पा.सू.४-१-८२), प्रग्घिताद्यत् (पा.सू. ४-४-७५), प्राक् क्रीतात् छः (पा.सू. ५-१-१), प्राग्वतेष्ठञ् (पा.सू. ५-१-१८) चेति पञ्च सूत्राण्येव निर्धारयति । स एव द्वितीयके सूत्रक्रमिके व्याख्याने त्वष्टाध्याय्यामत्र निर्धारितानि समग्राण्येवाधिकारसूत्राणि यथावद् विन्यसति । अन्यप्रकरणतोऽपि कानिचन सूत्राणि समानीय प्रकरणक्रमेणानुबन्धितायाः सिद्धान्तकौमुद्याः तद्धितप्रकरणे तु पूर्वोक्तैरधिकारसूत्रैः सह कानिचनान्यानि सूत्राण्यपि दृश्यन्ते । शारदाप्रभाकारेण प्राथमिके विन्यासे प्रयुक्तेष्वधिकारसूत्रेषु तद्धिताः (पा.सू. ४-१-७६) इति सूत्रं दीक्षितः स्त्रीप्रत्ययान्ते युवतिशब्दसाधनक्रमे विन्यसति ।

अष्टाध्याय्याश्चतुर्थपञ्चमाध्याययोः पठितानि तद्धिताधिकारस्थानि कतिचित् सूत्राण्यधिकारमेव निर्दिशन्ति चेत् कति त्वण्नञ्स्नञादिकान् प्रत्ययान् विधाय तदधिकारमप्युद्बोधयन्ति, अतः शेषे (पा.सू.४-२-९२), स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् (पा.सू.४-१-८७), तस्य भावस्त्वतलौ (पा.सू.५-१-११९) तदस्यास्त्यस्मिनिति मतुप् (पा.सू.५-२-९४), प्रागिवात्कः (पा.सू. ५-३-७०) प्रभृतीनि सूत्राणि प्रत्ययविधानेन सहोत्तरस्थे विधिप्रदेशे स्वाधिकारमपि प्रबोधयन्ति । एतेषु शेषाधिकारे पठितं शेषे (पा.सू. ४-२-९२) इति

सूत्रमण्प्रत्ययं विधाय तदधिकारमप्युपदिशतीति दीक्षित एवं सूचयति- "शेष इति लक्षणं चाधिकारश्च, तस्य विकार इत्यतः प्राक् शेषाधिकारः ।"[४३५] शारदाप्रभाकारोऽपि सूत्रमिदं विभज्य प्रथमस्य विधित्वं द्वितीयस्य त्वधिकारत्वं समर्थयति ।[४३६] तथैव स्त्रीपुंसाभ्यां...इति सूत्रान्ते ५-१-१३५ अङ्कमुल्लिख्य शारदाप्रभाकारोऽप्यस्याधिकारगतिं पञ्चमाध्यायस्य प्रथमपादस्य १३५ सूत्रान्तं निदर्शति । अत्र लघुकौमुदीव्याख्याता श्रीधरानन्दशास्त्रिवर्योऽस्याधिकारत्वं स्पष्टतया सूचयति[४३७] परमन्ये व्याख्यतारस्त्विमं विषयं न स्पष्टयन्ति । काशिकाकारः शब्दान्तरेणाधिकारमेवं सूचयति- "धान्यानां भवन इति वक्ष्यति तस्य प्रागित्यनेनैव सम्बन्ध इति ।"[४३८] एतेषु सूत्रेषु तस्य भावस्त्वतलाविति सूत्रं प्रत्ययं विधाय भावकर्मणोरधिकारत्वमपि शास्तीति गोपालशास्त्रिणोऽनेन वचनेन प्रमाणितं भवति, तदेवं- "इतो भावकर्माधिकारश्चलति पादान्तमर्थाद् ब्राह्मणस्त्वः (पा.सू.५-१-१३६) इति सूत्रान्तमिति ।"[४३९] एतैरुद्धरणैर्व्याख्यातृसङ्केतैश्च सूत्राणीमान्यधिकारेण सह विधित्वमपि शासतीति ज्ञायते ।

तद्धिते समाविष्टेष्वेतेष्वधिकारसूत्रेषु शारदाप्रभाकारो बहुत्राधिकारशब्दप्रयोगं न कुरूते । असौ ग्रन्थमूले व्याख्यानखण्डेऽपि शब्दान्तरेण तत्सङ्केतयति । स एतादृशेषु स्थानेष्वेतस्मात् सूत्रात् प्राक् एष प्रत्ययो भवतीत्येवं (यथा तद्वहति... सूत्रात् प्राक् ठक् प्रत्ययो भवति) अधिकारं सूचयति । शारदाप्रभायां तद्धिताः (पा.सू.४-१-७६) समर्थानां प्रथमाद् वा (पा.सू. ४-१-८२), प्रग्घिताद्यत् (पा.सू.४-४-७५), प्राक् क्रीतात् छः (पा.सू. ५-१-१), प्राग्वतेष्ठञ् (पा.सू. ५-१-१८) प्रभृतिषु सूत्रेषु तेषां व्याख्यानेषु चाधिकारोल्लेखः तेष्वनुवृत्तिसङ्केतश्च नास्ति अत एतानि कीदृशानि सूत्राणीति छात्राः विभ्रमन्ति, तथापि उत्तरपदस्य (पा.सू.७-३-११०) इति सूत्रे त्वधिकारोऽयं हनस्त... इत्यस्मात् प्राक्[४४०] इति स्पष्टं सङ्केतितम् । अतः शारदाप्रभाकारो बहुत्राधिकारशब्दमप्रयुञ्जानोऽपि क्वचित्तु प्रयुङ्क्त इति निश्चीयते । सिद्धान्तकौमुदीकारस्तु- सूत्रमिदं चैतत् पदं वा एतावत् सूत्रपर्यन्तमधिक्रियत इत्यधिकारशब्दप्रयोगपूर्वकमेव तत्सङ्केतयतीति समर्थानां प्रथमाद् वा (पा.सू.४-१-८२) इति

---

[४]. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४), पृ. ३०३ ।
[५]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, दाङः : म.सं.वि., (२०६०) पृ. २९७ ।
[६]. श्रीधरानन्दशास्त्री (व्या.) लघुसिद्धान्तकौमुदी, दिल्ली : मोतीलालब., (१९९६), पृ.८९० ।
[७]. वामनजयादित्यौ, *काशिकावृत्तिः* (तृतीयो भागः), पूर्ववत्, (१९६६) पृ.३८१ ।
[८]. गोपालशास्त्री (सम्पा.) *अष्टाध्यायी*, पूर्ववत्, (१९८७),पृ.५३ ।
[९]. हरिप्रसादशर्माचार्यः (व्या.),*अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ. ६२० ।

सूत्रस्थतदीयनिर्देशनतो ज्ञायते, तदेवं- "इदं पदत्रयमधिक्रियते प्राग्दिश इति यावत् ।"[४४१] अनेन प्रकारेण दीक्षितोऽसौ प्राग्दीव्यतोऽण् (पा.सू.४-१-८३), प्रग्घिताद्यत् (पा.सू.४-४-७५), प्राक् क्रीतात् छः (पा.सू.५-१-१), प्राग्वतेष्ठञ् (पा.सू.५-१-१८) प्रभृतिषु दशाधिकसूत्रेषु स्पष्टतयाधिकारसङ्केतं कुरूते । अत्र शारदाप्रभाकारेण शब्दान्तरेण कृतोऽधिकारसङ्केतः प्राथमिकछात्राणां कृते भारावह इति विचोरणीयोऽयमेतादृक् प्रयोगः ।

शारदाप्रभायास्तद्धितखण्डेऽनुवृत्तिसङ्केतस्तु पूर्वप्रकरणापेक्षया सुबोध्यतरः स्पष्टतरश्च दृश्यते । अन्येषु प्रकरणेष्विवात्रापि व्याख्यातासौ ग्रन्थस्थमूल एव सूत्रस्थानां पदानामनुवृत्तिगतिसीमां निर्धारयति । व्याख्यानखण्डेऽपि कखगादिवर्णैः सङ्केतं कृत्वा प्रकृतसूत्रे केभ्यः केभ्यः पूर्वसूत्रेभ्यः किं किं पदमनुवर्तत इति समुल्लिख्य व्याख्याति । निदर्शनरूपेणाष्टाध्याय्याः ग्क्ङिति च (पा.सू.७-२-११८) इति सूत्रे पूर्वसूत्रेभ्योऽनुवृत्तेरागमनप्रकारोऽत्र प्रदर्श्यते-

| (क) | (ख) | (ग) | (घ) | |
|---|---|---|---|---|
| अङ्गस्य | मृजेर्वृद्धिः | अचो ञ्णिति | तद्धितेष्वचामादेः | किति च |

पूर्वसूत्रेभ्य एतेषु पदेष्वानीतेषु किति च इत्यस्य सूत्रवृत्तिरेतादृशी भवति- "किति च तद्धितपरतोऽङ्गस्याचामादेरचः स्थाने वृद्धिर्भवति ।"[४४२] अनेन प्रकारेण पदानि संयोज्य सूत्रार्थापनं प्राथमिकच्छात्राणां कृते लाभदायकं सुबोध्यं सरलञ्च भवतीति । अतोऽस्य व्याख्यानस्य वैशिष्ट्यमेव सारल्यम्, तच्चानुवृत्तिद्वारा सूत्रार्थापने प्रदर्शितमिति निःसङ्कोचेन वक्तुं शक्यते ।

### ६.२.१.१ सिंहावलोकनानुवृत्तिनिदर्शनम्

अनुकर्षणमिवापकर्षणमपि सूत्रार्थापनसहयोगि । पाणिनिमुनिरसौ बहुत्र सूत्रानुवृत्तेरनुकर्षणेन स्वाभीष्टं साधयति परं कतिषु स्थानेष्वपकर्षणमप्यावश्यकं भवति । तत्र पाणिनिनाऽपकर्षणद्वाराऽपि सूत्रार्थः पूरितो वर्तत इति व्याख्यातारः सूचयन्ति । तादृशानां सूत्राणां पदानाञ्चाकर्षणे कतिपयेषु व्याख्यातृषु मतभेदोऽपि दृग्गोचरीभवति । शारदाप्रभाकारोऽयं मतभेदसमुल्लेखनपूर्वकमेव तादृशमपकर्षणं सङ्केतयति । प्रकृते

---

[१०]. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४), पृ.२७४ ।
[११]. हरिप्रसादशर्माचार्यः (व्या.),*अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.६१८ ।

तद्धितप्रकरणे कुत्र कुत्र च तादृशमपकर्षणं सङ्केतितमस्ति ? तस्य फलञ्च किमिति क्रमशोऽत्र प्रस्तूयते-

## क) द्विगोर्लुगनपत्ये इत्यत्रोत्तरसूत्रादचीत्यपकर्षणस्य समर्थनम्

तद्धितीयेऽपत्याधिकारपठिते द्विगोर्लुगनपत्ये (पा.सू. ४-१-८८) इति सूत्रे तदुत्तरवर्तिनो गोत्रेऽलुगचि (पा.सू.४-१-८९) इत्यस्मादचीत्यपकृष्यत इति शारदाप्रभाकार एवं सङ्केतयति- “अत्रोत्तरसूत्रादचीति पदमपकृष्यते, तच्च लुगित्यनेन सम्बद्धस्य प्रत्ययस्य विशेषणत्वात् षष्ठ्यन्ताय कल्पत इति ।”[४४३] अनेन प्रकारेणोत्तरसूत्रादचीति पदमपकृष्य द्विगोर्निमित्त-स्यानपत्यार्थे विहितस्याजादेः प्रत्ययस्य लुग् भवतीत्यर्थो निष्पाद्यते । कौमुदीकारो दीक्षितोऽपि उत्तरसूत्रादचीति पदमानीय सूत्रमिदमेवमर्थापयति-“द्विगोर्निमित्तं यस्तद्धितोऽजादिरनपत्यार्थः प्राग्दीव्यतीयस्तस्य लुक् स्यादिति ।”[४४४] प्रक्रियाक्रमानुसारिभिर्दीक्षितादिभिरचीति पदमपकृष्य पूर्वोक्तार्थे कृते सत्यपि काशिकाकार-न्यासपदमञ्जरीकारास्त्वच्पदं विनैव सूत्रमिदमेवमर्थापयन्ति- “द्विगोर्यसम्बन्धी निमित्तत्वेन तद्धितः प्रग्दीव्यतीयोऽपत्यप्रत्ययं वर्जयित्वा तस्य लुग् भवतीति ।”[४४५] अतः सूत्रार्थापनेऽनुवृत्तिग्रहणेऽपकर्षणे च व्याख्यातृषु मतभिन्नता स्फुटरूपेण दृश्यते । अतो बहुषु स्थानेषु काशिकानुगतोऽपि शारदाप्रभाकारः क्वचित्तु कौमुदीमप्यनुवर्तयतीति प्रकृतोदाहरणतोऽवगम्यते । तथैव द्वितीयके व्याख्याने सूत्रापकर्षणचर्चापि तस्याभीष्टमिति स्फुटम् ।

## ख) ‘कालप्रयोजनाद् रोगे’ इति सूत्रे संज्ञापदापकर्षणविचारः

तद्धितान्तर्गते पाञ्चमिकप्रकरणे पठिते कालप्रयोजनाद् रोगे (पा.सू. ५-२-८१) इति सूत्र उत्तरत्रस्थितात् तदस्मिनन्नं प्रायेण संज्ञायाम् (पा.सू. ५-२-८२) इत्यस्मात् संज्ञायामित्यपकर्षत इति काशिकावचनमुद्धरन् शारदाप्रभाकार आह तदेवं- “उत्तरसूत्रादिह संज्ञाग्रहणमपकृष्यते तेनेदं प्रकारको नियमः सर्वो लभ्यत इति काशिका ।”[४४६] शारदाप्रभाकारोऽत्र संज्ञापदमानीयापि सूत्रार्थापने तु नैवोपयुङ्क्ते, तथा हि-“कालवाचिनः

---

१२. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.२७१ ।
१३. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४),पृ.२७६ ।
१४. वामनजयादित्यौ, *काशिकावृत्तिः* (तृतीयो भागः), पूर्ववत्, (१९६६) पृ. ३८१ ।
१५. वामनजयादित्यौ, *काशिकावृत्तिः* (चतुर्थो भागः),वाराणसी : तारापब्लिकेसन, (१९६७) पृ. १९२ ।

पूरणप्रत्ययान्तप्रकृतिकाज्जनित इत्यर्थे कन् भवति रोगे गम्य इति" [४४७] अतः शारदाप्रभाकारोऽयं मतभेदसमुल्लेखनप्रयोजनायैवात्र काशिकावाक्यमुद्धरत इति ज्ञायते । अतः शारदाप्रभाकारः प्रक्रियाक्रमेण सूत्रमिदं व्याख्याति पक्षान्तरनिदर्शनमुखेनैव काशिकापक्षमुल्लिखतीति स्फुटम् । अत्र साक्षात् कालवाचिभ्यो मासादिभ्यः कन् प्रत्ययमविहित्वा तदितरेभ्य आनुषङ्गतः कालवाचकेभ्यो द्वितीयादिभ्यः कथं विहितः ? अत्र किं मानमिति शङ्कायां तत्त्वबोधिनीकारोऽपकर्षणं सूचयन्नाह-"ननु साक्षात् कालवाचिभ्यो मासादिभ्यः कन् न भवति, द्वितीयादिभ्यस्तु भवतीत्यत्र किं मानमित्यत्राहुः- उत्तरसूत्रस्थसंज्ञापकर्षणात् शब्दस्वभावात् वा तद्बोध्यमिति ।" [४४८] अत्र तत्त्वबोधिनीकारोऽपि संज्ञापकर्षणादेव द्वितीयादिभ्यः कन् जात इत्यत्र न दृढः, शब्दस्वभावादपि स सम्भवतीत्युक्त्वा संज्ञाया अपकर्षणेन शब्दस्वभावेन वाऽपकर्षणो विहित इत्याह । परं काशिकाकारस्तु दृढतयाऽपकर्षणं समर्थयतीत्यपकर्षणे काशिकाकारो दृढोऽस्तीति ज्ञायते । अत्र काशिकायाः तत्सूत्रवृत्तिः प्रमाणम् । तत्र स प्राह- "कालात् प्रयोजनाच्च यथायोगं समर्थविभक्तियुक्ताद्रोगेऽभिधेये कन् प्रत्ययो भवति ।" [४४९] अत्रत्योऽभिधेयशब्दः संज्ञार्थं ज्ञापयन्नुत्तरसूत्रादपकर्षणं प्रमाणीकुरूते । काशिकाव्याख्यातारौ न्यासपदमञ्जरीकारावपि मूलोक्तवचनेन सह सहमतौ । संज्ञापदस्य पश्चादनुवर्तनं कथं सम्भवतीति जिज्ञासमानः पदमञ्जरीकारो हरदत्तो ब्रूते- "सिंहावलोकनन्यायेन तत्सम्भवः, यथा सिंहा धावन्तः पृष्ठतोऽवलोकन्ते तद्वदिति ।" [४५०] अत्र हरदत्तप्रस्तुतेन सिंहावलोकन-दृष्टान्तेनापकर्षणं स्वीकृतमिति ज्ञायते । प्रकृतसूत्रे प्रकारनियमस्यानुल्लेखनात् तत्कथमत्र ज्ञाप्यत इति जिज्ञासायां न्यासकारः -"संज्ञाग्रहणसन्निधानादिह सर्वप्रकारोऽयं नियमो लभ्यत इति" [४५१] प्राह। अनेन प्रकारेण काशिकाकारस्तद्व्याख्यातारौ चात्र संज्ञापदमपकर्षन्ति चेत् प्रक्रियाकारास्तु शब्दस्वभावत एव तद् बुध्यन्त इति तर्कयन्ति । प्रकृतव्याख्याकारोऽत्र काशिकामतमुल्लिख्यापि दीक्षितसरणिं नानुकुरूत इति तदीयव्याख्यानेन बुध्यते ।

## ग) 'किमोऽत्'इति सूत्र उत्तरसूत्राद् वा पदापकर्षणविचारः

---

[१६]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ. ३७८ ।

[१७]. ज्ञानेन्द्रसरस्वती (व्या.) *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४), पृ. ३५५ ।

[१८]. वामनजयादित्यौ, *काशिकावृत्तिः* (पञ्चमो भागः), पूर्ववत्, (१९६७) पृ.१९२ ।

[१९]. हरदत्तः (व्या.) *काशिकावृत्तिः* (पञ्चमो भागः), पूर्ववत्, (१९६७) पृ.१९२ ।

[२०]. जिनेन्द्रबुद्धिः (व्या.) *काशिकावृत्तिः* (पञ्चमो भागः), पूर्ववत्, (१९६७) पृ. १९२ ।

सिद्धान्तकौमुद्यास्तद्धितान्तर्गते प्राग्दिशीयप्रकरणे पठिते किमोऽत् (पा.सू.५-३-१२) सूत्रे तदुत्तरपठितात् वा ह च च्छन्दसि (पा.सू.५-३-१२) इति सूत्राद्वा पदमपकृष्यत इति विषयं शारदाप्रभाकारो ग्रन्थमूल एवं प्रस्तौति- "अत्रोत्तरसूत्राद् वेत्येतत्पदमपकृष्यत इति ।"[४५२] प्रकृतसूत्रे विकल्पबोधकपदाभावाद् व्याख्यातार उत्तरसूत्राद् वा पदमानीय 'क्व' इति रूपस्य विकल्पे कुत्र इत्यपि साधयन्ति । अत्र सिद्धान्तकौमुदीकारो वा पदानुवर्तनोल्लेखमेवं कुरूते तदेवं- "वा ग्रहणमपकृष्यते, सप्तम्यन्तात् किमोऽद् वा स्यात् पक्षे त्रल् ।"[४५३] अत्र तप्वबोधिनीकार इमं पक्षमसहमानो योगविभागद्वारा तत्रत्यां समस्यां समाधत्ते, तदेवं- "अत्र किमोऽद् वा इति सूत्रं पठित्वा ह च छन्दसि इति सूत्रयितुं युक्तम् ।"[४५४] अनेन प्रकारेण योगविभागद्वारा सूत्रार्थापनं युक्तमिति तस्याशयो दृश्यते, परं काशिकाकारस्तु केचिदित्युक्त्वाऽपकर्षणपक्षमुररीकुरूते, तदेवं- "अत्र त्रलमपि केचिदिच्छन्ति, तच्चोत्तरसूत्राद् वा वचनं पुरस्तादपकृष्य सम्भव इति ।"[४५५] काशिकाकारस्येतेन वचनेन 'कुत्र' इति पदस्य साधुत्वसिद्धये वा पदस्यापकर्षणमावश्यकमिति ज्ञातुं शक्यते । तप्वबोधिनीकारस्य योगविभागपक्षस्तु काशिकायाः पदमञ्जरीव्याख्यानतः प्रभावितो दृश्यते । तत्र पदमञ्जरीकार आह- "किमोऽत् इति सूत्रे वा पदं संयोज्य ह च छन्दसि इत्येव सूप्यतामिति"[४५६] अत्र भागवृत्तिकारस्तु कुत्र इति पदं वैदिकप्रयोग एव साधुरित्युक्त्वा लोकेऽपकर्षणमेव खण्डयति तथापि लोके 'कुत्र' इत्यस्य प्रयोगदर्शनादमरकोषेणापि पक्षान्तरे तत्स्वीकाराच्च[४५७] वा पदापकर्षणपक्षमपि तप्वबोधिनीकारोऽप्रत्यक्षतया स्वी कुरूत इति ज्ञायते । एभिः तथ्यैरत्रापकर्षणपक्ष एव बलीय इति निश्चीयते । शारदाप्रभाकारेण गृहीतोऽयं पक्षः समुचितश्च प्रतीयते ।

## ६.२.१.२ गङ्गाप्रवाहमण्डूकप्लुत्योरनुवृप्योर्निदर्शनम्

शारदाप्रभायास्तद्धितखण्डे गङ्गाप्रवाहवदनुवर्तितानि सूत्राणि यत्र तत्र प्राप्यन्ते । अत्रत्यानि कानिचन सूत्राणि पदानि च प्रकृताध्यायस्य पादान्तमनुवर्तन्ते चेत् कति तु

---

[२]१. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.३९१ ।
[२]२. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४), पृ. ३६३ ।
[२]३. ज्ञानेन्द्रसरस्वती (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४),पृ. ३६३ ।
[२]४. वामनजयादित्यौ, *काशिकावृत्तिः* (पञ्चमो भागः), पूर्ववत्, (१९६७) पृ. २४७ ।
[२]५. हरदत्तः (व्या.), *काशिकावृत्तिः* (पञ्चमो भागः), पूर्ववत्, (१९६७) पृ. १९२ ।
[२]६. ज्ञानेन्द्रसरस्वती (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४) पृ. ३६३ ।

पादान्तरमप्यनुगच्छन्ति । अत्रत्यं तस्यापत्यम् (पा.सू.४-१-९२) इति सूत्रमपत्यार्थेऽण्प्रत्ययं विधाय चतुर्थाध्यायस्य प्रथमपादान्तमपत्यार्थमनुगमयति, तथैव तेन प्रोक्तम् (पा.सू.४-३-१०१) इति सूत्रं तस्यैव पादस्य १११ सूत्रान्तमण् प्रत्ययं प्रोक्तार्थञ्च नयति । अनेनैव प्रकारेण तस्येदम् (पा.सू.४-३-१२०) सूत्रमप्यण्प्रत्ययेन सहैवानुवर्तते, एवमेव भवे च छन्दसि (पा.सू.४-३-११०) इति सूत्रस्थं छन्दसीति पदमपि प्रकृतपादान्तमेवानुवर्तते, तस्मादत्र गङ्गाप्रवाहवदनुवृत्तेरूदाहरणानि यत्र तत्र दृश्यन्त इति निष्कर्षः ।

शारदाप्रभायास्तद्धिते मण्डूकप्लुत्याऽनुवर्तितानि कानिचनोदाहरणानि प्राप्यन्ते । शारदाप्रभाकारोऽयं बहुत्र ग्रन्थमूले क्वचिद् व्याख्यानखण्डेऽपि तेषां सङ्केतं कुरूते । अध्यायानुवाकयोर्लुक् (पा.सू.५-२-६) इति सूत्रे विंशत्यादिभ्यस्तमन्यतरस्याम् (पा.सू.५-२-५६) इत्यतो मण्डूकप्लुत्याऽन्यतरस्यामिति पदमनुवर्तते, तं च शारदाप्रभाकारः काशिकाव्याख्यानं न्यासमुद्धरन्नेवं सङ्केतयति- “अन्यतरस्यामिति मण्डूकप्लुत्याऽत्रानुवृत्तिरिति न्यासकारस्याशयः”[४५८] प्रकृतसूत्रे विकल्पबोधकपदाभावात् छप्रत्ययस्य वैकल्पिको लुक् कथं सम्भवतीति जिज्ञासायां दीक्षितकाशिकाव्याख्यातारौ परस्परं विवदेते, तयोर्मध्ये न्यासकारो विंशत्यादिभ्य... इत्यस्मात् सूत्रात् मण्डूकप्लुत्यान्यतरस्यामिति पदमागच्छतीत्युक्त्वा समाधत्ते चेद् दीक्षितस्तु विधानसामर्थ्यात् विकल्पेन लुगिति व्याख्याति । अत्र न्यासमताङ्गीकारे प्रकृतप्रसङ्गो मण्डूकप्लुतेरूदाहरणं भवितु शक्नोति । तथैव तदर्हम् (पा.सू.५-१-११६) सूत्रेऽपि तेन तुल्यं क्रियाचेद्वति (पा.सू.५-१-११४) इत्यस्मात् क्रिया चेदिति पदद्वयं व्याख्यातृभिर्मण्डूकप्लुत्या समानीतं दृश्यते तं शारदाप्रभाकार एवं सङ्केतयति-“अत्र क्रिया चेदिति मण्डूप्लुत्यानुवर्तते, तेनेह न राजानमर्हति छत्रम्”[४५९] तेन तुल्यमिति सूत्रस्थं क्रिया चेदिति पदद्वयं तदुत्तरवर्तिनं ‘तत्र तस्येवे’ति सूत्रमुलङ्घ्य तदर्हमिति सूत्रे समागच्छतीत्यत्र मण्डूकप्लुत्यानुवृत्तिरस्तीति निश्चीयते । एभिरूदाहरणैस्तथ्यैश्च शारदाप्रभाकारोऽयमत्र गङ्गाप्रवाह-सिंहावलोकन-मण्डूकप्लुतिश्चेति त्रिविधानामेवानुवृत्तीनां सङ्केतं करोतीति ज्ञायते । क्वचित् स्पष्टतया क्वचन चास्पष्टतया जातं सदप्यस्या अनुवृत्तिनिदर्शनं सूत्रार्थापने सहाय्यमिति निष्कर्षः

---

[२७]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ.३७६ ।
[२८]. पूर्ववत्,पृ.३६१ ।

## ६.२.२ विग्रहादिभिरूदाहरणादिभिश्च सूत्रार्थापनम्

शारदाप्रभाकारोऽयं तद्धितीये सूत्रव्याख्याने कठिनपदस्फोरणायार्थस्पष्टीकरणाय च विग्रहसमासौ प्रदर्शयति । अत्र कठिनपदसरलीकरणाय प्रायेण ग्रन्थमूले क्वचित् व्याख्यानखण्डेऽपि सूत्रोदाहरणादीनि निर्दिशति । अस्य विग्रहप्रयोगो न केवलं सूत्रेष्वपि तूदाहरणप्रत्युदाहरणेषु नैकसमासयुतेषु पदेष्वपि वर्तते ।

व्याख्याताऽयं प्रकृतिप्रत्ययप्रदर्शनायैव सूत्राणि न विगृह्णाति सूत्रार्थसरलीकरणायापि पदानि स्फोरयति, तादृशमुदाहरणं ऋष्यन्धकवृष्णिकुरू भ्यश्च (पा.सू.४-१-११४) इति सूत्रे प्राप्यते, स तत्राह-"ऋषिवाचिनः, अन्धकवाचिनः, वृष्णिवाचिनः, कुरू वाचिनश्च ऋष्यन्धकवृष्णिकुरवः, तेभ्योऽपत्यार्थेऽण् स्यादिति ।"[४६०] एतादृशमपरमुदाहरणं दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः (पा.सू.४-१-८५) सूत्रेऽपि प्राप्यते । तत्रासौ सूत्रार्थप्रकाशनधिया समस्तानि पदान्येवं स्फोरयति-"दितिप्रातिपदिकात्, अदिति प्रातिपदिकात्, आदित्यप्रातिपदिकात् पत्युत्तरपदकात् (यथा सेनापतिबृहस्पति इत्यादिकात्) प्रातिपदिकाच्च ण्यप्रत्ययो भवतीति ।"[४६१] यद्यपि प्रकृतव्याख्यात्रा प्रातिपदिकादित्युल्लिखितमस्ति तथापि सुबन्तात्तद्धितोत्पत्तिरिति नियमेन सर्वत्र सुबन्तादित्यस्य योजनमत्रापेक्ष्यते । अनेन प्रकारेण सूत्रार्थापिते स्थानेऽप्रत्यक्षतो विग्रहोऽपि ध्वन्यते अतोऽर्थप्रकाशनोद्देश्येन सूत्रादीनि विगृह्णातीति ज्ञायते । व्याख्याताऽयं कतिपयेषु पारिभाषिकेषु पदेषु पूर्वव्याख्यातॄनुद्धृत्यैवं विगृह्णाति- "गुरुरूपोत्तमं ययोस्तयोर्गुरूपोत्तमयोस्तत्सम्बन्धा दिति।"[४६२] तथैव, गोत्रावयवात् (पा.सू.४-१-७९) इति सूत्रे गोत्रमर्थापयन्नेवं विग्रहं कुरूते- "गूयन्ते= शब्यन्तेऽनेनेति गोत्रम्, मूलपुरुष इति[४६३] तादृशः पारिभाषिकपदविग्रहो नौवयोधर्म...इति सूत्रव्याख्यानेऽपि लभ्यते, स तत्र मूल्यशब्दमर्थापयन्नाह-"वणिग्भिर्विनियुक्तं धनं मूलं तस्मादतिरिक्तं आयभागो मूल्यमिति ।[४६४] तथैव पङ्क्तिविंशति...(पा.सू.५-१-५८) इत्यत्र पङ्क्तिपदमेवं विगृह्णाति- दशत्परिमाणमस्येति पङ्क्तिरिति । स पुनरर्थस्पष्टीकरणाय- पञ्चपदानि परिमाणमस्येति काशिकाकारस्यावान्तरविग्रहमपि प्रस्तौति ।

---

[२]९. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ.२७५ ।
[३]०. पूर्ववत्,पृ.२६९ ।
[३]१. पूर्ववत्,पृ.३७६ ।
[३]२. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ.३७६ ।
[३]३. पूर्ववत्,पृ.३३५ ।

एवमन्यत्रापि विशिष्टेषु पारिभाषिकेषु पदेषु यथासम्भवं मतमतान्तरं प्रदर्श्यैव विग्रहं कुरूते । एतादृशान्युदाहरणानि शारदाप्रभाया मूले व्याख्यानखण्डे च यत्र तत्र दरीदृश्यन्ते । कौमुदीकारस्तथान्ये व्याख्यातारः कठिनपदान्येव विग्रहेण स्फोरयन्ति परं शारदाप्रभाकारस्तु विषयसरलीकरणाय सूत्राण्यर्थापयन् तत्र स्थितानि पदानि विगृह्णाति । कतिषु स्थानेष्वेकमपि सूत्रमनेकानर्थान् प्रत्याय्यन्ति । तादृशेषु स्थानेषु विग्रहाणामप्यनेकत्वं सम्भाव्यं तत्र प्राथमिकाश्छात्राः कस्मिन् पदे को विग्रहो करणीय इति विभ्रमन्ते । तत्र शारदाप्रभाया युक्तिश्छात्रकाठिन्यं परिहरतीति निश्चेतुं शक्यते ।

तद्धितप्रकरण एव पठितं तमधीष्टो भृतो भूतो भावी (पा.सू.५-१-७९) इति सूत्रमधीष्टे भृते भूते भाविनि च ठञ्प्रत्ययं साधयति । अत्र स्थितानां भिन्नार्थानां योगोऽन्यैः सह कर्तुं न शक्यते, तस्मात्तदर्थबोधनाय सकलपदानां विग्रहप्रदर्शनमपेक्षितं भवति, तादृशविग्रहश्च शारदाप्रभाकार एवं प्रस्तौति- “मासमधीष्टो मासिकोऽध्यापकः, मासं भृतो मासिको कर्मकरः, मासं भूतो मासिको व्याधिः, मासं भावी मासिक उत्सवः ।”[४६५] तथैवेन्द्रियशब्दं साधयता दीक्षितेन सङ्क्षेपेण सङ्केतिता विग्रहा अत्र शारदाप्रभाकारेण सुबोध्यरूपेण प्रस्तुता दृश्यन्ते, तदेवं- “इन्द्र आत्मा तस्य लिङ्गम्, इन्द्रेण दृष्टं सृष्टं जुष्टं दत्तं वेन्द्रियम् ”[४६६] अत्रत्ये विग्रहे लिङ्गमित्यस्य योगः षष्ठ्यन्ते विग्रह एव कर्तुं शक्यते । अत्र स्थिता दृष्टसृष्टादयोऽर्थास्तु तृतीयान्तेन विग्रहेणैव बोध्याः । तेषां सङ्केतश्च प्रकृतव्याख्यात्रा विहितः । अतोऽस्य सूत्रख्यापनं सरलताकेन्द्रितमिति वक्तुं शक्यम् । एतादृशी व्याख्यानसम्बन्धिनी स्पष्टता सिद्धान्तकौमुद्यां न दृश्यते, तत्र दीक्षितः -“इन्द्र आत्मा तस्य लिङ्गं, करणेन कर्तुरनुमानादिति करणं प्रकारार्थः । इन्द्रेण दुर्जयमिन्द्रियमिति”[४६७] निर्दिशति । इन्द्रियप्रभृतीनां रूढशब्दानां विग्रहो यथाकथञ्चित् कर्तुं शक्यते रूढेरनियमादिति काशिकाया अभिमतं दृश्यते । अत्रत्ये विग्रहे कौमुदीकारो लिङ्गदुर्जयोरर्थयोश्च चयनं करोति चेत् शारदाप्रभाकारस्तु दृष्ट-सृष्ट-जुष्ट-दत्तपदानि समानरूपेण समुल्लिखति, अतो यथासम्भवमधिकार्थसमावेशोऽपि शारदाप्रभाया वैशिष्ट्यम् ।

शारदाप्रभाकारोऽत्रत्येषु कतिपयेषु सूत्रेष्वेव समाससङ्केतं करोति । पाणिनीयसूत्रस्थितेषु समस्तपदयुतेषु शब्देष्वपि छात्रबोधभारभीत्या व्याख्याताऽयं प्रायेण समासं

---

[३]४. पूर्ववत्,पृ.३५६ ।

[३]५. पूर्ववत्,पृ.३८० ।

[३]६. भट्टोजिदीक्षितः,*वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४), पृ. ३५६ ।

विग्रहञ्च न प्रस्तौति, एतेनात्यावश्यकेषु स्थानेष्वेवायं समासविग्रहादीन् निर्दिशतीति निश्चीयते ।

### ६.२.२ .१ उदाहरणप्रयोगः

शारदाप्रभाकारोऽयं तद्धिते यथासम्भवं मौलिकान्युदाहरणानि प्रस्तौति । तानि च प्रायेण नैपालककृषि-कला-संस्कृति-साहित्यादिविषयेभ्यो गृह्णाति । तदतिरिक्तान्युदाहरणानि काशिका-कौमुदीभ्यामानयति । अत्यल्पसङ्ख्यकानि कानिचनोदाहरणानि तु वेद-काव्य-नीतिशास्त्रादिभ्योऽपि समुद्धरते, अतः परमेतेषामुल्लेखो विधीयते ।

शारदाप्रभायास्तद्धितखण्ड उपलब्धानि मौलिकान्युदाहरणानि व्याख्यातुर्जन्मस्थानं प्रतिष्ठानपुरम्, गण्डकी-कौशिक्यादीर्नदीः, नैपालकहिमालयान् कृषिपद्धतिञ्च ख्यापयन्ति, एतद् व्याख्यानमधीयानोऽर्वाचीनः कश्चिदुत्तरकालिको जनो नैपालसौन्दर्यम्, भौगोलिकसङ्केतादिकञ्च सामान्यतो ज्ञातुं प्रभवति । तादृशानि मौलिकोदाहरणानि केषु केषु सूत्रेषु वर्तन्त इति ज्ञानायात्र कानिचनोदाहरणानि प्रस्तूयते -

| *मौलिकोदाहरणानि* | *सूत्रसङ्केतः* |
|---|---|
| नेपालो निवासोऽस्य नैपालकः/नेपालीयः/नैपालः | साऽस्य.. (पा.सू. ४-३-८९) |
| प्रतिष्ठानपुरमभिजनोऽस्य प्रातिष्ठानपुरम् | अभिजनश्च (पा.सू. ४-३-९०) |
| माण्डवीमभिनिष्क्रामति माण्डवीयम् | अभिनिष्क्रामति.(पा.सू.४-३-८६) |
| कुद्दालेन खनति कौद्दालिकः | तेन दीव्यति... (पा.सू.४-४-२) |
| गण्डकीतिर इव गण्डकीतीरवत् | तत्र तस्येव (पा.सू. ५-१-१२५) |
| साङ्ग्रहसूत्रिकः, लौकायतिकः, नैयायिकः | क्रतूक्थादिसूत्रा..(पा.सू.४-२-६०) |
| पर्वतादवरोहति | अपादाने ... (पा.सू. ५-४-४५) |
| भद्राकरोति कुमारं नापितः | मद्रात् परि... (पा.सू. ५-४-६७) |

एतेभ्योऽधिकान्यपि बहूनि मौलिकोदाहरणानि तद्धितखण्डे दृश्यन्ते परं तानि नैपालकं स्थान-समय-पर्यावरणादिकं नावबोधयन्ति । सूत्रोदाहरणरूपेण समागतैरेतैरुदाहरणैर्व्याख्याकारोऽयमुदाहरणमाध्यमेन दैशिक-स्थानीयसम्पदागौरवमपि प्रवर्द्धयतीति स्फुटं भवति ।

क) काशिकात उदाहरणग्रहणम्

शारदाप्रभायास्तिङन्तखण्डे काशिकावृत्तितो बहून्युदाहरणानि प्रत्युदाहरणानि च समानीतानि दृश्यन्ते अत शारदाप्रभायाः प्रमुखाधारग्रन्थत्वेन काशिकां मन्तुं शक्यते । तद्ग्रन्थतोऽसौ न केवलमुदाहरण-प्रत्युदाहरण-वार्त्तिकादीन्येव गृह्णात्यपि तु व्याख्यानशैलीं सूत्रानुवर्तनपद्धतिमपि समानयति । प्रकृते तद्धितखण्डे काशिकावृत्तितः कीदृशान्युदाहरणानि समानीतानि सन्ति ? व्याख्याताऽसौ तानि कठिनस्थले एवोद्धरत उत सामान्येऽपीत्यादिज्ञानायात्र तत्रत्यानि कानिचनोदाहरणानि प्रस्तूयन्ते -

| *उदाहरणम्* | *उदाहार्यसूत्रम्* |
|---|---|
| औपगवः, आश्वपतम्, दैत्यः, औत्सः | तस्यापत्यम् (पा.सू. ४-१-९२) |
| ऐन्द्रं हविः, आदित्यम्, बार्हस्पत्यम् | सास्य देवता (पा.सू. ४-२-२४) |
| मासिकः, आर्धमासिकः, सांवत्सरिकः | कालाट्ठञ् (पा.सू. ४-३-११) |
| पञ्चकः,गणकः, बहुकः | ङ्ख्यायाः ...(पा.सू. ५-१-२२) |
| ऊरुद्वयम्, ऊरुदघ्नम्, ऊरुमात्रम् | प्रमाणे ...(पा.सू. ५-२-३७) |
| शुक्लीकरोति, शुक्लीभवति, शुक्लीस्यात् | कृभ्वस्तियोगे...(पा.सू.५-४-५०) |
| एकधा, द्विधा | सङ्ख्यायाः ...(पा.सू. ५-३-४२) |
| सामन्यः, शरण्यः | तत्र साधुः (पा.सू. ४-४-९८) |

काशिकाकारो वेदपुराणादिभ्यो बहून्युदाहरणानि समानीय स्वग्रन्थागारं बिभर्ति । स सूत्रस्थानां प्रत्येकपदानां यथासम्भवमेकाधिकान्युदाहरणानि समुल्लिखति, तेभ्यः सरलानि सुबोध्यानि चोदाहरणान्येव चिनुते । फलतः काशिकापेक्षया न्यूनतमान्युदाहरणान्यत्र प्राप्यन्ते । तद्धितान्तर्गतेषु कतिपयेषु सूत्रेषु सूत्रकार एव पदं गणं वा निर्दिशति, अतस्तत्रापरशब्दप्रयोगसामर्थ्यं न दृश्यते, तत्र भवः (पा.सू.४-३-५३), तस्येदम् (पा.सू.४-३-१२०), स्त्रीभ्यो ढक् (पा.सू.४-१-१२०) प्रभृतिषु स्वतन्त्रशब्दचयनसामर्थ्ययुतेषु सूत्रेषु नवीनं दैशिकं स्थानीयं काव्यशास्त्रीयं वाऽन्यदीयमपि पदं प्रयोक्तुं शक्यते, तत्रापि पूर्वग्रन्थेभ्य

उदाहरणग्रहणं ग्रन्थस्य मौलिकपक्षप्रवर्द्धकं न प्रतीयते । सामान्यतयावलोकिते सति शारदाप्रभाकारः काशिकातोऽधिकान्युदाहरणानि समानयतीति वक्तुं शक्यते ।

## ख) सिद्धान्तकौमुद्या मौलिकोदाहरणपरीक्षणम्

शारदाप्रभायास्तद्धिते सिद्धान्तकौमुदीतोऽपि नैकान्युदाहरणानि समानीतानि दृश्यन्ते । यद्यपि कौमुद्यां काशिकातः, काशिकायाञ्च महाभाष्यतोऽनेकान्युदाहरणानि समानीतानि सन्तीति हेतोस्तेषामपि मूलस्रोतसो ज्ञानं दुष्करमेवास्ति । तथैव काशिकाकौमुद्योः समानुपूर्विकाण्युदाहरणानि सन्तीति किमुदाहरणं काशिकायाः किञ्च कौमुद्या इत्यपि विभज्य वक्तुं कठिनमेव । तथापि कौमुद्यपेक्षयाः काशिकायाः प्राग्वर्तित्वेन कौमुदीकारेणापि तत एवोदाहरणादीनि गृहीतानीति सामान्यतो वक्तुं शक्यम् । तत्र कौमुदीकारः प्राच्योदीच्यादिभेदजनितान् नैकान् दैशिकशब्दान् प्रयुङ्क्ते । अतस्तानि ग्रन्थान्तरेभ्यो गृहीतानि उत लोकव्यवहारत इति परिच्छेदोऽपि महाऽऽयासविषय एव, तथाप्यापाततः कौमुद्यां दृष्टिपथमागतानि कानिचनोदाहरणानि निदर्शनाय प्रस्तूयन्ते -

| *उदाहरणम्* | *उद्धृतं स्थानम्* |
|---|---|
| नापितात्तु परत्वात् फिञेव, नापितायनि | उदीचामिञ् (पा.सू.४-१-१५३) |
| शिवीनां विषयो देशः, शैवः | विषयो देशे (पा.सू.४-२-५२) |
| समकालीनं प्राक्कालीनं च | |
| अपभ्रंशा एवैत इति प्रामाणिकाः | कालाट्ठञ् (पा.सू. ४-३-११) |
| वैदम्, गार्गम्, दाक्षम् | गोत्रादङ्कवत् (पा.सू.४-३-८०) |
| शारीरकमधिकृत्य कृतो ग्रन्थः, शारीरकीयः | अधिकृत्यकृते..(पा.सू.४-३-८७) |
| वररुचिना कृतं वाररुचं वार्त्तिकम् | कृते ग्रन्थे (पा.सू.४-३-११६) |
| अवारीणम्, पारीणम्, वारीणम्, पारावारीणम् | तस्येदम् (पा.सू. ४-१-९२) |
| मार्दङ्गिकः, वैणविकः | शिल्पम् (पा.सू. ४-४-६१) |

सिद्धान्तकौमुद्यपेक्षयाः शारदाप्रभायामुदाहरणानां सङ्ख्याऽधिका दृग्गोचरीभवति । तत्र शारदाप्रभाया व्यासात्मिका व्याख्यानपद्धतिरेव कारणम् । कौमुदीकारोऽयं काशिकायामवस्थितेभ्य उदाहरणप्रत्युदाहरणेभ्यः कानिचन एवोद्धरति चेत् शारदाप्रभाकारस्तु बहून्यानीय तत्र मौलिकरूपाण्यपि सम्मेल्य उदाहरणबहुलं कारयति, अतः शारदाप्रभायामुदाहरणानां वैपुल्यं दृष्टिपथमायातीति निश्चीयते ।

### ग) वेदेभ्यः काव्यादिभ्यश्चोदाहरणग्रहणम्

शारदाप्रभाकारेण वैदिकग्रन्थेभ्यो नीतिशास्त्रेभ्यः काव्यादिभ्योऽन्यदीयेभ्यो ग्रन्थेभ्यश्च तद्धितखण्ड उदाहरणानि गृहीतानि सन्ति । तथैवात्र प्रासङ्गिकपद्यानि कारिकादीन्यपि च समानीतानि दृश्यन्ते । शिष्टपरम्परामनुपालयतानेन प्रयुक्तैरेतैर्निदर्शनैर्व्याख्यातुरध्ययन क्षेत्रवैपुल्यं विषयान्तरग्रन्थज्ञानसौष्ठवञ्च प्रकाशितं भवति । यद्यप्यत्र तादृशान्युदाहरणानि न्यूनसङ्ख्यकान्येव प्राप्यन्ते तथापि यथालब्धं प्रस्तूयन्ते-

| *वेद-काव्यशास्त्रादिसम्बद्धमुदाहरणम्* | *उद्धृतस्थलसङ्केतः* |
|---|---|
| त्वमग्ने वृषभस्तुग्रियाणाम् | तुग्राद् घन् (पा.सू.४-४-११५) |
| मेघ्याय च विद्युत्याय च नमः | भवे छन्दसि (पा.सू. ४-४-११०) |
| वैशन्तीभ्यः स्वाहा, हैमवतीभ्यः स्वाहा | वेशन्तहिमवद्..(पासू.४-४-११२) |
| असूर्यं देवेभिर्धायि विश्वम् | असुरस्य.. (पा.सू.४-४-१२३) |
| यथामुखीनः सीतायाः पुप्लुवे बहुलोभयन् | यथामुखसम्मुख (पा.सू. ५-२-६) |
| यथा हि जातं हिमवत्सु कान्थकम् | वर्णौ वुक् (पा.सू. ४-२-१०३) |
| सुमङ्गलीयं वधूः | छन्दसि... (का.वा.पृ.३८३) |
| तं प्रत्नथा पूर्वथा विश्वथे मथा | प्रत्नपूर्वविश्व..(पा.सू ५-३-११०) |
| आहुस्त्रिगर्तषष्ठासु कौण्डोपरथ... | दामन्यादि... (पा.सू. ५-३-११६) |

एतैरेतादृशैरन्यैश्चोदाहरणैः शारदाप्रभाकारोऽयं लोकतो वेदतो नीतिशास्त्रेभ्यः काव्यादिभ्यश्चोदाहरणानि गृह्णातीति सुस्पष्टं भवति । उपरि निर्दिष्टान्युदाहरणानि काशिकादावप्युपलभ्यन्त इति व्याख्यात्रा तत एव सङ्गृहीतानीति निष्कर्षः ।

### ६.२.२.२ प्रत्युदाहरणप्रयोगः

प्रतिगतमुदाहरणं प्रत्युदाहरणं भवति । विरुद्धोदाहरणं प्रकृतसूत्राप्रवृत्तिस्थलमिति तस्यार्थः । शारदाप्रभाकारोऽयं सूत्रस्थपदसार्थकीकरणायोदाहरणानामिव प्रत्युदाहरणानां प्रयोगोऽपि यत्र तत्र कुरूते । विशेषतः काशिकाकारेण प्रत्युदाहरणप्रयुक्तेषु स्थानेषु तान्येव वाक्यानि सरलीकृत्य सङ्क्षिप्य च प्रस्तौति । तथैव काव्यशास्त्रादौ प्रयुक्तानि वाक्यान्यपि यदाकदा प्रत्युदाहरणरूपेणोपस्थापयतीत्यस्य विशेषः । तेन तुल्यं क्रिया चेद्वति (पा.सू. ५-१-११५) इति सूत्रं व्याचक्षाणः काशिकाकारो ब्राह्मणवद् राजवदित्यादीन्युदाहरणानि प्रस्तुत्य क्रियाग्रहणं किम् ? गुणतुल्ये मा भूत्- पुत्रेण तुल्यः स्थूलः पुत्रेण तुल्यो गोमानिति

प्रत्युदाहरति । शारदाप्रभाकारस्तदेव प्रत्युदाहरणं सङ्क्षिप्यैवं प्रस्तौति- क्रिया चेदित्युक्तेर्नेह पुत्रेण तुल्यः स्थूल इति । अनेन पूर्वग्रन्थेषु स्थितानां प्रत्युदाहरणानां सङ्क्षेपीकरणमस्य वैशिष्ट्यमिति प्रतिभाति । कतिपयेषु स्थानेष्वसौ काशिकाकारेणानुक्तानि परं न्यासपदमञ्जरीकृद्भ्यां प्रोक्तानि प्रत्युदाहरणान्यपि प्रयुङ्क्ते,यथा- तदर्हम् (पा.सू. ५-१-११७) इति सूत्रे काशिकाकारो राजानमर्हतीति राजवत् पालनम्, ब्राह्मणवत्, ऋषिवत्, क्षत्रियवदित्युदाहरणान्येव समुल्लिखति चेत् शारदाप्रभाकारस्तु पदमञ्जरीमनुवर्तयन् मूल एव- "क्रिया चेदिति मण्डूकप्लुत्याऽनुवर्तते तेनेह न राजानमर्हतिच्छत्रम्"[४६८] इत्याह, परं कतिषु सूत्रेष्वयं काशिकाकौमुद्यादिषु समुल्लिखितानि प्रत्युदाहरणान्यपि न समुद्धरति, तद्यथा- पुराणप्रोक्तेषु ब्राह्मणकल्पेषु (पा.सू.४-३-१०५) इति सूत्रे काशिकाकौमुदीकारौ पुराणमिति किं ? याज्ञवल्क्यानि ब्राह्मणानि आश्मरथकल्प इति प्रत्युदाहरणं समुल्लिखतः परं शारदाप्रभाकारस्तु तन्नोलिखति । सम्भवतश्छात्रसारल्याय तन्नोल्लिखितं स्यात् । एतादृशान्यन्यान्यपि प्रत्युदाहरणानि शारदाप्रभायास्तद्धितखण्डे कतिषु स्थानेषु प्राप्यन्ते, तैः प्रत्युदाहरणैः सरलतया सूत्रार्थस्पष्टीकरणे निश्चयमेव सहयोगः स्यादित्यवधेयम् ।

## ६.२.३ शङ्कामुद्भाव्य समाधानम्

शारदाप्रभायास्तद्धितप्रकरणे सूत्र-वार्त्तिक-फक्किका-रूपसाधन-लिङ्गनिर्देश-समास-विग्रहादिसम्बद्धाः शताधिकाः शङ्काः समुत्थापितास्ताः पक्षविपक्षाभ्यां विविच्य कुत्रचित् सङ्केतरूपेण क्वचिद् व्याख्यानरूपेणापि समाहिता दृश्यन्ते । अत्र 'बहिषष्टिलोपो वक्तव्यः' इति वार्त्तिकेऽव्ययानां भमात्रे टिलोपः' इत्यस्यानित्यत्वप्रतिपादयित्री, स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् (पा.सू. ४-१-८७) इति सूत्रे 'स्त्रियाः पुंवदिति ज्ञापकाद् वत्यर्थे नञ्स्नञौ न भवतः' इति विषयसम्बद्धाः, ओर्गुणः (पा.सू.६-४-१४६) इति सूत्रे 'ओरोदिति वक्तव्ये गुणवचनग्रहणं संज्ञापूर्वको विधिरनित्य इति ज्ञापनार्थ'मिति विषयिणी, असमासे निष्कादिभ्यः (पा.सू.५-१-२०) इत्यत्र समासग्रहणेन तस्मात् पूर्वं तदन्तविधिरिति ज्ञापनविषयिणी, अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम् (पा.सू. ५-१-२८) इति सूत्रे समाहारद्वन्द्वसमासेऽपि पुँस्त्वविहितविषयिणी, पणपादमाषशताद्यत् (पा.सू.५-१-३४) इति सूत्रस्थे पादे पादः पत् (पा.सू.६-४-१३०) इति सूत्रेण पदादेशाभावसम्बद्धा, किं सर्वनामबहुभ्यः...(पा.सू.५-३-२) सूत्रे सर्वनाम्नैव किमोऽपि ग्रहणसम्भवे तस्य पुनरूपादानं किमर्थमिति विषयिणी, अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे (पा.सू.४-१-७८) इत्यत्र पारिभाषिकगोत्रग्रहणप्रयोजनप्रतिपादयित्री, नित्यवीप्सयोः

---

[३७]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.३६१ ।

(पा.सू.८-१-४) इत्यत्रोत्तरसूत्रात् पदस्येत्यपकर्षणेनैव सिद्धे किं पुनः सर्वस्य द्वे (पा.सू.८-१-१) इति सकलसूत्राधिकारेण इति विषयसम्बद्धा एवमन्यापि सूत्र-वार्त्तिक-फक्किका-रूपसाधनादिविषयसम्बद्धा अनेकाः शङ्का यत्र तत्र समुपलभ्यन्ते । शारदाप्रभाकारोऽयं प्रायः काशिकासरणिमङ्गीकृत्यैतासां शङ्कानामुत्थापनं तासां सङ्क्षिप्तसमाधानञ्च पुरस्कुरुते, क्वचित्तु काशिकाकारेणानुत्थापितासु परं कौमुदीकारेण समुत्थापितासु पदकृत्यप्रदर्शनादिष्वप्ययं समाधानं प्रस्तौति । तादृशशङ्कासु तस्यापत्यम् (पा.सू.४-१-९२) इति सूत्रे 'आदिवृद्धिरन्त्योपधावृद्धीर्बाधते' इति विषयिणी वर्तते । तत्रैव प्रस्तुतापरा 'कृतसन्धेरिति किम् ? अकृतव्यूहपरिभाषया सावुत्थितिर्माभूत्' इति विषयिका तथा अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे (पा.सू.४-१-७८) इति सूत्रे समुत्थापिता 'निर्दिश्यमानस्यादेशा भवन्ति' इत्यादिना अणिञोरेव ष्यङादेशो भवतीति व्याख्यानपरा तथा तत्सदृशा अन्याश्च वर्तन्ते । शारदाप्रभायामुद्भावितास्वेतासु शङ्कासु प्रायः सङ्क्षिप्तशैल्या सूत्रात्मकतया च समाधानं विहितम् । अत्र कतिषु स्थानेषु विषयमुपस्थाप्य पूर्ववर्त्तिनां मतानां समुल्लेखनेन व्याख्याय च समाहितमप्यस्ति चेत् क्वचन तु सङ्केतशैल्या समाहितमस्ति ।

अतः परं शारदाप्रभायास्तद्धितखण्डे प्राप्तास्वेतास्वन्यासु शङ्कासु शारदाप्रभाकारेण प्रस्तुतं विश्लेषणं समाधानञ्च प्रस्तूयते-

### ६.२.३.१ 'बहिषष्टिलोपो वक्तव्य' इत्यस्यौचित्यविमर्शः

तद्धितप्रकरणान्तर्गते दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः (पा.सू.४-१-८५) सूत्रे शारदाप्रभाकारेण प्रयुक्तेषु नववार्त्तिकेषु 'बहिषष्टिलोपो यञ् च' इत्यप्येकम् । वार्त्तिकमिदमव्ययबोधकाद् बहिष्शब्दात् यञ्प्रत्ययं तस्य टिलोपञ्च शास्ति, अतो बाह्य इति रूपं निष्पद्यते । प्रकृतवार्त्तिकेन यञ् प्रत्ययविधानस्य प्रयोजने सत्यप्यव्ययानां भमात्रे टिलोप इति वार्त्तिकेनैव टिलोपसम्भवात् पुनरनेन टिलोपविधानस्य किं प्रयोजनमित्याशङ्कायां शारदाप्रभाकार आह- "अव्ययानां भमात्रे टिलोप इति वार्त्तिकेनैव सिद्धे पुनरस्योपादानं (अव्ययानामित्यस्य वार्त्तिकस्यानित्यतासूचनार्थमिति ।"[४६९] अत्र तत्त्वबोधिनीकारोऽपि सहमतः । न्यासकारोऽपि तस्यानित्यतां सूचयन्नाह-"ननु चाव्ययानां भमात्रे टिलोप सायम्प्रातिकाद्यर्थ इत्यनेनैव टिलोपसिद्धिस्तत् किमर्थं पुनरुच्यते इत्याशङ्कायामाह- अनित्यत्वज्ञापनस्य

---

[३८]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ.२७० ।

प्रयोजनमाराद् भवतीति वृद्धाच्छः ।"[४७०] अर्थादव्ययानां भमात्रे टिलोप इति वार्त्तिकमनित्यम्, तस्मादव्ययवाचकादारादिति प्रातिपदिकाद् वृद्धाच्छः इति छप्रत्ययेन टिलोपाभावेनचारातीय इति रूपसाधनार्थं पुनर्द्वितीयवार्त्तिकं पठितमिति न्यासकारस्याशयः । अत्र सर्वे व्याख्यातारो द्वितीयवार्त्तिकपाठद्वारा प्रथमस्यानित्यत्वं प्रतिपादयन्तीति तदेव निष्कर्षः ।

### ६.२.३.२ तस्यापत्यमित्यस्य प्रयोजनविचारः

तस्येदम् (पा.सू.४-३-१२०) इति सूत्रेणैवापत्यार्थेऽण्प्रत्ययः सिध्यति, अतस्तस्मिन्नेवार्थे पुनस्तस्यैव प्रत्ययस्य विधानाय किमर्थं तस्यापत्यम् (पा.सू.४-१-९२) इति द्वितीयं सूत्रमित्याशङ्कायां जातायां शारदाप्रभाकारोऽत्र तस्येदमित्यपत्येऽपि... इति कारिकाद्वारा पूर्वव्याख्यातृभिः कृतं समाधानं सरलया शैल्या प्रस्तौति, तदेवम्-"तस्येदमित्यनेनैवापत्येऽपि सिद्धे सूत्रमिदं व्यर्थमिति चेन्न, एतत्सूत्राभावे भानोरपत्यं भानव इत्यादौ वृद्धाच्छः (पा.सू.४-२-११४) इति छप्रत्ययः प्रवर्तेत अतस्तद्बाधनार्थमिदमिति ।"[४७१] ननु वृद्धाच्छः सूत्रन्तु शेषाधिकारे पठिष्यते तत्कथमपत्याधिकारे प्रवर्तत इत्याशङ्कायामसौ पुनराह-"अपत्यार्थेऽदन्तादिञ्- प्रत्ययविधानाय तस्यापत्यमत इञ् इत्येकमेव सूत्रं पठनीयं स्यात्, तदाऽदन्तप्रातिपदिक सम्बद्धस्यैवापत्यार्थस्योपयोगेनान्यप्रातिपदिकसम्बद्धापत्यार्थस्य शेषत्वमेव स्यात्, अतोऽस्य सूत्रस्य प्रयोजनं वृद्धसंज्ञकानां प्रातिपदिकानां कृतेरिति बोध्यम् ।"[४७२] इदमर्थेऽपत्यसमूहविकारार्थानामन्तर्भावादपत्येऽपि तस्येदमित्यनेनाण्प्रत्ययेनैव सिद्धौ कोऽर्थः सूत्रद्वयकरणेनेति शङ्कायां समाधानकर्तार आहुः- तस्येदमित्यस्य बाधकं वृद्धाच्छ इति सूत्रं वर्तते, तदपि बाधनार्थं सूत्रकारेण तस्यापत्यमिति पृथक् सूत्रितमिति । अत्र शङ्का समुदेति ननु तस्येदमित्यस्यापवादभूतस्य वृद्धाच्छ इत्यस्य शैषिकेऽपत्यार्थे कथं प्रसक्तिः ? तत्र समाधानकर्तार आहुः- अपत्यादिचतुरर्थपर्यन्तेभ्यो योऽन्योऽर्थः स शेष इति व्यवहारात् उत्सर्गशेषोऽयमपत्यार्थः, असति योगविभागेऽदन्तबाह्वादिप्रकृतिसम्बद्धस्यैवापत्यार्थस्योपयोगादुपगवादिप्रकृतिसम्बद्धोऽपत्यार्थः शेष एव, तस्मादण्प्रत्ययं बाधित्वा भान्वादिभ्योऽपि छ एव प्रसज्येत । कृते योगविभागे तु प्रकृति सामान्यसम्बद्धस्यापत्यार्थस्योपयोगात् शेषत्वाभावेन छस्य प्राप्तिरेव नास्ति, एवञ्चाप्राप्तिसम्पादनद्वारा छबाधकत्वं तस्यापत्यमित्यस्य पृथगस्तित्वं सिध्यति, तथा सत्यप्येका शङ्का समुदेति- ननूपगवादेरवृद्धत्वेन छस्य प्रवृत्यभावान्निष्फलो

---

३९. जिनेन्द्रबुद्धिः (व्या.) *काशिकावृत्तिः* (तृतीयो भागः), पूर्ववत्, (१९६६) पृ. ४०२ ।
४०. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ. २७१ ।
४१. पूर्ववत्, (२०६०) पृ.२७१ ।

योगविभाग इति । तत्र समाधानकर्तार आहुः- भान्वादिप्रातिपदिकानि वृद्धान्यस्य प्रयोजनबोधकानीति । एतान् सर्वान् विषयान् समाकलय्याह सिद्धान्तकौमुदीकारः -

तस्येदमित्यपत्येऽपि बाधनार्थं कृतं भवेत् ।
उत्सर्गशेष एवासौ वृद्धान्यस्य प्रयोजनम् ॥[४७३]

अतः तस्यापत्यमित्यस्य पृथग् योगविन्यासः सार्थक इत्यवसीयते ।

### ६.२.३.३ वामदेवाड्डचड्ड्यौ इत्यत्र डित्करणस्य प्रयोजननिरूपणम्

वामदेवाड्ड्यड्ड्यौ (पा.सू.४-२-९) इति सूत्रे डित्करणेन विनैव यप्रत्ययमात्रे विहितेऽपि भसंज्ञायां यस्येति चेति सूत्रेण पूर्वस्याकारस्य लोपो निर्बाधतया सिद्ध्यतीति वामदेव्यमित्यत्र टिलोपबाधनार्थं ययतौ किमर्थं डित्कृताविति सन्देहे शारदाप्रभाकारः- "डित्वाभावेऽपि भसंज्ञयाऽकारलोपेन वामदेव्यमित्यस्य सिद्धे पुनर्डित्करणं 'निरनुबन्धकग्रहणे न सानुबन्धकस्य (परि.८२)', 'एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्ये [४७४] (परि.८३) इति परिभाषाज्ञापनार्थ "[४७५] मिति वदति । सूत्रेऽत्र कृतं डकारग्रहणं न टिलोपार्थमपि तु ययतोश्चातदर्थे (पा.सू. ६-२-१५) इत्यन्तोदात्तविधायके सूत्रे निरनुबन्धकैकानुबन्धकयोर्ययतो-र्ग्रहणप्रसङ्गे सानुबन्धकयोर्ड्यड्यतोर्ग्रहणं मा भूदेतदर्थं सूत्रेऽत्र डिद्गृहीतमिति शारदाप्रभाव्याख्यातुराशयः । अत एव ययतोश्चातदर्थे इति सूत्रेण ययच्छब्दाभ्यां ड्यड्यतोर्ग्रहणाभावेनाऽवामदेव्यमिति प्रयोगे तत्सूत्रं न प्रवर्तत इति ज्ञायते । शारदाप्रभाकारो महाभाष्यवार्त्तिकमुद्धरन् विषयमिममेवमाह -

सिद्धे यस्येति लोपेन किमर्थं ययतौ डितौ ।
ग्रहणं माऽतदर्थेऽभूद् वामदेव्यस्य नञ्स्वरे ॥ [४७६]

अतोऽवामदेव्यमित्यत्र प्रकृतसूत्रनिवृत्यर्थं डित्करणमिति निष्कर्षः ।

### ६.२.३.४ 'तदधीते तद्वेद' इति सूत्रे द्वितीयस्तत्पदपाठप्रयोजनम्

---

[४]२. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४) पृ.२७७ ।
[४]३. परिभाषेयं महाभाष्ये प्रत्याख्यातमिति सूचयन् नागेशः परिभाषेन्दुशेखरे प्राह- एकानुबन्धकग्रहणे सम्भवतीति त्वर्थो न भाष्यादिसम्मतः =
४३. नागेशः, *परिभाषेन्दुशेखरः* (तत्त्व. व्या.), वाराणसी : बालकृ.प्र., (२०३९) २८१ ।
[४]४. हरिप्रसादशर्माचार्यः (व्या.),*अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.२८६ ।
[४]५. हरिप्रसादशर्माचार्यः, पूर्ववत्, (२०६०), पृ.२९३ ।

अष्टाध्याय्यास्तदधीते तद्वेद (पा.सू.४-२-५९) इति सूत्रेण द्वितीयान्तात् समर्थसुबन्तादधीते वेद इत्यनयोरर्थयोरणादिप्रत्ययविधानाय तत्रैकेनैव तद्ग्रहणेन सिद्धे किमर्थं पुनस्तत् पाठ इति शङ्कां समादधन् शारदाप्रभाकार आह- "एकेन तदिति निर्देशेनैव सिद्धे द्विस्तद्ग्रहणमुत्तरत्रापि द्वाभ्यामर्थाभ्यां सम्बद्धार्थम्"[४७७] अर्थादित उत्तरवर्तिनः क्रतूक्थादि... (पा.सू.४-२-६०) तथा वसन्तादिभ्यष्ठक् (पा.सू.४-२-६३) इति सूत्रयोरपि तदनुवर्तते, तथा सति क्रतुमधीते वसन्तमधीत इत्यापद्यते, वस्तुतः क्रतुवसन्तयोरध्ययनासम्भवात्तत्र ग्रन्था विवक्षन्ते । तदधीते... इति सूत्रे द्विस्तद्ग्रहणेन द्वयोः पृथङ्निर्देशे सति तु द्वयोर्वैकल्पिकत्वेन गौणेऽध्येतरि मुख्ये वेदेऽपि प्रत्ययः स्यादेतदर्थं द्विस्तद्गृहीतमिति व्याख्यातुराशयः । अत्र द्विस्तद्ग्रहणप्रयोजनं समुल्लिखन् काशिकाकार आह-"द्विस्तद्ग्रहणमधीयानविदुषो पृथग् विधानार्थम् ।"[४७८] वाक्यमिदं विवृण्वन् पदमञ्जरीकारः प्राह-"तदधीते वेद इत्युच्यमाने समुच्चयो विज्ञायेत, ततश्च यस्तदधीते वेद च तत्रैव प्रत्ययः स्यात् यस्तु केवलमधीते वेद वा तत्र न स्याद्, द्विस्तद्ग्रहणे तु वाक्यभेदेनाधीयानविदुषोर्द्वयोः पृथक् प्रत्ययविधानं सिध्यति।"[४७९] हरदत्तस्यैतेन कथनेनापि स्वतन्त्रतयाऽध्ययनज्ञानयोर्ग्रहणार्थं द्विस्तद्गृहीतमिति सुस्पष्टं भवति । अत्र न्यासकारः सिद्धान्तकौमुदीकारस्तद्व्याख्यातारश्च सहमताः, तस्मादुत्तरसूत्रे तत्सम्बद्धग्रन्थाध्ययनरूपे गौणेऽर्थेऽपि मुख्ये वेदेऽपि प्रत्ययः स्यादित्यर्थं द्विस्तद्गृहीतमिति निश्चीयते । अत्र शारदाप्रभाकारेण कृतं शङ्कासमाधानं पूर्वसमाधानापेक्षया सरलमिति सारल्यमस्य वैशिष्ट्यमिति निष्कर्षः ।

### ६.२.३.५ युवतीनां समूहो यौवनमुत यौवतमिति विमर्शः

स्त्रीत्वबोधकयुवतिशब्दात्तासां समूह इत्यर्थे भिक्षादिभ्योऽण् (पा.सू.४-२- ३८) इत्यणि भस्याढे तद्धिते (तसिलादिष्वाकृत्वसुँचः पा.सू.६-३-३५ इति सूत्रे) इति वार्त्तिकेन पुंवद्भावे टिलोपं प्रबाध्य अन् (पा.सू.६-४-१६७) इति प्रकृतिभावे युवन् +अ इत्यवस्थायामादिवृद्धौ विभक्तिकार्ये यौवनमिति सिध्यति । शत्रन्तात् स्त्रीत्वबोधकाच्च युवतिशब्दात्तु अनुदात्तादेरञ् (पा.सू.४-२-४४) इति समूहार्थेऽञ्प्रत्ययविधानेन भिक्षादिगणे युवतिशब्दग्रहणसामर्थ्यात् पुंवद्भावनिवृत्तौ तकारोत्तरवर्तिन इकारस्य भसंज्ञया लोप आद्यचो वृद्धौ वर्णकार्ये च कृते यौवतमित्यपि सिध्यति । अत्र सिद्धान्तकौमुदीकारः पुंवद्भावपक्षमुररीकृत्य यौवनमिति रूपं साधयति चेत् काशिकाकारस्तु भिक्षादिगणे तस्य पाठसामर्थ्यात् पुंवद्भावोऽप्रसज्यत इत्युक्त्वा

---

[४]६. पूर्ववत्,पृ.२९३ ।
[४]७. वामनजयादित्यौ, *काशिकावृत्तिः* (तृतीयो भागः), (१९६६) पूर्ववत्, पृ. ५५५ ।
[४]८. हरदत्तः (व्या.) पूर्ववत्, (१९६६), पृ. ५५५ ।

यौवतमित्येव साधयति । अत्र स्थितयोरूभयोरूपयोर्मध्ये किं साधु ? द्वयोर्मध्ये शारदाप्रभाकारस्य कोऽभिप्रेतः ? इति विषयेऽत्र सङ्क्षेपेण विविच्यते ।

महाभाष्यकारो भिक्षादिगणे युवतिशब्दं प्रत्याख्यातवान् तत्सामर्थ्याद् भस्याढेः तद्धिते इति वार्त्तिकं पुंवद्भावं न करोतीति ज्ञापयन् तत्त्वबोधिनीकार आह- “इह युवतिशब्दस्य पाठसामर्थ्यात् पुंवद्भावो न ।”[४८०] भिक्षादिषु युवतिशब्दानपेक्षितत्वेऽपि तत्पाठसामर्थ्यात् पुंवद्भावो न विधीयत इति । महाभाष्यस्यैतत् प्रत्याख्यानवाक्यमुद्धरन्तः कतिपये व्याख्यातारः काशिकाकारश्च यौवतमित्येव रूपं साधयन्ति । काशिकाकारः प्रकृतप्रसङ्गे भिक्षादिभ्योऽण् (पा.सू.४-२-३८) इति सूत्र आह- “युवतिशब्दोऽत्र पठ्यते, तत्पाठसामर्थ्यादिह पुंवद्भावो न भवति, भस्याढेस्तद्धित इति, अतो युवतीनां समूहो यौवतमिति ।”[४८१] काशिकाया एतद्वचनं तद्व्याख्यातारौ न्यासपदमञ्जरीकारावपि समर्थयतः । तत्र पदमञ्जरीकार आह- “सिद्धत्वात् प्रत्ययविधाविति वचनादनुपपन्न एव तद्धिते पुंवद्भावेन भवितव्यम्” [४८२] ‘सिद्धत्वात् प्रत्ययविधा’ विति न्यायेन तद्धिते पुंवद्भावाऽसम्भवाद् यौवनमिति रूपं साधु इति तस्याशयः । तत्र न्यासकारो जिनेन्द्रबुद्धिरपि सहमतः, तत्सूत्रे स प्राह-“तत्र यदि पुंवद्भावः स्यात् उत्सर्गलक्षणेनैवाण् सिद्धः इतीहग्रहणमनर्थकं स्यात् तस्माद् मा भूदस्यानर्थक्यमिति तस्य ग्रहणसामर्थ्यादेव पुंवद्भावो न, तेन यौवतमित्येव सिद्धं भवति ।”[४८३] अतः काशिकापक्षीयाः सर्वे व्याख्यातारो यौवतमित्येव साधयन्तीति निश्चीयते, पक्षमिममङ्गीकुर्वन्तोऽमरकोश[४८४]-नैषधीयचरित-[४८५] गीतगोविन्दकाराः[४८६] समूहार्थे यौवतमेव प्रयुञ्जते । युवतीनां समूहो यौवनमिति पक्षीयेषु व्याख्यातृषु सिद्धान्तकौमुदीकारः प्रमुखः । असौ यद्यप्यत्रप्रत्ययद्वारा यौवतमित्यपि साधयति, तथाप्यण्पक्षीयं यौवनमित्येव तस्याभीष्टं दृश्यते । तत्र सिद्धान्तकौमुदीकार प्राह-“इह भस्याढेस्तद्धित इति पुंवद्भावे कृते इनण्यनपत्ये (पा.सू.६-४-१६४) इति प्रकृतिभावेन नस्तद्धिते (पा.सू.६-४-१४४) इति टिलोपो न स्यात्, तेन युवतीनां

---

४९. ज्ञानेन्द्रसरस्वती (व्या.),*वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४), पृ. २९६ ।
५०. वामनजयादित्यौ, *काशिकावृत्तिः* (तृतीयो भागः), पूर्ववत्, (१९६६) पृ. ५३४ ।
५१. हरदत्तः (व्या.),*काशिकावृत्तिः* (तृतीयो भागः), पूर्ववत्, (१९६६) पृ. ५३४ ।
५२. जिनेन्द्रबुद्धिः (व्या.), *काशिकावृत्तिः* (तृतीयो भागः), पूर्ववत्, (१९६६) पृ. ५३५ ।
५३. गणिकादेस्तु गाणिक्यं गार्भिणं यौवतं गणे =
अमरसिंहः *अमरकोषः* (तृ.सं.) दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, (१९९७) पृ. २१० ।
५४. अवधृत्य दिवोऽपि यौवतैर्न सहाधीतवतीमिमामहम् ... २/४१ ।
श्रीहर्षः *नैषधमहाकाव्यम्,* वाराणसी : चौखम्बासं. सिरिज, (१९५४) पृ. ९८ ।
५५. अहो विवुवधयौवतं वहसि तन्वि पृथिवी गता, गीतगोविन्दमहाकाव्यम्,पृ.१० ।

समूहो यौवनम्, शत्रन्तादनुदात्तादेरञि सति तु यौवतमिति ।"[४८७] दीक्षितस्यैतद् वचनं शारदाप्रभाकारोऽपि यथावदनुकुरूते, तदेवं- "युवतीनां समूहो यौवनम्, शत्रन्तादञि सति तु यौवतम् ।"[४८८] सिद्धान्तकौमुदीव्याख्याता तत्त्वबोधिनीकारस्तु- महाभाष्यकारो भिक्षादिगणे युवतिशब्दपाठं प्रत्याख्यातवान् इत्याह । पुनश्चासौ-"युवतिशब्दपाठस्यासाधुत्वेऽपि तत्पाठसामर्थ्यात् पुंवद्भावो न इति कथयन्तो वृत्तिकाराः परास्ताः"[४८९] इत्यप्याह । एतैर्वचोभिर्भिक्षादिगणे युवतिशब्दपाठः पूर्वव्याख्यातृभिः प्रत्याख्यातः, अतः पुंवद्भावप्रसङ्ग एव न जागर्तीति ज्ञायते । एतत्पक्षमनुकुर्वन्तो गणरत्नमहोदधिकारो वर्धमानो धातुवृत्तिकारः सायणस्तथान्ये कतिपये च स्वकृतिषु यौवनमित्येव प्रयुञ्जते । शारदाप्रभाकाराऽपि सिद्धान्तकौमुदीपक्षमेवानुकुरूते । स्वव्याख्यानुसारेण काशिकापक्षीया यौवतमित्येव, सिद्धान्तकौमुदीपक्षीयास्तु यौवनमित्येव प्रयुञ्जेयुस्तथापि भाषावाङ्मयेषु काव्यादिषु च द्वयोरेव प्रयोगः कृतोऽभ्युपेयते, तस्मादुभयमेव रूपं साधु इति निष्कर्षः ।

### ६.२.३.६ 'असमासे निष्कादिभ्यः' इत्यत्रासमासग्रहणस्य ज्ञापकत्वविचारः

'निष्क-पण-पाद-माष-वाह-द्रोण-षष्टि'रेते सप्तनिष्कादयः, एतेषु परिमाणसङ्ख्या वाचकयोर्द्रोणषष्ट्योरार्हादगोपुच्छसङ्ख्यापरिमाणाट्ठक् (पा.सू.५-१-१९) इति सूत्रेण पञ्चानां तून्मानवाचित्वेन[४९०] तत्पूर्वत्र-विद्यमानेन प्राग्वतेष्ठञ् (पा.सू.५-१-१९) इत्यनेन ठञ्प्रत्ययेनैव सिद्धेऽसमासे निष्कादिभ्यः (पा.सू. ५-१-२०) इति सूत्रे किमर्थमेते गृह्यन्त इति जिज्ञासायां समाधानकर्तार आहुः- पूर्वोक्ताभ्यां सूत्राभ्यामेतेषां सप्तानामेव ग्रहणसिद्धौ पुनरत्र तेषामुपादानं तदन्तविधौ समासप्रतिषेधार्थमिति । एतेषां प्रयोगपूर्वकं तदन्तविधौ समस्तपदेषु प्रकृतसूत्रेण ठक्ठञौ न स्यातामिति ज्ञापनार्थमत्रासमासपदमुपादत्तमिति तेषामाशयः । तथैवात्रत्यानां सप्तानां तदन्तविधिनिषेधेऽपि तत्पूर्ववर्तिनान्तु तदन्तविधिर्भवतीत्यपि ज्ञाप्यते । विषयमिमं शारदाप्रभाकार एवं सूचयति-"सूत्रेऽस्मिनसमासग्रहणं ज्ञापयति इतः प्राक् तदन्तविधिरिति, तेन उगवादिभ्यो यत् (पा.सू. ५-१-२) इति गोशब्दाद्यन्तादपि यत्, अतः सुगव्यमिति साधु ।"[४९१]

---

[५६]. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४), पृ.२९६ ।

[५७]. हरिप्रसादशर्माचार्यः (व्या.),*अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ. २९० ।

[५८]. ज्ञानेन्द्रसरस्वती (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४) पृ.२९६ ।

[५९]. उन्मानलक्षणं- उर्ध्वमानं किलोन्मानं परिमाणं तू सर्वतः ।
आयामस्तू प्रमाणं स्यात् सङ्ख्या बाह्या तु सर्वतः ॥
आर्हाद...(पा.सू.५-१-१९) इत्यत्र तत्त्वबोधिनीटीकायाम् ।

[६०]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ.३४६ ।

अत्र काशिकाकारो ग्रहणवता प्रातिपदिकेनेति (परि.३१) परिभाषामनित्यां सूचयन् प्रकारान्तरेण निष्कादिपूर्वेषु तदन्तविधिर्ज्ञाप्यत इति एवमाह-"असमास इति किम्? परमनैष्किकम्, अथ किमर्थमसमास इत्युच्यते ? यावता ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते । निष्कादिष्वसमासग्रहणं ज्ञापकं पूर्वत्र तदन्तविधिप्रतिषेधस्य, उगवादिभ्यो यत् (पा.सू. ५-१-२) सुगव्यमिति ।"[४९२] यद्यपि ग्रहणवता... इति परिभाषया निष्कादिभ्यः पूर्वत्रापि तदन्तविधिः प्रतिषिध्यते तथापि तस्यानित्यत्वेन तत्पूर्ववर्तिषु सप्तदशसूत्रेषु तु तदन्तविधिर्ज्ञाप्यत इति तस्याशयः । तत्र सिद्धान्तकौमुदीकारोऽपि सहमतः, स एवमाह-"आर्हादित्येतत् तेन क्रीतमिति यावत् सप्तदशसूफ्यामनुवर्तते" [४९३] अतोऽत्रासमासग्रहणं ततः प्राक् तदन्तविधिर्ज्ञापनार्थं सूचयतीति निष्कर्षः ।

६.२.३.७ 'सर्वनामबहुभ्योऽद्व्यादिभ्यः' इति सूत्रे किं शब्दस्य पृथक्पाठप्रयोजननिरूपणम्

प्राग्दिशीयानां त्रल्तसिलादिप्रत्ययानामधिकारनिदर्शके 'किंसर्वनामबहुभ्योऽद्व्यादिभ्यः' (पा.सू. ५-३-२) सूत्रे सर्वनामपदोपादानेनैव किमोऽपि ग्रहणसिद्धौ तस्य पुनरूपादानं कस्मै प्रयोजनायेति जिज्ञासायां शारदाप्रभाकार आह-"सर्वनामकथनेनैव सिद्धौ किं शब्दस्य पृथक् पाठः कथमिति परीक्षणव्याजेनाद्व्यादिभ्य इति पदेन किं शब्दस्यापि निषेधात्तस्य पुनः पाठ इति छात्रान् बोधयेत् ।" [४९४] प्रकृतसूत्रेण द्व्यादिभिन्नेभ्यः सर्वनामभ्य एव त्रल्तसिलादीनामधिकाराद् द्व्यादिषु किमोऽप्यन्तर्भावेन निषेधप्राप्तौ तस्य पुनर्ग्रहणार्थमत्र किं शब्दः पठ्यत इति शारदाप्रभाकारस्याशयः । एवं तर्हि द्व्यादिपूर्वं किंशब्दोपन्यासेनेष्टसिद्धौ किमर्थं ततः पश्चात् पठ्यत इत्याशङ्कां निराकुर्वन् न्यासकार आह-"यद्येवं द्विशब्दात् पूर्वं किं शब्दोऽयं पठितव्यः, एवं तर्हि तस्य पृथग्ग्रहणं न कर्तव्यमेव भवति ? सत्यमेतत् न सूत्रस्येह गणपाठ इति नासावुपालम्भमर्हति ।" [४९५] गणपाठोऽयं सूत्रकारेण न निर्दिष्टः, परम्परानिर्दिष्टे गणपाठे महर्षिपाणिनिरसौ सूत्राणि प्रणीय व्यवस्थितवान्, अतः तदन्यथाकरणासम्भवात् किं शब्दात् त्रल्तसिलादिप्रत्ययैः कुत्र-कुतः प्रभृतीनां सिद्धये सर्वादिगण उल्लेखानन्तरमप्यत्र पुनः किंशब्दपाठ आवश्यक इति व्याख्यातुराशयः । द्व्यादिषु किं शब्दोपन्यासस्यापरमपि प्रयोजनं दृश्यते, तदुपस्थापयन् सिद्धान्तकौमुदीव्याख्याता

---

[९१]. वामनजयादित्यौ, *काशिकावृत्तिः* (चतुर्थभागः), पूर्ववत्, (१९६७) पृ. ६ ।
[९२]. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४), पृ. ३३३ ।
[९३]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ. ३८९ ।
[९४]. जिनेन्द्रबुद्धिः (व्या.), *काशिकावृत्तिः* (चतुर्थभागः), पूर्ववत्, (१९६७) पृ. २४१ ।

तफ्वबोधिनीकारो ब्रूते-"द्व्यादिषु किं शब्दपाठस्य प्रयोजनं तु "त्वं च कश्च कौ, अहं च कश्च कौ इत्यत्र किमः शेषः, त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यत इत्युक्तत्वात् ।"[४९६] प्रकृतवार्त्तिकनियमेन किंशब्दस्यैकशेषविधानाय द्व्यादिषु तस्य पाठ आवश्यक इति तदभिप्रायः । अतः सर्वादिप्रभृतयो गणपाठा महर्षिपाणिनितः पूर्ववर्तिन इत्यवबुध्यन्ते । द्व्यादिषु किं शब्दपाठस्यापरं प्रयोजन्तु युष्मदस्मद्भ्यां सह समासे कृते किंशब्दस्येकशेषविधानाय वर्तत इत्यपि ज्ञायते, अतः सर्वादिगणे द्व्यादिशब्दतः पश्चात् पठितं किंशब्दं पूर्वत्राऽऽनेतुं न शक्यत इत्यपि ज्ञायते । शारदाप्रभाकारोऽयं फक्किकानां समुत्थापने समाधाने च प्रायेण काशिकामश्रयते । विषयविश्लेषणेऽपि प्रायः प्राच्यसरणिमेवाङ्गीकुरूते । शैलीशिल्पादिष्वपि काशिकावर्त्मन्येव तिष्ठति । तथापि कतिपयेषु तद्धितान्तर्गतेषु विषयेषु सिद्धान्तकौमुदीं तस्या व्याख्यानानि च यथासम्भवमाश्रयतीति ज्ञायते ।

## ६.२.४ रूपसिद्धिप्रक्रियावबोधः

पाणिनीयाष्टाध्यायीसूत्रोपरि विरचितानां काशिका-प्रक्रियाकौमुदी-सिद्धान्तकौमुद्यादीनां व्याख्यानां, व्याख्यानोपरि विरचितानां न्यास-पदमञ्जरी-बालमनोरमा-तफ्वबोधिनीप्रभृतीनां टीकानाञ्च च पृथक् पृथक् वैशिष्ट्यानि वर्तन्ते । काशिकायां प्रक्रियाशङ्कयोस्सन्तुलनं प्राप्यते चेत् प्रक्रियाकौमुद्यां तु प्रक्रियायाः प्रधानता लभ्यते । सिद्धान्तकौमुद्यामपि प्रक्रियायाः प्रधानता शङ्कानां बाहुल्यं च दृश्यते । एतासु टीकासु मध्ये बालमनोरमा प्रक्रियाकेन्द्रिताऽस्ति चेत् तफ्वबोधिनी शङ्कासमाधाने कृतप्रयत्ना प्रतीयते । शारदाप्रभा तु काशिका-कौमुदी-बालमनोरमाणां सूत्रार्थापन-रूपसाधनशैलीमङ्गीकुर्वती पाणिनीयसूत्राणि वितनुते । प्रकृतव्याख्यानस्योद्देश्यमेव पाणिनीयव्याकरणे सुगन्धरूपेण स्थितस्य रूपसाधनपक्षस्य प्रकाशीकरणमतोऽयं तत्र केन्द्रितो भूत्वा सूत्रार्थापनं फक्किकावार्त्तिकेष्ट्यादीनां व्याख्यानमधिकारादीनामुल्लेखनञ्च कुरूते, यद्यप्यस्य रूपसिद्धिप्रक्रिया सङ्केतमूला एव दृश्यते। तत्र संस्कृतस्यार्वाचीनं व्याकरणं नेपालीभाषाया व्याकरणञ्च प्रभावकमित्यनुमीयते । संस्कृतेऽपि प्राचीनानि व्याकरणानि प्रायेण प्रक्रियां विवृण्वन्ति । अर्वाचीनानि हैम-चान्द्र-सारस्वतप्रभृतीन्यपि सरलया शैल्या प्रक्रियामेव तन्वते । तामनुकुर्वन्तो नेपालीया वैयाकरणा अपि प्रकृतिप्रत्ययौ विच्छिद्यैव रूपसाधनप्रक्रियां दर्शयन्ति । अत्र शारदाप्रभाकारोऽपि तामेवार्वाचीनां शैलीमङ्गीकुर्वन् पाणिनिनिर्दिष्टां प्रक्रियां सरलीकृत्य पदनिर्माणप्रक्रियां समुल्लिखति । तत्क्रमे प्राचीनैः पञ्चभिः सूत्रैः साधितं रूपमसौ द्वि-त्रि-सूत्राणि प्रयुज्य

[९५]. ज्ञानेन्द्रसरस्वती (व्या.), *वैयाकरणसिद्धान्तकौमुदी,* (सम्पूर्णा), पूर्ववत्, (१९७४), पृ.३६२ ।

सङ्क्षेपेण साध्नोति । तादृशमुदाहरणं तद्धितान्तर्गते व्यासवरुडनिषादचाण्डालबिम्बानां चेति वक्तव्यम् (सुधातुरकङ् च पा.सू.४-१-९७ इति सूत्रस्थे) इति वार्त्तिके द्रष्टुं शक्यते । अन्यसूत्रैः सह तेन वार्त्तिकेन साधनीयं वैयासकिवारुडकिरिति रूपद्वयं शारदाप्रभाकारस्तु व्यासो वैयासकिः, न य्वाभ्यां...(पा.सू.७-३-३) इत्यैच्[४९७] इति सूत्रसङ्केतीकरणेनैव साधयति । अत्र बालमनोरमाकारस्तु "वेदान् व्यसति विविधमस्यति शाखाभेदेन विभजतीति वेदव्यासः कर्मण्यण्, अत्र नामैकदेशग्रहणं व्यासस्यापत्यमिति विग्रहः, इञ् प्रत्ययः प्रकृतेः सुधातुरकङ् च इत्यकङादेशस्तस्मात् परस्याकारस्य पर्जन्यवल्लक्षणप्रवृत्त्याऽऽदिवृद्धिप्राप्तौ तन्न भवति किन्तु यकारात्पूर्वमैजागमो वैयासकिरिति रूपम्" [४९८] इत्युल्लिखति । अनेनैव प्रकारेण बालमनोरमाकारो वरुडादयो जातिविशेषा इति निर्दिश्य वारुडकिरिति रूपमपि साधयति । एतेन बालमनोरमाकारः पदानि विगृह्य रूपाणि साधयति चेत् शारदाप्रभाकारस्तु प्रक्रियासङ्केतीकरणोद्देश्येन प्राथमिकच्छात्रकेन्द्रितो भूत्वा रूपसाधनं करोतीति ज्ञायते । तथैव परिपन्थं च तिष्ठति (पा.सू.४-४-३६) इति सूत्रद्वारा साधनीये पारिपान्थिक इति रूपेऽपि शारदाप्रभाकारस्य पदसाधुत्वप्रकारः सङ्केतमूलक एव दृश्यते । तत्र- परिपन्थं तिष्ठति हन्ति वा पारिपन्थिकः । अत्र तिष्ठत्यर्थे क्रियाविशेषणत्वादेव द्वितीयान्तं बोध्यमिति ।[४९९] अत्र सिद्धान्तकौमुदीकारस्तु पन्थानं वर्जयित्वा व्याप्य वा तिष्ठतीति पारिपन्थिकश्चौरोऽथवा परिपन्थं हन्तीति विगृह्णन् निपातनात् पन्थादेश [५००] इत्यधिकं सूचयति । तत्र बालमनोरमाकारोऽपि चकाराद्धन्तेरनुकर्षणं परीत्यस्य कर्मप्रवचनीयसंज्ञयाऽव्ययीभावसमासः, तस्य विकल्पो परिगतः पन्थेति विग्रहप्रदर्शनपूर्वकं प्रादिसमासः[५०१] इत्यपि सङ्केतयति । अत्र शारदाप्रभाकारस्तु सूत्रात्मकतया अर्थद्वयमेकत्रैवोल्लिख्य रूपसाधनसङ्केतमेव करोतीति ज्ञायते। अनेन प्रकारेण सिद्धान्तकौमुदी-बालमनोरमाभ्यां सह कृतया तुलनया शारदाप्रभायाः रूपसिद्धिप्रक्रिया सङ्केतात्मिकास्तीति निश्चीयते ।

शारदाप्रभाकारो रूपसाधने समागताः शङ्का अपाकर्तुं बहुत्र काशिकामाश्रयते । तद्धितान्तर्गते प्रशंसायां रूपप् (पा.सू.५-३-६६) सूत्रे तादृशमुदाहरणं प्राप्यते । तत्र काशिकाकारः प्रशस्तो वैयाकरणो वैयाकरणरूपः, प्रशस्तो वृषलो वृषलरूपः, प्रशस्तश्चोरः चोररूप इत्युदाहरणानि प्रस्तौति । अत्र शङ्का समुदेति निन्दार्थकाभ्यां वृषलचोरशब्दाभ्यां

---

६६. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.२७३ ।
६७. वासुदेवदीक्षितः (व्या.),*वैयाकरणसिद्धान्तकौमुदी), (समासतद्धितखण्डः) पूर्ववत्,* (१९८७)*पृ. २२२ ।*
६८. हरिप्रसादशर्माचार्यः (व्या.),*अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.३२९ ।
६९. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी),* (समासतद्धितखण्डः) *पूर्ववत्,* (१९८७) *पृ.३३८ ।*
७०. वासुदेवदीक्षितः (व्या.), पूर्ववत्, (१९८७) पृ.३३८ ।

प्रशंसायां कथं रूपप्प्रत्यय इति ? तत्र काशिकाकार उत्तरयन्नाह- योऽक्ष्णोरञ्जनमपहरेत्[५०२] चौरकार्येण नेत्राञ्जनं हरतीति तस्य वैशिष्ट्यम्, तादृशे वैशिष्ट्यपूर्णे कार्ये रूपप्प्रत्ययः सम्भवतीति । अत्र शारदाप्रभाकारोऽपि काशिकामुद्धरन् प्रशंसायां रूपप्प्रत्ययं विधाय वैयाकरणरूपः,चोररूपः प्रभृतीनि रूपाणि साधयति । तथैव प्रकृत्यर्थस्य वैशिष्ट्यस्य वर्णनमिति युक्तं प्रशंसेति काशिकावाक्यमप्युद्धरते च । अत्र सिद्धान्तकौमुदीकारस्तु प्रशंसायां चोरवृषलौ न गृहीत्वा प्रशस्तः पटुः पटुरूपः, प्रशस्तः पचति पचतिरूपमिति भिन्नमुदाहरणमेव दर्शयति। अनेन प्रकारेण शारदाप्रभाकारोऽत्र कौमुदीपक्षं परित्यज्य काशिकामाश्रित्य चोररूप इत्यस्योल्लेखनं तस्य सिद्धिप्रक्रियाञ्च दर्शयति । एतेन रूपसाधनेऽसावत्रापि काशिकामाश्रयत इति प्रमाणितो भवति । एतादृशमन्यं प्रमाणं वृद्धस्य च (पा.सू. ५-३-६२) इति सूत्रेऽपि प्राप्यते । प्रियस्थिर...(पा.सू.५-३-६२)इति सूत्रेण वृद्धस्य वर्षादेशविधानसामर्थ्याद् वर्षशब्दोऽयं सिध्यति, तस्मादिष्ठनि वर्षिष्ठः, ईयसुनि वर्षीयानपि भवतीति काशिकाकारस्तत्र सूचयति । एतत् समुल्लिखन् शारदाप्रभाकार आह-“विधानसामर्थ्यात् प्रियस्थिर... इत्यत्र वर्षादेशस्यापि समावेशो वर्षिष्ठो वर्षीयानिति च ।”[५०३] एतेनापि शारदाप्रभाया रूपसाधने काशिकाश्रयणं स्पष्टं भवति । शारदाप्रभाकारो रूपसिद्धौ समागतं काशिकाकौमुद्योर्मतभेदं यथावदेव समुल्लिखति । तद्धितान्तर्गतं अषडक्षाशितङ्...(पा.सू.५-४-७) इति सूत्रस्थमलङ्कर्मीण इति रूपं कथं सिध्यति ? तत्र कः समासः ? इत्यादिषु सन्देहेषु दीक्षितकाशिकाकारौ परस्परं विवदेते । तत्र दीक्षितः परवल्लिङ्गं...(पा.सू २-४-२६) इति सूत्रस्थेन ‘द्विगुप्राप्तापन्नाऽलंपूर्वगतिसमासेषु प्रतिषेधो वाच्य’ इति वार्त्तिकेनालमित्यस्य परवल्लिङ्गनिषेधज्ञापनात् समासो भवतीति सूचयति[५०४] चेत् काशिकाकारस्तु कुगतिप्रादयः (पा.सू. २-१-१८) इति सूत्रस्थेन ‘प्रादयो गताद्यर्थे प्रथमया’ इति वार्त्तिकेन समास इत्युल्लिखति । अत्र शारदाप्रभाकारो विनाऽग्रहेण मतद्वयमुपस्थापयतीति क्वचिद् द्विविधयोरेव मतयोः समावेशोऽप्यस्य वैशिष्ट्यं प्रतीयते । तथैव तद्धितान्तर्गतानां सद्यः, परुत्, परारिप्रभृतीनां निपातनतः साधनीयानां रूपाणां साधनमप्यसौ परम्पराप्रचलितैः प्रत्ययैरेव कुरूते, अतोऽस्या रूपसाधनप्रक्रिया पारम्परिकी इति निश्चीयते । एभिस्तथ्यै विश्लेषणैश्च शारदाप्रभायास्तद्धितान्तर्गता रूपसिद्धिप्रक्रिया सङ्केतमूला, विविधानां मतमतान्तराणामुपस्थापनेन विशिष्टीभूता चास्तीति ज्ञायते ।

---

७१. वामनजयादित्यौ, *काशिकावृत्तिः* (चतुर्थभागः), पूर्ववत्, (१९६७) पृ. २८३ ।
७२. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ.३९८ ।
७३. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४), पृ. २३५ ।

## ६.२.५ वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम्

सहस्राधिकसूत्रयुक्ते प्रकृते तद्धितप्रकरणे वार्त्तिकेष्टिपरिभाषाफक्किकादीन्यपि प्रकरणान्तरापेक्षया बहूनि विद्यन्ते । तद्धितान्तर्गतानि कतिपयरूपाणि सूत्रनियमतो न सिध्यन्त्यतो वार्त्तिकपरिभाषेष्टयादीनां परिकल्पनं वरिवर्ति । शारदाप्रभायास्तद्धितप्रकरणे पठितान्येतानि वार्त्तिकपरिभाषाफक्किकादीनि कुत्र कीदृशीं च जाटिल्यं स्फोरयन्तीति ज्ञानायात्र व्याख्यानतोलनादिभिस्तेषां पर्यालोचनं समीक्षणञ्च विधीयते ।

### ६.२.५.१ वार्त्तिकप्रयोगः

शारदाप्रभाकारोऽयं तद्धिते सिद्धान्तकौमुद्यामविद्यमानान्यनेकानि वार्त्तिकानि प्रयुङ्क्ते । काशिकातः समानीतानीति निश्चीयते । असौ तद्धितारम्भके दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः (पा.सू.४-१-८५) सूत्रे नवभिर्वार्तिकैः सूत्रतोऽनिष्पन्नानि रूपाणि कार्याणि च साधयति । तत्र कौमुदीकारोऽन्यान्यष्टौ वार्त्तिकानि तु समुल्लिखति परं 'ण्यादयोऽर्थविशेषलक्षणादपवादात् पूर्वविप्रतिषेधेन' इति तु नोद्धरते । तथैव 'यमाच्चेति वक्तव्यम्' इत्युल्लिख्यापि काशिकाकारमते एतद् वार्त्तिकमित्युक्त्वा तत्र स्वासहमतिं प्रकटयति । अण्यन्ताद् यमशब्दात् स्वार्थिके ष्यञ्प्रत्ययेन याम्य इति प्रयोगं साधयितुं शक्यत्वाद् भाष्यकारेण पूर्वोक्तवार्त्तिकप्रत्याख्यातत्वाच्च तन्नावश्यकमित्याशयेन वार्त्तिकमिदं कौमुदीकारः खण्डयति, परं काशिकाकारस्तु यमशब्दादपि ण्यप्रत्ययविधानार्थं प्रस्तुतं वार्त्तिकमारभते । शारदाप्रभाकारोऽप्यत्र काशिकापक्षमनुसरन् वार्त्तिकं यथावदुद्धरते । अत्रत्यं 'ण्यादयोऽर्थविशेष...' इति वार्त्तिकं किमर्थमारभ्यत इति संशयं निवारयन् काशिकाव्याख्याता पदमञ्जरीकारो लिखति- "येन नाप्राप्तिन्यायेनाण एव ण्यादयोऽपवादा अणपवादैस्तु ढगादिभिः सह सम्प्रधारणायां परत्वात् त एव स्युरिति वार्त्तिकारम्भः ।"[४०५] विशेषलक्षणार्थे पूर्वविप्रतिषेधेन ण्यप्रत्ययसाधनार्थं वार्त्तिकमिदमारभ्यत इति व्याख्यातुराशयः । शारदाप्रभाकारो यद्यपि वार्त्तिकमिदमानीयापि न व्याख्याति तथापि वार्त्तिकपाठेन तत् किमर्थमत्र पठ्यत इति जिज्ञासां प्रवर्द्धयतीत्यस्यावश्यकत्वं प्रमाणितं भवति ।

इष्टि-भाष्यवार्त्तिकसहितानां कौमुदीयसकलवार्त्तिकानां सङ्ख्या ८७६ वर्तते । तेषु द्विशताधिकानि तु तद्धित एव विद्यन्ते तथापि काशिकापेक्षया न्यूनतराण्येव वार्त्तिकानि कौमुद्यां प्राप्यन्ते । शारदाप्रभाकारोऽत्र काशिकायाः प्रायो वार्त्तिकानि यथावदुद्धरते । तस्मादेव कौमुद्यपेक्षयाऽधिकसङ्ख्यकानि वार्त्तिकान्यत्र प्राप्यन्ते । अतः परं शारदाप्रभाकारेण काशिकातः

---

[४०५] ४.हरदत्तः (व्या.), *काशिकावृत्तिः* (चतुर्थो भागः), पूर्ववत्, (१९६७), पृ.४०४ ।

समानीतानि परन्तु कौमुद्यामविद्यमानानि तद्धितान्तर्गतानि कतिपयानि प्रतिनिधिभूतानि वार्त्तिकान्यत्र प्रस्तूयन्ते-

| *वार्त्तिकानि* | *वार्त्तिकस्थानि सूत्राणि* |
|---|---|
| विद्याचानङ्गक्षत्रधर्मत्रिपूर्वा | ऋतूक्थादिसूत्रान्ताट्ठक् (पा.सू. ४-२-६०) |
| रथाङ्ग एवेष्यते | रथाद्यत् (पा.सू. ४-३-१२१) |
| तच्चरतीति च | तदस्य ब्रह्मचर्यम् (पा.सू. ५-१-९३) |
| अवान्तरदीक्षादिभ्यो... | तदस्य ब्रह्मचर्यम् (पा.सू. ५-१-९३) |
| अष्टचत्वारिंशतो... | तदस्य ब्रह्मचर्यम् (पा.सू. ५-१-९३) |
| चतुर्मास्यानां ... | तदस्य ब्रह्मचर्यम् (पा.सू. ५-१-९३) |
| डट् स्तोमे | प्रमाणे द्वयसज्... (पा.सू. ५-२-३७) |
| वतुप्रकरणे युष्मदस्मद्भ्यां... | यत्तदेतेभ्यः ...(पा.सू. ५-२-३९) |
| शेवलादीनां तृतीयादचो ... | शेवलसुपरिविशाल...(पा.सू. ५-३-८४) |
| समानाच्च | अन्तः पूर्वपदाट्ठञ् (पा.सू. ४-३-६०) |
| तदादेश्च | अन्तः पूर्वपदाट्ठञ् (पा.सू. ४-३-६०) |
| ऊर्ध्वन्दमादूर्ध्व... | अन्तः पूर्वपदाट्ठञ् (पा.सू. ४-३-६०) |
| मध्याच्छ : | अन्तः पूर्वपदाट्ठञ् (पा.सू. ४-३-६०) |
| मण्मीयौ च प्रत्ययौ | अन्तः पूर्वपदाट्ठञ् (पा.सू. ४-३-६०) |
| मध्यो मध्यं दिनण् | अन्तः पूर्वपदाट्ठञ् (पा.सू. ४-३-६०) |
| स्थाम्नो लुग् वक्तव्यः | अन्तः पूर्वपदाट्ठञ् (पा.सू. ४-३-६०) |
| अजिनान्ताच्च | अन्तः पूर्वपदाट्ठञ् (पा.सू. ४-३-६०) |

काशिकायां प्रयुक्तानां वार्त्तिकानामौचित्यानौचित्यविषये पृथगनुसन्धानमपेक्षितं स्यादिति विस्तरभयादत्र विशदय्य न चर्चितम् ।

### ६.२.५.२ इष्टिप्रयोगः

वार्त्तिकसमीक्षका इष्यत इति पदप्रयुक्तं वार्त्तिकवदुपकारकं वाक्यमिष्टिरिति व्यवहरन्ते । इष्टीनामवधारणा महाभाष्यतः समागता दृश्यते । शारदाप्रभाकारोऽसौ स्वकीये व्याख्यानग्रन्थे

तादृशेष्टीर्यथावदुद्धृत्य उक्तानुक्तदुरुक्तचिन्तासु प्रयुङ्क्ते । तथापि तत्रेष्टिसङ्केतस्तु न कुरूते । अतः शारदाप्रभावलोकनेन वार्त्तिकेष्टचोः परिच्छेदो दुश्शक्यः। खेमराजश्रीकृष्णदाससम्पादितायां तफ्वबोधिनीव्याख्यायुतायां सिद्धान्तकौमुद्यान्तु वार्त्तिकेष्ट्योर्विभागः प्राप्यते । तत्र सम्पादकोऽसौ (वा.) वेति सङ्क्षिप्तशब्दद्वारा वार्त्तिकानि, (इ.) द्वारा चेष्टीः सङ्केतयति । यद्यपि कौमुद्यन्तर्गते तद्धिते इष्यते पदप्रयुक्तानि वाक्यानि पञ्चाशत् सङ्ख्यातोऽप्यधिकानि वर्तन्ते तथापि तेषु सर्वेषु सम्पादकोऽसाविष्टिसङ्केतमकृत्वा वार्त्तिकसङ्केतमेव कुरूते, तेभ्यः काशिकायामिष्टिरिति निश्चयीकृतानि वाक्यान्येव कौमुदीसम्पादकोऽपि इष्टिरिति व्यवहरति । सिद्धान्तकौमुद्यन्तर्गते तद्धिते द्वे इष्टी प्राप्ते, तयोस्समुल्लेखोऽत्र विधीयते -

१) कर्मधारयादावेष्यते (इ.)[५०६]

२) रोगे चायमिष्यते (इ.)[५०७]

परं चौखम्बासुरभारतीप्रकाशनतः प्रकाशितायां बालमनोरमाव्याख्यासहितायां सिद्धान्तकौमुद्यान्तु तत्रेष्टिसङ्केतो न दृश्यते ।[५०८] तत्र कर्मधारयादावेष्यते, रोगे चायमिष्यते इति वाक्यद्वयं नेष्टिरूपेण, नापि वार्त्तिकरूपेण समुल्लिखिते वर्तेते, तत् केवलं फक्किकावाक्यवदुल्लिखितमेव । चौखम्बाप्रकाशने यत् किमपि स्यात्, काशिकायां प्राचीनकौमुद्यादिषु च तयोरिष्टित्वेन व्यवहारात्तादृशवाक्यानीष्टय एवेति निश्चीयते । शारदाप्रभाकारस्तु पूर्वोक्तं वाक्यद्वयमन्यद् वार्त्तिकवत् कोष्ठकीकृत्य सूत्रव्याख्यानक्रम एवोपन्यसति । अतः प्रस्तुतव्याख्यायाः प्रवृत्तिः वार्त्तिकेष्टचोः पृथक्करणे न वर्तत इत्यवधेयम् । 'व्याकरणवार्त्तिक'मित्याख्यस्य समालोचनात्मकपुस्तकस्य प्रणेतुर्वेदपतिमिश्रस्य विचारे तु तद्धिते स्थितानि 'इष्यते' पदयुतानि पञ्चाशदधिकानि वाक्यानि इष्टय इति व्यवहरणीयं भवति । समालोचकोऽसावर्थवदिति सूत्रस्थं 'अनर्थकस्यापि निपातस्य प्रातिपदिकसंज्ञेष्यते'इति भाष्यवाक्यमुदाहरन् 'इष्यते' पदप्रयुतानि सकलवाक्यानीष्टय इति व्यवहरति ।[५०९] काशिकायास्तद्धितप्रकरणे 'इष्यते' पदप्रयुक्तान्यनेकानि वाक्यानि सन्ति । परं तेषु कति वार्त्तिकत्वेन कतीष्टित्वेन च सङ्केतितानि सन्ति चेत् कतिचित्तूल्लेखनं विनैव

---

[५]. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४), पृ. ३३१ ।
[६]. पूर्ववत्,पृ.३६१ ।
[७]. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी,* (समासतद्धितखण्डः) *पूर्ववत्,* (१९८७) *पृ. ३३१ ।*
[८]. वेदपतिमिश्रः, *व्याकरणवार्तिक,* वाराणसी : पृथिवीप्रकाशन, (१९७०) पृ. १५९ ।

सामान्यवाक्यरूपेण निर्दिष्टानि दृश्यन्ते । क्रतूक्थादिसूत्रान्ताट्ठक् (पा.सू. ४-२-६०) इति सूत्रपठितं 'सूत्रान्तादकल्पादेरिष्यते' इति वाक्यं वार्त्तिकरूपेण चिह्नितमस्ति चेत् 'रोगे चायमिष्यते' इति वाक्यं (वातातीसाराभ्यां कुक् च- पा.सू.५-२-१२९ इति सूत्रस्थं) 'रथाङ्ग एवेष्यते' (रथाद्यत्-पा.सू.४-३-१२१ इति सूत्रस्थं) 'चरणाद्धर्माम्नाययोरिष्यते' (गोत्रचरणाद् वुञ्-पा.सू.४-३-१२६ इति सूत्रस्थं) प्रभृतीनि वाक्यानि तु सङ्केतं विनैवोल्लिखितानि सन्ति, अत इष्यत इति पदप्रयुक्तेषु वाक्येषु कति वार्त्तिकानि ? कतीष्टय इति पृथगध्ययनविषयस्तथापि इष्यते पदप्रयुक्तानि विधिबोधकानि निषेधसङ्केतकानि च वाक्यानीष्टय इति सामान्यतोऽवधेयम् । येषां पृथक्करणविश्लेषणादिषु शारदाप्रभाकारस्याग्रेरता न दृश्यते ।

### ६.२.५.३ परिभाषाप्रयोगः

शारदाप्रभाकार अन्यप्रकरणेष्विव तद्धितेऽपि परम्परातः प्रचलिताः परिभाषाः यथावत् प्रयुङ्क्ते । तद्धितेऽसौ निरनुबन्धकग्रहणे सानुबन्धकग्रहणम्, एकानुबन्धकग्रहणे न द्व्यनुबन्धकग्रहणम् (वामदेवाड्ड्यौ पा.सू.४-२-९ इति सूत्रे), नञिवयुक्तमन्य सदृशाधिकरणे तथा ह्यर्थगतिः (रङ्कोरमनुष्येऽण् च-पा.सू.४-२-१०० इति सूत्रे),गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः (तस्य व्याख्यान... पा.सू.४-३-६६ इत्यत्र), प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् (अजाविभ्यां थ्यन्- पा.सू.५-१-८ इति सूत्रे) इत्यादयः परिभाषाः प्रसङ्गानुसारेणोल्लिखति । व्याख्यानखण्डे समागता एताः परिभाषा यद्यपि सङ्केतमूला, विषयव्याख्याने सहयोगिन्योऽर्थप्रयोगादिकं विनैव प्रस्तुताः सन्ति तथापि प्रयोगसन्दर्भेणैवैतेषां कोऽर्थः ? कथं प्रयुज्यन्त इत्यादिविषयेषु छात्राणां जिज्ञासापरिवर्द्धनायोपकरिष्यन्तीति निश्चयेन वक्तुं शक्यते ।

### ६.२.५.४ फक्किकाप्रयोगः

शारदाप्रभायास्तद्धितखण्डे कठिनपदस्फोटिकाः फक्किका यत्र तत्र दृश्यन्ते । काशिका-कौमुदीक्रमतोऽत्रापि समागता एताः फक्किका- विभाषाफाल्गुनीश्रवणाकार्तिकी चैत्रीभ्य इति सूत्रनिर्देशेन पौर्णमास्यामयं लुब्नेति ज्ञापितत्वात् (लुबविशेषे पा.सू.४-२-४ इति सूत्रे), व्रतादन्यत्र न (स्थण्डिलाच्छयितरि व्रते- पा.सू.४-२-१५ इति सूत्रे), शत्रन्तादञि यौवतम् (भिक्षादिभ्योऽण् पा.सू.४-२-३८ इति सूत्रे), विधानसामर्थ्यात् प्रियस्थिर...इति वर्षादेशस्यापि समावेशः- वर्षिष्ठः,वर्षीयान् (वृद्धस्य च- पा.सू.५-३-६२ इति सूत्रे) क्रियाया ऐक्यान्न

द्विवचनादिकम् (प्रशंसायां रूपप्- पा.सू. ५-३-६६) इत्यादयः सन्ति । शारदाप्रभायाः तद्धितखण्डे शतशः सङ्ख्यासु पठिता एतादृशाः फक्किका न हि केवलं रूपसाधनगतां जटिलतामेव स्फोरयन्ति छात्रेषु फक्किकार्थबोधनविवेचनव्याख्यानसामर्थ्यमपि प्रवर्द्धयन्ति । अत एतासां प्रयोगो जिज्ञासुभ्यो हितकारको मन्तव्यः । शारदाप्रभायास्तद्धिते प्रयुक्ता एता एतत्सदृशा अन्या अपि फक्किका रूपसाधनसूत्रार्थापनादिषु समागतां जटिलतामपाकर्तुं सहायतां कुर्वन्तीति तेषामपि पृथङ् महत्त्वम् ।

### ६.२.६ अन्याचार्यमतसङ्ग्रहः

शारदाप्रभायास्तद्धिते प्रक्रियानिरूपणे सूत्रार्थापने च यत्र तत्र पूर्वाचार्याणां मतं सङ्गृहीतं विद्यते । व्याख्याताऽयं ग्रन्थमूले व्याख्याने च बहुत्र काशिकाकारं तद्व्याख्यातारौ न्यासपदमञ्जरीकारौ सिद्धान्तकौमुदीकारं तथा तद्व्याख्यातॄन् वासुदेवदीक्षित-ज्ञानेन्द्रसरस्वतीप्रभृतीन् नामोच्चारणेन वाक्योद्धरणेन च स्मरति । अधिकारानुवृत्त्योर्निदर्शने रूपसाधने शङ्कामुद्भाव्य समाधान उदाहरणप्रत्युदाहरणयोः प्रस्तुतीकरणे तथान्यत्रापि शारदाप्रभाकारो बहुत्र पूर्वोक्तानाचार्यान् स्मरति । अस्य स्मरणं तद्ग्रन्थेभ्योऽ-त्यावश्यकविषयग्रहणञ्च यद्यप्याधुनिकशोधविधेर्नियमानुसारेण न जातं तथापि पारम्परिकविधिना-अत्र दीक्षितः, अत्र काशिका, अत्र हरदत्तः, अत्र तत्त्वबोधिनी प्रभृतिभिर्वाक्यसङ्केतैः कृतानीत्यवधेयम् । व्याख्यातासौ ग्रन्थारम्भे व्याख्येयं विषयं प्रस्तुत्य तदुपरि समुत्थितासु शङ्कासु तासां समाधाने च प्रायशोऽन्याचार्यमतमुल्लिखति, क्वचित्तु सूत्रव्याख्यानेऽपि पूर्वाचार्यमतमुद्धरति, तादृशमुदाहरणं पूर्वादीनि (पा.सू. ५-२-८६) इति सूत्रे प्राप्यते, तद्यथा- पूर्वप्रातिपदिकादीनि प्रत्ययो भवति, अत्र तत्त्वबोधिनीकारः- पूर्वमिति क्रियाविशेषणाद् द्वितीयान्तात् प्रत्ययः ।[५१०] अत्रत्ये सूत्रार्थे द्वितीयान्तादेव प्रत्ययो भवतीति न निर्दिष्टः, अतस्तज्ज्ञापनार्थं प्रकृतव्याख्यात्रा तत्त्वबोधिनी समुद्धृता दृश्यते । शारदाप्रभायां तत्त्वबोधिन्याः समुद्धरणं स्वल्पेषु स्थानेष्वेव प्राप्यते, यतो हि व्याख्यातासौ सूत्रार्थापन-शङ्कासमाधानादिसम्बद्धान् विषयान् सरलतया प्रस्तोतुं कामयते अतः स्वल्पेष्वेव स्थानेष्वस्य स्मरणं स्वाभाविकम् ।

शारदाप्रभायां काशिकायाः समुद्धरणमन्यव्याख्यानापेक्षयाऽधिकतरेण कृतं दृश्यते । काशिकाकारः सरलायां भाषायां परं गभीरशैल्यां विषयान् सरलसरसरूपेणोपस्थापयति,

---

७९. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०), पृ. ३७९ ।

तत्क्रमे प्रथमतः सरलान् बोध्यविषयाऽश्च समुत्थाप्य प्रक्रियां विवृणोति । काशिकायामेतादृशमुदाहरणं तद्धितान्तर्गते- षष्ठ्या रूपय च (पा.सू.५-३-५४) सूत्रे प्राप्यते । काशिकामुद्धरन् हरिप्रसादः तत्राह- “षष्ठ्यन्ताद् भूतपूर्वेऽर्थे रूपयचरट्प्रत्ययौ स्तः । अत्र काशिका- षष्ठ्यन्तात् प्रत्ययविधानात् सम्प्रतिभूतपूर्वग्रहणं प्रत्ययार्थस्य विशेषणं न तु प्रकृत्यर्थस्य विशेषणमिति ।”[५११] अत्र प्रत्ययार्थविशेषणार्थं भूतपूर्वपदं गृहीतमस्तीत्यत्रस्थितस्य काशिकावचनस्याशयः । स च शारदाप्रभातो न स्पष्टीभूतः, तत्स्पष्टीकर्तुमेव शारदाप्रभाकारेण काशिकावचनं गृहीतं दृश्यते । अनेनैव प्रकारेण शारदाप्रभाकारेण बहुत्र काशिकावचनानि गृहीतानि दृश्यन्ते । तादृशानि वचनानि गृहीत्वाप्यसौ प्रायो न व्याख्यातीति सरलानामेव विषयाणां व्याख्यानमस्य वैशिष्टचं प्रतिभाति ।

शारदाप्रभाकारेणात्र सिद्धान्तकौमुदीतो न्यूनतराण्युद्धरणानि गृहीतानि सन्ति । क्रतूक्थादिसूत्रान्ताट्ठक् (पा.सू.४-२-६०) इति सूत्र उक्थशब्दमर्थापयता प्रकृतव्याख्यात्रा सिद्धान्तकौमुदी समुद्धृताऽस्ति, तदेवं-“उक्थं सामविशेषः, तल्लक्षणपरो ग्रन्थविशेषो उक्थमिति भट्टोजिदीक्षितः ।”[५१२] अत्र शारदाप्रभाकारेणोक्थशब्दो न व्याख्यातः, अतस्तदर्थबोधनाय सिद्धान्तकौमुदी समुद्धृता दृश्यते । अनेनैव प्रकारेण ‘एकाचो नित्यम्’ इति वार्त्तिकव्याख्यात्रा आप्यमम्मयमित्युदाहरणस्यानेकाच्त्वात् कथं मयडिति शङ्कामुत्थापयता, तदस्य ब्रह्मचर्यम् ( पा.सू.५-१-९३) इति सूत्रस्थे ‘सूतिकापुत्रिकावृन्दारकाणां वेति वक्तव्यम्’ इति वार्त्तिके वा पदं व्याख्यायताऽन्यत्र चानेकत्र प्रकृतव्याख्यात्रा सिद्धान्तकौमुदी गृहीता दृश्यते । अत्रत्ये ग्रहणेऽपि समुद्धृतं वाक्यं व्याख्यानं विनैव प्रस्तुतमस्तीत्यवधेयम् ।

शारदाप्रभायास्तद्धितखण्डे पदमञ्जरीव्याख्यातुर्हरदत्तस्याभिमतं बहुत्र समानीतं दृश्यते । व्याख्याताऽसौ प्रायो व्याख्यानखण्डे क्वचित्तु मूलेऽपि स्वव्याख्यातविषयपोषणार्थं नवीनविषयसंस्थापनार्थञ्च तन्मतं सादरं गृह्णाति । तस्मिन् क्रमेऽसौ- जीवति तु वंश्ये युवा (पा.सू.४-१-१६३) इति सूत्रे पूर्वसूत्रतः (अपत्यं पौत्रप्रभृति गोत्रम् पा.सू.४-१-१६२) समानीतात् ‘पौत्रप्रभृतिरपत्य’मिति पदात् पौत्रप्रभृतेरपत्यमिति षष्ठ्यन्तो विग्रहः, तादृशोऽर्थश्च कथं निष्पद्यते ? इत्याशङ्कां परिहरन् न्यासकारं हरदत्तमेवं समुद्धरते- “तस्य च विभक्तिविपरिणामस्यापत्यं हेतुः, अपत्यशब्दो हि सम्बन्धिशब्दत्वाद् हेत्वाद्यपेक्षते, तत्र षष्ठ्या हेतुर्भवति । यदि तर्ह्यपत्यग्रहणसामर्थ्यात् पौत्रप्रभृतेः षष्ठीविपरिणामो भवति पूर्वसूत्रेऽपि

५०. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ.३९७ ।
५१. पूर्ववत्,पृ.२९३ ।

कस्मान्न भवति ? तत्र प्रथमाया अनवकाशत्वात्, पूर्वसूत्रे ह्यकृतार्था प्रथमा ततो न शक्यते षष्ठ्यां विपरिणमयितुमिह तु कृतार्था शक्यते षष्ठ्या विपरिणमयितुमिति ।"[५१३] अपत्यं पौत्रप्रभृति गोत्रमिति सूत्रेऽकृतार्था प्रथमा विद्यतेऽतस्तां षष्ठ्यां विपरिणमयितुं न शक्यते परं तदुत्तरवर्त्तिनि जीवति तु वंश्ये युवेति सूत्रे कृतार्थायाः प्रथमाया विद्यमानत्वेन शक्यते तद् विपरिणमयितुमिति न्यासवचनस्याशयः । अनेन प्रकारेण सूत्रव्याख्यानं शारदाप्रभाकारस्य नोद्देश्यमतोऽत्यावश्यकेषु न्यासतत्त्वबोधिन्यादीनुद्धृत्य स्वकीयं कार्यं साधयतीति प्रकृतोद्धरणतो ज्ञायते । इत्थमेव क्वचिद् 'अत्र न्यासः' इति पदावलीतः कुत्रचित्तु हरदत्तशब्दतोऽपि शारदाप्रभाकारः काशिकाव्याख्यातारं न्यासकारं हरदत्तं समुद्धरति । तथैव काशिकायां न्यासपदमञ्जर्योर्मतभेदस्थानेषु पदमञ्जरीकारेण न्यासकारेण वा विशेषतः सूत्रादिव्याख्यातेषु च स्थानेष्वसौ तान् व्याख्यातॄन् विशेषतः स्मरति ।

शारदाप्रभाकारोऽयं- न प्राच्यभर्गादियौधेयादिभ्यः (पा.सू.४-१-१७६) सूत्रे 'यौधेयादिप्रतिषेधो ज्ञापकः पर्श्वाद्यणो लुक्' इति महाभाष्यवार्त्तिकमुल्लिखति । स तत्राह- "अत्र भाष्यवार्त्तिकं 'यौधेयादिप्रतिषेधो ज्ञापकः पार्श्वादिलुक्' यदयं न प्राच्यभर्गादियौधेयादिभ्य इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवति पार्श्वादिभ्यो लुगिति ।"[५१४] यौधेयादिभ्यः प्रतिषेधारम्भसामर्थ्यादतश्च (पा.सू. ४-१-१७५) इति सूत्रेण पर्श्वादि..(पा.सू. ५-१-११७) इत्यनेन च विहितस्य भिन्नप्रकरणस्थस्याप्यञो लुग् भवतीति ज्ञाप्यत इति, तेन पर्शू इत्यत्र अतश्चेत्यञो लुक् सिध्यतीति भावः । अनेन प्रकारेण कतिषु शङ्कासु भाष्यवार्त्तिकमुद्धृत्याप्यसौ शङ्कां समाधत्त इति ज्ञायते । अतोऽसौ काशिकां तद्व्याख्यानानि सिद्धान्तकौमुदीं तद्व्याख्यानानि महाभाष्यञ्च समुद्धृत्य स्वकीयं व्याख्यानं पूरयतीति निष्कर्षः ।

## ६.२.७ प्रकरणसङ्घटनं शैलीशिल्पञ्च

शारदाप्रभायास्तद्धितान्तर्गता भाषा सङ्क्षिप्ता, सरला, सुबोध्या च वर्तते । व्याख्याकारोऽयं प्रायः सूत्रात्मकैर्वाक्यैर्निर्देशवाक्यैश्च विषयान् विवृणोति । सूत्रव्याख्यानमपि प्रायः पदकृत्यप्रकाशनेन कुरूते । तत्क्रमे प्रथमतः सूत्रस्थं पदं स्फोरयित्वा शाब्दिकमर्थं कुरूते, एतादृशमुदाहरणं- सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्टचुट्युलौ तुट् च (पा.सू.४-३-२३) इति सूत्रे प्राप्यते । स तत्राह "सायं-चिरं-प्राह्ण-प्रगप्रातिपदिकेभ्योऽव्ययाच्च कालात् टचुट्युलौ

---

८२. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.२८० ।
८३. पूर्ववत् ।

टचुट्युल्प्रत्ययौ भवतः । तुट् च तयोस्तुडागमश्च भवति, स च शेषे (द्वि.पा.सू. ४-२-९२) इत्यस्याधिकार इति तस्याशयः । एवमेव सायंचिरंशब्दयोर्मकारान्तत्वं प्राह्णप्रगयोरेदन्तत्वञ्च निपात्यते । तुडागमः प्रत्यययोरनादेशानन्तरं भवत्यनद्यतन इत्यादिनिर्देशात् ।"[५१५] अनेन प्रकारेण सूत्रपदकृत्यमुल्लिख्य प्रासङ्गिकानां शङ्कानामुत्थापनं तत्समाधानञ्च शारदाप्रभाव्याख्यानस्य वैशिष्टचं मन्यते । तादृशमुदाहरणं मृदस्तिकन् (पा.सू. ५-४-३९) इत्यत्र प्राप्यते व्याख्यातासौ तत्राह- मृदिति शब्दात् तिकन् प्रत्ययो भवति स्वार्थे ।[५१६] अत्र शारदाप्रभाकारेण कृतं व्याख्यानं पदार्थज्ञापकं सङ्केतमूलकमेव प्रतीयते । काशिकाकारस्त्वत्र सूत्रार्थमुदाहरणञ्चोल्लिख्य तद्धिते विकल्पाधिकारादत्रापि 'विकल्पोऽनुवर्तत' इत्याशयेन समर्थानां प्रथमाद् वा (पा.सू.४-१-८२) इत्यस्मात् प्राप्तविकल्पोऽयं सर्वत्रानुवर्तते इति सूचयति । न्यासपदमञ्जरीकारौ त्वत्र मृत्शब्दात् तकन्प्रत्ययेन स्त्रियां टाप्विधानेन प्रत्ययस्थात्...(पा.सू. ७-३-४४) इत्यादिसूत्रेणेकारविधानेन मृत्तिकेति रूपसिद्धौ किमर्थं तिकन्नेव विधीयत इति शङ्कामुद्भावयन्तौ लुक् तद्धितलुकि (पा.सू. १-२-४९) इत्यनेन तद्धितलुकि सति स्त्रीप्रत्ययस्यापि लुक्विधानात्तत्र टापोऽभावेनाकारश्रवणाभावाच्चेष्टसिद्धिं न स्यात्, तद्धितोऽलुकि सत्यपि तकन्प्रत्यये प्रक्रियागौरवं स्यादिति विवृणुतः,[५१७] अतः शारदाप्रभाया व्याख्यानशैली पदार्थप्रधाना वर्तत इत्यवसीयते । यद्यपि कतिषु स्थानेषु व्याख्यानमूला भाषा अपि प्राप्यते । तादृशी भाषा शैली च तद्धितान्तर्गतेषु तस्यापत्यम् (पा.सू.४-१-९२), एको गोत्रे (पा.सू.४-१-९३), तस्मै हितम् (पा.सू.५-१-५) प्रभृतिषु सूत्रेषु दृग्गोचरीभवति । तस्य भावस्त्वतलौ (पा.सू.५-१-११८) इति सूत्रे त्वसौ भावपदार्थं व्याचक्षाणो घटचित्रमपि प्रस्तौति । तथापि सूत्रव्याख्याने रूपसाधने शङ्कासमाधानेऽन्यत्र च बहुषु स्थानेषु सङ्केतात्मिकां परन्तु सुबोध्यां भाषां शैलीञ्च प्रयङ्क्ते, अत एतादृशभाषाप्रयोगोऽस्य वैशिष्ट्यमिति निष्कर्षः ।

शारदाप्रभाकारेणान्यप्रकरणेष्विवात्रापि बहुत्र पूर्वग्रन्थस्थवाक्यानि समुद्धृतानि । अनेनात्र समुद्धृतानि वाक्यानि तेषां समग्रा भाषा शैली च प्रकृतग्रन्थापेक्षया जटिलतरा प्रौढतरा च दृश्यते । अत्र कठिनसरलभाषयोरेकत्र सन्निवेशात् कुत्रचिद् भाषिकप्रवाहोऽवरुद्धो क्वचिद् विषयावबोधो दुरवगमश्चानुभूयते । शारदाप्रभाकारोऽत्र सरलसंस्कृते, नेपालीमिश्रिते संस्कृते

---

८४. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.४१२ ।
८५. पूर्ववत्, पृ.४१२ ।
८६. वामनजयादित्यौ, *काशिकावृत्तिः* (चतुर्थो भागः), पूर्ववत्, (१९६७) पृ. ३५२ ।

च विषयं प्रबोधयति । संस्कृतस्य सरलीकरणार्थं जनसाधारणीकरणार्थञ्चायं कलमप्रभृतीन् लोकप्रसिद्धान् संस्कृतशब्दानप्यावश्यकेषु स्थानेषु प्रयुङ्क्ते, तथापि पूर्वप्रकरणापेक्षया हिन्दीनेपालीति भाषाद्वयसम्मिश्रणं न्यूनतमेषु स्थानेष्वेव प्राप्यते, अतोऽत्रत्या भाषा सरला परं पूर्वप्रकरणापेक्षया काचित् स्तरीया वर्तत इति निष्कर्षः ।

शारदाप्रभायास्तद्धिते न्यूनान्येव मौलिकोदाहरणानि प्रयुक्तानि । अत्र प्रयुक्तानि तादृशोदाहरणानि नैपालीं कलां जीवनप्रणालीं सांस्कृतिकगौरवञ्च प्रवर्द्धयन्तीति निश्चितम् । सल्यान इति प्रयोक्तव्ये शल्यानकूटम्, प्युठान इत्यस्य कृते प्रतिष्ठानशब्दप्रयोगस्तथैवान्यत्रापि स्थाननामसु मूलशब्दान्वेषणपद्धतिरत्र दृश्यते । कतिषु सरलसंस्कृतेषु, दैशिकभाषायाः स्रोतोभूतेषु संस्कृतशब्देषु प्रयुक्तेष्वपि व्याख्याकारोऽसौ सिद्धान्तकौमुद्यां प्रयुक्तानि परम्पराप्रचलितान्युदाहरणप्रत्युदाहरणान्येव बहुत्र प्रयुङ्क्ते । अतो नेपाले प्रयोगयोग्येषु नैकेषूदाहरणेषु सत्स्वपि पारम्परिकाणामुदाहरणप्रत्युदाहरणानां प्रयोगोऽत्र विचारणीयपक्षो वर्तते ।

शारदाप्रभाकारोऽयं द्वितीयके व्याख्याने काशिकापद्धत्या सूत्रफक्किकोदाहरण-प्रत्युदाहरणादीनि प्रस्तौति । काशिकाकारः प्रथमतोऽष्टाध्यायीक्रमेण सूत्राणि समुल्लिख्य ततोऽनुवृत्तिसङ्केतमुदाहरणं वार्त्तिकफक्किकादिकञ्च समुल्लिखति तदनन्तरमेव सूत्रस्थे पदे, सूत्रार्थ उदाहरणप्रत्युदाहरणयोः समुत्थितासु शङ्कासु च प्रविश्य ता विवेचयति तत्र स्वाभिमतञ्च प्रस्तौति । शारदाप्रभाकारोऽप्यत्र ग्रन्थमूलेऽष्टाध्यायीक्रमतः सूत्राणि समुल्लिख्य तदधस्तात् प्रायशो विग्रहं प्रदर्श्य साधनीयं रूपमुदाहरणञ्च दर्शयति, तदनन्तरमेवावश्यकेषु स्थलेषु वार्त्तिकपरिभाषाफक्किकादिकां शङ्कां तासां समाधानञ्च दर्शयति । अत्र काशिकाया ग्रन्थस्वरूपबिम्बः प्रतिभासते । यद्यप्यत्र काशिकायाः समग्रा विषया नानुकृतास्तथापि बहुत्र तादृशी शैली प्रतिभासते । व्याख्यातासौ मूलभागतोऽधस्तनस्थिते व्याख्यानखण्ड उपरिस्थितानि सूत्राण्यर्थाप्य सङ्केतरूपेण रूपमपि साधयति । अनेन प्रकारेण मूलव्याख्यानखण्डौ पृथक्कृत्य समुपन्यासे सिद्धान्तकौमुदीया व्याख्यानशैली अपि दृग्गोचरीभवति । शारदाप्रभायां काशिकाकौमुदीभ्यां भिन्नानि कानिचन शैलीशिल्पगतानि मौलिकानि वैशिष्ट्यान्यपि प्राप्यन्ते, तान्यधस्तात् क्रमेण प्रस्तूयन्ते-

१) व्याख्याकारोऽयं सर्वत्र सूत्रोल्लेखनपूर्वमष्टाध्यायीक्रमेण भाविसूत्रक्रमाङ्क-मुल्लिखति, यथा ४-२-३७ तस्य समूहः ।

२) व्याख्याकारोऽयं सर्वत्रानुबन्धवर्णं वर्णसमूहं वा सूत्रोपरि प्रदत्तेन चन्द्रविन्दुना सूचयति, यथा- ४-२-८५ नद्यां मतुँप् ।

३) व्याख्याकारोऽयं सर्वत्राग्रेऽनुवर्तनीयमधिक्रियमाणं पदं क्वचित् समग्रं सूत्रमपि स्थूलाक्षरीकृत्य स्वरितचिह्नेन च चिह्नयति, तद्यथा-

५-२-१ **धान्यानां' भवने क्षेत्रे'** खञ् ४

५-२-३०, **अवात्'** कुटाराच्च ३१

५-४- ६८ **समासान्ताः'**

४) व्याख्याकारोऽयं सर्वत्राग्रेऽनुवर्तनीयेषु सूत्रेषु तदन्ते प्रदत्तैरङ्कैरनुवृत्तिगतिसीमां निर्धारयति, तद्यथा-

५-१-१०४ **ऋतो'**रण् १०५

५-१-१०६ **कालाद्'** यत् १०७

५) काशिकाकौमुदीकारौ मूल एव सूत्रवृत्तिमुल्लिखतः परं शारदाप्रभाकारस्तु व्याख्यानखण्डे सूत्रवृत्तिं प्रस्तौति ।

६) अन्ये सूत्रव्याख्यातारो ग्रन्थमूल उदाहरणत्वेन साधनिकामुल्लिखन्ति, ताश्च टीकाकारा विवृण्वन्ति परमसौ मूले रूपमुल्लिख्य व्याख्यानखण्डे स्वयमेव व्याचक्षते ।

७) पूर्वव्याख्यातृभिर्विविधेन प्रयोजनेन कृताः सूत्रयोगविभागा व्याख्यान एव सूचिताः

परमनेन तु ग्रन्थमूल एव सूच्यन्ते, तदेवं-

क) ४-४-१०१ - परिषदो ण्यः, योगोऽयं विभज्यते ।

प्र. ४-४-१०१ परिषदः, परिषदि साधु पारिषदः ।

द्वि.४-४-१०१ ण्यः, परिषदि साधु पारिषद्यः ।

ख) ४-२-९२ शेषे, सूत्रमिदं लक्षणं चाधिकारश्च ।

प्र. ४-२-९२ शेषे, चक्षुषा गृह्यते चाक्षुषं रूपम् ।

द्वि.४-२-९२ शेषे वक्ष्यमाणा घप्रभृतयष्ट्युलन्ताः शेषाधिकारे विधीयन्ते ।

अनेन प्रकारेणाऽसौ पूर्वव्याख्यासु स्थितान् दुर्बलपक्षान् परिष्कृत्याधुनिकच्छात्रानुकूलां भाषां शैलीं शिल्पं च परिष्कृत्य प्रस्तौति । एतत् सर्वं शारदाप्रभाव्याख्यानस्य वैशिष्ट्यमिति वक्तुं शक्यते ।

## ६.३ समासप्रकरणसमीक्षा

शारदाप्रभाव्याख्यायाः समासखण्डोऽपि प्रारम्भिकद्वितीयकश्चेति द्विधा विन्यस्तो वर्तते । अत्रत्यः प्राथमिकप्रकरणविन्यासोऽव्ययीभाव-तत्पुरूष -बहुव्रीहि-द्वन्द्वसमासेषु तदन्तर्गतेषु ३८ सूत्रेषु प्रासङ्गिकवार्त्तिकेषु परिभाषासु तासामनुशीलनेषु विस्तारितो वर्तते चेद् द्वितीयकस्त्वष्टाध्यायीक्रमेण द्वितीयाध्यायान्तर्गतेषु प्रथम-द्वितीय-चतुर्थपादेषु व्याख्यातः । शारदाप्रभाकाराऽयं प्रथमतः सरलतया सङ्क्षेपेण च समासदिग्दर्शनं कृत्वा तदनन्तरं पाणिन्युपदिष्टसूत्रक्रमानुसारेण सकलामष्टाध्यायीं पाठयितुं कामयते, अतोऽत्र समासपठनोत्सुकैर्जिज्ञासुभिरष्टाध्याय्या द्वितीयाध्यायान्तर्गताः प्रथमद्वितीय चतुर्थपादा अध्येतव्या भवन्ति । तथैवालुगेकशेषसमासान्तसमासाश्रयप्रकरणाध्ययनसमुत्सुकैर्जिज्ञासुभिः षष्ठाध्याय्यास्तृतीयपादान्तर्गतानि सकलसूत्राण्यध्येतव्यानि भवन्ति । सिद्धान्तकौमुदीकारस्तु केवलाव्ययीभाव-तत्पुरूष -बहुव्रीहि-द्वन्द्वेषु तथैवालुगेकशेषसमासान्तसमासाश्रयप्रकरणेषु तदन्तर्गतैः ५८८ सूत्रैः प्रासङ्गिकैर्वार्तिकपरिभाषाफक्किकादिभिश्च प्रक्रियां व्याख्याय खण्डमिमं पूरयति ।

सिद्धान्तकौमुदीं सङ्क्षिप्य रचितायां लघुकौमुद्यां समासखण्डोऽयं केवलाव्ययीभावतत्पुरूष बहुव्रीहिद्वन्द्वसमासान्तैस्तदन्तर्गतैः ९१ सूत्रैः प्रासङ्गिकवार्त्तिक-परिभाषाफक्किकादिभिश्च प्रक्रियां व्याख्याय पूरितोऽस्ति । शारदाप्रभाकारः प्रारम्भिके व्याख्याने कौमुद्यां विद्यमानानि केवलैकशेषसमासान्तालुक् समासाश्रयप्रक्रियां न विवृणुते ।

अत्र पूर्वप्रकरणेषु प्रयुक्तैरधिकारानुवृत्त्योर्निदर्शनम्, विग्रहादिभिरूदाहरणादिभिश्च सूत्रार्थापनम्, शङ्कामुद्भाव्य समाधानम्, रूपसिद्धिप्रक्रियावबोधः, वार्त्तिकपरिभाषादिभिर्जटिलतास्फोरणम्, अन्याचार्यमतसङ्ग्रहः, प्रकरणसङ्घटनं शैलीशिल्पञ्चेति सप्तभिर्व्याख्यानतफ्वैः शारदाप्रभायाः समासखण्डे स्थिता विषयाः विव्रियन्ते । काशिकाकौमुद्यादिभिः सह तुलनां क्रियते च ।

### ६.३.१ अधिकारानुवृत्त्योर्निदर्शनम्

शारदाप्रभायाः प्रारम्भिके समासप्रकरणे प्राक्कडारात् समासः (पा.सू.२-१-३), विभाषा (पा.सू.२-१-११), शेषो बहुव्रीहिः (पा.सू.२-२-२३) चेति त्रीण्येवाधिकारसूत्राणि प्राप्यन्ते । सिद्धान्तकौमुद्यान्तु पूर्वोक्तैस्त्रिभिः सूत्रैः सह 'अव्ययीभावः' (पा.सू.२-१-५), तत्पुरूष :

(पा.सू.२-१-२२), अलुगुत्तरपदे (पा.सू.६-२-१), तत्पुरूषोऽनञ्कर्मधारयः (पा.सू.२-४-१९) इत्यधिकारसूत्राणि वर्तन्ते । पाणिनेरष्टाध्याय्यां द्वितीयषष्ठाध्याययोर्निर्धारिते समासखण्डे सिद्धान्तकौमुद्यामुक्तानि पूर्वोक्तानि सप्त सूत्राणि लभ्यन्ते, अतोऽष्टाध्याय्यास्तान्येव सूत्राणि शारदाप्रभाकारोऽपि द्वितीयके व्याख्यानेऽकुरूत इति निश्चितम् । अत्र तेषामधिकारसूत्राणां गतिः कियत्सूत्रान्तं गच्छति, एतैः सूत्रैः किमधिक्रियत इति क्रमशो विविच्यते ।

समासखण्डे निर्धारितं प्राक्कडारात् समासः (पा.सू.२-१-३) इति प्रथममधिकारसूत्रं संज्ञया सहाधिकारमपि निर्दिशति । अत्र शारदाप्रभाकार आह- "इतः कडारा कर्मधारये (पा.सू.२-२-३८) इति सूत्रात् पूर्वं समास इत्यस्याधिकारो गच्छति । इत आरभ्य कडारा कर्मधारये सूत्रात् प्राग्वर्तिभिः सूत्रैः समाससंज्ञा विधीयत इति ।"[५१८] एतेन कथनेन प्रकृतसूत्रेण संज्ञया सहाधिकारोऽप्यधिक्रियत इति ज्ञायते । सिद्धान्तकौमुदीकारस्तु इतोऽप्यधिकस्पष्टतयाऽस्याधिकारत्वमुल्लिखति, तदेवं-"कडाराः कर्मधारय इत्यतः प्राक् समास इत्यधिक्रियत इति ।"[५१९] कौमुदीकारः सूत्रमिदमधिकारसूत्रमित्येव मनुत इति उपरि प्रस्तुतेन कथनेन ज्ञायते । काशिकाकारो योगमिमं संज्ञया सहाधिकारमपि मनुते, तदेवं- कडाराः ... इति सूत्रात् प्राक् यानित ऊर्ध्वमनुक्रमिष्यामस्ते समाससंज्ञा वेदितव्याः ।[५२०] काशिकाया एतेन सङ्केतेन शारदाप्रभाकारोऽपि सूत्रमिदं संज्ञासूत्रमधिकारसूत्रञ्चोररीकुरूत इति स्पष्टीभवति । शारदाप्रभाकारः प्रकृतसूत्रस्थं समास इति पदमेव स्थूलाक्षरीकृत्य तत् कडारा कर्मधारये सूत्रपर्यन्तमधिक्रियत इति सूचयति । अत्रस्थितेनोत्तरपदाधिकारेण सूत्रस्थमावश्यकपदमेवाप्य- धिक्रियत इति ज्ञायते । एतेनार्धाधिकारेण सूत्रस्थमावश्यकं पदमेवाधिक्रियत इत्यपि ज्ञायते । विभाषा (पा.सू.२-१-११) इति शारदाप्रभायामधिकारसूत्रत्वेन पठितं द्वितीयं सूत्रं वर्तते । यद्यपि शारदाप्रभाकारः सूत्रेऽस्मिन् स्पष्टतयाऽधिकारं न सूचयति तथापि सूत्रस्थेन स्थूलाक्षरेण तत्रत्येन स्वरितचिह्नेन, सूत्रान्ते स्थितेन (२-२-२९) अङ्कसङ्केतेन च जिज्ञासवश्चार्थे द्वन्द्व इति सूत्रपर्यन्तं प्रकृतसूत्रमधिगच्छतीत्यनुमातुं प्रभवन्ति ।

शेषो बहुव्रीहिः (पा.सू.२-२-२३) इति शारदाप्रभायां विन्यस्तं तृतीयमधिकारसूत्रम् । शारदाप्रभाकारः प्रकृतसूत्रस्थं बहुव्रीहिरिति पदं स्थूलाक्षरीकृत्य, स्वरितचिह्नेन लक्षयित्वा

---

[८]७. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ.८७ ।
[८]८. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), पूर्ववत्, (१९७४), पृ. २०१ ।
[८]९. वामनजयादित्यौ, *काशिकावृत्तिः* (द्वितीयो भागः), वाराणसी : प्राच्यभारतीप्रकाशनम्, (१९६५) पृ. १५ ।

सूत्रान्ते २८ अङ्कं प्रदाय च तेन सहेति तुल्ययोगे (पा.सू.२-२-२८) इत्यन्तं सूत्रमिदमधिक्रियत इति सूचयति । परं काशिकाव्याख्याता ईश्वरचन्द्रस्तु सूत्रस्यास्याधिकारसीमा चार्थे द्वन्द्वः (पा.सू.२-२-२९) इत्यन्तं वर्तत इति सूचयति ।[५२१] अस्याधिकारसीमानिर्धारणे काशिकाकौमुदीकारौ न्यासपदमञ्जरीकारौ च मौनत्वं साधयन्ति । शारदाप्रभाकारस्तु गोपालशास्त्रिणो व्याख्यानमनुकुर्वन् तत्रत्यं विन्यासं यथावदनुकरोति, अतः प्रकृतसूत्रे स्थितस्य 'बहुव्रीहि'रिति पदस्यानुवृत्तिगतिसीमाया निर्धारण आचार्येषु मतैक्यं नास्तीति स्फुटमवगम्यते । शारदाप्रभाकारः प्रकृतसूत्रमर्थापयन्नाह- शेष इति प्रथमान्तं पदं बहुव्रीहिसंज्ञकं भवतीति ।[५२२] एतेन प्रकृतसूत्रस्य संज्ञासूत्रत्वमपि ध्वनितं भवति । परन्तु तद्विषये काशिकाकौमुदीकारौ तद्व्याख्यातारश्च न किमप्याहुस्तस्मात् संज्ञापरिभाषादिसूत्रप्रकारनिर्धारणेऽपि मतैक्यं नैवावलोकितम् ।

अव्ययीभावः (पा.सू.२-१-५), तत्पुरूष : (पा.सू.२-१-२२), तत्पुरूष ोऽनञ्कर्मधारयः (पा.सू.२-४-१९), अलुगुत्तरपदे (पा.सू.६-३-१) इमान्यधिकारसूत्राणि प्राथमिकाध्ययनार्थं निर्धारिते खण्डे न विद्यन्ते, अतस्तेषामध्ययनमष्टाध्यायीक्रमतो विधेयमिति शारदाप्रभाकारस्याप्रत्यक्षसङ्केतो वर्तते । अत्रत्येषु सूत्रेष्वव्ययीभावः (पा.सू.२-१-५), तत्पुरूष : (पा.सू.२-१-२२), तत्पुरूष ोऽनञ् कर्मधारयः (पा.सू.२-४-१९), अलुगुत्तरपदे (पा.सू.६-३-१) चेति सूत्राणि प्रक्रियादिग्दर्शनायैवात्र प्रस्तुतानि विद्यन्ते चेत् चतुर्थं अलुगुत्तरपद इति सूत्रन्त्वलुक्समासाधिकारे षष्ठाध्यायान्तर्गते तृतीयपादे समुपन्यस्तं वर्तते । सूत्रकारः पाणिन्यष्टाध्याय्यन्तर्गते द्वितीयाध्याये समासप्रक्रियां समुपदिश्य तृतीयचतुर्थपञ्चमाध्यायेष्वन्यप्रक्रियाः समुल्लिख्य षष्ठाध्यायान्तर्गते तृतीयपादे पुनरलुक्समासैकशेषसमासान्तप्रक्रियामुपदिशति । शारदाप्रभाकारोऽपि काशिकाकौमुद्यादीनाधृत्यैतेषां चतुःसूत्राणामेवाधिकारत्वं समुपदिशति । अतः परं शारदाप्रभाकारेण प्रस्तुतान्यधिकारसूत्राणि तन्निर्दिष्टा गतिसीमा चात्र क्रमशः प्रस्तूयन्ते ।

| *सूत्रम्* | *अधिकारसङ्केतः* |
|---|---|
| २-१-५ अव्ययीभावः २१ | तत्पुरुष ात्प्रागव्ययीभावोऽधिक्रियते ।[५२३] |

---

५०. ईश्वरचन्द्रः (व्या.), *अष्टाध्यायी,* (प्रथमो भागः), दिल्ली : चौ.सं.प्र., (२००४) पृ.१८६ ।
५१. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.१०५ ।
५२. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.८८ ।

२-१-२२ तत्पुरूष : २-२-२२ इदमधिक्रियते प्राग्बहुव्रीहेः ।[५२४]

२-४-१९ तत्पुरूष ोऽनञ्कर्मधारयः २५ नञ्समासस्तत्पुरूष ो नपुंसकमित्यर्थः ।[५२५]

६-३-१ अलुगुत्तरपदे २४,१३९ उत्तरपदे परतोऽलुग् भवतीत्यधिकृत्य ।[५२६]

शारदाप्रभायां प्रस्तुतैरेतैरधिकारसङ्केतैर्व्याख्याकारोऽयमत्र स्पष्टतोऽधिकारं निर्दिशतीति ज्ञायते ।

शारदाप्रभायाः समासखण्डे कृतोऽनुवृत्तिनिर्देशोऽपि स्पष्टो वर्तते । व्याख्याकारोऽयमत्राधिकारमिवानुवृत्तिमपि सूत्रस्थमनुवर्तनीयं पदं स्थूलाक्षरीकृत्य, सूत्रान्ते प्रदत्तेनाङ्केन तद्गतिसीमां निर्दिश्य च कुरूते । प्रकृतसूत्रस्थे व्याख्यानखण्डे पूर्वेभ्यः केभ्यः सूत्रेभ्यः किं पदमानेयमिति कखगादिभिर्वर्णसङ्केतैः सङ्केतयित्वा सूचयति, तदित्थं-

| (क) | (ख) | |
|---|---|---|
| **सुबा**मन्त्रिते पराङ्गवत्स्वरे | प्राक्कडारात् **समासः** | सह सुपा |

अनेन प्रकारेण सुबामन्त्रिते... इत्यस्मात् सुबिति, प्राक्कडारात् समास इति सूत्रतः समास इति च पदमानीय शारदाप्रभाकारः सह सुपेति सूत्रमेवमर्थापयति- सुबन्तं सुबन्तेन सह समासः[५२७] सुबन्तं सुबन्तेन सह समस्यत इति । अत्र समर्थः पदविधिः (पा.सू.२-१-२) इति सूत्रतः समर्थपदस्यानयनमपेक्षितमित्यनुभवन्नपि प्राथमिकेभ्यश्छात्रेभ्यो बोधभारभयात् तन्नानीयत इति शारदाप्रभाकारोऽत्र ज्ञापयति । एतत् सूत्रं समासशिक्षणानन्तरं पाठ्यमिति निर्दिशन् स आह- "अत्र समर्थं समर्थेन इत्यर्थं तु न प्रस्तुवीयात्, साम्प्रतं समर्थसूत्रस्यानुपदेशात् । तत्सूत्रोपदेशे च साम्प्रतमुदाहरणप्रत्युदाहरणबोधनं दुष्करं स्यात्, अतः समासशिक्षणावसाने समर्थसूत्रमुपदिशेत्, तदानीमेव समर्थं समर्थेनेत्यर्थञ्च बोधयेदिति" [५२८] अतः शारदाप्रभाकारः प्राथमिकेभ्यश्छात्रेभ्यः समर्थसूत्रं नोपन्यसतीत्यवबुध्यते । 'सह सुपा' इत्यस्यार्थापनप्रसङ्गेऽपि तदनुवृत्तिर्नानेया, समर्थसूत्रस्योदाहरणानि चात्र न पाठनीयानीति तस्याशयोऽभिव्यक्तो भवति । अनेनैव प्रकारेण अव्ययं विभक्ति... इति सूत्रे प्राक्कडारात् समास इत्यत समास इति, अव्ययीभाव इति च पूर्वोक्तप्रक्रिययाऽनुवर्तनीय इत्यसौ सूचयति ।

---

[९३]. पूर्ववत्, पृ.९१ ।
[९४]. पूर्ववत्, पृ.१२९ ।
[९५]. पूर्ववत्, पृ.५०७ ।
[९६]. पूर्ववत्, पृ.८८ ।
[९७]. पूर्ववत् ।

शारदाप्रभायाः समासखण्डे एतादृगनुवृत्तिसङ्केतः ‘अनेकमन्यपदार्थे’ (पा.सू. २-२-२४), निष्ठा (पा.सू. २-२-३६), अव्ययीभावश्च (पा.सू. २-४-१८), सप्तमी विशेषणे बहुव्रीहौ (पा.सू. २-२-३५) प्रभृतिष्वनेकेषु सूत्रेषु दृश्यते, तत्रत्ये व्याख्यानखण्डे शारदाप्रभाकारः सह सुपा सूत्र इव कखगादिवर्णैः सङ्केतीकृत्यानुवृत्तिमानीय संयोज्य च सूत्रमर्थापयति । शारदाप्रभाया मूलेऽपि सूत्रस्थमनुवर्तनीयं पदं समग्रं सूत्रं वा स्थूलाक्षरीकृत्य, स्वरितचिह्नेन चिह्नयित्वा, सूत्रान्तेऽङ्कं प्रदाय चैतस्मात् सूत्रादेतत्पदं समग्रं सूत्रं वा एतत्सूत्रपर्यन्तमनुवर्तत इति सूचयति, उदाहरणं यथा-

२-४-१७ स **नपुंसक॑म्** २५

२-२-३० **उपसर्जनं॑ पूर्वम्॑** ३१, ३८

२-१-३२ **कर्तृकरणे** कृता बहुलम् ३३

अत्रत्ये स नपुंसकमिति सूत्रे स्थितेन स्वरितचिह्नेन (शब्दोपरि स्थितोर्ध्वरेखा स्वरितचिह्नम्) (॑) तथा सूत्राक्षरस्थूलीकरणेन चैतत् पदमग्रे गच्छतीति ज्ञातुं शक्यते । तस्याग्रेगमनसीमा तु सूत्रान्ते प्रदत्तेनाङ्केन बुध्यते । अत्रत्ये स नपुंसकमिति सूत्रे २५ अङ्कविद्यमानात् सूत्रमिदं (पा.सू.२-४-२५) पर्यन्तमनुवर्तत इति जानन्ति विचक्षणाः । तथैव उपसर्जनं पूर्वमिति सूत्रान्ते प्रदत्तेन ३१,३८ अङ्केन एतत् सूत्रस्थमुपसर्जनपदं पा.सू. २-२-३१ पर्यन्तं तथा पूर्वमिति पदं तु पा.सू. २-२-३८ इति सूत्रान्तं निरन्तरं गच्छतीति निश्चीयते । अतः शारदाप्रभाकारेण सूत्रस्यार्थं निर्धारयता निर्दिष्टेनेतादृशसङ्केतेन सूत्रार्थापने सहयोगं विधास्यतीति स्फुटम् ।

### ६.३.२ विग्रहादिभिरूदाहरणादिभिश्च सूत्रार्थापनम्

विग्रहो नाम सूत्रादिघटकासमस्तपदस्फोरणपूर्वकं स्फुटितपदावयवसमासावयवार्थ-बोधनम् । अष्टाध्याय्याः कानिचन सूत्राणि पदप्रत्ययादीनां पारस्परिकयोगेन कठिनीभूतानि विद्यन्ते । अत एतेषामर्थापनं विग्रहसमासाभ्यामेव सम्भवम् । शारदाप्रभाकारस्तादृशेषु स्थलेषु विग्रहसमासौ प्रदर्शयति । द्वितीयाध्यायस्य चतुर्थपादे पठिताद् गवाश्वप्रभृतीनि च (पा.सू. २-४-११) इति सूत्रे स्थिताद् गवाश्वपदात् कीदृगर्थो निष्पद्यत इति जिज्ञासायां तत्र विग्रहसमासाभ्यामर्थापनमावश्यकम् । तत्र- गावश्चाश्वश्चेति विग्रहद्वारा द्वन्द्वसमासं निर्धार्य गवाश्वप्रभृतिगणपठितशब्दस्वरूपाणि यथोच्चरितानि साधूनि भवन्तीत्यर्थाप्यते । यद्यप्यत्र

गावश्चाश्वाश्चेति विग्रहद्वारा सर्वत्र विभाषा गोः (पा.सू. ६-१-१२२) इति सूत्रेण वा प्रकृतिभावेन 'गो अश्वः', तदभावे 'गोऽश्व' इति रूपद्वयमपि साधयितुं शक्यते परन्तु प्रयोगेऽस्मिन् पाणिनिना अवङ्स्फोटायनस्य (पा.सू. ६-१-१२३) सूत्रनिष्पन्नं 'गवाश्वः' इति रूपमेव प्रयुक्तं विलोक्यते । अत्र सम्भावितेषु विकल्पेषु गवाश्वः/गोऽश्वः/गो अश्वो यत्किमपि स्यात् सर्वैरेव रूपैर्ज्ञाप्योऽर्थस्तु गोश्वप्रभृतीनां समुदाय एव वर्तते, अतः सूत्रार्थापने सन्देहे सति विग्रहसमासाभ्यामर्थो निर्णीयत इति निष्कर्षः ।

अष्टाध्याय्याः सूत्रघटकपदकृत्योद्बोधने तु पदविग्रहः समास उदाहरण-प्रत्युदाहरणानि च कारणत्वेन निर्दिष्टानीति सूत्रव्याख्यानावलोकनेनावबुध्यते । समासे लौकिकालौकिकत्वेन स्वपदास्वपदत्वेन च प्रचलितो विग्रहः सूत्रस्थकठिनपदस्फोरणे, सूत्रार्थापने, तद्गूढार्थप्रकाशने च कारणत्वेनोपस्थितो दृश्यते । अव्ययं विभक्ति... (पा.सू. २-१-६) इति सूत्रे समुदाहृतस्य 'अधिसरित्' इति समस्तपदस्य सरितीति लौकिकः, सरित् + ङि इत्यलौकिकश्च विग्रहः, प्रकृतसूत्रस्थं विभक्तिरितिपदमव्ययेन सह वर्तमानेन सप्तम्यन्तेनान्यविभक्त्यन्तेन सह वा समस्यत इति बोधयति । अतो सूत्रार्थापने विग्रहस्य सहकारिकारणत्वं मन्तव्यम् । अनेन प्रकारेण विग्रहद्वारा प्रकाशितोऽर्थस्तृजकाभ्यां कर्तरि (पा.सू.२-२-१५) इति सूत्रे स्फुटं प्रतीयते । तत्र तृजकेति टाबन्तमव्युत्पन्नं पदं वर्तते । तत्राजन्ताद् तृज इत्यस्मात् स्वार्थे कप्रत्ययेन निष्पन्ने तृजक इति पदे स्त्रीत्वे टाप्विधानेन तृजकेति रूपं साधितमथवा तृच्चाकश्च तृजकौ ताभ्यामिति विग्रहतस्तृजकाभ्यां निष्पादितम् ? एवंविधासु शङ्कासु समुपस्थितासु अपां स्रष्टेति तृजन्तोदनस्य पाचक इति अकप्रत्ययान्तञ्चोदाहरणं दृष्ट्वाऽत्र तृजकप्रत्ययान्तौ गृह्याविति स्पष्टीभवति । अतः सूत्रस्थपदानामर्थापने पदविग्रहः, तत्रत्योदाहरणानि चावश्यकानीति निश्चीयते ।

विग्रह इव समस्तपदमपि सूत्रार्थापने तात्पर्यनिरूपणे च कारणं मन्यन्ते । निष्ठा (पा.सू.२-२-३६) इति सूत्रं निष्ठाप्रत्ययान्तान् शब्दान् पूर्वप्रयोगं कुरूते- पीतजला गावः, कृतकृत्यः, इत्यादीनि तस्योदाहरणानि । परं शार्ङ्गजग्धिः, मासजातः सुखजातः, दण्डपाणिः प्रभृतिषु कतिपयेषूदाहरणेषु निष्ठान्तं पूर्वं न प्रयुज्यते । शिष्टपरम्परामनुकुर्वता महामुनिना कात्यायनेन 'जातिकालसुदिभ्यः परा निष्ठा वाच्या' 'प्रहरणार्थेभ्यश्च परे निष्ठा सप्तम्यौ भवत इति वक्तव्यम्' इति वार्त्तिकाभ्यां परम्पराप्रचलिता निष्ठाप्रत्ययान्ता परप्रयुक्ताः शब्दाः साधव इति प्रमाणीकृता वर्तन्ते । अत्र शार्ङ्गजग्धिप्रभृतीनां समस्तपदानां निरूपणेन विना

'निष्ठा' इत्यस्यार्थापनं पूर्णतां न याति, तस्मादुदाहरणीभूतं प्रत्युदाहरणीभूतं वापि समस्तं पदं सूत्रार्थापने कारणमित्यवसीयते ।

### ६.३.२.१ उदाहरणैः सूत्रार्थापनम्

विग्रहसमासौ यथा तदर्थं स्पष्टीकुरूतस्तथैव तत्रत्य उदाहरणप्रत्युदाहरणेऽपि सूत्रार्थं प्रकाशयत इति 'विशिष्टलिङ्गो नदीदेशोऽग्रामाः' (पा.सू.२-४-७) इत्यत्र प्रस्तुताभ्यामुदाहरणप्रत्युदाहरणाभ्यामवबुध्यते । अत्रत्यविशिष्टलिङ्गशब्दो भिन्नलिङ्गबोधकं पदद्वयं सङ्केतयतीति- 'गङ्गाशोणम्, कुरूक्षेत्रम्' इत्युदाहरणाभ्यामवगम्यते । अत्रत्यो गङ्गाशब्दः स्त्रीलिङ्गीयो वर्तते चेत् शोणस्तु नापुंसकः । तथैव- कुरू कुरू क्षेत्रमित्यत्र च कुरू शब्दः पुंलिङ्गेऽस्ति चेत् कुरू क्षेत्रशब्दस्तु नपुंसकलिङ्गे विद्यते तस्मादत्र विशिष्टलिङ्गता प्राप्यते । गङ्गाशोणमित्यत्रापि गङ्गाशब्दो नदीवाचकः स्त्रीत्वबोधकश्च विद्यते चेत् शोणशब्दस्तु देशवाचकोऽस्ति पुमान्, अस्मादत्रापि विशिष्टलिङ्गता दृश्यते, अतो द्वन्द्वसमासनिष्पन्नयोरुभयोः प्रकृतसूत्रेणैकवद् विधीयते । अनेन प्रकारेण विशिष्टलिङ्गबोधकाभ्या मुदाहरणप्रत्युदाहरणाभ्यामपि सूत्रार्थबोधनादुदाहरणैरपि सूत्रार्थो स्फुटीभवतीति निश्चीयते । तथैव, स्तम्बेरमः कर्णेजप इति रूपद्वयमवलोक्य कृदन्तीये तत्पुरूष े बाहुलकेन सप्तम्या अलुग् भवतीत्यर्थापनम्, चौरस्य कुलमित्यादीन्युदाहरणानि विलोकनेन षष्ठ्या आक्रोशे (पा.सू. ६-३-२१) इति सूत्ररचनञ्च सूत्रार्थापने ज्ञापकानि । लोकः षष्ठीतत्पुरूष समासनिष्पन्नेषु दन्तचिकित्सक-दन्तलेखक-दन्तधावनमित्यादिषु समस्तपदेषु दन्तशब्दं पूर्वं प्रयुङ्क्ते । तदनुसरन् व्याकरणशास्त्रमपि तस्यैव पूर्वप्रयोगमुपदिशति परं 'राजदन्तः' इत्यत्र तु लोकोऽपि तं परं प्रयुङ्क्ते अतस्तत्र विशिष्टतां स्वीकुर्वन् पाणिनिरपि राजदन्तादिषु परम् (पा.सू.२-२-३१) इत्यतो दन्तशब्दस्य परप्रयोगं शास्ति । लोकप्रसिद्धिरप्यस्ति- शिष्टपरिज्ञानार्थमष्टाध्यायीति । पाणिनेः सूत्रमपि तदेवाह- तदशिष्यं संज्ञाप्रमाणत्वात् (पा.सू.१-२-५३) अतो लोकन्यायेनाष्टाध्याय्यादिशास्त्रप्रमाणेनोदाहरणादिभिर्व्यवहारतश्च सूत्रमर्थाप्यत इति प्रमाणितं भवति । द्वन्द्वसमास एकशेषे समासान्ते चैतादृशान्युदाहरणतोऽर्थापितानि बहूनि सूत्राणि विद्यन्त इत्यवधेयम् ।

### ६.३.२.२ प्रत्युदाहरणैः सूत्रार्थापनम्

उदाहरणमिव प्रत्युदाहरणमपि सूत्रार्थापने कारणमिति विशेषणं विशेष्येण बहुलम् (पा.सू.२-१-५७) इति सूत्रावलोकनेन ज्ञायते । सूत्रमिदं विशेष्यविशेषणयोर्बाहुलकेन कर्मधारयसमासं शास्ति । अत्र प्रयुक्तो बाहुलकशब्दः काश्चिद् नित्यसमासं काश्चिद् वैकल्पिकत्वं कुत्रचित्तु समासनिषेधमपि सङ्केतयति । यद्यत्र नीलोत्पलमित्युदाहरणमेव दृष्ट्वा प्रकृतसूत्रमर्थाप्यते चेत् तदपूर्णं भवति । तथैव कृष्णसर्प इति नित्यसमासोदाहरणमेव विलोक्य सूत्रार्थः क्रियते चेद् रामो जामदग्न्यः, अर्जुनः कार्तवीर्यः इत्यादिषु समासार्थमयोग्येष्वतिव्याप्तिः स्यात्तस्माद् लोकाश्रयणं कृत्वात्र सूत्रस्य बहुविधोऽर्थः प्रत्युदाहरणमुखेन प्रकटितो भवति । एतेन प्रत्युदाहरणमुखेनापि सूत्रार्थप्रकाशनं विधीयत इत्यर्थो निष्पद्यते । तथैव दिक्सङ्ख्ये संज्ञायाम् (पा.सू.२-१-५०) सूत्रे 'संज्ञायामेवेति नियमान्नेह- उत्तरा वृक्षाः, पञ्च ब्राह्मणाः'[५२९] इति वाक्ये चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः (पा.सू. २-१-३९)इति सूत्रे 'अत्र तदर्थेन प्रकृतिविकृतिभाव एव गृह्यते, अतो नेह- रन्धनाय स्थाली' [५३०] इति वाक्येऽन्यत्रापि प्रत्युदाहरणद्वारा सूत्रार्थापनं विधीयते, अतो न केवलमुदाहरणेनापि तु प्रत्युदाहरणेनापि सूत्रमर्थाप्यमिति निष्कर्षः ।

### ६.३.२.३ उदाहरणेषु मौलिकता

शारदाप्रभायाः समासखण्डेऽपि कानिचन मौलिकान्युदाहरणानि विद्यन्ते । तानि च प्रायेण नैपालककलां सांस्कृतिकगौरवं प्रवर्द्धयन्त्यो नैपालकराजसंस्थां व्याख्यातुर्जन्मस्थानादिकमपि सङ्केतयन्ति । अत्र तादृशानि कतिचिद् मौलिकोदाहरणानि प्रस्तूयन्ते -

| *मौलिकोदाहरणानि* | *उदाहृतस्थानम्* |
|---|---|
| दत्तघासा गौः | अनेकमन्यपदार्थे (पा.सू.२-२-२४) |
| कलमलिखितः | कर्तृकरणे कृता बहुलम् (पा.सू.२-१-३२) |
| छात्रपुस्तकम्, जनकपुत्री | षष्ठी (पा.सू. २-२-८) |
| नेपालराज्ञी | राजाहःसखिभ्यष्टच् (पा.सू. ५-४-९१) |
| नेपालसेनम् , नेपालसेना | विभाषा सेनासुरा...(पा.सू. २-४-३५) |

[९८]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.९५ ।
[९९]. पूर्ववत्,पृ.९३ ।

| | |
|---|---|
| आप्रतिष्ठानपुरम्, आप्रतिष्ठानपुरात् | आङ्मर्यादाभिविध्योः (पा.सू. २-१-१३) |
| हिमालसिद्धः | सिद्धशुष्कपक्वबन्धैश्च (पा.सू.२-१-४१) |
| किंराजा, किंसखा | किं क्षेपे (पा.सू. २-१-६४) |
| प्रपुरूष | कुगतिप्रादयः (पा.सू. २-२-१८)। |
| ब्राह्मणस्य कुर्वन् कुर्वाणो वा | पूरणगुण...(पा.सू. २-२-११) |
| हरिहरगणेशाः | चार्थे द्वन्द्वः (पा.सू. २-२-२९) |
| रामशाहोपक्रमं स्तुत्यस्थितिस्थापनम् | उपज्ञोपक्रमं...(पा.सू. २-४-२१) |
| अधिसरित्, सुराष्ट्रम् | अव्ययं विभक्ति...(पा.सू. २-१-६) |

शारदाप्रभाकारेण प्रस्तुतेषु मौलिकेषूदाहरणेषु छात्रजीवनसम्बद्धाः कति विषया अपि सङ्गृहीताः सन्ति । पठनपाठनक्रमे तैर्विहिता विविधाः क्रियाकलापाश्छात्रोपयोगिनो वर्तन्ते । शारदाप्रभाकारोऽयं संस्कृतभाषाया व्याकरणं सरलीकर्तुं कतिपयेषु स्थानेषु दैशिक-स्थानीयशब्दानपि प्रयुङ्क्ते । संस्कृतकोशे लेखनीबोधनाय कलमशब्दः प्रयुक्तो वर्तते । परं भाषावाङ्मये धान्यभेदबोधनाय यथा प्रचलितोऽयं न तथा लेखनीबोधय । नेपालीभाषायान्तु शब्दोऽयं तस्मिन्नेवार्थे प्रचलितः । तमेव शब्दं व्याख्याकारोऽयं कर्तृकरणे...सूत्रेदाहरणरूपेण प्रस्तौति । 'कलमः पुंसि लेखन्या'मित्यमरवचनात् शब्दोऽयं संस्कृत इति जानन्त्येव विदुषः । व्याख्यातासौ संस्कृतेऽप्रचलितं हिमालशब्दमपि सिद्धशुष्कपक्व... सूत्र उदाहरति । अतः सरलो लोकानुकूलश्च शब्दप्रयोगोऽस्य वैशिष्टयमित्यवधेयम् ।

### ६.३.२.४ प्रत्युदाहरणे मौलिकता

शारदाप्रभायां समुपलब्धेषु प्रत्युदाहरणेषु कानिचन मौलिकानि वर्तन्ते । तानि च नैपालकराजसंस्थां नैपालं जनजीवनञ्च सूचयन्ति । यद्यपि तादृशप्रत्युदाहरणवाक्यानि स्वल्पसङ्ख्याकान्येव विद्यन्ते तथापि यथासमुपलब्धान्यत्र प्रस्तूयन्ते-

| *प्रत्युदाहरणम्* | *प्रत्युदाहृतं स्थानं/सूत्रम्* |
|---|---|
| राजसभा, महेन्द्रसभा | सभा राजाऽमनुष्यपूर्वाः (पा.सू. २-४-२३) |
| मनसा दत्ताः= मनोदत्ता | मनसः संज्ञायाम् (पा.सू. ६-३-४) |
| रमापतिः | इको ह्रस्वो... (पा.सू. ६-३-६१) |
| सहपूर्वाह्णम् | अव्ययीभावे चाकाले (पा.सू. ६-३-८१) |
| पञ्चब्राह्मणाः | दिक्सङ्ख्ये संज्ञायाम् (पा.सू. २-१-५०) |

अत्र प्रस्तुतैः प्रत्युदाहरणैः शारदाप्रभाकारोऽयमुदारण इव प्रत्युदाहरणेऽपि नैपालकविषयान् राजसंस्थाञ्च संस्मरतीति सुस्पष्टं भवति ।

### ६.३.३ शङ्कामुद्भाव्य समाधानम्

शारदाप्रभायाः समासखण्डान्तर्गते समर्थः पदविधिः (पा.सू. २-१-१) इति सूत्रे समर्थपद- व्याख्याने, सह सुपा (पा.सू. २-१-४) इत्यत्र सुपोऽनुवर्तने, पारे मध्ये षष्ठ्या वा (पा.सू.२-१-१८) इत्यत्र पूर्वसूत्राद् विभाषाऽनुवर्तनेनैव सिद्धे पुनर्विभाषाग्रहणे, अन्यपदार्थे च संज्ञायाम् (पा.सू.२-१-२१) इति सूत्रे विभाषाऽधिकारे विद्यमानेऽपि नित्यसमासविधाने, देवता द्वन्द्वे च (पा.सू. ६-३-२६) इत्यत्र पूर्वसूत्राद् द्वन्द्वानुवर्तनेनैव सिद्धे पुनर्द्वन्द्वग्रहणे, स्त्रियाः पुंवद्भाषित...(पा.सू.६--३४) इति सूत्रस्योदाहरणभूते त्रिपदे बहुव्रीहौ कस्य कस्य शब्दस्य पुंवद्भाव इति जिज्ञासायां पृषोदरादिगणपठितशब्देषु रूपसाधनप्रक्रियायां का पथ्यक्षयोः (पा.सू.६-३-१०४) इति सूत्र अक्षिशब्दोऽक्षशब्दो वा गृह्यत इति संशये तथा व्याख्यानतः समाधेयासु सूत्रवार्त्तिकफक्किकारूपससम्बद्धासु शताधिकासु शङ्कासु शारदाप्रभाकारेण पूर्वव्याख्यातृभिः प्रस्तुते समाधाने स्वकीयं मन्थनं संयोज्य समाहितमस्ति ।

अत्र पाणिनीयसूत्रेषु सूत्रादिभिः साधनीयासु प्रक्रियासु चाधुनिकैः समालोचकैः समुत्थापितास्वेतासु शङ्कासु प्रतिनिधरूपेण कानिचन समुद्भाव्य तासां समाधानं पुरस्क्रियते।

#### ६.३.३.१ समर्थः पदविधिरिति सूत्रार्थविचारः

समर्थः पदविधिरितिसूत्रे समर्थपदस्य कोऽर्थः ? तत्र कीदृशो विग्रहः ? कः समासः ? तत्र सवर्णदीर्घश्च कथन्न ? अत्र कीदृशं सामर्थ्यमपेक्षितम् ? अत्रत्ये विधिशब्दे भावे कर्मणि वा घञ् ? इत्यादीन् संशयान् निराकुर्वन् शारदाप्रभाकारः प्राह- “समो विग्रहवाक्येन समस्तुल्योऽर्थो यस्येति बहुव्रीहौ शकन्ध्वादित्वात् पररूपे समर्थपदसिद्धिः ।” [५३१] अत्रत्यसमानताबोधकसमशब्द आकाङ्क्षावशाद् विग्रहवाक्यमपेक्ष्यते, अतो विग्रहवाक्यतुल्यार्थक इति समर्थशब्दस्य यौगिकार्थः । विग्रहतो यावानर्थो बुध्यते तावानर्थबोधनसमर्थ इति समर्थपदतो बोध्योऽर्थः । अत्र बहुव्रीहिसमासः, ततो सवर्णदीर्घापवादत्वेन शकन्ध्वाद्याकृतिगणत्वात् पररूपमित्यपि कार्यमिति शारदाप्रभाव्याख्यानतोऽवबुध्यते । अत्राष्टाध्यायीव्याख्याता ब्रह्मदत्तजिज्ञासुः समर्थपदसम्बद्धं महाभाष्यवचनं व्याचक्षाणः समर्थपदे

---

[१००]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.८७।

चतुर्विधान् विग्रहान् प्रस्तौति- सङ्गतार्थः समर्थः, संसृष्टार्थः समर्थः, सम्प्रेक्षितार्थः समर्थः, सम्बद्धार्थश्च समर्थ [५३२] इति । अत्रोत्तरपदलोपो बहुव्रीहिरिति तस्य साधनप्रक्रिया । सङ्गतेरेकीभाव इति तस्यार्थः, यथा- सङ्गतं घृतं तैलनेत्युक्ते एकीभूतमित्यर्थो गम्यते, संसृष्टोऽग्निरित्युक्ते एकीभाव इत्यर्थोऽवबुध्यते तथैवात्रापि विग्रहबोध्येनार्थेन सहैकीभूत इत्यर्थः सङ्गत-संसृष्टपदयोरर्थः । सङ्गतार्थस्योदाहरणन्तु राजपुरुष इति । स्वस्वामिभावसम्बन्ध-बोधकत्वेन परस्परसम्बद्धयोर्राजपुरुषयोरर्थैक्येनात्र समासो विहितो दृश्यते तस्मादत्र सम्बद्धार्थः स्पष्ट एव । सामर्थ्याभावे केवलसम्बद्धार्थमात्रेऽपि समासो न जायते, अत एव 'भार्या राज्ञः पुरुषो देवदत्तस्य' इति वाक्ये व्यवधानेन परस्परसम्बद्धार्थताविद्यमानेऽपि एकार्थीभाव सामर्थ्याभावान्न समासः, एभिस्तथ्यैः सामर्थ्यस्य द्विविधत्वं स्पष्टं भवति- व्यपेक्षासामर्थ्यमेकार्थीभावसामर्थ्यञ्च । तत्र 'भार्या राज्ञः पुरुषो देवदत्तस्ये'त्यादिषु वाक्येषु व्यपेक्षाभावसामर्थ्यं प्राप्यते चेद् राज्ञः पुरुष इत्यादिषु समासयोग्यपदेषु त्वेकार्थीभावरूपं सामर्थ्यं लभ्यते । समासस्तु एकार्थीभावरूपे सामर्थ्ये एवाभीष्टः । व्यपेक्षायान्तु समासो न भवति समासयोग्यताभावात् । समासे कीदृशं सामर्थ्यमपेक्षितमिति जिज्ञासायां समर्थसूत्रेऽष्टाध्यायीव्याख्याता ईश्वरचन्द्रः प्राह- सामर्थ्ये त्रीणि तत्त्वान्यपेक्षितानि- आकाङ्क्षा, योग्यताऽऽसत्तिश्च । जनकतनयेति समस्तपदे स्थितयोरुभयोः पदयोर्मध्ये एकस्योच्चारणेन स्वतोऽपरस्याप्याकाङ्क्षा जागर्त्येव, अत तत्रत्यं पदद्वयं समासयोग्यमिति ज्ञायते । अनयोर्जन्यजनकभावमूलकार्थसम्बन्धोऽपि दृश्यते । अत एते पदे समासयोग्य इति वक्तुं शक्यते । परमग्निः सिञ्चति, वायुर्दहति, आकाशो वर्षति प्रभृतिषु वाक्येषु समागतयोः पदयोरर्थसम्बन्धो न विद्यते, तस्मादत्र सामर्थ्याभावात् सामासो न सम्भवति, परं जनकस्य तनयेति विग्रहवाक्ये द्वयोः पदयोर्न कालकृतं नापि पदकृतं व्यवधानं विद्यते तस्मादेव तत्रासत्तिः प्राप्यते । ऋद्धस्य राज्ञः पुरुषः, पश्य कृष्णं श्रितो राममित्रमित्यादौ तु कालकृत-पदकृतव्यवधानाभावेऽप्यर्थकृतव्यवधानसत्वात् समासो न भवति, अतः प्रकृते सूत्रे समासयोग्यमेकार्थीभावरूपं सामर्थ्यमपेक्षितमिति निश्चीयते । तथैव समर्थसूत्रस्थं समर्थपदं विग्रहसमानार्थकं सामर्थ्यं सङ्केतयतीत्यपि ज्ञायते ।

प्रकृतसूत्रस्थे विधिपदे विधानं विधिरिति भावे घञ् उत विधीयतेऽसौ विधिरिति कर्मणि घञ् इति सन्देह एके- भावे घञं स्वीकुर्वन्ति चेत् काशिका-शारदाप्रभाकारौ तु कर्मणि घञं ऊररीकुर्वन्ति । अत्र पक्षद्वयमेवोल्लिख्य व्याख्याय च प्राप्तनिष्कर्षः प्रस्तूयते-

---

[५३२] ब्रह्मदत्तजिज्ञासुः, *अष्टाध्यायीभाष्यम्* (प्रथमा वृत्तिः),हरयाणा : रामलालक.ट्र., (२०४२) पृ. १५२ ।

अत्र हरदत्तादयः शङ्कन्ते- "यद्यत्र विधीयतेऽसौ विधिरिति कर्मसाधनो विधिशब्दः स्वीक्रियते चेद् विभक्तिविधानमसङ्गृहीतं स्यात् पदान्येव हि तत्र विधीयन्ते न तु पदानां सतां किञ्चिद् विधानं सम्भवतीति"[५३३] अत एव विधानं विधिरिति भावे घञ् स्वीकर्तव्य इति तेषामाशयः । परं कर्मणि घञ्पक्षीयास्तु भावे घञ्स्वीकारे कर्मषष्ठ्यन्तेन पदशब्देन सह विधिशब्दस्य समासात् पदकर्मकं विधानमित्यर्थ आपद्यते समर्थस्य वाक्याश्रयत्वात् तत्समानाधिकरण्यापत्तेश्चेत्याहुः । कर्मणि घञ्विधानेऽपि विभक्तिविधानं सङ्गृहीतं स्यादित्युल्लिखन् पदमञ्जरीकार आह-"ननु कर्मसाधनपक्षेऽपि विभक्तिविधानमसङ्गृहीतं स्यात् पदान्येव तत्र विधीयन्ते न तु पदानां सतां किञ्चिदुच्यते, कर्मणि द्वितीया इत्यादिना न नियमः क्रियते न पदविधिरिति"[५३४] कर्मणि द्वितीयेति सूत्रे व्यवस्थितपदानां ग्रहणेन विभक्तिरपि गृह्यत इति नियम्यते अतः कर्मसाधनपक्षे विभक्तिसङ्गृहीतेऽपि न कापि हानिरिति पदमञ्जरीकारस्याशयः । भावसाधनपक्षे विभक्तौ सङ्गृहीतायामपि पराङ्गवद्भावादिषु दोषा आपद्यन्त इत्युल्लिखन्नत्रैव न्यासकारो जिनेन्द्रबुद्धिराह-"यदीह भावसाधनो विधिशब्द आश्रीयेत तदा विभक्तिविधानमेव सङ्गृहीतं स्यात्, समासपराङ्गवद्भाव-तद्धितवृत्त्यादिकं न सङ्गृह्येत, न हि तत्र पदानामसतां विधानम्, किं तर्हि ? व्यवस्थितानामेव पदानां समासादिकार्यं विधीयत इति ।"[५३५] कर्मसाधने तु विभक्तिविधानमेव दोषः परं भावसाधने तु समासान्तपराङ्गवद्भावतद्धितवृत्त्यादयो न सङ्गृह्यन्ते तस्मादत्र कर्मसाधनमेवोचितं दृश्यते, अतः कर्मसाधनमेव समर्थयमानः शारदाप्रभाकारोऽपि विधिशब्दोऽयं कर्मसाधन इत्याह । अतो निष्कर्षे समर्थपदविधिरिति सूत्रस्थे विधिशब्दे कर्मसाधनपक्ष एव न्यायोचित इति निश्चीयते ।

### ६.३.३.'पारे मध्ये षष्ठ्या वा' इत्यत्र विभाषाग्रहणविचारः

अव्ययीभावसमासे पठिते पारे मध्ये षष्ठ्या वा (पा.सू.२-१-१८) इति सूत्रे विभाषा (पा.सू.२-१-११) इत्यस्मात् स्वतो विभाषापदमधिक्रियते, अतस्तदधिकारमुपेक्ष्य किमर्थमत्र वेति पठ्यत इत्याशङ्कायां शारदाप्रभाकार आह-"अत्र महाविभाषयैव कार्यसिद्धौ पुनर्वाग्रहणं यत्रोत्सर्गापवादौ महाविकल्पेन विकल्प्येते तत्रापवादेन मुक्ते पुनरुत्सर्गशास्त्रं न प्रवर्तत इति ज्ञापयति, तेन इतोऽन्यत्र महाविभाषया मुक्ते विग्रहवाक्यमेवावतिष्ठते, पुनरुत्सर्गशास्त्रं न

---

[१०२]. हरदत्तः (व्या.), *काशिकावृत्तिः* (द्वितीयो भागः) पूर्ववत्, (१९६५), पृ.४ ।
[१०३]. पूर्ववत् ।
[१०४]. जिनेन्द्रबुद्धिः (व्या.),*काशिकावृत्तिः* (द्वितीयो भागः) पूर्ववत्, (१९६५), पृ.४ ।

प्रवर्तते तेन पूर्वं कायस्येति विग्रहे पूर्वापराधरोत्तर...(पा.सू.२-२-१) इति समासे पूर्वकायः, तदभावे विग्रहवाक्यमेव भवति न तु षष्ठीतत्पुरूष समासः, एवं सर्वत्र ।"[५३६] षष्ठीतत्पुरूष ापवादभूतेऽव्ययीभावे प्रकृतसूत्रेण समास एदन्तनिपातने च कृते सति पारेगङ्गम् मध्येगङ्गमित्यादीनां सिद्धिर्भवति । अपवादस्याप्रवृत्तौ पुनरुत्सर्गः प्रवर्तत इति नियमात् षष्ठीतत्पुरूष े गङ्गापाराद् गङ्गामध्यादिति च रूपद्वयं सिध्यति, पुनश्च महाविभाषाधिकाराद् गङ्गायाः पारात् इतयादिवाक्येषु सिद्धेषु पुनरत्र केन प्रयोजनेन वा ग्रहणं विधीयत इत्याकाङ्क्षायां जातायां महाभाष्यव्याख्यानमुद्धरन् काशिकाव्याख्याता पदमञ्जरीकारो ब्रूते- "यत्रोत्सर्गापवादौ महाविभाषया विकल्पितौ तत्रापवादेन मुक्ते सति पुनरुत्सर्गो न प्रवर्तत इति ज्ञापयति, तेन पूर्वं कायस्येत्यत्रैकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति । दक्षस्यापत्यं दाक्षिरिति प्रयोगे इञा मुक्तेऽण्प्रत्ययो न भवति"[५३७] अत्र महाविभाषयैव सिद्धे इतोऽन्यत्रापवादेनावशिष्टे स्थाने पुनरुत्सर्गशास्त्रं न प्रवर्तत इति ज्ञापयति अत एव षष्ठीतत्पुरूष ापवादभूतेन पूर्वपराधरोत्तरादिना सूत्रेण समासेन पूर्वकायः, अपरकाय इत्यादीनां सिद्धेऽनन्तरं विभाषया वाक्यमेव न तु पुनरुत्सर्गशास्त्रप्रवृत्त्या षष्ठीतत्पुरूष ोऽपि, तेन तस्यापत्यम् (पा.सू.४-१-९२) इत्यस्यापवादेन अत इञ् (पा.सू.४-१-९५) इति शास्त्रेण इञ्प्रत्यये दाक्षिरिति रूपं साधु । तदभावे तु दक्षस्यापत्यमिति वाक्यमेव न तु तस्यापत्यमित्युत्सर्गस्य पुनः प्रवृत्तिः । तदेतत्सकलं ज्ञापयितुं सूत्रे वा ग्रहणं कृतमिति व्याख्यातार आहुस्तदेव निष्कर्षश्च । शारदाप्रभाकारश्च पदमञ्जरीकारस्यैतद् वचनमत्रानीय सरलायां शैल्यां जिज्ञासून् बोधयति, अतः सरलभाषायां शङ्कानां समाधानमस्य वैशिष्ट्यं तदेव निष्कर्षश्च ।

### ६.३.३.३ अन्यपदार्थे च संज्ञायामिति सूत्रेण नित्यसमासविमर्शः

नन्वन्यपदार्थे च संज्ञायाम् (पा.सू.२-१-२१) इति सूत्रे विभाषा (पा.सू.२-१-११) इति सूत्रस्याधिकारात् प्रकृतसूत्रेण विकल्पेन समासे विधातव्ये कथं नित्यं समासः ? इत्याशङ्कायां जातायां शारदाप्रभाकार आह- "विभाषाधिकारेऽपि समासोऽयं नित्यः, वाक्येन संज्ञाऽनवगमादिति"[५३८] सम्यग् ज्ञायत इति संज्ञाः= देशविशेषः स्थानावगमादिह नित्यं समासः, परन्तु सिद्धान्तकौमुद्या बालमनोरमाटीकाकारस्त्वत्र विभाषाधिकारमुररीकुरूते, तदेवं- "वस्तुतस्तु विभाषाधिकारादयमपि समासो वैकल्पिक एव, अत एव द्वितीयतृतीय... इति

---

१०५. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी,* पूर्ववत्, (२०६०) पृ.९१ ।
१०६. हरदत्तः (व्या.), *काशिकावृत्तिः* (द्वितीयो भागः),पूर्ववत्, (१९६५), पृ. ३६ ।
१०७. हरिप्रसादशर्माचार्यः, पूर्ववत्, पृ.९१ ।

सूत्रेऽन्यतरस्यामिति ग्रहणेनोत्सर्गापवादयोर्महाविभाषाविषयत्वादपवादाभाव उत्सर्गस्या प्रवृत्तिरिति ज्ञापितेऽर्थ उन्मत्तगङ्गमित्याद्युदाहृतम् । अव्ययीभावेन मुक्ते बहुव्रीहिर्नेति चोक्तं भाष्ये । अस्य समासस्य नित्यत्वे तु तदसङ्गतिः स्पष्टैव, कदाप्यव्ययीभाव-मुक्त्यसम्भवात् ।"[५३९] बालमनोरमाकारस्यैतेन वचनेनापि स्वतो विभाषाधिकारेणोन्मत्तगङ्गं लोहितगङ्गमित्यनयोर्विकल्पे तयोर्विग्रहवाक्यमेव भवत इति ज्ञायते । समासप्रकरणे विभाषाधिकारेणैव सिद्धे पारे मध्ये षष्ठ्या वा (पा.सू. २-१-११) इत्यत्र वा ग्रहणेन विकल्पबोधकवापदस्याप्रयोगेण चोत्सर्गस्याप्रवृत्तिरिति ज्ञापनाद् द्वितीयतृतीयचतुर्थ...(पा.सू.२-२-३) इत्यत्रान्यतरस्यां ग्रहणेनोत्सर्गस्य प्रवृत्तिः प्रदर्शिता वर्तते । पुनश्चात्र विभाषाधिकाराभावेऽव्ययीभावेन मुक्ते बहुव्रीहिर्नेति भाष्यवचनमसङ्गतं भवेदतो विभाषाधिकारेण समासाभाव उन्मत्ता गङ्गा यस्मिन् देश इति वाक्यमपि साध्यत इति बालमनोरमाकारस्याभिप्रायः । शारदाप्रभाकारस्तु- विभाषाधिकारेऽपि नित्यसमास एवायं न हि वाक्येन संज्ञा गम्यत[५४०] इति काशिकापक्षमाश्रयन् नित्यसमासत्वमेव समर्थयति । अत्र बालमनोरमापक्षे भाष्यसम्मतिदर्शनात् काशिकापक्षो विचारणीयः प्रतीयते ।

### ६.३.३.४ अर्धं नपुंसकम् इति सूत्रार्थविमर्शः

अर्धपिप्ली, अर्धकोशातकीप्रभृतिषु समप्रविभागबोधकोऽयमर्धशब्दो ग्रामार्धः, नगरार्ध इत्यादौ त्वंशबोधनाय प्रयुज्यते, अतः प्रकृतसूत्रेऽर्धशब्देन को गृह्यते ? इत्याकाङ्क्षायां शारदाप्रभाकार आह- "समांशवाच्यर्धशब्दो नित्यं क्लीबे वर्तते स एकाधिकरणवाचिनैकदेशिना सुबन्तेन सह षष्ठीसमासापवादत्वेन समस्यत इति"[५४१] 'वा पुंस्यर्धोऽर्धः समेंशके' इत्यमरवचनादंशसामान्यान्यवाचकोऽयमर्धशब्दः पुंनपुंसकयोर्वर्तते चेत् समप्रविभागबोधकस्तु नित्यं नपुंसके वर्तते ।[५४२] महाभाष्येऽपि तथैव प्रयोगात् प्रकृतसूत्रे नपुंसकलिङ्गबोधकार्धशब्दो गृह्यत इति स्पष्टसङ्केतितत्वाच्चात्रत्यार्द्धशब्दो नित्यनपुंसकः समप्रविभागबोधकश्चे- त्यवसीयते, अत एवार्धपिप्पली इत्यादिना पिप्पल्या अर्धभागमवबुध्यत इति गम्यते । गोलार्धः, नगरार्धः,अर्धाहार इत्यादिबोधनाय पुंसि, अर्धोक्तम्,अर्धविलोकितमि त्यादिबोधनाय नपुंसके, प्रेम्णा शरीरार्धहरा हरस्येति कुमारसम्भवपद्ये स्त्रियामप्यर्धशब्दोऽयं वर्तते तथापि तानि सकलपदानि न समांशवाचकानि । 'समुदाये दृष्टाः शब्दा अवयवेष्वपि

---

[१०८]. वासुदेवदीक्षितः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (समासतद्धितखण्डः), पूर्ववत्, (१९८७) पृ.१९ ।
[१०९]. वामनजयादित्यौ, *काशिकावृत्तिः* (द्वितीयो भागः), पूर्ववत्, (१९६५) पृ.३८ ।
[११०]. हरिप्रसादशर्माचार्यः, पूर्ववत्, पृ.१०१ ।
[१११]. वासुदेवदीक्षितः (व्या.) पूर्ववत्, (१९८७), पृ.४० ।

वर्तन्त' इति न्यायादर्धं चासौ पिप्पलीति विग्रहेण कर्मधारयसमासेनार्धपिप्पलीपदसिद्धौ तदर्थमेव सूत्रमिदमनावश्यकं मत्वा महाभाष्यकारः परवल्लिङ्गं द्वन्द्वतत्पुरूष योः (पा.सू.२-४-२६) अर्धं नपुंसकम् (पा.सू. २-२-२) इति सूत्रे च प्रकृतं सूत्रं प्रत्याख्यातवानिति तत्त्वबोधिनीकारोऽत्र सूचयति । यद्यपि काशिकाशारदाप्रभाकारौ तु तन्न सङ्केतयतः । पदमञ्जरीकारो हरदत्तस्तु- "अयं योगः शक्योऽवक्तुं कथमर्धपिप्पली ? सामानाधिकरण्ये भविष्यत्यर्धञ्चासौ पिप्पलीति । ननु यद्यर्धं न पिप्पलीत्यथ पिप्पली नार्धम्, अर्धं पिप्पली चेति विप्रतिषेधः ? नास्ति विप्रतिषेधः समुदाये हि दृष्टाः शब्दा अवयवेष्वपि वर्तन्ते ।"[५४३] एतैः कथनैः सूत्रमिदं प्रत्याख्यातुं शक्यमिति महाभाष्यकारस्याशयो दृश्यते । शारदाप्रभाकारस्तु काशिकामनुसरन् सूत्रस्य प्रत्याख्यानपक्षं नोत्थापयति तस्मात् सूत्रप्रत्याख्यानविषये प्रकृतव्याख्यातुर्रुचिर्न विद्यत इति निश्चीयते । अत्र समुपस्थापितः सूत्रप्रत्याख्यानपक्षस्तु वाग्विलास एवेति ध्येयम् ।

### ६.३.३.५ 'तेन सहेति तुल्ययोगे' इति सूत्रस्थतुल्ययोगपदस्य सार्वत्रिकाभावविचारः

तेन सहेति तुल्ययोगे (पा.सू.२-२-२८) इति सूत्रं तुल्ययोगेऽर्थात् समानसम्बन्धे वर्तमानेन सहेति तृतीयान्तेन सह विभाषया समासं करोति, परमत्र समानसम्बन्धबोधकं तुल्ययोगपदं सर्वत्र न प्रयुज्यत इति काशिकामुद्धरन् शारदाप्रभाकार आह- "तुल्ययोग इति प्रायिकम्, विभाषा सपूर्वस्येत्यादिनिर्देशात् सकर्मक इत्यस्य विद्यमानकर्मक इत्यर्थः"[५४४] अर्थाद् विभाषा सपूर्वस्य (पा.सू.४-१-३४) इति सूत्रस्थं सपूर्वस्येतिपदं पूर्वेण सह इति विग्रहेण तेन सहेति तुल्ययोगे (पा.सू.२-२-२८) इति समासेन साधितं वर्तते । पदमिदं विद्यमानपूर्वस्येत्यर्थे बहुव्रीहिसमासेन निष्पन्नमस्ति । तथैवान्यत्र सकर्मकः (विद्यमानकर्मकः) सलोमकः (विद्यमानलोमकः) सहैव दशभिः पुत्रैर्भारं वहति गर्दभी (दशपुत्रेषु विद्यमानेष्वपि गर्दभी भारं वहति) प्रभृतिषूदाहरणेषु विद्यमानार्थक एव सह इत्यस्य प्रयोगदर्शनात् पुत्रेण सहागत सपुत्र इत्यादिषु तुल्ययोगार्थे प्रकृतसूत्रेण समासे विहितेष्वपि प्रकृतसूत्रस्थं तुल्ययोगपदं क्वचिद् विद्यमानार्थेऽपि समासं करोतीति ज्ञायते । अत्रत्यं तुल्ययोगपदं सत्तावचनेऽप्यस्तीति काशिकाव्याख्याता विभाषा सपूर्वस्येति सूत्र एवं सङ्केतयति- सहशब्दोऽस्त्येव तुल्ययोगेऽर्थे, यथा सशिष्यो गुरुरागतः । गुरोः शिष्यस्य चागमनेन तुल्ययोगः प्रतीयते । अस्ति च सत्तावचनः, यथा- सहैव दशभिः पुत्रैर्भारं वहति

---

[११२]. हरदत्तः (व्या.), *काशिकावृत्तिः* (द्वितीयो भागः), पूर्ववत्, (१९६५) पृ.९९ ।
[११३]. हरिप्रसादशर्माचार्यः (व्या.),*अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ. १०७ ।

गर्दभीति वाक्ये पुत्रेषु विद्यमानेष्वपि भारं वहतीत्यर्थोऽवबुध्यते । तदिह सत्तावचनो गृह्यते सपूर्वस्य विद्यमानपूर्वस्येत्यर्थः[५४५] अतस्तुल्ययोगपदमिदं प्रायिकमिति निश्चीयते । प्रकृतसूत्रस्थं तुल्ययोगपदं प्रायिकमित्यत्र किं प्रमाणमिति विषये द्विविधं व्याख्यानं समुपलभ्यते । तत्र लघुशब्देन्दुशेखर-न्यासकारौ विभाषासूत्र इतिकरणात् तुल्ययोगवचनं प्रायिकमित्यर्थापयन्ति चेत् काशिकाव्याख्याता पदमञ्जरीकारो हरदत्तस्तथान्ये तु विभाषा सपूर्वस्य प्रभृतीनि कानिचन सूत्राण्युदाहृत्यास्य प्रायिकत्वं सूचयन्ति । शेखरमतं बालमनोरमाकारोऽपि पक्षान्तरे स्वीकुरूत इति शेखरस्यानेनोद्धरणेन ज्ञायते, तथाहि- "इति शब्दोपादानादस्य सूत्रस्य प्रयोगदर्शनात् प्रवृत्तिरिति भावः ।"[५४६] तथैव काशिकाव्याख्याता न्यासकारोऽपि प्रकृतसूत्र इति करणात् प्रायिकत्वं ज्ञापितमिति सङ्केतयति, तदेवं- "कुतः पुनरस्य प्रायिकत्वं लभ्यते ? इतिकरणात् ।"[५४७] अत एके व्याख्यातार इति शब्दोपादानात्तुल्ययोगस्य प्रायिकत्वं ज्ञाप्यत इत्यर्थापयन्ति, परं पदमञ्जरीकारस्तु विभाषा सपूर्वस्येत्यादीनि सूत्राणि तुल्ययोगस्य प्रायिकत्वे प्रमाणं मानयति, स तत्राह- विभाषा साकाङ्क्षे, छन्दस्यनेकमपि साकाङ्क्षम्, पूर्वादीनि, सपूर्वाच्च, सपूर्वायाः प्रथमायाः, विभाषा सपूर्वस्य प्रभृतीनि सूत्राणि विद्यमानार्थेऽपि समासं निर्दिशन्ति, ते ज्ञापयन्ति प्रायिकं विशेषणमिति । एतेन कथनेन तुल्ययोगवचनस्य प्रायिकत्वं प्रमाणितं भवति । अत्र बालमनोरमाकारोऽपि पक्षान्तरे वचनद्वयमेव तुल्ययोगस्य प्रायिकत्वे प्रमाणं मनुते । एतत्पक्षमेव स्वीकुर्वन् शारदाप्रभाकारोऽत्र विभाषा सपूर्वस्येत्यादिनिर्देशादित्युल्लिखति । अत्र शारदाप्रभाकारोऽप्यादिशब्दत इतिकरणमपि सूचयतीति ज्ञायते । अतः प्रकृतसूत्रे पठितं समानधर्मबोधकं तुल्ययोगपदं प्रायिकं तस्य प्रायिकत्वे च तत्रैव पठितमितिपदं विभाषा सपूर्वस्येत्यादिषु निर्दिष्टं विद्यमानार्थबोधकं सह पदञ्च कारणमिति निश्चीयते ।

### ६.३.३.६ देवताद्वन्द्वे च इत्यत्र पुनर्द्वन्द्वग्रहणविचारः

द्वन्द्वसमासे आनङ्विधायके देवताद्वन्द्वे च (पा.सू. ६-२-२६) सूत्रे पूर्वस्मादानङ् ऋतो द्वन्द्वे (पा.सू.६-३-२५) इत्यतो द्वन्द्वपदाऽऽनयनेनैव सिद्धे पुनर्द्वन्द्वग्रहणस्य किं प्रयोजनमित्याशङ्कायां काशिकामुद्धरन् शारदाप्रभाकार एवमाह-"द्वन्द्व इति वर्तमाने

---

५४५. जिनेन्द्रबुद्धिः (व्या.), *काशिकावृत्तिः* (द्वितीयो भागः),पूर्ववत्, (१९६५) पृ. ३२४ ।
५४६. वासुदेवदीक्षितः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (समासतद्धितखण्डः), पूर्ववत्, (१९८७) पृ.११५ ।
५४७. जिनेन्द्रबुद्धिः (व्या.), *काशिकावृत्तिः* (द्वितीयो भागः), पूर्ववत्, (१९६५) पृ. १३८ ।

पुनर्द्वन्द्वग्रहणं प्रसिद्धसाहचर्यार्थम्, तेनात्यन्तसहचरिते लोकविज्ञाते द्वन्द्वो निपात्यते" [५४८] अर्थात् पूर्वसूत्रतो द्वन्द्वपदानयनादेव सिद्धे पुनर्द्वन्द्वपदग्रहणेन लोके वेदे च प्रसिद्धानि द्वन्द्वसमासनिष्पन्नानि पदान्येवात्र गृह्यन्त इत्युपलक्षणार्थमत्र द्वन्द्वपदं गृहीतमिति तस्याशयः । तं विशदीकुर्वन् भाषावृत्तिकार आह- "आनङ्...इति सूत्राद् द्वन्द्वग्रहणेऽनुवर्तमानेऽपि पुनरत्र सूत्रे द्वन्द्वग्रहणं वेदप्रसिद्धद्वन्द्वोपलक्षणार्थमिति ।" [५४९] अनेन प्रकारेण प्रसिद्धस्य द्वन्द्वस्यैवात्र ग्रहणात् शिववैश्रवणौ, ब्रह्मप्रजापती प्रभृतिष्वप्रसिद्धेषु समस्तपदेषु प्रकृतसूत्रेणानङ् न विधीयते । काशिकाकारोऽप्यत्र द्वन्द्वपदेन 'अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्येतन्निपात्यते' इति वचनद्वारा प्रसिद्धद्वन्द्वमेव गृह्णाति, अतोऽत्र लोकवेदयोः प्रसिद्धान्युदाहरणान्येवात्र द्वन्द्वपदेन गृह्यन्ते, फलत इन्द्रावरुणौ, इन्द्राबृहस्पती, इन्द्रासोमौ प्रभृतिषु प्रसिद्धोदाहरणेष्वेवानेन सूत्रेणानङ्विधीयत इति बोधः । अस्याः प्रक्रियायाः सारल्येन व्याख्यानञ्च शारदाप्रभाया अभीष्टमिति निष्कर्षः ।

### ६.३.३.७ पृषोदरादीनि यथोपदिष्टमित्यनेन कृतं सिद्धिप्रक्रियानिरूपणम्

पाणिनिना तात्कालप्रचलितानां प्राग्वर्त्तिनाञ्च प्रायः साधुपदानां निष्पादनमष्टाध्याय्यां विहितम्, तथापि पृषोदरम्, बलाहकः, जीमूतः, श्मशानम्, उलूखलम्, पिशाचः, मयूरः, ब्राह्मणसदृशानामनेकानां पदानां साधनमष्टाध्यायीसूत्रैर्न जायते, तानि च कात्यानवार्त्तिकैरपि न साध्यन्ते तथासत्यप्येतानि संस्कृतवाङ्मये व्यवहारे च प्रयुज्यन्ते । साधुत्वसंरक्षणं रूपसाधने ऐक्यञ्च कथं सम्भवतीत्यत्र महर्षिपाणिनिः पृषोदरादीनि यथोपदिष्टम् (पा.सू.६-३-१०९) इति सूत्रे स्थूलतया रूपसाधनमार्गनिदेशं कुरूते । तत्सूत्रव्याख्यातारोऽपि स्पष्टतया न किमपि निगदन्ति । अत्र शारदाप्रभाकारोऽपि काशिकाकौमुद्यादीनां व्याख्यानमुल्लिखन्- "पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युः" [५५०] इत्येवाह । शिष्टा येन प्रकारेण शब्दानुच्चारितवन्तोऽर्थापितवन्तो रूपसाधनं निर्दिष्टवन्तश्च तेनैव पथाऽर्वाचीनैरपि भाव्यमिति व्याख्यातारः सूचयन्ति । अत्र काशिकाकार आह- "पृषोदरप्रकाराणि शब्दस्वरूपाणि, येषु लोपागमवर्णविकाराः शास्त्रेण न विहिता दृश्यन्ते तानि यथोपदिष्टानि साधूनि भवन्तीति । यानि यथोपदिष्टानि शिष्टैरूच्चरितानि प्रयुक्तानि तानि तथैवानुगन्तव्यानीति ।" [५५१] उणादिशब्दानां साधनमुणादयो बहुलम् (पा.सू.३-३-१) इत्यनेन सूत्रेण विधीयते ।

---

[११७]. हरिप्रसादशर्माचार्यः (व्या.), पूर्ववत्, (२०६०), पृ.५११ ।
[११८]. पुरुषोत्तमदेवः, *भाषावृत्तिः,* वाराणसी : रत्ना पब्लिकेसन, (१९८९),पृ. २८६ ।
[११९]. हरिप्रसादशर्माचार्यः, पूर्ववत्, पृ. ५२५ ।
[१२०]. वामनजयादित्यौ, *काशिकावृत्तिः* (पञ्चमो भागः), पूर्ववत्, (१९६७) पृ. २९७ ।

वैदिकशब्दानां निष्पादनञ्च वैदिकप्रक्रियया क्रियते तथैवात्रापि सूत्रवार्त्तिकादिभिरसाधितानां समस्तपदानां निष्पादनमनेन सूत्रेण सम्पाद्यते । एकस्यैव गोशब्दस्य गावी-गोणी-गोता-गोपोतलिका-गाई प्रभृतिषु नैकेषु समानार्थकशब्देषु समुपलब्धेषु कः साधुः ? साधुशब्दस्यापि रूपसाधनप्रक्रिया च केत्यत्र व्याख्यातार आहुः शिष्टपरिज्ञानार्थमष्टाध्यायी, अर्थात् शिष्टानामनुसरणमष्टाध्याय्याः प्रवृत्तिः, अतो पृषोदरप्रकारकाणां- वारिवाहको बलाहकः, ब्रुवन्तो सीदन्त्यस्यामिति बृसी, पूर्यन्ते गलन्ति च पुद्गलाः (देहाः), तथ्यस्य भावः तथ्यता, रतेस्तननं रत्नम्, वाहितं पापमनेन ब्राह्मणः, जितमेनोऽनेन जिनः, यशः कौतीति यक्षः, कौ जीर्यतीति कुञ्जरः, शवानां शयनं श्मशानम्, पृषदुद्वानमस्य पृषोद्वानम्, जीवनस्य मूतो जीमूतः, उर्ध्वं खमस्येति उलूखलम्, पिशिता आशा यस्य स पिशिताशः-पिशाचः, अश्वे तिष्ठतीति अश्वत्थः, कपिषु तिष्ठतीति कपित्थ इत्यादयः शिष्टपरम्परातः समागताः शब्दाः प्रचलितप्रक्रियाद्वाराऽसम्भवेऽपि निपातनप्रक्रियाद्वारा च साध्यन्ते, अतः पृषोदरादीनां रूपसाधने शिष्टपरम्परानुसरणमेव प्रमाणमिति निश्चितं भवति । शारदाप्रभाकारोऽयमत्र पूर्वव्याख्यातृभिः शिष्टशैल्या समुत्थाप्य समाधानीकृताः शङ्काः सरलतया प्रस्तुत्य समाधत्ते, तदपेक्षया पूर्ववर्तिनस्तु परिष्कृतभाषायां विषयं प्रस्तुवन्ति, अतः सरलतया विषयानुत्थाप्य तत्समाधानमस्य वैशिष्ट्यमिति निष्कर्षः ।

### ६.३.४ रूपसिद्धिप्रक्रियावबोधः

शारदाप्रभायाः समासखण्डे रूपसिद्धिप्रक्रियायाः सामान्यसङ्केतः प्राप्यते । सह सुपा (पा.सू.२-१-४) इत्यतः प्रारब्धेऽस्मिन् प्रकरणे व्याख्याकारोऽयं भूतपूर्वाधिसरित्प्रभृतिषु रूपेषु विस्तृततया लौकिकालौकिकविग्रहौ, समासं, प्रातिपदिकसंज्ञां, विभक्तिलोपादिकान् विस्तरशः सूचयति । तस्मिन् क्रमे मूल एव प्रायो लौकिकविग्रहमुल्लिख्य सामान्यतया तत्रत्यां प्रक्रियामुपदिशति । एतादृक् प्रक्रियासङ्केतोऽव्ययीभावसमासनिष्पन्नेषूपग्रामम्, अधिहरि, अधिसरित्, सुराष्टम्, आप्रतिष्ठानपुरम्, दुष्खलमेवमादिषु मौलिकोदाहरणेष्वन्यत्र च प्राप्यन्ते । तत्पुरूष ेऽपि ग्रामगतः, कलमलिखितः, हिमालसिद्धः, दुग्धप्ररूढम्, लोहितशिरस्त्रम्, भोज्योष्णमित्यादौ मूल एव विग्रहमुल्लिख्य तत्रत्यैः सम्बद्धैः सूत्रैः समासप्रक्रियां निर्दिशति । अव्ययीभाव एव ज्ञातसमासप्रक्रियच्छात्र आयासेनैव तत्पुरुष ेऽपि तामवबुध्यत इति विचार्य प्रक्रियाया दिङ्मात्रं सङ्केतयतीति ज्ञायते । द्वितीयाध्यायस्य द्वितीयपादे निर्धारिते बहुव्रीहावपि चत्वारो भुजा यस्य सः- चतुर्भुजः, उष्ट्रस्य मुखमिव मुखं यस्य स उष्ट्रमुख इत्यादौ विग्रहमुल्लिख्यानेकमन्यपदार्थे(पा.सू.२-२-२४) प्रभृतिभिः सूत्रैस्तत्रत्यां समासप्रक्रियामुल्लिखति। द्वन्द्वेऽलुगादावपि मूल एव सङ्क्षेपेण विग्रहं दर्शयति, अतोऽत्रत्या रूपसाधनप्रक्रिया सङ्क्षिप्ता

सङ्केतमूला च विद्यत इति ज्ञायते । शारदाप्रभाकारो रूपसाधनप्रक्रियामुल्लिखन् प्रथमतः समस्तपदविग्रहं कृत्वा ततः समासं समासान्ते टजादिकञ्चोल्लिख्य लोपागमविधाने स्वाद्युत्पत्तिनिदर्शने च श्यामपट्ट-(शारदाप्रभाकारः श्यामपाटीशब्दं प्रयुङ्क्ते) प्रयोगे सिद्धपदस्य वाक्यप्रयोगे च शिक्षकान्  प्रेरयति । एतादृक् प्रेरणामूलकनिर्देशः कुम्भकार इत्यस्य साधनेऽपि दृश्यते, तथा हि- "अथ कुम्भ ङस् कार इति श्यामपाटिकायां लिखित्वा कृत्तद्धित...(पा.सू.१-२-४६) इति सूत्रेण समुदायस्य प्रातिदिपकसंज्ञां कारयित्वा समुदायघटकस्य ङस्विभक्तेः प्रातिपदिकावयवत्वेन सुपो धातुप्रातिपदिकयोः (पा.सू.२-४-७१) इति छात्रैरेव सुपो लुकि साधिते कुम्भकारस्य सिद्धिः, ततः स्वादिकार्यमिति बोधयेत् ।"[५५२] अनेन प्रकारेण क्वचित् प्रत्यक्षतया क्वचिदप्रत्यक्षतयापि रूपसिद्धिं सङ्केतीकृत्य मध्ये मध्ये शिक्षकनिर्देशः प्रदत्तः । एतस्मात् पूर्ववर्तिनः समकालिका अन्ये व्याख्यातारश्शिक्षकान् छात्राांश्च निरपेक्ष्यैव रूपसाधनादिकं कुर्वन्ति परमसौ तु पुरतः छात्रान् क्वचित् शिक्षकानप्युपस्थापयतीति प्रकल्प्य कक्षाप्रवचनमिव विषयमुपस्थापयति । अस्मादेवात्रत्या भाषा शैली च कक्षाप्रवचन इव बहुत्र सरला, क्वचित् नेपालीहिन्दीभाषाभ्यां प्रभाविता कुत्रचित्तु निर्देशनमूला अपि दृश्यते । रूपसाधनक्रमे कतिपये स्थानेऽसौ काशिकापक्षं परित्यज्य कौमुदीपक्षमप्याश्रयति, तादृशमुदाहरणं प्राप्तापन्ने च द्वितीयया (पा.सू. २-२-४) इत्यत्र लभ्यते । अत्र काशिकाकारः प्रकृतसूत्रस्थे द्वितीययेति पदे योगविभागमकृत्वैव प्राप्तजीविकः, जीविकाप्रप्त इत्यादीनि रूपाणि समुल्लिखति चेत् सिद्धान्तकौमुदीकारो दीक्षितस्तु- 'अकारपूर्वस्य विधीयते प्राप्तापन्ने द्वितीयान्तत्वेन समस्यते आत्वं च भवति प्राप्तापन्नयोरिति'[५५३] भाष्यवचनं गृह्णन् सूत्रस्थं द्वितीययेति पदं छित्वा द्वितीयया+अ इति कारयत्यतो जीविकां प्राप्ता स्त्री प्राप्तजीविका, जीविकामापन्ना स्त्री आपन्नजीविकेति काशिकायामविद्यमानं रूपद्वयं साधयति । शारदाप्रभाकारोऽत्र दीक्षितमुद्धरन्- इह सूत्रे द्वितीयया + अ इति योगविभागं कृत्वा (छेदं कृत्वा) अकारोऽपि विधीयते, तेन जीविकां प्राप्ता स्त्री प्राप्तजीविका, आपन्नजीविकेति रूपद्वयं सिद्धयति ।[५५४] काशिकान्यासव्याख्याभ्यां प्रकृतप्रसङ्गेऽनुत्थापिते सत्यपि हरदत्तदीक्षिताभ्यान्तु समुत्थाप्य व्याख्यातः । शारदाप्रभाकारोऽत्र पदच्छेदपक्षमङ्गीकुरूते । एतेनासौ क्वचित् काशिकामुपेक्ष्य सिद्धान्तकौमुदीपक्षमप्यनुसरतीति स्पष्टं भवति । शारदाप्रभाकारः क्वचित् तु सिद्धान्तकौमुदीपक्षमुपेक्ष्य काशिकापक्षमाश्रयते । तादृशमुदाहरणं स्त्रियाः पुंवद्भाषितपुंस्का... (पा.सू.६-३-३४) इति सूत्रेऽपि दृश्यते । तत्र चित्रा जरती गौर्यस्येति त्रिपदे बहुव्रीहौ कस्य

---

[१]२१. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ.१०४ ।

[१]२२. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (समासतद्धितखण्डः) पूर्ववत्, (१९८७) पृ. ४२ ।

[१]२३. हरिप्रसादशर्माचार्यः, पूर्ववत्, पृ.१०१ ।

पुंवद्भावो विधेयः ? इत्याकाङ्क्षायामुत्तरपदव्यवधानात् प्रथमपदस्य पुंवद्भावो न भवति, तृतीयस्यापि समानाधिकरणोत्तरपदाभावान्न पुंवदत उपान्त्यस्य जरतीत्यस्य पुंवद्भावेनान्त्यस्य च गोस्त्रियोरूपसर्जनस्य (पा.सू.१-२-४८) इति ह्रस्वेन चित्राजरद्गुः[५५५] सिद्धयतीति दीक्षितमतुमद्धरन् तद्रूपं साधयति, अतोऽसौ सत्यावश्यके दीक्षितमतमप्युद्धरतीति ज्ञायते ।

शारदाप्रभाकारोऽयं तसिलादिष्वाकृत्वसुचः (पा.सू.६-३-३५) इति सूत्रे सपत्नी शब्दं त्रिधा विभज्य तस्य साधनप्रक्रियां भिन्नार्थत्वञ्च स्पष्टयति, तदित्थं-

१) सपत्नशब्दाच्छाङ्र्गरवादित्वाद् ङीन्येकः ।

२) समानपतिर्यस्या इति विग्रहे विवाहनिबन्धनपतिशब्दमाश्रित्य नित्यस्त्रीलिङ्गो द्वितीयः ।

३) स्वामिपर्यायेण पतिशब्देन भाषितपुंस्कस्तृतीयः ।

परमसावेकशेषे समासान्ते समासाश्रये च साधनीयेषु ब्राह्मणीतरा, महाबाहुः, हृल्लेखः, द्विपाद्यम्, सपक्षः, सदृक्, काक्षप्रभृतीनां पदानां रूपसाधनन्तु प्रक्रियोल्लेखनपुरस्सरं कुरूते । तथैव पृषोदरादीनि यथोपदिष्टम् (पा.सू. ६-३-१०९) सूत्रेण निपातनतः साधनीयानां कतीनां रूपाणां साधनिकामेवं दर्शयति -

१) बृसी-ब्रुवन्तो सीदन्त्यस्यामिति विग्रहे सदेरधिकरणे डट्, ब्रुवन् शब्दस्य बृ इत्यादेशश्च ।

२) मयूरः - मह्यां रौतीति विग्रहे रौतेरचि टिलोपः, महीशब्दस्य मयू आदेशश्च ।

३) दूढ्यः - दुष्टं दुःखेन वा ध्यायतीति विग्रहे आतश्चोपसर्गे क इति कप्रत्ययः ।

४) बलाहकः - वारिवाहक इत्यर्थे वारि इत्यस्य बादेशः तथोत्तरपदादेश्च लत्वम् ।

५) पृषोदरम् - पृषदुदरं यस्येति बहुव्रीहौ तकारलोपः ।

अनेन प्रकारेणासौ बहुत्र सङ्केतेन क्वचित्तु विस्तृततयापि प्रयोगानि साधयति । अतो यथाकथञ्चिदपि शब्दसाधुत्वसम्पादनरूपे पाणिनीयव्याकरणस्य लक्ष्ये प्रकृतं व्याख्यानं सहाय्यमिति निष्कर्षः ।

### ६.३.५ वार्त्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम्

शारदाप्रभायाः समासखण्डे ११७ वार्त्तिकानि, दशाधिकाः परिभाषाः, पञ्चाशदधिकाः फक्किकाः, पञ्चाधिकेष्टयश्च विद्यन्ते, एताः सर्वा रूपसाधने, सूत्रार्थापने,

---

१२४. पूर्ववत्,पृ. ५१२ ।

पदस्फोरणेऽधिकारानुवृत्त्योरूल्लेखने च समागतान् संशयान् दूरीकृत्य सहयोगं कुर्वन्ति । अत्र एतेषां परिचयः प्रयोगादिकञ्च क्रमशः प्रस्तूयते -

### ६.३.५.१ समासे वार्त्तिकप्रयोगः

पणिनीयाष्टाध्याय्या द्वितीयाध्याये, षष्ठाध्यायस्य तृतीयपादे च स्थिते समासप्रकरणे ११७ वार्त्तिकानि दृश्यन्ते । तानि चाव्ययीभावाधिकारे ६, तत्पुरूषे २६, बहुव्रीहौ ३, द्वन्द्वे २०, एकशेषसमासान्तादिषु ६२ वर्तन्ते । महाभाष्ये स्थितेभ्यश्चतुस्सहस्राधिकेभ्यो वार्त्तिकेभ्यः सिद्धान्तकौमुदीकारोऽष्टशताधिकानि सिद्धान्तकौमुद्यामानीय व्याख्यायति चेत् काशिकाकारस्तु सहस्राधिकवार्त्तिकानि समानीय स्वकीयं व्याख्यानं पूरयति । शारदाप्रभाकारो नवशताधिकानि वार्त्तिकानि काशिकातः समुद्धृत्य तत्रवत् सूत्रक्रमात्मिकया पद्धत्या व्याख्यायन् सूत्रार्थापन-रूपसाधनादिषु समुपस्थिताः शङ्काः दूरीकरोति, अतोऽत्रत्येषु कतिपयषु प्रकरणेषु सिद्धान्तकौमुदीतोऽप्यधिकानि वार्त्तिकानि गृहीतानि दृश्यन्ते । कौमुद्यामविद्यमानानि परमत्रत्ये समासप्रकरणे दृष्टानि वार्त्तिकानि समुद्धृतस्थलनिर्देपुरस्सरमत्र प्रस्तूयन्ते-

| *वार्त्तिकानि* | *शारदाप्रभायां स्थानसङ्केतः* |
|---|---|
| सुबन्तस्य पराङ्गवद्भावे समाना.. | सुबामन्त्रिते पराङ्गवत्स्वरे (पा.सू. २-१-१) |
| छन्दसि पूर्वाङ्गवच्चेति वक्तव्यम् | सुबामन्त्रिते पराङ्गवत्स्वरे (पा.सू. २-१-१) |
| कृत्यग्रहणे यण्ण्यतोर्ग्रहणम् कर्तव्यम् | कृत्यैरधिकार्थवचने (पा.सू. २-१-३३) |
| शतसहस्रौ परेणेति वक्तव्यम् | स्तोकान्तिक... (पा.सू.२-१-३९) |
| कृतापकृतादीनामुपसङ्ख्यानम् | क्तेन नञ्विशिष्टो (पा.सू. २-१-६०) |
| तत्स्थैश्च गुणैः षष्ठी समस्यत ... | याजकादिभिश्च (पा.सू.२-२-९) |
| प्रादिप्रसङ्गे कर्मप्रवचनीयानां... | कुगतिप्रादयः (पा.सू. २-२-१८) |
| बहुष्वनियमः | अजाद्यदन्तम् (पा.सू. २-२-३३) |
| क्वचिन्न | सप्तमी विशेषणे बहु... (पा.सू.२-२-३५) |
| भ्रूकंसादीनां तु भवत्येव | इको ह्रस्वोऽङ्यो... (पा.सू. ६-३-६१) |
| भ्रूकंसादीनामकारो भवतीति वक्तव्यम् | इको ह्रस्वोऽङ्यो...(पा.सू. ६-३-६१) |
| भक्षस्यच्छन्दसि | कारे सत्यागदस्य (पा.सू.६-३-७०) |
| वाचो वादे डत्वं च लभावः ... | पृषोदरादीनि यथो...(पा.सू. ६-३-१०९) |
| धासु वेति वाच्यम् | पृषोदरादीनि यथो... (पा.सू. ६-३-१०९) |
| स्वरो रोहतौ छन्दसि | पृषोदरादीनि यथो...(पा.सू. ६-३-१०९) |

| | |
|---|---|
| पापोपवासादीनां... | पृषोदरादीनि यथो...(पा.सू. ६-३-१०९) |
| सादकारयोः कृत्रिमे दीर्घो भवति | उपसर्गस्य (पा.सू. ६-३-१२२) |

शारदाप्रभायां काशिकातः समुद्धृतान्येतानि वार्त्तिकानि सिद्धान्तकौमुद्यां न प्राप्यन्ते, अत एतैः साधनीयानि वाड्वालिः, षोढा-षड्धा, प्रासादः, प्राकारः प्रभृतीनि रूपाणि कौमुदीकृन्मते न सिध्यन्ति । सिद्धान्तकौमुदीकारः पृषोदरादीनि यथोपदिष्टम् (पा.सू.६-३-१०९) इति सूत्रे पृषोदरम्, बलाहकः, दक्षिणतारमित्यादीनि रूपाण्येव साधयित्वाग्रे गच्छति परं काशिकाकारस्तु तत्र 'वाचो वादे डत्वं च लत्वाभावश्चोत्तरपदस्येञि प्रत्यये भवति' इति वार्त्तिकद्वारा दकारस्य डकारादेशेनाऽन्त्यस्य लकारेण तथा तद्धितकार्येण च वाड्वालिरिति रूपमपि साधयति । तेनैव प्रकारेण 'धासु वेति वाच्यम्' इति वार्त्तिकद्वारा षोढेत्यस्य विकल्पे षड्धेति रूपमपि साध्नोति । तद्वार्त्तिकाभावे तु तदसम्भवम् । तथैव 'सादकारयोः कृत्रिमे दीर्घो भवती'ति वार्त्तिकाभावे सादकारयोः परयोर्दीर्घविधानासम्भवेन प्रासाद-प्राकारयोः सिद्धिरसम्भवा, तस्मादेव शारदाप्रभाकारः काशिकावार्त्तिकमुद्धरन् पूर्वोक्तानि रूपाणि साधयतीति निश्चितम् । अतो व्याख्यातायं सिद्धान्तकौमुदीतोऽनिष्पन्नान् परं भाषावाङ्मयादिषु प्रचलितानथवा पाणिनेरूत्तरकाले जनितान् शब्दान् काशिकावार्त्तिकादीनां सहयोगेनापि साधयतीति ज्ञायते । प्राथमिकाणां छात्राणां कृते यद्यप्येतदनावश्यकं तथाप्यनुसन्धातॄणां कृते तु सुतरामावश्यकमित्यसङ्गृहीतानामप्रचलितानाञ्च ग्रहणेनोपदेशनमस्य वैशिष्ट्यं मन्तव्यम् ।

## ६.३.५.२ परिभाषाप्रयोगः

शारदाप्रभायाः समासखण्डे परम्परातः समागता दशाधिकाः परिभाषा लभ्यन्ते । व्याख्याकारोऽयमावश्यकतानुसारेण मूले व्याख्यानखण्डे च एताः प्रयुङ्क्ते । अत्र प्रयुक्तासु परिभाषासु- एकदेशविकृतमनन्यवत् (सह सुपा- पा.सू.२-१-४ सूत्रे) प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् (कुमारश्रमणादिभिः- पा.सू.२-१-७० सूत्रे) कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् (कर्तृकरणे....पा.सू.२-१-३२ इत्यत्र), यत्रोत्सर्गापवादौ महाविभाषया विकल्प्येते तत्रापवादेन मुक्ते पुनरूत्सर्गशास्त्रं न प्रवर्तते (पारे मध्ये षष्ठ्या वा- पा.सू.२-१-१८ इत्यत्र), सिद्धौ सत्यामारभ्यमाणो विधिर्नियमाय कल्पते (अमैवाव्ययेन- २-२-२० इत्यत्र) सदृशा मुख्याः सन्ति । शारदाप्रभाकारोऽयमेताः परिभाषाः क्वचित् पूर्णतः कुत्रचित्तु प्रतीकरूपेण समुल्लिखति, तथाप्येतासां व्याख्यानन्तु कुत्रापि न प्राप्यते । रूपसाधनक्रमे समागता एताः परिभाषा अनियमे नियमनं कुर्वन्तीत्यासां प्रयोगः सान्दर्भिकः प्रतीयते ।

### ६.३.५.३ शारदाप्रभायां फक्किकाप्रयोगः

शारदाप्रभायाः समासे फक्किकावाक्यानां प्रयोगोऽपि बहुत्र लभ्यते । काशिकातस्तद्-व्याख्यानतः सिद्धान्तकौमुदीतश्च तादृशानि वाक्यानि समानीय व्याख्याताऽयं रूपसाधने शङ्कादिषु च प्रयोजयति । समासे प्रयुक्तानि कार्यविधायकानि, निषेधकानि, नियामकानि च कानिचन तादृशवाक्यान्यत्र प्रस्तूयन्ते -

विभाषाधिकारे नित्यसासोऽयं विग्रहेण निन्दावगमात् (खट्वा क्षेपे-पा.सू.२-१-२६ इत्यत्र), शब्दप्रवृत्तिनिमित्तकुत्सायां समासोऽयम् (कुत्सितानि कुत्सनैः-पा.सू.२-१-५३), साधारणधर्मवाचिशब्दप्रयोगे तु न पुरुषो व्याघ्र इव शूरः (उपमितं व्याघ्रादिभिः ... पा.सू. २-१-५६), चकारः पुनरस्यैव समुच्चयार्थः, तेन गोव्याघ्रम्, काकोलूकम्, इत्यादौ विभाषा वृक्षमृग.....इति सूत्रं बाधित्वा नित्यमेवेदं प्रस्तूयते ( येषां च विरोधः ...पा.सू. २-४-९) इत्यादीनि सन्ति ।

एतासु विभाषाधिकारेऽपि नित्यसमासोऽयं...इति फक्किकावाक्यं परिभाषावद् नियमयति चेत् 'चकारः पुनरस्यैव समुच्चयार्थः' इति वाक्यं तु येषां च विरोधः शाश्वतिकः (पा.सू.२-४-९) इति शास्त्रेण विभाषा वृक्षमृग...(पा.सू.२-४-१२) सूत्रं बाध्यत इति ज्ञापयति, अत एतान्येतत्सदृशान्यन्यानि च फक्किकावाक्यानि परिभाषादिवत् विधिनिषेधनियमादि-वदुपकारीणि सन्तीति वक्तुं शक्यते । शारदाप्रभायामेतासां फक्किकानां प्रयोगः शब्दसाधुत्वसम्पादनधिया विहितत्वादेताः फक्किकाः शब्दशास्त्रीयसौन्दर्यप्रवर्द्धकत्वेन विराजन्त इति निष्कर्षः ।

### ६.३.५.४ इष्टिप्रयोगः

शारदाप्रभायाः समासखण्डे 'इष्यते' प्रदप्रयुक्तानि पञ्चाधिकानि वाक्यानि प्राप्यन्ते । शारदाप्रभाकार एतानि वार्त्तिक-परिभाषेष्टचादिभिर्वान्यैः कैश्चिदपि नामभिर्न सङ्केतयति, अत एतेषु कानि वार्त्तिकानि ? काः परिभाषाः ? काश्चेष्टय इति विवेक्तुं कठिनम्, तथापि लघुकौमुद्या भैमीव्याख्याता भीमसेनशास्त्रिवर्योऽत्रत्यानि 'इष्यते' पदयुतानि पञ्चाधिक-वार्त्तिकानीष्टिरिति व्यवहरति । न्यासपदमञ्जरीयुतायाः काशिकायाः सम्पादकौ द्वारिकादासशास्त्रि-कालिकाप्रसादशुक्लौ भीमसेनशास्त्रिणा इष्टिरिति व्यवहृतानि वाक्यानि वार्त्तिकपरिभाषेष्ट्यादिभिः कैरपि सङ्केतैर्न चिह्नितवन्तौ । तत्त्वबोधिनीव्याख्यायुतायाः सम्पूर्णभागसहितायाश्च सिद्धान्तकौमुद्याः सम्पादकप्रकाशकौ खेमराजश्रीकृष्णदासौ त्वत्रत्यानि 'इष्यते' पदप्रयुक्तानि बहूनि वाक्यानि वार्त्तिकरूपेण कानिचन तु इष्टिसङ्केतकेन (इ.)

सङ्क्षिप्तशब्देन सङ्केतितवन्तौ, अत एतेषां पृथक्कारो भिन्नानुसन्धानविषयस्तथापि सामान्यतो व्याख्यातृभिरिष्टिरिति व्यवहृताः समासप्रकरणान्तर्गता इष्टयोऽत्र प्रस्तूयन्ते-

| *इष्टयः* | *प्रयोगस्थानम्* |
|---|---|
| समाहारे चायमिष्यते | नदीभिश्च (पा.सू.२-१-२०) |
| तदर्थेन प्रकृतिविकारभावे समासोऽयमिष्यते | चतुर्थीतदर्थार्थ...(पा.सू.२-१-३६) |
| तुरीयशब्दस्यापीष्यते | द्वितीयतृतीयचतुर्थ...(पा.सू.२-२-३) |
| पुण्यसुदिनाभ्यामहः क्लीबतेष्यते | अव्ययीभावश्च (पा.सू.२-४-१८) |
| क्रियाविशेषणानाञ्च क्लीबतेष्यते | अव्ययीभावश्च (पा.सू. २-४-१८) |
| वाऽऽबन्तः स्त्रियामिष्टः | स नपुंसकम् (पा.सू. २-४-१७) |
| अकारान्तोत्तरपदो द्विगुस्त्रियामिष्टः | स नपुंसकम् (पा.सू. २-४-१७) |

एतासु इष्टिषु मध्ये राजपर्यायस्यैवेष्यत इति सिद्धान्तकौमुद्यां न वर्तते, तथापि शारदाप्रभायां तथा भौमीव्याख्यायाञ्च प्राप्यते । काशिकाकारेण ग्रन्थमूले तथा तत्सम्पादकेन च व्याख्यानखण्डेऽप्युपर्युक्तानि वाक्यानीष्टिरिति सङ्केतिता न सन्ति । काशिकारम्भे स्थिते 'इष्ट्युपसङ्ख्यानवती...' इति पद्य इष्टयोऽत्र व्याख्यायन्त इति सङ्केतितत्वाद् लक्षणैः सहासां सारूप्याच्चैता इष्टय एवेत्यनुमीयते । यत् किमपि स्यात्, शारदाप्रभायां प्रयुक्ता एता इष्टयः रूपसाधनक्रमे समागतां जटिलतामपाकुर्वन्तीति तासामावश्यकत्वं सर्वत्र दरीदृश्यते ।

### ६.३.६ अन्याचार्यमतसङ्ग्रहः

शारदाप्रभायाः समासखण्डे बहुत्र पूर्वाचार्याणां मतानि सङ्गृहीतानि सन्ति । विशेषतः काशिका-कौमुदीकारावत्र समुद्धृतौ दृश्येते । ताभ्यामन्ये पदमञ्जरीकारो हरदत्तो न्यासकारो जिनेन्द्रबुद्धिर्बालमनोरमाकारो वासुदेवदीक्षितस्तत्त्वबोधिनीकारो ज्ञानेन्द्रसरस्वती, अष्टाध्यायीसम्पादको गोपालदत्तशास्त्री केचनान्येऽपि समुद्धृता विद्यन्ते । शारदाप्रभाकारोऽयं प्रायः प्रतिपृष्ठं काशिकाकौमुद्यौ समुद्धरति, अतो व्याख्यानमिदं काशिकाकौमुद्योः समन्वयतो सञ्जातं प्रतीयते । शारदाप्रभाकारेण पूर्वोक्तयोर्ग्रन्थयोः समुद्धरणं कथं गृहीतम् ? तेषां महत्त्वञ्च किमिति ज्ञानायात्रोद्धरणचर्चा विधीयते ।

#### ६.३.६.१ काशिकायाः समुद्धरणानि

शारदाप्रभायाः समासे प्रयुक्तानि कतिपयवार्त्तिकानि परिभाषेष्टयः काशिकातः समानीता दृश्यन्ते । सिद्धान्तकौमुदीकारो दीक्षितो महाभाष्ये स्थितानि वार्त्तिकानि सङ्क्षिप्य प्रयुङ्क्ते चेत् काशिकाकारस्तु तानि यथावदुद्धरति, तदेव वार्त्तिकं ग्रन्थद्वये पदान्तरेण प्रयुक्तं दृश्यते, तादृशेभ्यो वार्त्तिकेभ्यो निदर्शनाय कानिचनात्र प्रस्तूयन्ते-

१) प्रहरणार्थेभ्यश्च परे निष्ठासप्तम्यौ भवत इति वक्तव्यम् (काशिकायाम् )
प्रहरणार्थेभ्यश्च परे निष्ठासप्तम्यौ (सिद्धान्तकौमुद्याम्)

२) बहुष्वनियमः (काशिकायां वार्त्तिकम्)
बहुष्वनियमः (सिद्धान्तकौमुद्यान्तु सामान्यफक्किकावाक्यमेव)

३) द्वन्द्वे घ्यन्तादजाद्यदन्तं विप्रतिषेधेन (काशिकायाम् )
घ्यन्तादजाद्यदन्तं विप्रतिषेधेन (सिद्धान्तकौमुद्याम्)

४) वा प्रियस्य पूर्वनिपातः (काशिकायाम् )
वा प्रियस्य (सिद्धान्तकौमुद्याम्)

अत्रत्यानि काशिकावार्त्तिकानि शारदाप्रभाकारः स्वग्रन्थे यथावदुद्धरते । यद्यपि शारदाप्रभायामवस्थितानि कानिचन वार्त्तिकानि कौमुदीवार्त्तिकवत् सङ्क्षिप्तानि सन्ति तथापि कौमुदीकारस्तु कतिचिद् वार्त्तिकानि सूत्रपरिवर्तनेनापि प्रयुङ्क्ते चेत् शारदाप्रभाकारस्तु काशिकासरणिं यथावदनुकुरूते । एतेन शारदाप्रभायाः काशिकानुवर्तित्वं प्रमाणितं भवति । तथैव सूत्रक्रमेण व्याख्याने, अनुवृत्तिग्रहणे, कौमुदीतोऽधिकवार्त्तिकसमुद्धरणव्याख्यानयोः कौमुदीतोऽधिकोदाहरणप्रत्युदाहरणसंस्थापनयोश्चासौ काशिकामनुवर्तयति । सन्देहे समुत्पन्नेऽसौ बहुत्र 'अत्र काशिका' इत्यतो व्याख्यानमारभ्य संशयं निवारयति तन्माध्यमेन काशिकामतं पुष्णाति च । तादृशवाक्यान्यत्रान्यप्रकरणेष्विव समासखण्डेऽपि यत्र तत्र समुपलभ्यन्ते । विशेषतः सामि (पा.सू.२-१-२७) इत्यत्रार्द्धशब्दपर्यायस्य सामीत्यस्य व्याख्याने, अपेतापोढमुक्त...(पा.सू.२-१-३८) इत्यत्राल्पशब्दस्यार्थापने, तत्र तेनेदमिति सरूपे (पा.सू.२-२-२८) इत्यत्रानुवृत्तस्य कर्मव्यतिहारपदस्य व्याख्याने, देवताद्वन्द्वे च (पा.सू.६-३-२६) इति सूत्रे पूर्वसूत्रतो द्वन्द्वपदानयनेनैव सिद्धे पुनर्द्वन्द्वग्रहणप्रयोजनोपपादाने तथान्यत्रापि च प्राप्यन्ते । एतेन शारदाप्रभाया मुख्योपजीव्या काशिकेति सुस्पष्टं भवति ।

### ६.३.६.२ सिद्धान्तकौमुद्याः समुद्धरणम्

शारदाप्रभायां सिद्धान्तकौमुदीतो बहूनि फक्किकावाक्यानि, उदाहरणानि, वार्त्तिकपरिभाषादीनि च गृहीतानि विद्यन्ते । शारदाप्रभाकारेण प्राथमिकं द्वितीयकञ्चेति विभाजिते प्रस्तुतव्याख्यानेऽत्रत्यं प्राथमिकं समग्रस्वरूपं कौमुदीतुल्यं वर्तते । अत्रत्यः प्राथमिकविन्यासस्तेषां सूत्रवृत्तिक्रमश्चाव्ययीभावतत्पुरूष बहुव्रीहिद्वन्द्वात्मकोऽस्ति । तथैवो-दाहरणप्रत्युदाहरणादीनि, सूत्रवृत्तयश्च प्रायेण कौमुदीतुल्याः सन्ति । व्याख्यातायं काशिकाकौमुद्योर्विवादे मतान्तरसमुपस्थापनार्थं विषयविश्लेषणार्थञ्च कौमुदीमतमुल्लिखति । तत्र 'अत्र दीक्षितः' इत्युल्लिख्य तन्मतं समुद्धरते । एतादृशानि कौमुदीकृन्मतानि समासखण्डे यत्र तत्र प्राप्यन्ते । तेभ्यः कानिचनोदाहरणायात्र प्रस्तूयन्ते- प्राप्तापन्ने च द्वितीयया (पा.सू.२-२-४) इत्यत्र द्वितीयया अ इति पदच्छेदविषये, विभाषावृक्षमृग...(पा.सू.२-४-१२) इति सूत्रे अश्ववडवग्रहणं नपुंसकार्थमिति समुल्लेखने, स्त्रियाः पुंवद्...(पा.सू. ६-३-३४) इत्यत्रोदाहृते त्रिपदे बहुव्रीहावुपान्त्यस्यैव पुंवद्भावो भवतीति निश्चयीकरणे, 'भस्याढे तद्धिते' इति वार्त्तिकस्थे रौहिणेय इत्युदाहरणे पुंवद्भाववारणे, का पथ्यक्षयोः...(पा.सू.६-३-१०४) इति सूत्रे समासभेदेन (तत्पुरूषे सति अक्षः,बहुव्रीहावक्षिः) अक्षाक्षिशब्दावपि गृह्येत इति समुल्लेखने तथाऽन्यत्रापि बहुषु स्थानेषु कौमुदीकृन्मतानि प्राप्यन्ते । मूलतः शङ्कासमाधाने, स्वमतपोषणे चासौ दीक्षितमतमुद्धरति । एतेन शारदाप्रभाव्याख्याया द्वितीयोपजीव्यग्रन्थः सिद्धान्तकौमुदीति निश्चीयते ।

काशिकाकौमुदीभ्यामन्येष्वाधारग्रन्थेषु पदमञ्जरी-न्यास-बालमनोरमा-तत्त्वबोधिन्य मुख्याः सन्ति । व्याख्याकारोऽयं युवाखलतिपलित...(पा.सू.२-१-६७) इति सूत्रे- 'वृत्यन्तरे हि जरद्भिरिति पठ्यत इति न्यासकारः' इति वाक्यद्वारा न्यासकारं जिनेन्द्रबुद्धिं स्मरति चेत् अशाला च (पा.सू.२-४-२४) इति सूत्रे पदमञ्जरीकारं हरदत्तं स्मरति । अनेनैव प्रकारेणान्यत्रापि बहुत्रैतयोर्व्याख्यात्रोः स्मरणं तत्रत्यवाक्यानि समुद्धृत्य करोति । तथैव सिद्धान्तकौमुदीव्याख्यातारौ वासुदेवदीक्षितज्ञानेन्द्रसरस्वत्यौ तदुद्धरणपूर्वकमेव बहुत्र स्मर्येते । तत्त्वबोधिनीकारतः प्रकृतव्याख्यात्राऽनुवादे चरणानाम् (पा.सू.२-४-३) इति सूत्रे गृहीतविचारः स्मरणीयो वर्तते ।

शारदाप्रभाकारोऽन्यप्रकरणेष्विवात्राप्यष्टाध्यायीसम्पादकस्य गोपालदत्तशास्त्रिणः सूत्र व्याख्यानशैलीं तथाधिकारानुवृत्त्योरुल्लेखनपद्धतीश्चाक्षरशो गृह्णाति । अनेनानुवर्तनीये पदे सूत्रे

वा स्थूलाक्षरेण, अनुनासिकचिह्नेन, स्वरितचिह्नेन च प्रदर्शिता परिचयप्रदानशैली प्रकृताष्टाध्यायीव्याख्यानाद् गृहीता दृश्यते । एतेनास्या व्याख्याया आधारः शास्त्रिणो व्याख्यानमपि वर्तत इति सुस्पष्टं भवति, तेषां समेषां समुद्धरणं शारदाप्रभाकारः पारम्परिकविधिना कुरूते, अतोऽत्र बहूनामाचार्याणां मतानि ससङ्केतं समुद्धृतानि सन्तीति निश्चीयते ।

### ६.३.७ प्रकरणसङ्घटनं शैलीशिल्पञ्च

शरदाप्रभाया भाषाशैली बहुत्र शिक्षकनिर्देशनमूला दृश्यते । व्याख्याकारोऽयं प्रतिसूत्रं रूपसाधनाय, सूत्रार्थापनाय, कठिनपदस्फोरणाय, शङ्कासमाधानाय चानेन प्रकारेण शिक्षणीयमिति प्रत्यक्षतः शिक्षकान् निर्दिशति । एतस्मात् पूर्ववर्तिनो व्याख्यातारः प्रायेण विषयकेन्द्रिताः सन्तः विषयान् प्रस्तुवन्ति स्म परमयं तु क्वचिद् मित्रसम्मत्या भाषया, क्वचित्तु प्रभुसम्मित्या भाषयाऽपि विषयानुपस्थापयति । शारदाप्रभाकारस्य महफ्वपूर्णं भाषिकवैशिष्टचन्तु विषयसाधारणीकरणमेव वर्तते । कठिनं शुष्कञ्च व्याकरणशास्त्रं सरलरीत्याऽभ्यासप्रधानशैल्या चासौ व्याकुरूते । छात्रस्तरानुकूलं विषयसङ्क्षेपीकरणमप्यास्या व्याख्याया अपरं वैशिष्टचं मन्यते । एतदुद्देश्येनैवासौ प्राथमिके समासविभाजने ३८ सूत्राणि तदन्तर्गतानि वार्त्तिकानि चोल्लिखति । तत्क्रमेऽसौ सामान्या प्राथमिकी च प्रक्रियैवोपदिशति, अत एव सह सुपा (पा.सू.२-१-४) सूत्रे समर्थं समर्थेन सुबन्तेन समस्यत इति वृत्तिगम्यमर्थं त्यक्त्वा सुबन्तं सुबन्तेन सह समस्यत इति सरलार्थं प्रस्तौति । तस्य कारणं समुल्लिखन् स तत्राह- "अत्र समर्थं समर्थेन समस्यत इत्यर्थं न प्रस्तुवीयात्, साम्प्रतं समर्थसूत्रस्यानुपदेशात् तत्सूत्रोपदेशे च साम्प्रतमुदाहरणप्रत्युदाहरणबोधनं दुष्करमतः समासशिक्षणावसाने समर्थः पदविधिः (पा.सू.२-१-१) इति सूत्रमुपदिशेत् ।"[५५६] एतेनायं प्राथमिकविभाजने स्वल्पान्येव सूत्राणि सामान्यामेव प्रक्रियां प्रस्तोतुं प्रयतत इति ज्ञायते । भाषाविदः प्राथमिकानां छात्राणां पठनपाठनं मातृभाषायामेव फलदायकं भवतीत्युपदिशन्ति । तदेव विचार्यात्र शारदाप्रभाकारः प्रवृत्तो विद्यते, यद्यप्यत्र तत्सौविध्यं नास्ति तथापि मातृभाषामिश्रिते संस्कृते तेभ्यः पाठनाय सुकरं भवेदिति विचार्यासौ दैशिकभाषामिश्रिते संस्कृते व्याकरणशिक्षणं कामयत इत्यवबुध्यते । अतः समासेऽपि बहुत्र नेपालीहिन्दीतिभाषासम्मिश्रितो वाग्व्यवहारः समुपलभ्यते । अत्र व्याख्यात्रा प्रयुक्तेषु कतिषु मौलिकशब्देषु- 'कलमलिखितः, प्रतिष्ठानपुरम्, हिमालसिद्धः,

[१२५]. हरिप्रसादशर्माचार्यः (व्या.), *अष्टाध्यायी*, पूर्ववत्, (२०६०) पृ.८७ ।

पापनापितः, गोमुख्यनामपर्वतः, खोजनम्, रामशाहोपक्रमं स्तुत्यस्थितिस्थापनम्, महेन्द्रसभा, नेपालसेना, सारितम्' इत्यादयो मुख्याः सन्ति । एते प्रकृतव्याख्याया मौलिकत्वं प्रवर्द्धयन्ति । एतेषु हिमालस्य संस्कृतत्वे सन्देहः समुत्पद्यते, तथाप्येतादृशपदप्रयोगेण व्याख्याकारो देशजशब्दान् प्रयुञ्जानः सरलया सङ्क्षिप्तया भाषया शैल्या च विषयानभिव्यनक्तीति ज्ञायते । शारदाप्रभायाः समासखण्डस्य द्वितीयकं व्याख्यानमष्टाध्यायीक्रमिकं विद्यते । तत्र स अष्टाध्याय्याः सकलसूत्राणि व्याख्याति । तत्रत्या भाषा, पाठ्यविषयाश्च प्राथमिकविभाजनापेक्षया स्तरीया शास्त्रीयाश्च विद्यन्ते । व्याख्याकारः स्वयमपि विषयोऽयं द्वितीयाध्ययने पाठनीय इति बहुत्र सङ्केतयति । एतेनापि प्रथमस्य विषयपरिचयात्मकत्वं द्वितीयस्य शास्त्रीयत्वञ्च प्रमाणितं भवति ।

शारदाप्रभायां विषयव्याख्यानशैल्यपि द्विविधा विद्यते । अत्रत्या प्राथमिकी शैली लघुकौमुदीतुल्या वर्तते चेद् द्वितीया तु काशिकातुल्या दृश्यते । कौमुदीकारो यथाऽव्ययीभावादिना समासान्तेन समासखण्डं पूरयति । तेनैव क्रमेणाव्ययीभावतः प्रारभ्य द्वन्द्वसमासान्ते प्राथमिकं व्याख्यानखण्डं पूरयति । यद्यप्यत्र लघुकौमुदीतुल्यानि सकलप्रकरणानि सूत्रसङ्ख्याश्च न प्राप्यन्ते तथापि यानि सूत्राणि व्याख्यातानि तानि सर्वाणि कौमुदीक्रमेणैवोपस्थापितानि विद्यन्त इत्यवधेयमम् ।

द्वितीयकशारदाप्रभाया व्याख्यानशैली प्रथमतः काचित् स्तरीया विद्यते । तत्रासौ समर्थः पदविधिरिति सूत्रं व्याचक्षाणः समर्थपदसिद्धिं तस्य लाक्षणिकार्थवत्वम्, तत्रत्ये विधिशब्दे कर्मसाधनत्वम्, सामर्थ्यस्य द्विविधत्वञ्च सूचयति । एते विषयाः प्राथमिकाननावश्यकं मत्वा छात्राणां कृते न प्रस्तुता वर्तन्ते । अत एवात्रत्या व्याख्यानशैली प्राथमिकापेक्षया स्तरीया वर्तत इति वक्तुं शक्यते ।

शारदाप्रभायां काशिकाकौमुदीभ्यामेव व्याख्यानशैली गृहीता वर्तते । अत्र तेभ्यो विषयवस्तुनो ग्रहणात् ततः शैलीशिल्पग्रहणमपि स्वाभाविकमेव । तथैव काशिकाकौमुद्योष्टीकाभ्यामपि विषयग्रहणेन विषयव्याख्याने ततोऽपि शैलीशिल्पादीनि गृहीतानि दृश्यन्ते, तथापि तेभ्यो विषयं गृहीत्वापि यथाशक्यं सरलीकरणं जनसाधारणीकरणञ्चास्य भाषाशैलीगतं वैशिष्ट्यं प्रतीयते ।

अतो निष्कर्षे शारदाप्रभायाः समग्रस्वरूपं सूत्रप्रक्रियाक्रममिश्रितं वर्तते चेद् भाषा तु सरला,सुबोध्या दैशिक-स्थानीयशब्दसम्मिश्रिता च दृश्यते । तथैवात्रत्या विषयप्रस्तुतिशैली व्याख्यानपरा, वर्णनात्मिका क्वचित् परामर्शमूला, निर्देशात्मिका च वर्तत इत्यवधेयम् ।

## ६.४ अध्यायनिष्कर्षः

शारदाप्रभाकारस्तिङन्तकृदन्तकारकप्रकरणानि व्याख्याय प्रथमतस्तद्धिते तदनन्तरमेव समासे प्रविशति । तद्धितापेक्षया समासस्य जाटिल्यात् स सर्वान्ते पाठ्य इति व्याख्यातुस्तर्कः स स्वाभाविकश्च । व्याख्यातासौ तद्धितसमासावपि प्राथमिकद्वितीयकाविति कृत्वा द्विधा विभज्य प्राथमिके ५४ सूत्रैस्तत्सहायकैर्वार्तिकादिभिश्चाभीष्टानि रूपाणि साधयति चेद् द्वितीयके तु १०२२ सूत्रैः तत्प्रसङ्गतः समागतैर्वार्तिकादिभिश्च प्रक्रियां निरूपयति । व्याख्यातायं प्राथमिकं समासमव्ययीभाव-तत्पुरूष -बहुव्रीहि-द्वन्द्वेषु तदन्तर्गतेषु ३८ सूत्रेषु सङ्कोचयति चेद् द्वितीयकन्त्वष्टाध्याय्या द्वितीयाध्यायान्तर्गतेषु प्रथम-द्वितीय-चतुर्थपादेषु तथा षष्ठाध्यायान्तर्गतेषु तृतीयपादेषु निर्धारितैः सूत्रैस्तदन्तर्गताभिः प्रक्रियाभिश्च विशदीकुरूते ।

शारदाप्रभाकारोऽयं तद्धितप्रकरणे - तद्धिताः, समर्थानां प्रथमाद् वा, शेषे, प्राग्घिताद्यत्, प्राक्क्रीताच्छः, प्राग्वतेष्ठञ् चेति पञ्च, समासे प्राक्कडारात् समासः, विभाषा, शेषो बहुव्रीहिरिति त्रीण्यधिकारसूत्राणि विन्यसति । एतेषु शेषे, प्राग्घिताद्यत्, प्राक्क्रीताच्छः, प्राग्वतेष्ठञ् इति सूत्राण्यधिकारत्वेन प्रत्ययविधायकत्वेन च पठितानि सन्ति ।

तद्धित उत्तरसूत्रादपकर्षितपदयुतानि द्विगोर्लुगनपत्ये, कालप्रयोजनाद्रोगे, किमोऽत् चेति त्रीण्यधिकारसूत्राणि प्राप्यन्ते । तेषु द्विगोर्लुगनपत्ये (पा.सू.४-१-८८) इत्यत्रोत्तराद् गोत्रेऽलुगचि (पा.सू.४-१-८९) इत्यस्मादच्पदं कालप्रयोजाद्रोगे (पा.सू.५-२-८१) इति सूत्र उत्तरवर्तिन स्तदस्मिनन्नं प्रायेण संज्ञायाम् (पा.सू.५-२-८२) इत्यस्मात् संज्ञायां तथा किमोऽत् (पा.सू.५-३-१२) इत्यत्रोत्तरत्र स्थिताद् वा ह च च्छन्दसि (पा.सू.५-३-१३) इति सूत्राद् वा पदमपकृष्यते। एतेषां सर्वेषां सूचनं शारदाप्रभाकारोऽसौ पूर्वव्याख्यातॄनुद्धरन् कुरूते ।

शारदाप्रभाकारोऽयं प्रायः काशिकाकौमुदीभ्यामुदाहरणप्रत्युदाहरणानि गृह्णाति । तेषु कानिचन नैपालकपरिवेशजनजीवनाद्यवबोधकानि सन्ति । एतानि प्रकृतव्याख्यानस्य मौलिकत्वप्रवर्द्धने सहायकानि दृश्यन्ते ।

शारदाप्रभायास्तद्धितेऽव्ययानां भमात्रे टिलोप इत्यनेनैव सिद्धे बहिषष्टिलोपो वक्तव्य इत्यस्य किं प्रयोजनम् ? इदमर्थेऽपत्यार्थस्यापि समावेशेनैव सिद्धे तस्यापत्यमित्यस्य किं प्रयोजनम् ? इत्यादयस्तद्धितीयास्तथा समर्थः पदविधिरिति सूत्रे समर्थपदस्य कोऽर्थः ? पारे मध्ये षष्ठ्या वा इत्यत्र पुनर्विभाषाग्रहणविषयिणी, अन्यपदार्थे च संज्ञायामित्यत्र विभाषाधिकारात् कथं नित्यसमास इति समाधानपरा तथैवान्या अपि शताधिकाः शङ्काः तासां समाधानञ्च प्राप्यते । शारदाप्रभाकारः प्रायशो मूल एव पदविग्रहं कृत्वा तद्धिते रूपसाधनसङ्केतं कुरूते चेत् समासे तु सामान्यतः समासप्रक्रियां दर्शयति, सपत्नीप्रभृतिषु कतिषु शब्देष्वनेकैर्विग्रहैरप्यर्थं निर्धारयति ।

कौमुदीकारेणासाधितानि कतिचिद्रूपाण्यत्र काशिकावार्त्तिकैस्तथा पृषोदरादिप्रक्रियया च साधितानि सन्ति तदस्य महद्वैशिष्टचम् ।

शारदाप्रभायास्तद्धितसमासयोस्त्रिंशदधिकसङ्ख्यकानि कौमुद्यामविद्यमानानि काशिका-वार्त्तिकानि प्राप्यन्ते । तथैव तद्धिते नव तथा समासे द्वे कृत्वैकादशेष्टयोऽत्र समुपलभ्यन्ते । यद्यपि प्रकृतव्याख्याकारो वार्त्तिकेष्टिपरिभाषाफक्किकादीनि न विभजति तथाप्यन्यत्र विभागाच्च तानि भिन्नानीति ज्ञायते ।

शारदाप्रभायास्तद्धितान्तर्गतं प्राथमिकं स्वरूपं लघुकौमुदीतोऽपि स्वल्पमतोऽत्र ५४ सूत्रेषु प्रासङ्गिकेषु वार्त्तिकेषु च परिसीमितीकृतम् । समासस्तु तस्मादपि न्यूनतरः । अत्र निर्धारितेष्वव्ययीभाव-तत्पुरूष -बहुव्रीहि-द्वन्द्वेषु १८ सूत्राण्येव सन्ति । अतः शारदाप्रभायां तद्धितसमासयोर्निर्धारिता विषयाः प्राथमिकेभ्यश्छात्रेभ्य उपकारका सन्तीति समीक्षणनिष्कर्षः ।

सप्तमोऽध्यायः

# शोधप्रबन्धोपसंहारनिष्कर्षोपलब्धयः

## ७.१ विषयपरिचयः

प्रस्तुतशोधप्रबन्धः सप्ताध्यायात्मको वर्तते । तेषु प्रथमोऽध्यायः शोधपरिचयात्मकोऽस्ति चेद् द्वितीयस्तु व्याख्यातुर्हरिप्रसादस्य व्यक्तित्वकृतित्वयोः समुल्लेखने केन्द्रितोऽस्ति । तथैव सिद्धान्ताध्यायत्वेन स्थितस्तृतीयोऽध्यायो व्याख्यानसिद्धान्तपर्यालोचने तस्मात् शब्दशास्त्रीय-व्याख्यानतत्त्वनिर्धारणे च समर्पितो विद्यते । तदुत्तरवर्त्तिनश्चतुर्थ-पञ्चम-षष्ठाध्यायास्तु शारदाप्रभाव्याख्यान्तर्गतानां संज्ञासन्धिसुबन्ततिङन्तकारकसमासतद्धितप्रकरणस्थानां विषयाणां समुद्भावनसमीक्षणतोलनादिषु समर्पिताः सन्ति ।

अतः परं प्रकृतशोधप्रबन्धस्थानां द्वितीय-तृतीय-चतुर्थ-पञ्चम-षष्ठाध्यायस्थविषयाणां सारभूतोपसंहारः क्रमशः प्रस्तूयते ।

## ७.२ उपसंहारः

प्रस्तुतशोधप्रबन्धस्य प्रथमेऽध्याये शोधपरिचयः प्रस्तुतोऽस्ति, तथैव *द्वितीयाध्याये* शारदाप्रभाव्याख्यातुर्हरिप्रसाशर्माचार्यस्य देशकाल- कृत्यादयस्तद्रचितस्य शारदाप्रभा-व्याख्यानस्य सामान्यपरिचयश्चोल्लिखिताः सन्ति । नेपालदेशीयः प्रथितवैयाकरणो हरिप्रसादशर्माचार्यः पाणिनीयव्याकरणे स्थितयोः सूत्रप्रक्रियाक्रमयोः सङ्गमयिता मन्यते । असौ पाणिनीयाष्टाध्याय्या रूपसाधनप्रक्रियां सरलीकर्तुं प्रथमतः प्रक्रियाक्रमेण ५३६ सूत्राणि ततश्च सूत्रक्रमेण सकलामष्टाध्यायीं व्याख्याय 'शारदाप्रभा व्याख्यामहिताष्टाध्यायी' नाम ग्रन्थरत्नं २०६० तमे वैक्रमाब्दे निर्मितवान् । व्याख्याताऽयं ग्रन्थेऽस्मिन् सूत्रक्रमं प्रक्रियाक्रमञ्च सङ्गमय्य व्याकरणाध्ययनपरम्परायां नवक्षितिजमुद्घाटितवान् तथैवाधुनिक-शैक्षणिकोपकरणप्रयोगनिर्देशपाठाभ्यासादिभिश्च शैलीशिल्पेष्वाधुनिकत्वमपि प्रदत्तवान् ।

१९८९ तमे वैक्रमाब्दे प्युठानमण्डलान्तर्गते खैरानामके ग्रामे हीराकुमारीदेव्या गर्भतो जातो हरिप्रसादशर्माचार्यो वाराणसेय-संस्कृतविश्वविद्यालयतो नव्यव्याकरणविषयमवलम्ब्य २०१५ तमे वैक्रम आचार्यपरीक्षां समुत्तीर्णवान्, तथैव २०४२ तमे

'पाणिनीयव्याकरणशिक्षणपद्धतिविमर्शः' इति शीर्षके विध्यावारिध्युपाधिमधिगतवान् । आचार्यकक्षां समुत्तीर्य तेन त्रिभुवविश्वविद्यालयान्तर्गते संस्कृतसङ्काये व्याकरणमध्यापितम् । अध्यापनकाले व्याकरणं जनसाधारणीकरणेन पाठयितुं प्रयतमानः 'अष्टाध्यायीशारदा-प्रभाव्याख्यां' रचितवान् ।

षड्मासावधि सूत्रोदाहरणादिसंयुतं प्रक्रियाक्रमिकं ५३६ सूत्रात्मकं व्याकरणमधीत्य तदनन्तरमेव पाणिनिमुनिना सूत्रप्रणीतक्रमेण व्याकरणं पाठनीयमिति विधिर्निर्धारितः, तत्सूत्रोदाहरणादीनि निर्दिष्टानि च ।

वैयाकरणेन हरिप्रसादेन योगिनरहरिनाथप्रेरणया संस्कृते नैका विकीर्णाः कविताः, खण्डकाव्यद्वयं तथा महाकाव्यमेकं विरचितम् । कविशिरोमणेर्लेखनाथपौडेलनयराजपन्तयो-र्बुद्धिविनोदखण्डकाव्यमनेन तत्समच्छन्दस्येव संस्कृतेऽनूदितः । तथैव- श्री ५ महेन्द्रविरहवेदना (२०२८), तथा श्री ५ वीरेन्द्रशुभराज्याभिषेककाव्यम् (२०३१) इति नामके द्वे खण्डकाव्ये रचिते। तेनैव प्रकारेण गोरक्षशाहवंशमहाकाव्यम् (२०२२) इत्याख्यमेकं महाकाव्यमपि विरचितम् । संस्कृतकाव्यरचनेन सह जनताविद्यापीठदाङतः २०४१/०४२ वैक्रमाब्दे प्रकाशितायां हिमज्योतिपत्रिकायां निर्वचनज्योतिरिति शीर्षकतो विंशत्यधिका भाषिकलेखाः, कविताः चानेन विरचय्य प्रकाशिताः सन्ति । एतैः सुलेखैः, काव्यरचनाभिः, शोधानुसन्धानैः,प्राध्यापनैः सामाजिकधार्मिकयोगदानैश्चानेन नैपालकैर्भारतीयैश्चानेकैः शैक्षिकनिकायैः परिषद्भिश्च महाकवि-विद्यासागरप्रभृतीनि नैकानि सम्मानाभिनन्दनानि प्राप्तानि, अतोऽयं संस्कृतस्य मूर्धन्यविद्वानासीदिति वक्तुं शक्यते । दैववशादसौ २०७२ तमे वैक्रमे फाल्गुनमासस्य प्रथमदिवसे सरस्वतीपूजनपर्वणि दिवङ्गतः ।

व्याख्यात्रा हरिप्रसादेन शारदाप्रभाव्याख्यानमिदं द्विधा विभक्तमस्ति- प्राथमिकं द्वितीयकञ्चेति । प्रकृतव्याख्यानस्य प्रारम्भिको भागः प्रक्रियाक्रमेण ५३६ सूत्रेषु ६ वार्तिकेषु, प्रासङ्गिकपारिभाषादिषु पूरितो वर्तते । अत्र विशेषतः संस्कृतवाङ्मये प्रचलितानां रूपाणां पाणिनीयव्याकरणपद्धत्या साधनरीति प्रदर्शिताऽस्ति । अत्र कौमुदीकारेणासाधितानि परं संस्कृतवाङ्मये प्रचलितानि शताधिकानि रूपाणि काशिकावार्तिकैः परिभाषादिभिश्च साधितानि सन्ति, तथैव संस्कृतभाषाशिक्षणाभ्यासानुवादरीति-वाच्यपरिवर्तनपद्धति-क्रियारूपाणि च दर्शितानि सन्ति । शिक्षकेभ्यो व्याकरणपाठनपद्धतिनिदर्शितेयं व्याख्याऽऽगमननिगमनपद्धत्योः संयोजनेन प्रणीताऽऽधुनिकी प्रायोगिक्यभ्यासबहुला च वर्तते ।

प्रस्तुतप्रबन्धस्य *तृतीयोऽध्यायः* सिद्धान्ताध्यायत्वेनोपस्थापितोऽस्ति । भाषावाङ्मये, साहित्ये च व्याख्याबोधकानि-चर्चा-व्याकृति-वर्णन-भाष्य-संसूचन-विवरण- पञ्जिका- टीका- समालोचन-समीक्षा- मीमांसाप्रभृतीनि दशाधिकानि पदानि प्रचलितानि सन्ति । यद्यपि तेषां क्षेत्रं स्वेषु सङ्कायेषु सङ्कोचीभूतमस्ति तथापि तानि सर्वाणि सामान्यतो वर्णन-व्याख्यानबोधनायैव प्रयुज्यन्ते । संस्कृतव्याकरणे तु प्रथमतः सामान्यरूपेण शब्दनिर्वचनं प्रस्तुत्य तद्यौगिकार्थमभिधाय च लाक्षणिकव्यञ्जकाद्यर्थप्रकाशितम्, सति सम्भवे वैकल्पिकेनोपायेनापि निष्कर्षप्रदत्तं प्रकथनमेव व्याख्यानमित्याम्नाय्यते । व्याख्यानस्येतत् स्वरूपं दर्शन-निरुक्त-साहित्यादिशास्त्रसम्बद्धे व्याख्यानेऽप्यंशतो मिलति । व्याख्यानस्य स्वरूपाणि वेद-निरुक्त-व्याकरण-दर्शन-साहित्य-लोकव्यवहारेषु विभिन्नानि सन्ति । वेदेऽतिरिक्तपदत्याग-हीननिवेश-विप्रकृष्टसंयोजनानुपूर्वकल्पन-लिङ्ग-धातु-विभक्तिसंयोजनानि व्याख्यानतत्त्वरूपेणाङ्गीकृतानि । तथैव निरुक्ते तत्त्व-पर्याय-भेद-सङ्ख्या-सन्दिग्धोदाहरण-विभाग-निर्वचनानि व्याख्यान- तत्त्वानीति स्वीकृतानि । दर्शने तु पूर्वोक्तेषु तत्त्वेषु किञ्चित् परिवर्तनं कृत्वा विषयप्रवेश-संशय-पूर्वपक्ष-सिद्धान्तसङ्गतिश्चेति चत्वारि तत्त्वानि निर्धारितानि । साहित्यशास्त्रेऽपि व्याख्यात्रा मल्लीनाथेन पूर्ववर्त्तिभिर्निर्धारितानि तत्त्वान्यंशतः परिष्कृत्य सन्दर्भ-प्रसङ्ग-विग्रहान्वयेष्टशब्दप्रयोग-छन्दोऽलङ्कार-गुण-ध्वनि-रसादीनि समुल्लिखितानि सन्ति । तथैवाधारभूतव्याख्यानतत्त्वरूपेण संस्कृतवाङ्मयसमीक्षकैः पदच्छेद-पदार्थोक्ति-विग्रह-वाक्ययोजनाऽऽक्षेपपूर्वकसमाधानानि प्रस्तुतानि सन्ति ।

संस्कृतव्याकरणे व्याख्यानस्य स्वरूपं स्पष्टतो न निर्धारितम् । संस्कृतव्याकरणेतिहासे तात्त्विकाध्ययनपरम्परा न प्राप्यते । सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः प्रकाशितायां सारस्वतसुषमापत्रिकायां व्याख्यानपद्धतिर्नामत एकस्तथैव व्याख्यानप्रक्रियेति शीर्षकतश्चापरो लेखः प्रकाशितो दृश्यते परं तत्रापि स्पष्टतो व्याख्यानतत्त्वानि, विधिः, पद्धतिर्वा न निर्धारित अतोऽत्र विषयान्तरग्रन्थसहयोगेन, नेपालीभाषासाहित्यादिषु व्याख्यानतत्त्वनिर्धारणपद्धत्या च काशिकाकौमुद्यादीन् रूपसाधनकेन्द्रितान् प्रक्रियाग्रन्थानाश्रित्यावधारणरूपेणात्र-अधिकारानुवृत्त्योर्निदर्शनम्, विग्रहादिभिरुदाहरणादिभिश्च सूत्रार्थापनम्, शङ्कामुद्भाव्य समाधानम्, रूपसिद्धिप्रक्रियावबोधः, वार्तिकपरिभाषादिभिर्जाटिल्यस्फोरणम्, अन्याचार्य-मतसङ्ग्रहः, प्रबन्धसङ्घटनं शैलीशिल्पञ्चेति सप्तव्याख्यानतत्त्वानि निर्धार्य रूपसाधनप्रक्रियाकेन्द्रितायां शारदाप्रभाव्याख्यायामेतानि तत्त्वानि परीक्षितानि सन्ति । पुनश्च ग्रन्थान्तरैः सह प्रकृतग्रन्थस्य तोलनमपि कृतमस्ति ।

प्रस्तुतप्रबन्धस्य *चतुर्थाध्याये* शारदाप्रभाव्याख्यायाः संज्ञासन्धिसुबन्तप्रकरणान्तर्गतानि विषयवस्तूनि शब्दशास्त्रीयव्याख्यानतत्त्वदृष्ट्या विश्लेषितानि परीक्षितानि च सन्ति । एतत्क्रमे प्रथमतः संज्ञाप्रकरणे प्राचीननवीनभाषाविदोः स्थानप्रयत्नविभागः, तयोः साम्यवैषम्यम्, नवीनानां विभागे सूक्ष्मतरत्वञ्च प्रतिपादितमस्ति । ततः पश्चात् सन्धिप्रकरणे सुबन्ते च स्थितानां विषयवस्तूनां परिचयं प्रदाय सन्धिप्रकरणे सुबन्ते चाधिकारानुवृत्त्यो प्रयोगः, पूर्वोक्तप्रकरणपठितेषु सूत्रोदाहरणप्रत्युदाहरणेषु विग्रहसमासयोरवस्थितिः, शङ्कानां समुत्थापन-विश्लेषणरीतिः, रूपसाधनप्रक्रियाया दिग्दर्शनम्, उत्थापितेषु विषयेषु पूर्वाचार्याणां सम्मतिः, वार्तिकपरिभाषादीनां प्रयोगः, ग्रन्थसङ्घटनञ्च समीक्षितमस्ति ।

तिङन्तकृदन्तकारकप्रकरणान्तर्गतविषयसमीक्षिते *पञ्चमाध्याये* दशगणात्मके तिङन्ते निर्धारितानि १७१ सूत्राणि, णिजादि-नामधात्वन्तानि उत्तरतिङन्तर्गतानि १८ सूत्राणि, कृदन्तीयानि ५१ सूत्राणि तथा कारकान्तर्गतानि ९ सूत्राणि तदन्तर्गता प्रक्रिया च समीक्षिता अस्ति । प्रकरणपरिष्कारक्रमे व्याख्यातायं पूर्वनिर्धारितमकारादिवर्णक्रमिकान् लड्लिडादीन् लकारक्रमान् परिष्कृत्य सरलक्रमेण लट्लोट्लङ्विधिलिङ्चेति सार्वधातुकान् तथा लृट्लुट्लृङ्लुङ्लिटाशिर्लिङ्लकारान् च निर्धारयति । पुनश्चानेनैव क्रमेण भ्वाद्यदाद्यन्तर्गतानि दशगणस्थानि रूपाण्येकत्रैव साधनाय च समुत्प्रेरयति । शारदाप्रभाकारेण निर्धारित उत्तरतिङन्तकृदन्तकारकप्रकारणस्था विषया अपि प्रकरणपरिचयमूलका एव सन्ति ।

तद्धितसमासमासयो रूपसाधनिकाप्रस्तुते *षष्ठाध्याये* शारदाप्रभाकारेण प्राथमिकाध्ययनार्थं निर्धारितानि (तद्धिते ५४,समासे ३८) ९२ सूत्राणि तदन्तर्गता प्रक्रिया च निरूपिताऽस्ति । शारदाप्रभाकारः सरलक्रमेण पाठनाय प्रथमतस्तद्धितप्रक्रियां ततश्च समासप्रक्रियां स्वल्पेषु सूत्रेषु परिचयरूपेणैव निरूपयति । तद्धितसमासखण्डे शारदाप्रभाकारेणान्यैर्विषयैः सहापकृष्टपदयुतानि- द्विगोर्लुगनपत्ये, कालप्रयोजनाद्रोगे, किमोऽत् चेति त्रीण्यधिकारसूत्राणि समुल्लिख्य तेषापकर्षणप्रक्रियापि पक्षविपक्षाभ्यां व्याख्यातः, अतः खण्डोऽयं वैषयिकगाम्भीर्येण, भाषिकसौष्ठवेन च विशेषः ।

अतः परं शारदाप्रभायाश्चतुर्थपञ्चमषष्ठाध्यायानां समीक्षणेन, व्याख्यान्तरैः सहास्य तोलनेन च समवाप्तो निष्कर्षः क्रमशः प्रस्तूयते ।

७.३ शोधनिष्कर्षः

शारदाप्रभाव्याख्यायाः सर्वोपमं वैशिष्टचमधिकारानुवृऽयोर्निदर्शनं मन्यते । अत्राधि-क्रियमाणेष्वनुवर्तनीयेषु च सूत्रेषु वर्णस्थूलाक्षरीकरणेन, तत्र स्वरितचिह्नप्रदानेन, सूत्रान्तेऽङ्कप्रदानेन चाधिकारसङ्केतः कृतः प्राप्यते । एतादृशसङ्केतो भारतीयव्याख्यात्रा गोपालदत्तशास्त्रिणा इतः पूर्वमेवाष्टाध्यायीसम्पादने कृतस्तथाप्यनेकग्रन्थावलोकनेन कतिपये स्थाने तत्परिष्कारेणापि विहितोऽस्तीत्यस्य वैशिष्टचं तदेव निष्कर्षश्च ।

पाणिनीयव्याकरणे गङ्गाप्रवाह इव सिंहावलोकनमिव मण्डूकप्लुतिरिव चेति त्रिविधा अनुवृत्तयः प्रसिद्धाः । तासु गङ्गाप्रवाहवदनुवृत्तिरुत्तरवर्त्तिसु सूत्रेषु शततमधिगमने, सिंहावलोकानुवृत्तिः सिंहस्य पश्चादवलोकनमिव तथा मण्डूकप्लुतिस्तु मण्डूकानामुत्प्लवनमिव सूत्राणामप्यावश्यके स्थान एवानुवर्तने प्रसिद्धिः । प्रकृते व्याख्यान एवंविधानां त्रिविधानामेवानुवृत्तीनां स्पष्टसङ्केतो दृग्गोचरी भवति । अत्राधिकारस्येवानुवृत्तेरपि सङ्केतः सूत्रस्थवर्णपदादिस्थूलीकरणेन कृतः प्राप्यते । शारदाप्रभायां गङ्गाप्रवाहवदनुवृत्तानि शतशः सूत्राणि सन्ति । तेषु सूत्रेषु 'खरि च' (पा.सू.८-४-५४), 'झयो होऽन्यतरस्याम्' (पा.सू.८-४-५४), 'शश्छोऽटि' (पा.सू.८-४-६२), 'पदान्तस्य' (पा.सू.८-४-३६) प्रभृतीनि निदर्शनानि सन्ति। अत्रत्ये खरि चेति सूत्रे चकारात् झलां जश् झशीति सूत्रात् झल् तथा अभ्यासे चर्च इत्यस्मात् चरागच्छतीति सङ्केतः कृत एवमन्यत्रापि । अतो गङ्गाप्रवाहवदनुवृत्तानां सूत्राणामुल्लेखः प्रकृते व्याख्याने स्पष्टतया कृतोऽभ्युपेयते ।

महर्षिणा पाणिनिना- अष्टन आ विभक्तौ (पा.सू.७-२-८४), अचस्तास्वत् थल्यनिटो नित्यम् (पा.सू.७-२-६१), द्विगोर्लुगनपत्ये (पा.सू.४-१-८८), कालप्रयोजनाद्रोगे (पा.सू.५-२-८१) तथा किमोऽत् (पा.सू.५-३-१२) इति सूत्रेषु पदापकर्षणेनेष्टं साधितम् । एतेषु सूत्रेषूत्तरवर्त्तिभिः सूत्रैः सिंहावलोकनमिवापेक्षितं पदमपकृष्टम् । तेषां सङ्केतः पूर्ववर्त्तिभिर्व्याख्यातृभिः कुत्रचिदस्पष्टरूपेण कृतेषु केषुचिदविहितेषु सत्सु व्याख्याताऽयं सूत्रस्थूलीकरणादिभिः स्पष्टीकुरुते । एतेषु 'अष्टन आ विभक्तौ' (पा.सू.७-२-८४) इति सूत्र उत्तरत्र स्थिताद् 'रायो हलि' (पा.सू.७-२-८५) इत्यस्माद् हलीति सप्तम्यन्तं पदमानीतं वर्तते । तथैव 'अचस्तास्वत् थल्यनिटो नित्यम्' (पा.सू.७-२-६१) इत्यत्र तदुत्तरत्र स्थितात् 'उपदेशेऽत्वतः' (पा.सू.७-२-६२) इत्यस्मादुपदेशपदमपकृष्यते । तेनैव प्रकारेण 'द्विगोर्लुगनपत्ये' (पा.सू.४-१-८८), 'कालप्रयोजनाद्रोगे' (पा.सू.५-२-८१) तथा 'किमोऽत्' (पा.सू.५-३-१२) चेति

त्रिषु सूत्रेषूत्तरवर्त्तिभ्यः आवश्यकपदान्यानीयन्ते । अत्र द्विगोर्लुगनपत्ये (पा.सू.४-१-८८) इत्यत्र तदुत्तरवर्त्तिनो 'गोत्रेऽलुगचि' (पा.सू.४-१-८९) इत्यस्मादच्पदं 'कालप्रयोजनाद्रोगे' (पा.सू.५-२-८१) इत्यत्र तदुत्तरवर्तिन 'तदस्मिनन्नं प्रायेण संज्ञायाम्' (पा.सू.५-२-८२) इत्यस्मात् संज्ञायामिति पदं तथा 'किमोऽत्' (पा.सू.५-३-१२) इत्यत्रोत्तरस्मात् 'वा ह च च्छन्दसि' (पा.सू.५-३-१३) इति सूत्राद् वा पदमपकृष्यते । शारदाप्रभाकारोऽसावेतेषां सर्वेषां सूचनं स्पष्टतया कुरुते । अतोऽवृत्तिनिर्देशोऽस्यापरं वैशिष्टचम् । व्याख्यातुरनुवृत्तिनिदर्शना शैली पूर्ववर्तिभ्यः काचिद् भिन्ना । प्रकृतव्याख्यानस्य नूतनवैशिष्टचन्तु- व्याख्यातव्ये यस्मिन् कस्मिन्नपि सूत्रे केभ्यः केभ्यः पूर्वसूत्रेभ्योऽनुवृत्तिरागच्छतीति निर्धारणमस्ति । शारदाप्रभायाः प्रथमावलोकनेनापि पाणिनीयसूत्रेष्वनुवृत्तीनामागमननिगमनपद्धतिः प्रतिबिम्बवत् स्पष्टी भवति। व्याख्याताऽयं प्रकृतग्रन्थेऽनुवृत्तिमेवं सूचयति-

१. व्याख्याकारोऽयं सर्वत्रानुबन्धनीयं स्वरवर्णं सूत्रोपरिप्रदत्तेन चन्द्रबिन्दुना सूचयति, यथा- ४-२-८५ नद्यां मतुँप् ।

२. व्याख्याकारोऽयं सर्वत्राग्रेऽनुवर्तनीयमधिक्रियमाणं वा समग्रं सूत्रं पदं वा सूत्रस्थूलाक्षरीकृत्य स्वरितचिह्नेन च चिह्नयति, तद्यथा-५-२-१ **धान्यानां॑ भवने क्षेत्रे॑** खञ् ।

३. व्याख्याकारोऽयं सर्वत्राग्रेऽनुवर्तनीयेषु सूत्रेषु तदन्ते प्रदत्तैरङ्कैरनुवृत्तिगतिसीमां निर्धारयति, तद्यथा- ५-१-१०४ **ऋतो॑**रण् १०५ ।

शारदाप्रभायां मण्डूकप्लुतानुवृत्तेश्चर्चाऽपि सामान्यतः प्राप्यते । गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु (पा.सू.२-४-७७), नोदात्तोपदेशस्य मान्तस्यानाचमेः (पा.सू.७-३-३४), अध्यायानुवाकयोर्लुक् (पा.सू.५-२-६) प्रभृतिषु सूत्रेषु पूर्वसूत्रेभ्यो मण्डूकप्लुत्याऽऽवश्यकं पदमागच्छतीति चर्चति । उक्तेष्वध्यायानुवाकयोर्लुगिति सूत्रे विंशत्यादिभ्यस्तमन्यतरस्याम् (पा.सू.५-२-५६) इति सूत्राद् मण्डूकप्लुत्याऽन्यतरस्यामागच्छतीति सङ्केतः शारदाप्रभायां प्राप्यत इति मण्डूकप्लुतानुवृत्तेर्निदर्शनमप्यस्या वैशिष्टचं मन्तव्यम् ।

शारदाप्रभाव्याख्यानं प्राथमिकश्छात्रकेन्द्रितमतोऽत्र प्रायो विग्रहसमासौ न प्रदर्शितौ, विग्रहसमासाभ्यां बोध्योऽर्थो यद्यपि सुकरः स्थिरश्च तथापि व्याकरणप्रविविक्षवस्तदधिगन्तुं काठिन्यमनुभवन्तीति प्राथमिकेऽध्ययने विग्रहसमासौ विनैव सूत्रमर्थाप्यम्, रूपसाधनञ्च कार्यमिति शारदाप्रभाया निष्कर्षस्तथापि तिङ्कृदादिषूत्तरवर्तिषु प्रकरणेषु सूत्रार्थापनक्रमप्राप्तो

विग्रहः सामान्यतया प्रदर्शितो दृश्यते । तादृशविग्रहयुतेषु सूत्रेषु- अनुदात्तङित आत्मनेपदम्, ग्क्ङिति च, सन्वल्लघूनि चङ्परेऽनग्लोपे, आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य, अकर्तरि च कारके संज्ञायाम्, असूर्यललाटयो दृशितपोः प्रभृतीनि मुख्यानि ।

शारदाप्रभायां बहून्युदाहरणप्रत्युदाहरणानि काशिकातस्तदवशिष्टानि तु कौमुद्या गृहितानि सन्ति । अत्यल्पसङ्ख्यायां सत्यामपि नैपालककृषिप्रणाली-नदी-कला-संस्कृति-जीवनपद्धति- बोधकान्युदाहरणप्रत्युदाहरणानि प्रायः प्रकरणेषु प्रयुक्तानि । मौलिकोदाहरणप्रदाने प्रकृतव्याख्यायाः कारकप्रकरणं समृद्धं प्रतीयते । उदाहरणप्रत्युदाहरणैर्व्याख्याकारेण स्वकीया जन्मभूमिर्नैपालजकराजसंस्था गौरवास्पदानि विषयवस्तूनि च स्मृतानि सन्ति ।

शारदाप्रभायां सरलाज्जटिलक्रम इति शिक्षाशास्त्रीयो नियमः पूर्णतोऽनुपालितोऽतः प्राथमिकेषु खण्डेष्वत्र बहुत्र शङ्का नोत्थापिताः । अतो व्याकरणशास्त्रीयाणां शङ्कानां समुत्थापन-विश्लेषणम्, तदुपरि पूर्वाचार्यमतसमुल्लेखनञ्च शारदाप्रभाकारस्य न प्राथमिकक्षेत्रमित्यवबुध्यते, तथापि द्वितीयेऽध्ययने पठितव्येषु सूत्रेषु प्रसङ्गतः समागताः शङ्काः समुत्थाप्य तासु काशिकाकौमुद्योस्तद्व्याख्यातृणाञ्च मतोपस्थापनेन निराकृतं प्राप्यते । शङ्कासु पक्षविपक्षाभ्यां परामृशताऽनेन बहुशः काशिकापक्षोऽल्पशस्तु कौमुदीपक्षोऽप्यवलम्बितोऽस्ति । क्वचित्तु तटस्थत्वमपि प्रदर्शितमस्ति । समर्थः पदविधिरिति सूत्रस्थे विधिपदे भावे किः, उत कर्मणीत्याशङ्क्य कर्मणीति निर्णयप्रदाने, 'पारे मध्ये षष्ठ्या वे'ति सूत्रे पुनर्विभाषाग्रहणप्रयोजनप्रतिपादने, 'अन्यपदार्थे च संज्ञाया'मित्यत्र विभाषाधिकारात् कथमनेन नित्यसमास इत्याशङ्कायाः समाधाने, 'देवताद्वन्द्वे चे'ति सूत्रे पुनर्द्वन्द्वग्रहणप्रयोजनस्थापनेऽन्यत्रापि बहुत्र च व्याख्यानमिदं काशिकामवलम्बते । परं 'वदव्रज...'इत्यादिसूत्रे हलन्तत्वादेव सिद्धे पृथग् वदिव्रजिग्रहणप्रयोजनोपपादने, 'श्लिष आलिङ्गने' इति सूत्रस्य योगविभागे, 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इति वार्तिकेनैव सिद्धे सत्यापादीनां पुनर्ग्रहणप्रयोजनोपपादने तथान्यत्र कतिषु स्थानेषु व्याख्यानमिदं कौमुदीपक्षमवलम्बते । तथापि 'अस्तिसिचोऽपृक्ते' इति सूत्रस्थमस्तीति पदं विभक्तिप्रतिरूपकमव्ययमुत अस भुविधातुनिष्पन्नमिति सन्देहनिवारणे तथान्यत्र कतिचित् विषयेषु तु ग्रन्थोऽयं स्वमतस्थापनं विना मतद्वयमेव समुल्लिखति ।

प्रकृतं व्याख्यानं पाणिनीयव्याकरणे स्थितां रूपसिद्धिप्रक्रियां पूर्वव्याख्यातृभिर्जटिलीकृत- प्रसङ्गे तां संशोध्य सरलीकर्तुं विरचितम्, अतोऽस्य व्याख्यानस्य

मूलविषयवस्तु रूपसाधनमेव, तस्माद् व्याख्यानमिदं संस्कृतवाङ्मये लोकव्यवहारे च प्रचलितान् संस्कृतशब्दान् पाणिनीयसूत्रद्वारा साधयति । पाणिनीयसूत्रैरसाधितान् कतिचिच्छब्दान् कात्यायनवार्तिक-भाष्येष्टयादिभिरपि साधयति। एतत्प्रसङ्गे- बृसी (ब्रुवन्तो सीदन्त्यस्यामिति विग्रहे सदेरधिकरणे डट्, ब्रुवन् शब्दस्य बृ इत्यादेशश्च), मयूरः (मह्यां रौतीति विग्रहे रौतेरचि टिलोपः, महीशब्दस्य मयू आदेशश्च), दूढ्यः (दुष्टं दुःखेन वा ध्यायतीति विग्रहे आतश्चोपसर्गे क इति कप्रत्ययः) तथा बलाहकः (वारिवाहक इत्यर्थे 'वारि' इत्यस्य बादेशः तथोत्तरपदादेश्च लत्वम्) प्रभृतीनां शब्दानां रूपसाधनं विशेषतः समुल्लेखनीयमस्ति । रूपसाधने विस्तारो जाटिल्यञ्च मा भूदिति विचार्य ग्रन्थोऽयं पूर्वव्याख्यातृभिर्गृहीतां शङ्कोत्थापन-बाध्यबाधकोत्सर्गापवादादीनामुल्लेखपद्धतिं प्रायो नाङ्गीकुरुते एतदस्या व्याख्यायाः शक्तिरपि सीमापि । अनया प्रक्रियया व्याकरणप्रविवक्षवः सारल्येन रूपसाधनप्रक्रियामधिगच्छन्तीत्यस्य शक्तिरस्ति चेत् काशिकाकौमुद्यादीन्यधीत्य समागता जिज्ञासवोऽत्र किमपि न लभन्ते, अतस्तेषां कृते नवीनतथ्यसमुद्घाटनाभावेन सीमा प्रतीयते ।

शारदाप्रभायाः प्राथमिके स्वरूपे षड्वार्तिकान्येव प्राप्यन्ते, तेषु चत्वारि सुबन्ते द्वे तिङन्ते सन्ति, अतो व्याख्येयं प्राथमिकच्छात्रेभ्यो वार्तिकपाठनं न कामयत इति ज्ञायते, अतः सरलतया शब्दसाधुत्वप्रक्रियाविबोधयिषूणां प्राथमिकच्छात्राणां कृतेऽधिकवार्तिकप्रयोगो भारावह इति शारदाप्रभाया निष्कर्षः। चतुःसहस्रसूत्रेभ्यः ५३६ सूत्राण्येवाधिताश्छात्रा वार्तिकसाध्यरूपाणि पठितुं न प्रभवन्तीति निश्चितमेव, अतस्तादृशछात्राणां कृते षड्वार्तिकानि पर्याप्तानीत्यवधेयम्। शारदाप्रभाकार एव द्वितीयके विभाजने तु कौमुदीतोऽधिकानि ७२ वार्तिकानि (इष्टिसहितानि) विन्यसति । एतेषु वार्तिकेषु मध्ये दशाधिका इष्टयः सन्ति, अतः कौमुद्यामप्रयुक्तानि ६२ वार्तिकान्यत्र प्राप्यन्ते । एतानि वार्त्तिकानि काशिकातः कति तु महाभाष्यतोऽपि समानीतानि दृश्यन्ते । कौमुदीयं लौकिकशब्दनिर्माणे केन्द्रिताऽस्ति चेत् काशिका तु लौकिकवैदिकयोरुभयोरेव शब्दयोः साधुत्वसम्पादनार्थं समर्पणशीला प्रतीयतेऽतः काशिकायां वार्त्तिकाधिक्यं स्वाभाविकं मन्तव्यम् ।

परिभाषाणां व्याख्यानं शारदाप्रभाकारस्य नाभीष्टमतोऽसौ रूपसाधनक्रमप्राप्ताः परिभाषाः समुल्लिख्यापि न व्याख्याति । अत्र तादृश्यः परिभाषाः पञ्चाशदधिका दृश्यन्ते । परिभाषा इव फक्किकावाक्यान्यपि व्याख्येयं विषयवस्तु प्रायो न विवृणोति, तथापि रूपसाधनक्रमप्राप्तेषु स्थानेषु सामान्यतोऽर्थापयत्येव, तथापि विषयावबोधनार्थम्,

संशयनिवारणार्थम्, रूपसाधने समागत-जाटिल्यस्फोरणार्थञ्च तेषामावश्यकत्वं वरीवर्तीत्यवधेयम् ।

शारदाप्रभायां व्याख्यायां दशाधिकानां पूर्ववर्तिनामाचार्याणां व्याख्यानानि, विचाराः सिद्धान्ताश्च गृहीताः सन्ति । अत्र विशेषतः कात्यायन-पतञ्जलि-कैयट-वामन-जयादित्य-नागेश-दीक्षितप्रभृतीनां व्याख्यातॄणां काशिकाकौमुद्योः, टीकाकाराणां जिनेन्द्रबुद्धि-हरदत्त-ज्ञानेन्द्रसरस्वती-वासुदेवदीक्षितादीनां सूत्रादिव्याख्यानसम्बद्धानि मतानि समुद्धृतानि सन्ति । व्याख्यानेऽस्मिन् कौमुदीकाशिकयोस्तट्टीकाकारयोश्च मतो बहुत्र समुद्धृतः प्राप्यते । विषयसमुद्धृते स्थाने व्याख्यानमिदं -"अत्र काशिका, अत्र दीक्षितः, अत्र बालमनोरमा, अत्र तत्त्वबोधिनी"प्रभृतिभिः सङ्केतैः समुद्धरणस्थानसङ्केतं कुरुते । प्रकृतव्याख्यानस्य गन्थसमुद्धरणप्रक्रिया यद्यपि पारम्परिकी तथापि शोधनियमानुसारिणी वर्तत इत्यस्य सबलपक्षः । अत्रत्येषु कतिषु समुद्धरणेषु स्वाशयप्रकटनाभावः, भाषिकजाटिल्यम्, तद्विश्लषेणाभावेन ग्रन्थस्थभाषया सह समुद्धरणस्यासामञ्जस्यं प्रभृतयो दोषाः स्पष्टतो दृश्यन्ते, एते प्रकृतव्याख्यानस्य दुर्बलपक्षाः ।

समुद्धरणप्रसङ्गे विचारशैलीशिल्पादिष्वष्टाध्यायीवृत्तिकारस्य गोपालशास्त्रीदर्शनकेशरिणः प्रत्यक्षप्रभावोऽत्र संलक्ष्यते । वृत्तिकारेण शास्त्रिणा सर्वप्रथममष्टाध्यायीसूत्राणामनुवृत्तिसूचनं कृतम्, अनुवृत्तेर्गतिसीमा च निर्धारिता, तत्र किञ्चित् परिष्कारेण परिवर्द्धनेन च शारदाप्रभाव्याख्यानेन सूत्राणामनुवृत्तेर्गतिसीमादिकं निर्धारितम् ।

पाणिनीयाष्टाध्यायी, पातञ्जलं महाभाष्यम्, काशिकासिद्धान्तकौमुद्यादीनि व्याख्यानानि, तदुपरि रचिता न्यासपदमञ्जरीबालमनोरमातत्त्वबोधिन्याद्यष्टीकाः शारदाप्रभाया उपजीव्या इव प्रतीयन्ते परं ताः सर्वा नोपजीव्या, उपजीव्यास्तु पाणिनीयाष्टाध्यायीकाशिकाकौमुद्य एव । व्याख्यायामस्यां पाणिनीयाष्टाध्याय्याः सकलसूत्राणि सूत्रविन्यासक्रमेणैव व्याख्यातानि । तथैव काशिकासरण्या व्याख्यानम्, कौमुद्यधिकानां वार्त्तिकेष्टयादीनां प्रयोगः, लक्षणप्रधानशैलीग्रहणं कौमुद्यधिकरूपसाधनञ्चास्याः काशिकानुजीवकत्वं प्रमाणीकुर्वन्ति । तेनैव प्रकारेण काशिकाकौमुद्योर्मतभेदयोः काशिकापक्षग्रहणम्, काशिकाविवृत्त्योर्न्यास-पदमञ्जर्योर्लक्षणप्रधाना शैली, तत्रत्योद्धरणानि चास्याः काशिकानुगामित्वे सहयोगि कारणानि सन्ति । शारदाप्रभाया अपरोपजीव्यग्रन्थस्तु सिद्धान्तकौमुदी दृश्यते । शारदाप्रभाकारेण कृते प्राथमिके विभाजने कौमुद्याः संज्ञासन्धिसुबन्ततिङन्तादिप्रकरणक्रमः प्रत्यक्षतो गृहीतोऽस्ति, तथैव सूत्रमनु

वृत्तिलेखनपद्धतिः, मूलभाग-व्याख्यानभागश्चेति द्वेधा ग्रन्थविभागपद्धतिः, प्राथमिके लक्षणप्रधाना शैली चास्याः सिद्धान्तकौमुद्यनुजीवकत्वं प्रमाणीकुर्वन्ति ।

शारदाप्रभाटीकेयमष्टाध्यायीसूत्रार्थसरलीकरणाय विरचिता, अत अष्टाध्याय्याः सकलसूत्राणाम्, प्रसङ्गतः समागतानां वार्त्तिक ानाम्, परिभाषाणाम्, फक्किकाणाञ्च विवृतिरत्र प्राप्यते । प्रायः संस्कृतभाषायां निबद्धस्य व्याख्यानस्यास्य विषयवस्तु कतिपये स्थाने नेपालीहिन्दीति भाषाद्वयेऽपि समुपन्यस्तमस्ति । प्राग्वर्तिभ्यः काशिका-सिद्धान्तकौमुदी-प्रतिसंस्कृतासिद्धान्तकौमुदीप्रभृतिभ्यः सूत्रव्याख्यातग्रन्थेभ्यस्तद्विवृतिभ्यश्च कतिपयविषयान् गृहीत्वा सरलातिसरलतया विषयविज्ञापनमस्य महद्वैशिष्ट्यं प्रतिभाति । अत आधुनिकशैलीप्रधानेऽस्मिन् व्याख्याने बहुत्राष्टाध्यायीक्रममनुसृत्य पूर्वार्द्धे तु सूत्रप्रक्रियाक्रमयोर्मन्थनेन नवनीतः सूत्रप्रक्रियाक्रमसङ्गमो निस्सारितो दृश्यते । सन्धिप्रकरणारम्भे प्रथमं हल्सन्धिस्ततोऽच्सन्धिविन्यासः, ततः षड्लिङ्गेषु तत्राप्यज्हल्स्वकारादिक्रमेण शब्दसाधुत्वसम्पादनं ततोऽव्ययं व्याख्याय लघुकौमुद्यामिव तिङन्तोत्तरतिङन्तकृदन्तकारकतद्धितसमासानां समाख्यानमस्या अपरं वैशिष्टचं प्रतीयते । द्वन्द्वसमासानन्तरं नवीनक्रमाभावात् सूत्रक्रममनुसृत्यैव तद्वितीया विषया व्याख्येयेत्यसौ ज्ञापयति ।

शारदाप्रभाया विषयव्याख्यानशैलीत्वागमननिगमनविधिमिश्रिता वर्तते । व्याख्याकारोऽयं प्रथमतो रूपसाधनं ततश्छात्रेभ्य रूपनिर्माणाभ्यासं, भाषानुवादशिक्षणञ्च कारयित्वा तन्माध्यमेन सूत्रवार्त्तिक ादीनि पाठयति अतोऽत्रागमनमूला शैली परिलक्ष्यते चेद् द्वितीये व्याख्याने तु सूत्रम्, तदर्थम्, तत्रत्यं समासविग्रहादिकं शिक्षयित्वैवो-दाहरणप्रत्युदाहरणानि पाठयति, अत्रत्ये पाठे. निगमनमूला प्राचीना शैली दृग्गोचरीभवति, अस्मादेव कारणाद् पूर्णचन्द्रढुंगेलप्रभृतयो ग्रन्थमिमं सूत्रप्रक्रियाक्रमयोः सङ्गममित्यामनन्तीति तदेव निष्कर्षः ।

शारदाप्रभाया अत्रत्यः प्रकरणविन्यासो यद्यपि कौमुदीसन्निकटस्तथापि पूर्णतो न तत्समान इति प्रथमतो हल्सन्धिस्ततोऽच्सन्धिरिति विन्यासेन, सन्धिद्वय एव कौमुद्याः पञ्चसन्धिस्थानां विषयाणां सङ्कोचेन, सुबन्तीयेऽजन्तशब्दसाधनक्रमे स्वरक्रमं व्यतिक्रम्य बहुप्रचलितशब्दक्रमेण शब्दसाधुत्वसम्पादनेन, सर्वादिगणपठितानां विशेषणवाचकानाञ्च पुँस्त्रीनपुंसकलिङ्गबोधकानां शब्दानामेकत्रैव रूपसाधनेन, तिङन्ते लकारक्रमनिर्धारणे

कौमुदीक्रमं परिमार्ज्य लट्-लोट्-लङ्-वि.लिङ्-लृट्-लुट्-लृङ्-लुङ्-लिट्-आ.लिङ्क्रमेण लकारनिर्धारणेन, कर्तृकर्मभावबोधकक्रियाणामेकत्रैव समुपदेशनेन, एकत्रैव रूपशिक्षणवाक्य-प्रयोगाभ्यासानुवादनिदर्शनेन, कृदन्ते पूर्वकृदन्त-कृत्योत्तरकृदन्तक्रमेण प्रकरणविभाजनेन, तद्धितानन्तरं समासोपदेशनेन च ज्ञायते । अतः शारदाप्रभायाः प्रकरणविन्यासः कौमुदीयप्रकरणविन्यासादपि सामान्यतो भिन्न इति निष्कर्षः ।

अत्र लघुकौमुदीकारेण वरदराजेन निर्धारितरीत्या स्थानप्रयत्नान् निर्धार्य प्राचामाचार्याणां विभाजनं समुचितमासीदिति पुनः परिपोषितो वर्तते । प्रसङ्गेऽस्मिन् प्रकृतशोधकर्त्राऽऽधुनिकैर्भाषाविद्भिः कृतैः स्थानप्रयत्नविभाजनैः सह महर्षिणा पाणिनिना तदनुयायिभिश्च कृतस्य विभागस्य तुलनां कृत्वाऽऽधुनिकापेक्षया प्राचीनैः कृतं विभाजनं स्थूलतरमासीदिति निर्णीतमस्ति ।

शारदाप्रभेयं व्याकरणप्रविविक्षून् कोमलमतीन् छात्रान् नेपालीहिन्दीसम्मिश्रितया सरलसंस्कृतगिरा विषयं प्रबोधयतीति सरलतया विषयप्रबोधनमस्य प्रथमं वैशिष्ट्यम् । तथैव प्रायोगिकायां पद्धतौ ग्रन्थरचनमस्य द्वितीयं वैशिष्टचम् । इतः पूर्वं विरचितानि सूत्रक्रमाधीनानि प्रक्रियाक्रमानुसारीणि वा प्रायो व्याख्यानानि विषयगतगाम्भीर्यप्रकाशने निमग्नानि दृश्यन्ते । काशिका-पदमञ्जरी-न्यास-बालमनोरमा-तत्त्वबोधिनीतुल्यानि पूर्वव्याख्यानानि पदानि विवृण्वन्ति, शङ्कां समादधते, रूपाणि साधयन्ति, मतान्तराणि प्रस्तुत्य प्रौढसरणिमङ्गीकुर्वन्ति, कतिपये स्थाने प्रौढपाण्डित्यमपि प्रदर्शयन्ति, परं तानि छात्रयोग्यतां नापेक्षन्ते, प्राथमिकाश्छात्रा एतान् विषयानधिगमिष्यन्ति न वेति कदापि न विचारयन्ति, पठनपाठनशैलीमपि न निर्दिशन्ति परमिदन्तु सरलतया स्तरानुकूलेन प्रयोगाभ्यासमूलकेन निगमनविधिना मध्ये मध्ये छात्रान् परीक्ष्य विषयं प्रबोधयति, अतोऽभ्यासबाहुल्यमस्य तृतीयं वैशिष्टचम् । तथैव जिज्ञासुबालकेभ्यः षण्मासावधिर्भाषां शिक्षयित्वा तदनन्तरमेव व्याकरणपाठने प्रेरकोऽसौ व्याख्यानस्यास्य कस्मिश्ँिचत् स्थानेऽपि प्रौढपाण्डित्यप्रदर्शनाय शास्त्रान्तरीयगूढविषयप्रतिपादनाय वा न प्रयतते, सर्वथा केनोपायेन छात्राः सूत्रार्थान्

अधिगमिष्यन्तीति भूयो भूय चिन्तयन् दृश्यते एतदस्य चतुर्थं वैशिष्टचम् । तथैवात्र सूत्रप्रक्रियाक्रमयोः सङ्गमः प्राप्यते, यथा- वृद्धिरादैजिति संज्ञानिर्देशानन्तरं वृद्धिरेचि (पा.सू.६-१-८५) इति विधिनिर्देशः सुकरः, परमष्टाध्यायीक्रमेण प्रवृत्ते सति तु आद् गुणः (पा.सू.६-१-८७) इति पठनकाले अदेङ् गुणः (पा.सू.१-१-२) इत्यस्य पुनः स्मरणमावश्यकं भवतीति गौरवम् । प्रक्रियाक्रमेणैव पठितेऽपि अज्झल्-विसर्ग-स्वादिसन्धिस्था विषयाः क्रमशः पठितव्या भवन्ति परं शारदाप्रभाव्याख्यानन्तु प्रथमं हल्सन्धौ स्थितानि 'स्तोः श्चुना श्चुः' (पा.सू.८-४-३९), ष्टुना ष्टुः (पा.सू.८-४-४१) सदृशानि सरलसूत्राणि पाठयित्वा तदनन्तरमेवाच्सन्धिप्रकरणान्तर्गतानि पाठनीयानीति निर्दिशतीति व्याख्यानस्यास्य पञ्चमं वैशिष्ट्यम् ।

प्रस्तुतं व्याख्यानं व्याकरणशास्त्रीयमतभेदे प्रायः स्वमतं नोपस्थापयतीत्यस्य प्रथमो दुर्बलपक्षः । तथैव व्याख्यायामस्यां नवीनशास्त्रीयचिन्तनं वैषयिकप्रौढत्वं च कुत्रापि न विलसति, इतोऽधिकं ज्ञानं तु पूर्ववर्तिभिः काशिका-कौमुद्यादिभिस्तद्व्याख्यानैश्च वितरितमेव, एतस्मादपेक्षया पूर्वव्याख्यानमेव उपयुक्तमित्यस्यालोच्यपक्षः तत् स्वाभाविकमपि, अतो वैषयिकचिन्तने सङ्कोचोऽथवा चञ्चुप्रवेशोऽस्य द्वितीयं दौर्बल्यम् । तेनैव प्रकारेण अपेक्षाधिकं शिक्षकेभ्यश्छात्रेभ्यश्च निर्देशनमभ्यास एकरूपताभावश्चास्य तृतीयं निर्बलत्वम् । अनेनैव प्रकारेण सूत्रप्रक्रियाक्रमयोः सङ्गमे कतिपयेषु स्थानेष्वाधारं विनापि क्रमविन्यासोऽस्य चतुर्थं दौर्बल्यं प्रतीयते । तस्मादप्यधिकं दौर्बलं तु एकस्मिनेव पुस्तक एकत्रैव सूत्रप्रक्रियाक्रमयो र्विन्यासः, एतेन प्राथमिकाश्छात्राः कीयानंशः प्राथमिकेभ्यः कीयान् च द्वितीयकेभ्यो निर्धारित इति परिच्छेत्तुं न शक्नुवन्ति । एतादृशान्यान्यपि नैकानि दौर्बल्यानि व्याख्यायामस्यां लभ्यन्ते, तथापि गुणाधिक्याद् गुणेष्वेतान्यन्तर्भवन्तीति दोषं परित्यज्य गुणा ग्राह्या इति निष्कर्षः ।

नेपालदेशोद्भवैः पञ्चाधिकैर्विवृतिकृद्भिः प्रक्रियाक्रमेण सूत्रक्रमेण चाष्टाध्यायीसूत्राणि व्याकृतानि । एतेषु सकलविवृतिग्रन्थेषु शारदाप्रभेयं नवीना सामान्या च प्रतीयते । इतः पूर्वं भारतीयव्याख्यातृभिर्या या संस्कृतव्याख्या कृतास्ताः स्वकीयधारणसंस्थापनोद्देश्येन स्वत्वप्रदर्शनप्रयोजनेन च विरचिताः सन्ति, तथैव ताः सर्वाः शेखर-प्रौढमनोरमा-काशिकासरणिमनुसन्ति । परमस्या उद्देश्यन्तु प्राथमिकेभ्यश्छात्रेभ्यः प्रयोगमूलकसरण्या सरलया च भाषया विषयप्रबोधनमस्ति, अतो भारतीयैर्नैपालकैश्च पूर्वव्याख्यातृभिः कृतैर्व्याख्यानैः सहैतत् तोलयितुं न शक्यते । तेषां सर्वेषां वैषयिकगाम्भीर्यप्रतिपादनरूपं वैशिष्टचमस्ति चेदस्या तु व्याकरणसरलीकरणरूपं भिन्नं वैशिष्ट्यं दृश्यते । तथापि स्वपूर्ववर्तिभिर्विरचितैर्व्याख्यानग्रन्थैः सह तोलनक्रमेऽस्या गुणवत्ता सामान्यतरा एव प्रतीयते, अतो भारतवर्षीयव्याख्यानग्रन्थेषु शास्त्रीयचिन्तनदृष्टचा सामान्यमिदं व्याख्यानमिति वक्तुं समुचितं भवति ।

नैपालकविवृतिग्रन्थेष्वपि सुकृतिदत्तपन्तस्य वृद्धयादिसूत्राष्टकविवृतिः, सोमनाथ-सिग्द्यालस्य प्रतिसंस्कृतासिद्धान्तकौमुदी चेति द्वौ ग्रन्थावेतस्या व्याख्यायाः प्राञ्जलतरौ प्रौढतरौ च प्रतीयेते । इतः प्राग्वर्तिनः पश्चाद् वर्तिनश्चान्ये व्याख्यानग्रन्था एतस्मादतिसामान्याः स्वल्पाकाराश्च सन्तीति तयोर्मध्यवर्त्तिव्याख्यानग्रन्थत्वेन प्रकृतं व्याख्यानं परिगणयितुं शक्यत इति मूल्याङ्कनम् ।

## ७.४ उपलब्धयः

शारदाप्रभाव्याख्याया अध्ययनसमीक्षणतुलनादिभिरधोऽङ्किता उपलब्धयः प्राप्ताः-

१. सिद्धान्तकौमुदीकाशिकादीन् प्रक्रियाग्रन्थानन्यानाधाराँश्चाश्रित्य शब्दशास्त्रीयव्याख्यान-तथ्वनिर्धारणम् ।

२. पाणिनीये व्याकरणे स्थितं रूपसाधनपक्षं सरलीकर्तुं प्रकृता व्याख्या रचितेति व्याख्यायामस्यां स्थितानां ग्रन्थसरलीकरणयुक्तीनां प्रकाशनम् ।

३. ब्लुमफिल्डचम्स्कीप्रभृतिभिर्भाषाविद्भि 'देशभाषासम्मिश्रणविधिना शास्त्रीयभाषाः शिक्षणीये'ति विधिर्निर्दिष्टस्तस्य परीक्षणञ्च हरिप्रसादशर्माचार्येण कृतं तन्मूल्याङ्कनम् ।

४. स्वप्रणीतानां सूत्राणां व्याख्यानाय महर्षिणा पाणिनिना प्रयुक्तयोरधिकारानुवृत्त्यो रीत्योः सारल्येन व्याख्यानाय हरिप्रसादेन कृतं प्रयतनमुपयुक्तमिति समर्थनम् ।

५. भाषावाङ्मयेषु प्रचलितानां पाणिनिकालिकानां ततोऽर्वाचीनानामपि शब्दानां साधुत्वसिद्धये प्रकृतव्याख्यात्रा कृतप्रयतनमुपयुक्तमिति प्रदर्शनम् ।

६. पाणिनीयसूत्रव्याख्याने प्रयुक्तयोः सूत्रक्रमप्रक्रियाक्रमयोर्युक्तत्वसमर्थनम् ।

७. वृत्तिरटनकेन्द्रिताया पारम्परिकाध्यापनप्रणाल्या प्रकृतव्याख्यानेन कृतनिरोधसमर्थनम् ।

८. आगमनादीन् छात्रकेन्द्रितानाधुनिकान् शिक्षणप्रविधीन् प्रयुज्य विरचितायाः शारदाप्रभाव्याख्याया शिक्षणविधित्वसमर्थनम् ।

९. शारदाप्रभाकारेण पाठनान्ते प्रयुक्ताया मूल्याङ्कनप्रणाल्याः समर्थनम् ।

## ७.५ भाव्यनुसन्धानाय सम्भावितशोधशीर्षकम्

शारदाप्रभाव्याख्याव्याख्यानकेन्द्रितं प्रस्तुतमध्ययनं साङ्गोपाङ्गं ग्रन्थाध्ययनमिति मन्तव्यम् । इत उत्तरवत्तिभिर्जिज्ञासुभिरेकं विषयं लक्ष्यं कृत्वाऽधीष्यत इति आशासे । भविष्येऽध्येतुकामानां कृते सम्भावितशीर्षकाण्यत्र दीयन्ते-

१. अष्टाध्यायीशारदाप्रभाव्याख्यायां सूत्रप्रक्रियाक्रमसङ्गमपरीक्षणम् ।

२. अष्टाध्यायीशारदाप्रभाव्याख्यायां सारल्यविमर्शः ।

३. हरिप्रसादशर्माचार्यप्रणीतानां काव्यानां व्याकरणदृष्टयाऽध्ययनम् ।

## सन्दर्भसामग्रीसूची


अज्ञातः, *शुक्लयजुर्वेदसंहिता,* वाराणसी : मोतीलालब., (इ.१९७८) ।

अधिकारी, हेमाङ्गराजः, *नेपाली भाषाशिक्षण,* काठमाडौं : कुञ्जलप्रकाशन (२०५३) ।

अमरसिंहः, *नामलिङ्गानुशासनं नामामरकोशः,* दिल्ली : चौ.सं.प्र., (२००२) ।

ईश्वरचन्द्रः, (व्या.), *अष्टाध्यायी* (प्रथमद्वितीयभागौ), दिल्ली : चौ.सं.प्र. (२००४) ।

उपाध्यायः, माधवशरणः, *सुकृतिदत्तपन्तस्य वृद्ध्यादिसूत्राष्टकविवृतिः,* (अप्र.विद्या.शो.), दाङः : म.सं.वि. (२०५६) ।

उवटमहीधरौ (भा.), *शुक्लयजुर्वेदसंहिता,* वाराणसी : मोतीलालब. (इ.१९७८) ।

कौण्डिन्न्यायनः, शिवराजः, *कतिपयनैपालकसंस्कृतग्रन्थकारपरिचयः,* काठमाडौं : देवी आचार्याणी, (२०४८) ।

खनालः, खेमराजः, *पालपाधिपतिना पृथ्वीपालसेनेन विरचितायाः प्रासादकौमुद्याः सविवेचनं सम्पादनम्,* (अप्र. विद्या.शो.), काठमाडौं : ने. सं. वि. अनु. के. (२०७०) ।

गिरिः, विक्रमः, *समासाधिकारीयसूत्राण्यधिकृत्यतत्त्वबोधिनीबालमनोरमाटीकयोस् तुलनात्मकं समीक्षणम्,* (अप्र.विद्या. शो.), वाराणसी : सं. सं. वि., (इ.२००२) ।

गोयन्दका, हरिकृष्णदासः (व्या.), *इशादि नौ उपनिषत्,* गोरखपुर : गीताप्रेसः (२०५०) ।

घिमिरे, आनन्दप्रसादः, *प्रातिशाख्यपाणिनीयव्याकरणयोस्तुलनात्मकमध्ययनम्,* (अप्र.विद्या.शो.) , काठमाडौं : ने. सं. वि. अनु. के., (२०६७) ।

जयदेवः, *चन्द्रालोकः,* वाराणसी : चौ.सु.भा.प्र., (इ.१९९९) ।

जयशङ्करलालः (व्या.), *काशिकावृत्तिः,* (प्रथमो भागः), वाराणसी : तारा प्रिन्टर्स, (१९८५) ।

जिज्ञासुः, ब्रह्मदत्तः, *अष्टाध्यायीभाष्यम्,* (प्रथमा वृत्तिः), हरियाणा : रा.ला.क.ट्र., (२०४२) ।

जिनेन्द्रबुद्धिः (व्या.), *काशिकावृत्तिः* (द्वितीयो भा.),वाराणसी : प्राच्यभारतीप्रकाशनम्, (१९६५) ।

........,*काशिकावृत्तिः* (तृतीयो भा.), वाराणसी : तारा पब्लिकेसन, (१९६६) ।

......,*काशिकावृत्तिः* (चतुर्थो भा.), वाराणसी : तारा पब्लिकेसन, (१९६७) ।

........, *काशिकावृत्तिः* (पञ्चमो भा.), वाराणसी : प्राच्यभारतीप्रकाशनम्, (१९६७) ।

......., *काशिकावृत्तिः* (प्रथमो भा.), वाराणसी :सुधीप्रकाशनम्, (१९८३) ।

ढकालः, मतिप्रसादः, *लोपागमवर्णविकारदृष्ट्या वैयाकरणसिद्धान्तकौमुद्यन्तर्गतानां विधिसूत्राणां तत्रोपात्तानामुदाहरणाञ्च समीक्षणम्,* (अप्र.विद्या.शो.), काठमाडौं : ने. सं. वि. अनु. के., (२०६७) ।

ढुङ्गेलः,भोजराजः, *सामान्य र प्रायोगिक भाषाविज्ञान,* काठमाडौं : एम. के.पब्लिसर्स (२०६७) ।

...... ,*नेपाली भाषा पाठ्यक्रम पाठ्यपुस्तक...,* काठमाडौं : एम. के. पब्लिसर्स, (२०६९) ।

तिवारी, कृष्णमुरारी, *कारकप्रकरणीयसिद्धान्तकौमुदीव्याख्याबालमनोरमाया महाभाष्यालोके समीक्षणम्,* (अप्र. विद्या. शो.), वाराणसी : सं. सं. वि.,(२००८) ।

त्रिपाठी, वासुदेवः (सम्पा.),*अनुसन्धानविधिका केही पक्ष,* काठमाडौं : ने. रा. प्र. प्र. (२०६०) ।

त्रिवेदी, क्षेमकरणदासः (सम्पा.),*गोपथब्राह्मणभाष्यम्,* इलाहावाद : इन्द्रदयाल सेठ, (१९७७) ।

त्रिवेदी , रामचरित्रः, *फक्किकासरलार्थः,* वाराणसी : चौ.सं.सि., (१९७६) ।

दाहालः, लोकमणिः, *संस्कृतव्याकरणशास्त्रेतिहासः;* वाराणसी : भारतीयविद्याभवनम्, (१९९०) ।

दुर्गाचार्यः (व्या.), *निरुक्तम्,* दिल्ली : चौ.स.प्र. (२०२२) ।

दीक्षितः, भट्टोजिः,*वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), मुम्बई : खेमराजश्रीकृष्णदासः, (१९७४) ।

......(कारिकाकारः), *वैयाकरणभूषणसारः* वाराणसी :चौ.सं.प्र., (इ.१९८५) ।

......*वैयाकरणसिद्धान्तकौमुदी* (कृदन्तखण्डः), वाराणसी : चौ. सु. भा. प्र., (इ.१९८७) ।

......,*वैयाकरणसिद्धान्तकौमुदी* (समासतद्धितखण्डः), वाराणसी : चौ. सु. भा. प्र. (इ.१९८७) ।

......,*वैयाकरणसिद्धान्तकौमुदी,* (सुबन्तखण्डः) वाराणसी :चौ.सु.भा.प्र. (इ.१९९६) ।

......*प्रौढमनोरमा,* (पञ्चसन्ध्यन्ता) वाराणसी : चौ. सु. भा. प्र., (इ.१९९८) ।

......,*वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः), दिल्ली : मोतीलालबनारसीदासः, (२००५) ।

......,*वैयाकरणभूषणसारः,* वाराणसी : चौखम्बा ओरियन्टल, (२००६) ।

दीक्षितः, वासुदेवः (व्या.),*वैयाकरणसिद्धान्तकौमुदी,* (सुबन्तः),वाराणसीः चौ. सु. भा. प्र.(इ.१९९६) ।

......,*वैयाकरणसिद्धान्तकौमुदी* (कृदन्तखण्डः), वाराणसी : चौ. सु. भा. प्र.,(इ.१९८७) ।

……,*वैयाकरणसिद्धान्तकौमुदी,* (तिङन्तखण्डः), वाराणसी : मोतीलालब.(२००५) ।

……,*वैयाकरणसिद्धान्तकौमुदी,* (समासतद्धितखण्डः), दिल्ली : मोतीलालब., (२०१२) ।

देवकोटा, विष्णुप्रसादशर्मा, *प्रक्रियासिद्धान्तकौमुद्योः* समीक्षणात्मकमध्ययनम्, (अप्र.विद्या.शो.), काठामाडौं : ने. सं. वि. अनु. के. (२०५५) ।

द्विवेदी, कपिलदेवः, *प्रौढरचनानुवादकौमुदी,* वाराणसी : सं.सं.वि.प्रकाशनम्, (इ.१९९७) ।

द्विवेदी, रहसविहारी, 'व्याख्यानपद्धतिः', *सारस्वती सुषमा,* (स्वर्णजयन्ती विशेषाङ्कः), वाराणसी : सं.सं.वि.प्रकाशनम्, (इ.१९९७) ।

नागेशः, *लघुशब्देन्दुशेखरः,* (राधिकाव्याख्यायुतः पञ्चसन्ध्यन्तः), पटना : सुशीलप्रकाशनम्, (१९८८) ।

…..,*परमलघुमञ्जूषा,* (लोकमणेर्व्याख्यायुता), वाराणसी : चौ. सु. भा. प्र., (इ.१९९८) ।

…..,*लघुशब्देन्दुशेखरः,* दिल्ली : चौ.सं.प्र., (इ.२००१) ।

…..,*लघुशब्देन्दुशेखरः,* (भैरवी व्याख्यायुतः) वाराणसी :चौ.सु.भा.प्र., (इ.२००६) ।

…..,*लघुशब्देन्दुशेखरः,* (वैकुण्ठी व्याख्यायुतः), वाराणसी : चौ. सु. भा. प्र., (इ.२००६) ।

…..,*परिभाषेन्दुशेखरः,* (तत्त्वप्रकाशिका व्याख्यायुतः), वाराणसी : बालकृष्णप्रवर्द्धनम् (२०३९) ।

न्यौपाने, कुलराजः, *पाठ्यक्रम तथा मूल्याङ्कन,* काठमाडौं : वल्डवाइड प्रकाशन, (२०६९) ।

न्यौपाने, टंकः, *सामान्य तथा प्रायोगिक भाषाविज्ञान,* काठमाडौं : सन् लाइट प्रकाशन, (२०६८) ।

पञ्चाननः, विश्वनाथः, *न्यायसिद्धान्तमुक्तावली,* वाराणसी : हरिकृष्णनिबन्धभवनम् (२०४३) ।

पण्डितः, कृष्णमणिः, *प्रक्रियाकौमुदी* (स्त्रीप्रत्यान्ता), वाराणसी : सं सं. वि., (२०२९) ।

पतञ्जलिः, *व्याकरणमहाभाष्यम्,* वाराणसी : चौखम्बासंस्कृतसंस्थानम्, (२०५२) ।

….,*व्याकरणमहाभाष्यम्,* वाराणसी : चौखम्बाविद्याभवनम् , (२००९) ।

पन्थी, टीकारामः, *केही जनश्रुतिहरू,* तम्घास : किरणपुस्तकालयः, (२०४१) ।

पर्वतीयः, नित्यानन्दः (व्या.), *लघुशब्देन्दुशेखरः,* वाराणसी :चौ.सं.प्र., (२०६४) ।

पाणिनिः, *अष्टाध्यायी* (सम्पा.गोपालशास्त्री) (तृ.सं.), वाराणसी : चौ. सु. भा. प्र., (इ.१९८७) ।

पाण्डेयः, रामाज्ञा, *व्याकरणदर्शनभूमिका,* वाराणसी : सं.सं.वि. प्रकाशनम्, (२०३९) ।

पाण्डेयः, श्रीकान्तः *व्याकरणशास्त्रदृष्ट्या सम्बन्धस्वरूपपर्यालोचनम्,* दिल्ली : विद्यानिधिः, (१९९०) ।

पिटर, एस गार्डनर *न्यु डिरेक्सन,* (द्वि. सं.), दिल्ली : क्याम्ब्रिज युनिभर्सिटि प्रेस, (इ.२०१०) ।

पुरुषोत्तमदेवः, *भाषावृत्तिः,* वाराणसी : रत्ना पब्लिकेसन, (इ.१९८९) ।

पोखेलः, माधवः 'प्राच्य अनुसन्धानविधि' *अनुसन्धानप्रकाशः,* (वर्षम् १, अङ्कः ३), काठमाडौं : ने. सं. वि., अनु.के., (२०६५) ।

पोखेलः, सरस्वती, पाणिनीयव्याकरणजैनेन्द्रव्याकरणयोः समीक्षात्मकमध्ययनम् (अप्र. विद्या.शो.), काठमाडौं : ने. सं. वि. अनु. के., (२०६७) ।

पौडेलः, सूदनः (सम्पा.), *अनुसन्धानप्रकाशः,* काठमाडौं : ने. सं. वि., अनु.के., (२०६५) ।

पौडेलः, लीलानाथः *व्याकरणदृष्टया हरिकेलिमहाकाव्यस्य समीक्षणम्,* (अप्र. विद्या.शो.), काठमाडौं : ने. सं. वि. अनु. के., (२०६४) ।

फाटकः, मधुकरः, *पाणिनीयशिक्षायाः शिक्षान्तरैः सह समीक्षा,* वाराणसी : लेखकः, (२०२९) ।

भट्टः, कुमारिलः, *मीमांसाश्लोकवार्त्तिक म्,* वाराणसी : रत्ना पब्लिकेसन, (इ.१९७८) ।

भट्टः, कौण्डः, *वैयाकरणभूषणसारः* वाराणसी :चौ.सं.प्र., (१९८५) ।

भट्टराईः, घटराजः, *संस्कृतका अमर साहित्यकारः,* काठमाडौं : साझाप्रकाशन, (२०३८) ।

भट्टराईः, भवानीशङ्करः, '*अष्टाध्यायीव्याख्याने...' (ऋतम्भरा वर्ष-१३ अङ्क*-१६), काठमाडौं : ने.सं.वि.अनु.केन्द्र, (२०७०) ।

भण्डारी, पारसमणिः, *प्रायोगिक भाषाविज्ञानका कतिपय पक्षहरू,* काठमाडौं : विद्यार्थी, (२०५४) ।

भर्तृहरिः, *वाक्यपदीयम्,* (ब्रह्मकाण्डम्), वाराणसी : चौखम्बाविद्याभवनम्, (इ.१९९०) ।

भारतीतीर्थमुनिः, *वैयासिकन्यायमाला,* वाराणसी : सत्यानन्दसरस्वती, (२०२९) ।

माघः, *शिशुपालवधमहाकाव्यम्,* (पञ्चसं.), वाराणसी : चौखम्बाविद्याभवनम्, (इ.१९८४) ।

माधवाचार्यः, *सर्वदर्शनसङ्ग्रहः,* वाराणसी : चौखम्बाविद्याभवनम्, (इ.१९६४) ।

मिश्रः, परमानन्दः, *अष्टाध्याय्याः पञ्चमाध्यायानुगतन्यासपदमञ्जर्योः समीक्षणम्,* (अप्र.विद्या.शो.) वाराणसी : सं. सं. वि., (२००५) ।

मिश्र, वेदपतिः, *व्याकरणवार्त्तिक म्,* वाराणसी : पृथिवीप्रकाशनम्, (इ.१९७०) ।

मिश्रः, श्रीनारायणप्रसादः(व्या.), *काशिकावृत्तिः* (द्वितीयो भा.), वाराणसी : चौ.सं.सि. (२०२९) ।

मीमांसकः, युधिष्ठिरः, *संस्कृत व्याकरणशास्त्रका इतिहास,* (प्रथमभा.), हरियाणा : रा. ला. क. ट्र. (२०३१) ।

.....,*मीमांसाशावरभाष्यम्,* हरियाणा : लेखकः, (२०३४) ।

.....,*संस्कृत व्याकरणशास्त्रका इतिहास,* (द्वितीयो भा.), हरियाणा : लेखकः, (२०४१) ।

मोतीनिशानी तथान्ये, *फ्ल्याक्स गोल्डेन टेल्स,* काठमाडौं : एकता बुक्स, (इ.२०१३) ।

यास्कः, *निरुक्तम्,* दिल्ली : चौ.सं.प्र.,(२००२) ।

राजशेखरः, *काव्यमीमांसा,* वाराणसी : चौखम्बाविद्याभवनम्, (इ.१९६२) ।

रामचन्द्राचार्यः,*प्रक्रियाकौमुदी,* (स्त्रीप्रत्ययान्ता), वाराणसी : सं. सं. वि., (१९७७) ।

लम्सालः रामचन्द्रः, *नेपाली भाषा पाठ्यपुस्तक...,*काठमाडौं : भुँडीपुराण प्रकाशन, (२०६७) ।

लामिछाने, कपिलदेवः, *समीक्षा सिद्धान्त र समीक्षा,* वाग्लुङ : दिअ प्रकाशन, (२०६९) ।

वरदराजः, (इ.१९९७), *लघुसिद्धान्तकौमुदी,* (त्रयो.सं.), वाराणसी : मोतीलालब. ।

वर्मा, अशोककुमारः,*सरल आगमन तर्कशास्त्र,* दिल्ली : मोतीलालब., (इ.१९७३) ।

वर्मा, सत्यकामः *व्याकरणकी दार्शनिक भूमिका,* दिल्ली : मुन्सीराम मनोहर लाल, (इ.१९६९) ।

वामनजयादित्यौ, *काशिकावृत्तिः* (प्रथमो भा.), वाराणसी : प्राच्यभारतीप्रकाशनम्, (१९६५) ।

.....,*काशिकावृत्तिः* (द्वितीयो भा.), वाराणसी : प्राच्यभारतीप्रकाशनम्, (१९६५) ।

.....,*काशिकावृत्तिः* (तृतीयो भा.), वाराणसी : तारा पब्लिकेसन, (१९६६) ।

.....,*काशिकावृत्तिः* (चतुर्थो भा.), वाराणसी : तारा पब्लिकेशन, (१९६७) ।

.....,*काशिकावृत्तिः* (पञ्चमो भा.), वाराणसी : तारा पब्लिकेसन, (१९६७) ।

.....,*काशिकावृत्तिः* (प्रथमो भा.), वाराणसी :सुधीप्रकाशन, (१९८३) ।

.....,*काशिकावृत्तिः* (प्रथमो भा.), वाराणसी :तारा प्रिन्टर वर्क्स, (१९८५) ।

.....,*काशिकावृत्तिः* (द्वितीयो भा.), वाराणसी : चौखम्बा संस्कृत सिरिज, (२०२९) ।

विलियमआर. मोल्सर, *राइट् टु वि रिड,* (द्वि.सं.),दिल्ली : क्याम्ब्रिज., (इ.२०१४) ।

वेदव्यासः, *श्रीमद्भागवतमहापुराणम्* (सप्तच.सं.), गोरखपुर : गीताप्रेसः, (२०५९) ।

शर्मा, केदारप्रसादः, *नेपाली भाषा र साहित्यशिक्षण,* काठमाडौं : न्यु हिरा बुक्स, (२०६०) ।

शर्मा, गोविन्दः, *पाणीनीयव्याकरणस्यैतिहासिकं परिशीलनम्,* अयोध्या : यतिराज ग्रन्थमालाप्रकाशनम्, (२०४७) ।

शर्मा, चिरञ्जीवी, *शिक्षामनोविज्ञान,* काठमाडौं : एम. के. पब्लिसर्स, (२०५२) ।

.....,*भाषाशिक्षणका केही परिप्रेक्ष्य तथा पद्धतिः,* काठमाडौं : विद्यार्थी., (२०५३) ।

.....,*कक्षा कोठामा मनोविज्ञान,* काठमाडौं : एम. के. पब्लिसर्स, (२०६३) ।

शर्मा, मोहनराजः, *नेपाली साहित्यको सङ्क्षिप्त इतिहास,* काठमाडौं : साझाप्रकाशन(२०५६) ।

.....,*शैलीविज्ञान,* काठमाडौं : ने. रा. प्र. प्र. (२०५९) ।

....., *शोधविधिः,* काठमाडौं : साझाप्रकाशन, (२०५२) ।

शर्मा, योगराजः, 'वैयाकरणविदुषः सुकृतिदत्तपन्तस्य...', *प्रज्ञाज्योतिः* (वर्ष : १, अङ्कः १), धरान : ने. सं. वि. प्रा. संघः, (२०६९) ।

शर्मा, रङ्गनाथः (व्या.), *वैयाकरणसिद्धान्तकौमुदी* (कारकप्रकरणम्), वाराणसी : भारतीयविद्याप्रकाशनम्, (इ.१९९७) ।

शर्मा, रुद्रधरः (व्या.), *व्याकरणमहाभाष्यम्,* वाराणसी : चौखम्बासंस्कृतसंस्थानम्, (२०५३) ।

शर्मा, श्रीनिवासः (व्या.), *व्याकरणमहाभाष्यम्,* वाराणसी : चौखम्बाविद्याभवनम्, (इ.२००९) ।

शर्माचार्यः, हरिप्रसादः, *गोरक्षशाहवंशः* (महाकाव्यम्), दाङ : लेखकः (२०२२) ।

.....,*श्री ५ वीरेन्द्रशुभराज्याभिषेकम् (खण्डकाव्यम्),* दाङ : लेखकः, (२०३१) ।

.....,*पाणिनीयव्याकरणशिक्षणपद्धतिविमर्शः,* (अप्र.विद्या.शो.प्राग्रूपम्)वाराणसी : सं. सं. वि., (२०४१) ।

.....,(व्या.),*अष्टाध्यायी,* (शारदाप्रभाव्याख्यामहिता), दाङः : म. सं. वि., (२०६०) ।

शशिदेवः,'व्याख्यानप्रक्रिया', *सारस्वती सुषमा,* (वर्ष : ३०, अङ्क : ३४), वाराणसी : सं.सं. वि., (२०३२) ।

शास्त्री, अशोकचन्द्रगौडः, *संस्कृतव्याकरणशास्त्रेतिहासविमर्श;* वाराणसी : भारतीय विद्याप्रकाशनम्, (२०५५) ।

शास्त्री, गोपालः (सम्पा.), *अष्टाध्यायी,* (तृ.सं.), वाराणसी : चौ. सु. भा. प्र. (१९८७) ।

शास्त्री, जगदीशः (व्या.), *उपनिषत् सङ्ग्रहः,* दिल्ली : मोतीलालब., (इ.१९८०) ।

शास्त्री, भीमसेनः (व्या.), *लघुसिद्धान्तकौमुदी,* दिल्ली : लेखकः, (इ.१९९१) ।

शास्त्री, श्रीधरानन्दः (व्या.), *लघुसिद्धान्तकौमुदी,* दिल्ली : मोतीलालब., (१९९६) ।

शुक्लः, चन्द्रकान्तः, *सिद्धान्तकौमुद्यां समागतविशिष्टवाक्यानां भाष्यदृष्ट्यानुशीलनम्,* (अप्र. विद्या.शो.), वाराणसी : सं. सं. वि., (२०१०) ।

श्रीहर्षः, *नैषधमहाकाव्यम्,* वाराणसी : चौ.सं.सि., (इ.१९५४) ।

सरस्वती, ज्ञानेन्द्रः (व्या), *वैयाकरणसिद्धान्तकौमुदी* (सम्पूर्णा), मुम्बई : खेमराजश्रीकृष्णदासः, (१९७४) ।

.....,*वैयाकरणसिद्धान्तकौमुदी* (तिङन्तखण्डः), दिल्ली : मोतीलालब., (२००५) ।

.....,*वैयाकरणसिद्धान्तकौमुदी,* (समासतद्धितखण्डः), दिल्ली : मोतीलालब.,(२०१२) ।

सस्वती, सत्यानन्दः (व्या.), *वैयासिकन्यायमाला,* वाराणसी : लेखकः, (२०२९) ।

सरस्वती, दयानन्दः (व्या.), *उणादिकोषः,* अजमेर : वैदिकपुस्तकालयः, (२०३३) ।

सिंहः, पुनमः*सप्तमाध्यायस्य सूत्राण्याश्रित्य काशिकावैयाकरणसिद्धान्तकौमुद्योस्तुलनात्मकं समीक्षणम्,* (अप्र. विद्या. शो.), वाराणसी : सं. सं. वि., (२००९) ।

सिग्द्यालः, सोमनाथः *प्रतिसंस्कृता सिद्धान्तकौमुदी,* काठमाडौं : ने. रा. प्र. प्र., (२०१७) ।

सुवेदी, शालिग्रामः, *सिद्धान्तकौमुदीप्रतिसंस्कृतासिद्धान्तकौमुद्योस्तुलनात्मकमध्ययनम्,* (अप्र. विद्या.शो.), काठमाडौं : ने. सं. वि. अनु. के., (२०६७) ।

श्रेष्ठः, ईश्वरकुमारः, *पूर्वीय एवम् पाश्चात्त्य साहित्य..,* काठमाडौं : साझाप्रकाशन, (२०६२) ।

हरदत्तः, (व्या.), *काशिकावृत्तिः* (प्रथमो भा.), वाराणसी : प्राच्यभारतीप्रकाशनम्, (१९६५) ।

.....,*काशिकावृत्तिः* (द्वितीयो भागः), वाराणसी : प्राच्यभारतीप्रकाशनम्, (१९६५) ।

.....,*काशिकावृत्तिः* (तृतीयो भा.), वाराणसी : तारा पब्लिकेसन, (१९६६) ।

.....,*काशिकावृत्तिः* (चतुर्थो भा.), वाराणसी : प्राच्यभारतीप्रकाशनम्, (१९६७) ।

...., *काशिकावृत्तिः* (पञ्चमो भा.), वाराणसी : प्राच्यभारतीप्रकाशनम्, (१९६७) ।